BIBLIOTHECA INDICA

THE

BAUDHĀYANA ŚRAUTA SŪTRA

NEW SERIES NO. 1163

BELONGING TO THE

TAITTIRĪYA SAMHITĀ

EDITED BY

DR. W. CALAND

Extra Professor of Sanskrit at the University of Utrecht.

VOLUME II.

CALCUTTA:

PRINTED AT THE BAPTIST MISSION PRESS,

AND PUBLISHED BY THE

ASIATIC SOCIETY, 57, PARK STREET.

1907.

LIBRARY

JUN 22 19..

UNIVERSITY OF CALIFORNIA

Digitized by Google

Digitized by Google

73C
B582
v.163:2-3
MAIN

PREFACE.

In preparing the text of this second volume of the Baudhāyana-śrautasūtra the editor has had to cope with many more difficulties than he had to do when preparing the text of the first volume. Indeed, a few months ago I was almost despairing of obtaining sufficient material for this volume. The fact is, that the tradition of these parts of the sūtra, describing for the greater part the rituals, partly obsolete, partly less observed than the darśapūrṇamāsa, agnyādheya and agniṣṭoma, is, throughout India, a very bad one. The MSS. of Bombay, Benares, Gwalior, Dhar and Ujjain are all together more or less corrupt and seem partly to derive from one archetype, in which not only were lost the right arrangement of the materials and the numbering of the praśnas, adhyāyas and khaṇḍikās, but the text of which was also hopelessly corrupt in many a passage. And no complete copy of Bhavasvāmins Vivaraṇa, which would have been of paramount use, seems to be extant. Although Professor Hultzsch has taken all possible pains to hunt up more MSS. from Southern India and has set to work two pandits to unearth more material, he has, alas, not succeeded. Professor Bhandarkar of Elphinstone College also was kind enough to provide me with more material, but it was of the same kind: on the whole corrupt from beginning to end.

Nearly despairing, I wrote to Dr. Thomas, Librarian-in-Chief to the India Office, requesting him to look over, for my sake, once more the Mackenzie Collection of Sanskrit MSS. preserved at the India Office. And he was so fortunate as to light upon one MS. (cp. *infra* the enumeration of the MSS.) containing a wholly independent tradition of the text I stood in need of so much. This MS., too, is far from faultless, but it throws light on many a difficult passage, and, what is the main point, the arrangement of the praśnas seems to be correct in this MS. Before I knew this Mackenzie MS., I had my doubts about which part of the sūtra constituted the so-called uttarā tatiḥ. In the MS. from Benares, where the praśnas are all numbered by a *secunda manus* (cp. my paper "Ueber das rituelle Sūtra des Baudhāyana," p. 12), the praśna coming after the dvādaśāha and gavām ayana, numbered here as the 17th, contains the atirātra, the sautrāmaṇī and the ekādaśinī. In the copy of Bhavasvāmins Vivaraṇa, known to me from the beginning up to the aupānuvākya (consequently giving the first fourteen praśnas complete), is found neither the aśvāmedha nor the dvādaśāha and gavām ayana, but immediately after the aupānuvākya comes the ekādaśinī. Now, as the MS. of Bhavasvāmin ends with the words: *iti bhavasvāmikṛte*

Digitized by Google

kalpavivaraṇe tatau dvitīyo 'dhyāyaḥ, and the Mackenzie MS. agrees exactly with this numbering, as it gives the number *dvitīyaḥ* precisely at the end of the passage treated lastly by Bhavasvāmin, there is no doubt at all that the Mackenzie MS. is *right* and that the uttarā tatiḥ begins with the atirātra and the *immediately following* ekādaśinī. This being the case, the statement of B and Be, that the 17th praśna should have contained the atirātra, sautrāmaṇi and ekādaśinī must be false. On account of the fact that the Mackenzie MS. agrees in this respect with Bhavasvāmin and that in other points this MS., of all those known to me, also seems to have preserved the correct order, I have adopted the arrangement of the materials as given by this MS. In consequence of this arrangement, the one adopted previously has been abandoned: thus the numbering of the praśnas and partially that of the adhyāyas in the text coming after the gavām ayana is wholly different from the numbering followed by me in citing passages from Baudhāyana in my above paper on this sūtra. But however valuable this Mackenzie MS. may be, it has not cleared up all the *dubia* regarding the arrangement of the materials. There are two more points to be settled. The first is a question analogous to a difficulty in the construction of the text of Vol. I (the place where the pravargya had to be put in), viz., the place to be assigned to the Kāṭhakasūtra. In the MSS. from Benares (Be) and Bombay (B) it is numbered as the 18th, in the MS. Haug it is numbered as the 21st. The Mackenzie MS. assigns a place to this praśna between the agnicayana and the vājapeya, without, however, giving a praśna-*number* to it.[1] As the contents of this praśna are mentioned neither in the Dvaidha- nor in the Karmāntasūtra, no further information is to be obtained from these texts. But as it is highly improbable that this praśna should have formed part of the uttarā tatiḥ, the number 18 assigned to it by Be and B can by no means be right. In accordance with the MS. Haug.[2] and with the place occupied by this material in the brāhmaṇa (viz., *at the end* of the Taitt. Brāhm.) I have inserted it after the uttarā tatiḥ. In consequence of this new arrangment the numbers of the following praśnas (Dvaidha, Karmānta and Prāyaścitta) will have to be changed accordingly. By doing so I may come into collision with the original numbering, which, it seems, is unknown to us. But this is a point of minor importance.

Another question has also puzzled me greatly. In the uttarā tatiḥ, as handed down to us in the Mackenzie MS., two

---

1 Praśna *numbers* are not found in the Mack. MS.

2 This MS. gives as the number of the Kāṭhakapraśna: 21; the same MS. numbers the three Karmāntapraśnas: 22, 23, 24; and the Dvaidhapraśnas: 25, etc. This is obviously an error (cp. my paper on the Baudh. sūtra, p. 13, 14). But at any rate this MS. inserts the Kāṭhaka *immediately before* Dvaidha and Karmānta.

Digitized by Google

adhyāyas are found, the contents of which are entirely foreign to a śrautasūtra, viz. the adhyāyas 12 and 13 of praśna 17, treating of the samāvartana, a subject we would expect to be treated rather in the gṛhyasūtra. Now, the tradition of the gṛhyasūtra is in this respect not wholly consistent either. Most of the MSS. of the gṛhyasūtra have in the gṛhyasūtra proper (second praśna) a chapter commencing thus: *vedam adhītya snāsyann ity uktaṃ samāvartanam*, and in the so-called paribhāṣā-sūtra a chapter commencing: *vedam adhītya snāsyann ity upakalpayate*, etc. This last part is identical with the long passage found in the Mackenzie MS. of the śrautasūtra and here inserted as adhyāya 12 of the first uttarā tatiḥ praśna. This distribution of the material in the MSS. of the gṛhyasūtra cannot possibly be right, for obviously the passage *vedam adhītya snāsyann ity uktaṃ samāvartanam* refers to the passage *vedam adhītya snāsyann ity upakalpayate*, which therefore must have *preceded*. I possess a very good copy in Grantha writing of the whole gṛhyasūtra, kindly procured me by Professor Hultzsch. In this MS. the long passage commencing: *vedam adhītya snāsyann ity upakalpayate* (the passage given by the Mackenzie MS. as forming part of the śrautasūtra) stands where the chapter *vedam adhītya snāsyann ity uktaṃ samāvartanam* is inserted by the other MSS. Before the Mackenzie MS. came into my hands I thought this was all right. But not long ago I received one more copy of the gṛhyasūtra, copied from an original preserved at Madras. This MS. throws some light on this hitherto obscure point. Where the other MSS. (except the one from Madras, designed by me as M) have the chapter *vedam adhītya snāsyann ity uktaṃ samāvartanam*, this MS. reads: *vedam adhītya snāsyann ity uktaṃ samāvartanam; asya samāvartanasya nātra pāṭhah, kiṃtu anyatra paṭhitam; atra saṃgṛhya vilikhitam atropayogāt;* then comes the text given by Mackenzie as xvii. 12 and 13, and the rest of the chapter *vedam adhītya snāsyann ity uktaṃ samāvartanam.* Now, as it is impossible that the passage referred to in the opening words *ity uktaṃ samāvartanam* could have *followed*, it seems highly probable that the treatment of the samāvartana was originally incorporated in the uttarā tatiḥ, and that here the Mackenzie MS. is right too. I possess now another copy of the complete gṛhyasūtra, which confirms this statement. This MS. gives in the second praśna the chapter *vedam adhītya snāsyann ity uktaṃ samāvartanam*, but in the paribhāṣā the text given by the Mackenzie MS. (as xvii. 12, 13) is *not* found. It is not improbable that the scribes of our śrautasūtra, finding the treatment of the samāvartana foreign to a śrautasūtra, omitted it and inserted it in a more proper place (the gṛhyasūtra), disturbing, in doing so, the first praśna of the uttarā tatiḥ. For it is remarkable that none of all the other MSS. of the śrautasūtra give for this praśna (the 17th) any adhyāya- or khaṇḍikā-number; the Mackenzie MS., on the other hand, gives the adhyāya- and khaṇḍikā-numbers, and, in accordance with this

Digitized by Google

fact, at the close of this praśna, all the pratīkas of the adhyāyas and khaṇḍikās, including those of the chapters on samāvartana. How it occurred to the diasceuasts of the śrautasūtra to insert the samāvartana among the subjects treated in the śrautasūtra, I am, however, at a loss to explain.

So this Mackenzie MS. was of the greatest help in constituting the text of Vol ii. The tradition of the cayana, vājapeya and rājasūya chapters is in this MS. inferior to that of the following chapters. To these, however, it is of the greatest value: entire passages, omitted by all the other MSS., are found *here*, and in many a passage it is easy to prove that only the reading found in M. (Mackenzie) is right, over against the oftentimes unanimous reading of all the other MSS. As no complete copy of the Vivaraṇa seems to be available, we are thrown upon our own resources to understand the meaning of this text. Of some use are, of course, the cognate texts of Āpastamba and Hiraṇyakeśin, but, as these are much more real sūtras than the text of Baudhāyana, and consequently, on the whole, much shorter, the help procured from these texts is rather inefficient. In passages, where new words or unknown expressions occur, I have, therefore, as a rule, adhered to the reading of M. The corruption of the other MSS. is so great, that it is not worth while mentioning all their various readings. So, *e.g.*, in the description of the vrātyastomas: here the text of all the MSS., with the exception of M., is one hopeless confusion. It is highly to be regretted, that this Mackenzie MS. is not wholly complete: some final leaves are wanting; consequently the text of the important last chapters of the second uttarātatiḥpraśna had to be edited as well as possible after the corrupt MSS. This is all the more to be regretted as they contain the legends of Purūravas and Uśanas.

After the above remarks, the reader and student of the second volume of Baudhāyana will be indulgent to the editor, who thought it better to give a text, however imperfect, rather than postpone its publication *ad calendas graecas*, as, after years of inquiry, no more help seemed to be forthcoming.

After these preliminary remarks, I shall now give a list of the MSS. used in editing Vol. ii.

1. M, being No. xxviii. (new number: 92) of the Mackenzie Collection at the India Office, see Wilson, a descriptive catalogue of the Oriental MSS. collected by Lt.-Col. Mackenzie, Vol. i., p. 6; old palmleaf MS. in Nandināgari characters, 44 c.m. long, 2½ large, well-written but slightly injured; the pagination is continuous. It contains the following parts:—

(*a*) karmāntasūtra, one leaf numbered 2 and containing Karm. i., kh. 3 from: ° *ta āvāpo bhavati taṃtraṃ tu* unto *jagatīti*, close of kh. 5; then on 20 leaves numbered 21-41, the rest of the Karmānta, beginning praśna ii., kh. 27, from: ° *bṛhaspatibhyāṃ tvā juṣṭam* unto the end of the Karmānta.

(*b*) śulbasūtra foll. 42-50 *a*.

Digitized by Google

(c) cayanasūtra foll. 50a-72.
(d) kāṭhakasūtra foll. 73-77.
(e) vājapeya foll. 78-83.
(f) rājasūya foll. 83-93.
(g) iṣṭikalpa foll. 94-105.
(h) aupānuvākya foll. 106-122.
(i) aśvamedha foll. 123-137.
(k) dvādaśāha foll. 137-148.
(l) uttarā tatiḥ (first praśna) foll. 149-168.
(m) ekāhas (sec. praśna) foll. 168-182.

The MS. breaks off after the 10th adhy. of praśna xviii.

2. B. cp. Preface to Vol. i., p. vii.

3. Be (Be 115) cp. ib. p. vii, viii.

4. U, being a nearly complete collection of the Baudh.-sūtras, neatly written on paper in Nāgarī by the same hand. From Ujjain. The avāntaradīkṣā is not found in this collection. It contains on 158 leaves (numbered continuously) the contents of Vol. i.; the pravargya comes *after* the agniṣṭoma; it closes with kh. 17. Then come the agnicayana, vājapeya, etc. No praśna numbers are given here and in the following parts, which are all numbered separately; its colophon runs: *śake 1762 bhādrapada kṛṣṇa 2 ravivāsare taddine āṭhavele ity upanāmakagaṇeśabhaṭṭātmajarāmacandreṇa likhitam.* Through the kind mediation of Professor Bhandarkar I was allowed the use of this MS.

MSS. containing single parts:—

5. H cp. Preface to Vol. i., p. viii.: cayana, vājapeya, atirātra, aptoryāma, ekādaśinī, kāṭhaka, and sautrāmaṇī.

6. F cp. Preface to Vol. i., p. ix. (vājapeya).

7. D, being a collection of various parts of the sūtra found at Dhar, the loan of which was procured to me also by Professor Bhandarkar. Paper, Nāgarī writing, different handwriting. It contains the iṣṭikalpa in a rather good tradition, although badly written; the dvādaśāhapraśna, atirātra, uttarā tatiḥ, very badly written and in the same hopelessly corrupt tradition as the other MSS.

8. Tr, being a copy in Grantha writing on paper from an original in Trichinopoly, pretending to be a complete śrautasūtra (!). It contains: the whole of the text already published in Vol. i.; the pravargya, together with its prāyaścitta and the avāntaradīkṣā, precedes the agniṣṭoma. After the agniṣṭoma come: 1. cayana (foll. 225-276); 2. sautrāmaṇī (foll. 277-282); 3. vājapeya (foll. 282-297); 4. atirātra (foll. 297-305); 5. aptoryāma (foll. 305-306); 6. the three prāyaścitta praśnas (foll. 306-343). The praśna numbering of this copy is utterly worthless.

9. MS, being the sūtra passages of the cayana as found in the mahāgnisarvasva, in Grantha writting on palmleaves, belonging to the India Office (cp. Burnell, a catalogue of Sanskrit MSS., Part i., p. 27); MSc., the reading presented by the Mahāgnisarvasva commentary itself.

Digitized by Google

10. Bu, the text of the cayana as given in an appendix after the above mentioned MS. (Burnell 55), comprising the text up to kh. 24, breaking off after the words: *nihanty āvṛhyāśmānam upa.*

11. Be 11, cp. Preface to Vol. i., p. x., No. 9: dvādaśāha (without gavām ayana), rājasūya, vājapeya.

12. T, cp. Preface to Vol. i., p. x., No. 12: rājasūya only. Of the rājasūya MSS. B Be and U agree mostly; on the other hand Be 11 and T go together. M is independent.

13. Be 8, cp. Preface to Vol. i., p. x., No. 10 (here cited as B 4) contains the iṣṭikalpa.

14. Be, a copy of the aupānuvākya praśna from Benares (Nāgarī, paper) on 14 foll., well-written but containing on the whole the same tradition as B and Be (115).

15. Be, a copy of the kāṭhakasūtra from Benares (see sūcīpattra, p. 72, No. 10), paper, Nāgarī, 7 leaves.

16. Be (12), a copy of the atirātra from Benares (see sūcīpattra, p. 72, No. 12), paper, Nāgarī, 3 leaves.

17. G, an original MS. of the aupānuvākya from Gwalior on paper in Nāgarī, procured on loan by Professor Bhandarkar.

18. T, a copy of the sautrāmaṇī in the collection of Sanskrit MSS. preserved at Tübingen (M.a. i., 317) Nāgarī, paper.

19. MS and MSc, text and commentary of the ekādaśinīsūtra contained in the MS. of the Mahāgnisarvasva, cp. supra No. 9.

Other sources, which were of more or less help, are the Vivaraṇa of Bhavasvāmin up to the aupānuvākya, the Vivaraṇa of the atirātra, the aptoryāma and the sautrāmaṇī, and lastly the Prayogasāra of Keśavasvāmin on the contents of which cp. my paper on the Baudh.-sūtra, p. 15.

My thanks are due, for procuring me the use of some of these MSS. and for taking pains in having copied others for me, to Dr. Thomas, Librarian-in-Chief of the India Office, to Professor Hultzsch, to Professor Bhandarkar at Bombay, to Mr. A. Venis at Benares, and to the British Government, which enabled me to collate some of the originals of the above mentioned manuscripts.

W. CALAND.

Utrecht, May 1906.

Digitized by Google

उखाः संभरिष्यन्नुपकल्पयते ऽश्वं च गर्दभं च तयोरेव रशने मौञ्ज्यौ वा कुशमय्यौ वाभ्रिं च ब्राह्मणसंपन्नां मृदं च भावितां करवीयां वल्मीकवपां कृष्णाजिनं च पुष्करपर्णं च चोष्णमुदकुम्भꣳ हिरण्यमर्मकपालानि शर्करा अश्वाञ्जनपिष्टा अजलोमानि कृष्णाजिनलोमानि वेणुꣳ यमद्गꣳ स्थूणामधिकरणीमुखाहृतं कुशलमित्यथामावास्येन वा हविषेष्ट्वा नयने वायेण शालाꣳ अग्न्यन्याये गर्तं खानयति । तद्भावितां मृदमवलेपयति । समां बिलेन करोति । तदुपसादयति कृष्णाजिनं च पुष्करपर्णं च चोष्णमुदकुम्भꣳ हिरण्यमित्यथ विषुवति स्फ्येनोद्धृत्यावोक्ष्य वल्मीकवपां निदधाति । तां दक्षिणतो वैश्यो गोपायन्नास्ते । ऽथोत्तरꣳ शालाखण्डमयेण स्फ्येनोद्धृत्यावोक्ष्य सिकता निवपति । तं परिमण्डलं खरं करोत्यथैनꣳ सिकताभिराच्छाद्याग्निनं करोति । तं कुशतरुणकैर्दूर्वापञ्चिभिरिति संप्रच्छाद्यैनं परिश्रयन्ति । तस्योदीचीं द्वारं कुर्वन्ति । तदुपसादयत्यर्मकपालानि शर्करा अश्वाञ्जनपिष्टा अजलोमानि कृष्णाजिनलोमानि स्थूणामधिकरणीमुखाहृतं कुशलमित्यथैतावश्वगर्दभावग्रेण शालां पर्यूषितौ तिष्ठतो । ऽन्तर्वेद्यभ्रिं निदधात्युत्तरे वेद्यन्ते रशने । परिस्तृणन्ति । दक्षिणत उपविशतो ब्रह्मा च यजमानश्चाथ गार्हपत्य आज्यं विलाप्योत्पूय स्रुचि चतुर्गृहीतं गृहीत्वाहवनीये सावित्राणि जुहोत्यन्वारब्धे यजमाने । ॥ १ ॥

युञ्जानः प्रथमं मन इति षड्चो ऽन्तर्हिता देव सवितरि-

Digitized by Google

त्युगेषेमं नो देव सवितरिति यजुरेतदृचा वा यजुषा वावस-
त्याहुतिं नवमीꣳ हुत्वोपतिष्ठत ऋचा स्तोमꣳ समर्धयेत्यथा-
भ्रिमादत्ते देवस्य त्वा सवितुः प्रसव इति चतुर्भिः पर्यायैस्ता-
मपेणावचनीयं पर्याहृत्य दक्षिणत आसीनाय ब्रह्मणे प्रयच्छ-
त्यथ रशनामादत्त इमामगृभ्णन्रशनामृतस्येति। तयाश्वमभि-
दधाति प्रतूर्तं वाजिन्नाद्रवेत्यथैवमेव द्वितीयाꣳ रशनामादत्ते।
तया गर्दभमभिदधाति युञ्जाथाꣳ रासभं युवं योगेयोगे तव-
स्तरमिति द्वाभ्यामश्वं पूर्वं नयन्ति। तमनुमन्त्रयते प्रतूर्वन्ने-
ह्यवक्रामन्नशस्तीरित्यन्वञ्चं गर्दभं पूष्णा सयुजा सह पृथिव्याः
सधस्थादग्निं पुरीष्यमङ्गिरस्वदच्छेहीति। प्रदक्षिणौ वैश्यं कुर्वते।
वैश्यः पृच्छति पुरुषाः किमच्छैथेत्यग्निं पुरीष्यमङ्गिरस्वदच्छेम
इतीतरे प्रत्याहुरथ वल्मीकवपामुपतिष्ठते ऽग्निं पुरीष्यम-
ङ्गिरस्वद्भरिष्याम इत्यथोपातियन्त्यन्वग्निरुषसामग्रमख्यदन्वहानि
प्रथमो जातवेदाः। अनु सूर्यस्य पुरुत्रा च रश्मीननु द्यावा-
पृथिवी आततानेत्यथैतेनाश्वेन प्राचा मृदमाक्रमयत्यागत्य
वाज्यध्वन आक्रम्य वाजिन्पृथिवीमिति द्वाभ्यामथास्य पृष्ठं मर्मृ-
ज्यते द्यौस्ते पृष्ठं पृथिवी सधस्थमात्मान्तरिक्षꣳ समुद्रस्ते योनिः।
विख्याय चक्षुषा त्वमभितिष्ठ पृतन्यत इत्यथ यं यजमानो
द्वेष्टि तमभ्यवाधस्पदं ध्यायत्यथैनं प्राञ्चमुत्क्रमयत्युत्क्रामोदक्र-
मीदिति द्वाभ्यामथैतं पदाग्रथमङ्क्तिरुपसृजति ॥ २ ॥

आपो देवीरुपसृज मधुमतीरयक्ष्माय प्रजाभ्यः। तासाꣳ
स्थानादुज्जिहतामोषधयः सुपिप्पला इत्यथ सुषि चतुर्गृहीतं

गृहीत्वा दक्षिणे ऽवान्तरदेशे हिरण्यं निधाय संपरिस्तीर्याभिजुहोति जिघर्म्यग्निं मनसा घृतेनेत्यपरं चतुर्गृहीतं गृहीत्वोत्तरे ऽवान्तरदेशे हिरण्यं निधाय संपरिस्तीर्यैवाभिजुहोत्या त्वा जिघर्मि वचसा घृतेनेत्यपोद्धृत्य हिरण्यमभ्रिमादाय पदं परिलिखति परि वाजपतिः कविः परि त्वाग्ने पुरं वयं त्वमग्ने द्युभिरिति तिसृभिः खनति देवस्य त्वा सवितुः प्रसवे ज्योतिष्मन्तं त्वाग्ने सुप्रतीकमिति द्वाभ्यामथोत्तरतः पार्श्वतः संभाराणां प्राचीनाग्राणि तृणानि सꣳस्तीर्य तेषूपरि कृष्णाजिनं प्राचीनग्रीवमुत्तरलोमोपस्तृणात्यपां पृष्ठमसीति पुष्करपर्णमाहरति तदुपरिष्टात्कृष्णाजिने निधायाथैनेन संमृशति शर्म च स्थः संवसाथामिति द्वाभ्यामपोद्धृत्य पुष्करपर्णमष्टाभिर्हृदꣳ हरति ॥ ३ ॥

पुरीष्यो ऽसि विश्वभरा इति तासां चतस्रो गायत्र्यस्तिस्रस्त्रिष्टुभः स पिण्डंपिण्डं वैवर्षां हरत्यपि वाष्टाभिरेकमेव पिण्डꣳ हरत्यथैतमवटं[1] विश्वलोपेन पूरयित्वाद्भिरुपसृजति सं ते वायुर्मातरिश्वा दधातूत्तानायै हृदयं यद्विलिष्टम्। देवानां यश्चरति प्राणथेन तस्मै च देवि वषडस्तु तुभ्यमित्यथोपरिष्टात्पुष्करपर्णं हृदि निधाय समुच्चित्य कृष्णाजिनस्यान्तान्योक्त्रेणोपनह्यति सुजातो ज्योतिषा सह शर्म वरूथमासदः स्वः। वासो अग्ने विश्वरूपꣳ संव्ययस्व विभावसो इत्यथैन-

---

१ Thus only M Bhāv.; अथैनमवटं all the other MSS.

Digitized by Google

मादायोपोत्तिष्ठत्युदु[1] तिष्ठ स्वध्वरोर्ध्व ऊ षु ण ऊतय इति द्वाभ्यामथैनमाहरति स जातो गर्भो असि रोदस्योरग्ने चारुर्विभृत ओषधीषु। चित्रः शिशुः परि तमाꣳस्यक्तः प्र मातृभ्यो अधि कनिक्रदद्गा इत्यथैनं गर्दभ आसादयति स्थिरो भव वीड्वङ्ग आशुर्भव वाज्यर्वन्। पृथुर्भव सुषदस्त्वमग्नेः पुरीषवाहन इत्यथैनमुपतिष्ठते शिवो भव प्रजाभ्यो मानुषीभ्यस्त्वमङ्गिरः। मा द्यावापृथिवी अभिशूशुचो मान्तरिक्षं मा वनस्पतीनित्यश्वं पूर्वं नयन्ति तमनुमन्त्रयते प्रैतु वाजी कनिक्रददित्यथ गर्दभं नानदद्रासभः पत्वा। भरन्नग्निं पुरीष्यं मा पाद्यायुषः पुरा॥ रासभो वां कनिक्रदत्सुयुक्तो वृषणा रथे। स वामग्निं पुरीष्यमाशुर्दूतो वहादितः॥ वृषाग्निं वृषणं भरन्नपां गर्भꣳ समुद्रियम्। अग्न आयाहि वीतय इत्यथेमे समीक्षन्त ऋतꣳ सत्यमृतꣳ सत्यमिति प्रदक्षिणी वेशं कुर्वते वैश्यः पृच्छति पुरुषाः किं भरथेत्यग्निं पुरीष्यमङ्गिरस्वद्भराम इतीतरे प्रत्याहुरथैनं स्वर उपावहरन्त्योषधयः[2] प्रतिगृभ्णीताग्निमेतमोषधयः प्रतिमोदध्वमेनमिति द्वाभ्यामद्भिरभ्युक्ष्याश्वगर्दभावुत्सृजन्त्यपो रथने अभ्यवहरन्त्यपि वाद्भिरभ्युक्ष्य मुञ्चते॥ ४॥ प्रथमः॥

अथैनं विस्रꣳसयति वि पाजसा पृथुना शोशुचान इत्य-

[1] Thus M Tr U; उप om. HB Ms. °पैत्तिष्ठ° Be.
[2] उपावहरन्ते° B Be.

Digitized by Google

थैनमद्भिरुपसृजत्यापो[1] हि ष्ठा मयोभुव इति तिसृभिरनुच्छन्दसमथैनमर्मकपालैः शर्कराभिरश्मपिष्टाभिरजलोमैः कृष्णाजिनलोमैरिति संसृजति मित्रः संसृज्य पृथिवीमयक्ष्माय त्वा संसृजामीति द्वाभ्यामथैनꣳ संभरति रुद्राः संभृत्य पृथिवीमिति। पिण्डं करोति मखस्य शिरोऽसीति। यज्ञस्य पदे स्थ इत्यङ्गुष्ठाभ्यामुपनिष्टभ्नात्यथ तृतीयं मृदोऽपच्छिद्य त्रीन्पिण्डान्करोति। तेषामेकमुखाकृते प्रयच्छति संसृष्टां वसुभी रुद्रैरित्यनुमन्त्रयते वसवस्त्वा कृण्वन्तु गायत्रेण छन्दसेत्यतिशिष्टायै मृदोऽर्धं प्रयच्छति सिनीवाली सुकपर्देत्यनुमन्त्रयते रुद्रास्त्वा कृण्वन्तु त्रैष्टुभेन छन्दसेति। सर्वामन्ततो मृदं प्रयच्छत्युखां करोतु शक्त्येत्यनुमन्त्रयत आदित्यास्त्वा कृण्वन्तु जागतेन छन्दसा विश्वे त्वा देवा वैश्वानराः कृण्वन्त्वानुष्टुभेन छन्दसेत्यथ वै भवति प्रान्याभिर्यच्छत्यन्यैर्मन्त्रयते मिथुनत्वाय। स्नुहिं करोतीति। स यदेव निर्हरति निरनुलिम्पति तेन स्नुहिकां प्रादेशमात्रीमूर्ध्वामपरिमितां तिरश्चीं करोत्यथास्यै त्र्यङ्गुले वा चतुरङ्गुले वा रास्नां पर्यस्यत्यदित्यै रास्नासीत्यथास्या अनुदिशमष्टावश्रीरुन्नयति। रास्नायन्त्रिषु चाश्रिषन्त्रिषु चाष्टौ स्तनान्करोति। नवाश्रिमभिचरतः कुर्यादिति ब्राह्मणमंसनां नवमीं करोत्यथास्यै बिलं गृह्णात्यदितिष्टे बिलं गृह्णातु पाङ्क्तेन छन्दसेत्यथैनां चरे निदधाति क्लमाय

१ Thus M Be Tr HU (pr.m.), Bhav.; उपावसृजत्य॰ BU (sec. m.) Ms.

Digitized by Google

या मखीमुखामित्यान्तादनुवाकस्यैवमेव द्वितीयां करोत्येवं तृतीयां तूष्णीं पञ्च चर्षभाꣳस्तिस्रश्च[1] मण्डलेष्टकाः । ॥ ५ ॥

अथ या मृदतिशिष्यते तया प्रवाते प्रतिलेपमुपवातयति । तासूपवातासूपकल्पयत एकविꣳशतिं वृष्णो अश्वस्य शकृत्पिण्डानभिमग्निं पचनमित्यथाश्वशकमादीप्य मुख्यामुखां धूपयति वसवस्त्वा धूपयन्तु गायत्रेण छन्दसेति प्रतिपद्य वरुणस्त्वा धूपयत्वित्यान्तो ऽन्तरतश्च बाह्यतश्च । सुधूपितां कृत्वा निदधात्येवमेव द्वितीयां धूपयत्येवं तृतीयां तूष्णीं पञ्च चर्षभाꣳस्तिस्रश्च मण्डलेष्टका । अथोत्तरेण शालामुदकस्थमिवावटं खानयत्यदितिष्ट्वा देवी विश्वदेव्यावती पृथिव्याः सधस्थे ऽङ्गिरस्वत्खनत्ववटेति । तं पचनेनावस्तीर्य तस्मिन्मुख्यामुखां प्रवृणक्ति देवानां त्वा पत्नीर्देवीर्विश्वदेव्यावतीः पृथिव्याः सधस्थे ऽङ्गिरस्वद्दधतूख इत्येवमेव द्वितीयां प्रवृणक्त्येवं तृतीयां तूष्णीं पञ्च चर्षभाꣳस्तिस्रश्च मण्डलेष्टकास्ताः प्राचीर्वोदीचीर्वायातयत्यथैनाः पचनेनोपरिष्टात्संप्रच्छाद्य मृदावलिम्पति[2] । चतुरङ्गुलमनुदिशमादीपनायातिशिनष्ट्यथोपोषति[3] ॥ ६ ॥

धिषणास्त्वेति पुरस्ताद् ग्नास्त्वेति दक्षिणतो वरूत्रयस्त्वेति

---

१ Here and infra some of the MSS. present the fem.: °चर्षभाꣳस्ति° (or च ऋषभाꣳस्ति°); again some of the MSS. om. the first च ।

२ Thus (cp. Vol. I. 269, 8) MUH Be; अभिलिम्पति B Bu Tr Ms Keś.

३ Before चतुर° Be B Bu Tr U (sec. m.) Ms ins. ताम् ।

पश्चाज्जघनस्येत्युत्तरतो । ऽथैनाः परिददाति मित्रैतामुखां पश्चैषा मा भेद्येतां ते परिददाम्यभित्त्या इति । ता अक्ष्णा वा राश्या वा पश्यन्ते । यदि प्रातरुपोषति सायमुपैति यदि सायं प्रातस्तांस्तु पक्षासूपकल्पयते गोपयश्छागापयो धृष्टिमश्मसंदावꣳ सतꣳ संदꣳश्यं शारीꣳ शिक्यं कृष्णाजिनमित्यैतत्समादायाभ्येत्यभीमां महिना दिवं मित्रो बभूव सप्रथाः । उत श्रवसा पृथिवीम् ॥ मित्रस्य चर्षणीधृतः श्रवो देवस्य सानसिम् । द्युम्नं चित्रश्रवस्तममित्यथ धृष्टिमादाय मुख्याया उखाया अङ्गारानुद्वपति देवस्त्वा सवितोद्वपतु सुपाणिः स्वङ्गुरिः । सुबाहुरुत शक्त्येत्यथैनामुच्छ्रयत्युत्तिष्ठ बृहती भवोर्ध्वा तिष्ठ ध्रुवा त्वमित्यथैनामाग्नेये प्रतिष्ठापयत्यपद्यमाना पृथिव्याशा दिश आपृणेत्यथैनाꣳ संदꣳशेन परिगृह्य सते ऽवधाय छागापयसाच्छृणत्ति ॥ ७ ॥

वसवस्त्वाच्छृन्दन्तु गायत्रेण छन्दसेति प्रतिपद्य विश्वे त्वा देवा वैश्वानरा आच्छृन्दन्त्वानुष्टुभेन छन्दसेत्यातो ऽन्तरतश्च बाह्यतश्च । स्वाच्छृणां कृत्वा गोपयसाभिविष्यन्दयत्येवमेव द्वितीयामाच्छृणत्त्येवं तृतीयां तूष्णीं पञ्च चर्षभाꣳस्तिसृश्च मण्डलेष्टका । अथ यदि विधुर्वा प्रदरो वा जायते ऽश्मचूर्णानि छागापयसि संप्रकीर्य तैः प्रत्युच्योल्मुकेनाभितपति । सꣳ हैव रोहति । यद्यु वै सर्वश एव भिद्यत[1] एतान्येव[1] कपालान्य-

१ भिद्येत तान्येव Be; भिद्येतैतान्येव U Tr (but cp. Vol. I. 270, 14).

Digitized by Google

वाश्वनं पिष्ट्वा येषां मूलान्यवच्छिन्नानि परिशेरते तथा संगृह्य कृत्वा पश्चात्कृत्य निदधाति । तासां यदा शुष्य उपरमत्यथैनाः स्थालीं समवधाय कृष्णाजिनेनोपरिष्टात्संप्रच्छाद्योत्तरे ग्रावाखण्डे निधाय प्रावजति । ता आ कालात्परिशेरे । ॥ ८ ॥ द्वितीयः ॥

अथैतस्मिन्नेव पूर्वपक्षे वायव्येन पशुना यजते । तस्य तदुपक्लृप्तं भवति यत्पशुना यक्ष्यमाणस्य संग्रामे हतयोरश्वस्य च वैश्यस्य च शिरसी । दौष्यन्त ऋषभं पचन्ते । वृष्णिं च वस्तं चाहरन्त्येतत्सर्पशिरो । ऽथास्यैषा पूर्वेद्युरेव पाशुबन्धिकी वेदिर्विमिता भवति । तां परिस्तीर्य स्तम्भयजुर्हरतीदमेव प्रसिद्धं पौरोडाशिकं त्रिर्यजुषा तूष्णीं चतुर्थं । पूर्वं परिग्राहं परिगृह्णाति । करणं जपत्युद्धन्त्युद्धतादाग्नीध्रश्शिखरं हरति । यदाग्नीध्रश्शिखरं हरत्यथ चात्वालस्याहृता चात्वालं परिलिखत्युत्तरवेदेराहृतोत्तरवेदिं निवपत्युत्तरनाभिमुत्सादयाग्नेराहृताग्निं प्रणयत्यग्निवत्युत्तरं परिग्राहं परिगृह्य योयुपित्वा तिर्यञ्चं स्फ्यं कृत्वा संप्रेषमाह प्रोक्षणीरासादयेध्मं बर्हिरुपसादय स्रुवं[1] स्वधितिं[1] स्रुचश्च संमृड्ढि तूष्णीं पृषदाज्यग्रहणीं पत्नीं संनह्याज्येन च दध्ना चोदेहि प्रतिप्रस्थातः पशुशीर्षाणि विद्धीत्यध्वर्युरेव प्रसिद्धं पाशुबन्धिकं कर्म चेष्टत्यथ प्रतिप्रस्थाता चापत्येकविंशतिं

---

१ Some of the MSS. ins. च after स्रुवं and after स्वधितिं, some only after स्रुवं; M om. स्वधितिं and has स्रुवं स्रुचश्च; cp. Vol I. 112, 7.

Digitized by Google

सामास्यवर्णमात्रकां वुल्धिवलुष्टपावयुक्तुवीरू¹ यथा विदग्धां वल्मीकवपाङ् संदंशमभिनिर्बाधमाहृत्य पञ्चगवीर्यावाप्येति दक्षिणत एतत्पुरुषशिर उपधत्ते ऽथैनदराधय्य प्राचीनावीतं कृत्वा सतभिर्मन्त्रैः पुरुषशिरः परिकीर्य निरयणैः पर्यायशः परिकर्षति ॥ ९ ॥

अथ रक्षोघ्नकामो नाकस्य पुरुषं जपत्। मेषवन्तो न ग्रन्थि यजुभिर्नाभवेयेन इत्यपरैः सप्तभिः परिकीर्यैव परिकर्षति वेदनाते विविच्यन्ते यमे राजनि ते जनाः। ये चेह सत्ये-नेच्छन्ते य उ चानृतवादिन इत्यपरैः सप्तभिः परिकीर्यैव परिकर्षति ते राजन्निह विविच्यन्ते ऽथा यन्ति त्वामुप। देवांश्च ये नमस्यन्ति ब्राह्मणांश्चापचित्यतीत्यथादत्ते दक्षिणेन वल्मीकवपाङ् सव्येन संदंशेन पुरुषशिरः प्राणैः प्राणा-न्संनिधायाथैवे वल्मीकवपां निदधात्यथैतत्पुरुषशिरो ऽभ्युक्षो-त्युक्ष्य² प्रचाल्य मृदाभिलिम्पत्यनभिलिम्पन्प्राणानथैतराणि सर्वे-

१ Thus (°लुष्टीरू or °वी°) Tr Be H Bu U Bhav. (MS. Burnell), Ms and Mso (both the Burnell MS. and the MS. of Tübingen); °लुर्वी° Bhav. (Cidambara MS.); °लर्वि° B; M °लुवी° or °लुषी°। According to the Bhāṣya it is: सुवंशका अपेक्षका; Mso.: सवका अपे सावधा द्रोणकाष्टोलुनी भवेदिति गोपालः।

२ Thus U (pr. m.) Bhav.; अभ्युक्ष्योत्कृष्य Tr; अभ्युक्ष्य Be U (sec. m); मुक्तृष्य B Ms; अभ्युक्ष्य only M; Bu is corr. and in H this whole chapter is missing.

Digitized by Google

ण्येव निष्ठिहन्नभ्युत्कुष्येव[1] प्रत्यास्य हृदाभिलिम्पन्ननभिलिम्पन्तः प्राशानंशेनान्यद्भिः प्रोक्षणतो[2] निदधाति । तान्स्म कालात्परिग्रेरे[3] ॥ १० ॥

अथ पशोः सामिधेनीकल्पः । प्र वो वाजा अभिद्यव इत्येकादश । समास्त्वाग्न ऋतवो वर्धयन्त्विति दश । तासां ज्योतिष्मतीमपोद्धृत्य नव धाय्यास्थाने दधात्यथ पृथुपाजवत्यौ धाय्ये दधात्यथ युक्ष्वा हि देवहूतमानित्येतां दधाति । ताः पराचीरनूच्यमानाश्चतुर्विंशतिः संपद्यन्ते । ज्योतिष्मतीं त्वेवोत्तमामन्वाहाथ हिरण्यगर्भः समवर्तताग्र इत्याघारमाघारयत्यथात आप्रीणामेव सौमाँसीर्ध्वा अस्य समिधो भवन्तीति द्वादश । तासां तानूनपातीमपोद्धृत्य नाराशंसीं वसिष्ठानां[4] दधात्यपो-

---

१ Thus only BU (sec. m.); Ms again अभ्युत्कुष्येव; thus also Bu with var. r: अभ्युत्कुष्येव; अभ्युक्ष्येव M Tr.; Bhav.: अथैव संप्रापयति नापयित्वा प्रत्यास्य हृदाभिलिम्पति; as Bhav. has explained उत्कृष्य, supra p. 9, l. 14, by प्रताप्य रोमाणि दग्ध्वा perhaps here simply उत्कुष्येव without अभि is to be read.

२ Thus M only in accordance with Bhav. (अद्भिः प्रोक्षणतः पशोः प्रोक्षणेन सह यथा प्रोक्ष्यते तथा निदधाति); प्रोक्षन्दक्षिणतो Ms. and Msc. (but the commentary runs: अद्भिः प्रोक्षणाय दक्षिणतो निदधाति । पशुप्रोक्षणेन यथा प्रोक्षितानि भवन्ति तथा दक्षिणतः पशोर्निदधातीति यावत्); प्रोक्षन्दक्षिणतो U; प्रोक्ष दक्षिणतो Bu Tr B Be; H om. the whole chapter.

३ The last sentence is omitted by M Tr U; is it commented upon by Bhav. and Ms.

४ वासिष्ठानां some of the MSS.

कृत्य नाराशꣳसीं तानूनपातीमन्येषां गोत्राणामथ पीवो ऽन्नाꣳ राये ऽनु यमिति वपायै यः प्राणतो य आत्मदा इति पशुपुरोडाशस्य प्र वायुमच्छा नो नियुद्भिरिति हविष । इति[1] नु यदि मिश्रो भवति । यद्यु वै सर्ववायव्य[2] एव भवति पीवो ऽन्नाꣳ राये ऽनु यमित्येतासां द्वे वपायै द्वे पशुपुरोडाशस्य द्वे हविषो । ऽथ यदि सर्वप्राजापत्य[3] एव भवति यः प्राणतो य आत्मदा इत्येतासां द्वे वपायै द्वे पशुपुरोडाशस्य[4] द्वे हविषः । सर्वसꣳस्थां पशोः कुर्वन्त्यथैतानि पशुशीर्षाण्यभिपर्यग्निकृतान्युत्तरे शालाकाण्ड शिक्येष्वासजन्त्यथैतर्ह्यग्निर रज्ज्वया विपच्य शिक्यपाशे प्रबध्नाति । तान्वा काशात्परिग्रेरे । ॥ ११ ॥ तृतीयः ॥

अथापरपक्षः प्रतिधीयते । स उपकल्पयत इष्टकाश्चाग्निदक्षिणाश्च [5]यदि रात्रिसत्त्रं चेष्यमाणो भवति । यद्यु वै संवत्सरसत्त्रं दीर्घो ऽध्वाजिरिति नाद्रियेत । स उपकल्पयत औदुम्बरीमुख्यासन्दीं तस्याः प्रादेशमात्राः पादा भवन्त्यरत्निमात्राणि शीर्षाण्यनूच्यानि सा मौञ्जीभी रज्जुभिर्व्यूता भव-

१ om. B Be U Ms.

२ Thus M, all the other MSS. सर्वो वा॰, but cp. xvi. 11 and 19.

३ Thus again only M; सर्वः प्रा॰ the other MSS.

४ पशु॰ fails in some of the MSS.

५ All the MSS. exc. B and Ms insert यद्य before यदि; but the clause यदि रात्रिसत्त्रं चे॰ भ॰ seems to be the protasis of the foregoing स उपक॰ इष्ट॰; Msc.: ॰ग्निदक्षिणाश्चोपकल्पयत इति पूर्वेणान्वयः।

Digitized by Google

त्र्येकसराभिः फलकाभिस्तीर्णा मृदावलिप्ता[1] चतुर्यामं द्वादशो-
द्यामं वा मौञ्जꣳ शिक्यं मुञ्जकुलायं क्रमुकमाञ्जनसंयुतं वैक-
ङ्कतीं च शमीमयीं च समिधौ सप्तौदुम्बरीः समिधश्चित्रो-
नानावृक्ष्या एकविंशतिनिर्बाधꣳ रुक्मं । प्रज्ञाता आग्निष्टो-
मिकाः संभारा । जुष्टे देवयजने शाला कारिता भवत्यथैनं
तीर्थादानीय पचयित्वा चित्रविपर्माग्निद्रौहिणीयामिष्टिं निर्वप-
त्याग्नावैष्णवमेकादशकपालमदित्यै घृते चरुं वैश्वानरं द्वादश-
कपालमिति । तस्मै तावन्मुखीदन्ति यावन्ति द्रौहिणीयाया ।
अथाध्वर्युः प्रदक्षिणमावृत्य प्रत्यङ्ङाक्रुत्य पत्नीः संयाज्य प्राञ्चेत्य
ध्रुवाकपाल्याञ्जल्याञ्जल्यां प्रत्यञ्चीयाञ्जल्याञ्जल्याः स्रुवेणोपघात-
मग्निद्रौहिणाहुतीर्जुहोति ॥ १२ ॥

आकूतिमग्निं प्रयुजꣳ स्वाहा मनो मेधामग्निं प्रयुजꣳ
स्वाहा चित्तं विज्ञातमग्निं प्रयुजꣳ स्वाहा वाचो विधृतिमग्निं
प्रयुजꣳ स्वाहा प्रजापतये मनवे स्वाहाग्नये वैश्वानराय स्वाहे-
त्यथ स्रुचि चतुर्गृहीतं गृहीत्वाज्यस्य पूर्णाꣳ स्रुचमौदुम्बरीं[2]
जुहोति विश्वे देवस्य नेतुर्मर्तो वृणीत सख्यं विश्वे राय इषु-
ध्यसि द्युम्नं वृणीत पुष्यसे स्वाहेत्यथैतत्पूर्णपात्रमन्तर्वेदि निनय-
त्यथापरेणाहवनीयं पर्याहृत्य यजमानाय प्रयच्छत्यथ मुख्या-

---

1 Thus MH Bhav.; मृदाभिलि° B Be U Ms. Msc.

2 Thus Tr Be Bu U Ms; the other MSS. चौदुम्ब°; but cp. TS. vi. 1.2.4.

स्रुचौ याचति । तस्मात् प्रकृत्यिष्टाप्पूतिरश्नोति संप्रकीर्या-ऽस्तुवं प्रत्यस्तावनीयस्यान्तात्तेष्वङ्गारेषु प्रहरति मा सु भित्था दृढस्वेति दाभ्यामेवैनां परिददाति मित्रैतामुखां तपैषा मा भेदि ते परिददाम्यभित्त्या इत्येष वै भवति यदि भिद्येत तैरेव कपालैः संसृजेदिति । सा यदि भिद्यत[1] एतान्येव[1] कपालान्यवाकं पिष्ट्वा ऐषा मृत्प्रायश्चित्ताय परिप्रैते तथा संसृज्य कृत्वा पक्त्वाभ्यूय निदध्यात्तयाभ्यां प्रहरत्येव वै भव-त्यम्बरीषादन्नकामस्यावदध्यादित्येष वै भवति यं कामयेत यजमानं भ्रातृव्यमस्मै जनयेयमित्यन्यतस्तस्याहृत्यावदध्यादित्येष वै भवति यो गतश्रीः स्यात् स्वयमयित्वा तस्यावदध्यादित्येष वै भवति यो भूतिकामः स्यात् य उखायै संभवेत्स एव तस्य स्यादिति । स य एवैष उखायै संतापाज्जायते तस्मिन्मुञ्ज-कुलायमवदधाति या ते अग्ने ओजस्विनी तनूरोषधीषु प्रविष्टा तां त एतेनावयजे स्वाहेत्येष मुञ्जकमायसंयुतमवदधाति कृमुकः सर्पिराहुतिरित्येष वैकङ्कतीं च शमीमयीं च समिधा-वादधाति परस्या अधि संवत इति वैकङ्कतीं परमस्याः परावत इति शमीमयीमेव वोट् त्वं मातुरस्या उपस्थ इति तिसृभिर्गायत्रीभिरुपतिष्ठते । अथ पञ्चौदुम्बरीः समिध आदधाति ॥ १३ ॥

---

१ भिद्येतैतान्येव U Be Ms, the others (exc. B which is corrupt and Bu, which is incomplete) : भिद्यत एतान्येव ; cp. supra p. 7, 20.

यदग्ने यानि कानि च यदग्न्युपजिह्विका रात्रिꣳरात्रिमप्रयावं नाभा पृथिव्या याः सेना अभीत्वरीरित्यथैनं पञ्चर्चेन राक्षोघ्नेनोपतिष्ठते कृणुष्व पाजः प्रसितिं न पृथ्वीमित्यथ तिस्रो नानावृक्ष्याः समिधोऽभ्यादधाति दꣳष्ट्राभ्यां मलिम्लूनित्याश्वत्थीं ये जनेषु मलिम्लव इति वैकङ्कतीं यो अस्मभ्यमरातीयादिति शमीमयीमथ सꣳशितं मे ब्रह्मोदेषां बाहू अतिरमित्युत्तमे औदुम्बरीं वाचयन्नेवाभ्यादधात्यथ कृष्णाजिने यजमानं वाचयति । मुष्टी चैव न करोति वाचं च न यच्छत्यथैतामासन्दीं व्यस्तशिक्यपाशां जघनेनाहवनीयं निदधाति । तस्यामिष्टकाभ्यां परिश्रित्योख्यमासादयति ॥ १४ ॥

मातेव पुत्रं पृथिवी पुरीष्यमग्निꣳ स्वे योनौ बिभर्तूखा । तां विश्वैर्देवैर्ऋतुभिः संविदानः प्रजापतिर्विश्वकर्मा युनक्त्वित्यथासीन उत्तरनिर्बाधꣳ रुक्मं प्रतिमुञ्चते दृशानो रुक्म इत्यथ शिक्यपाशं प्रतिमुञ्चते विश्वा रूपाणि प्रतिमुञ्चते कविर्नक्रोपासेति द्वाभ्यां । तूष्णीं कृष्णाजिनमुत्तरमथैनमवेक्षते सुपर्णोऽसि गरुत्मांस्त्रिवृत्ते शिरो गायत्रं चक्षुः स्तोम आत्मा साम ते तनूर्वामदेव्यं बृहद्रथन्तरे पक्षौ यज्ञायज्ञियं[1] पुच्छं छन्दाꣳस्यङ्गानि धिष्णियाः शफा यजूꣳषि नामेत्यथैनमुद्गृह्णाति सुपर्णोऽसि गरुत्मान्दिवं गच्छ सुवः पतेति । पुरस्तादेवास्यैते

१ यज्ञायज्ञीयं Tr H ; M abbreviates.

दीर्घाः शिक्यपाशाः[१] कारिता भवन्ति । सो[२] ऽथ[२] वैव[२] सति[२] क्रमते ऽपि वैनमुपोद्यच्छते ॥ १५ ॥

विष्णोः क्रमो ऽस्यभिमातिहा गायत्रं छन्द आरोह पृथिवीमनुविक्रमस्व निर्भक्तः स यं द्विष्म इति चतुर्भिरनुच्छन्दसं । तृतीये चतुर्थमनुवर्तयति । स चतुर्थाय प्रक्रामति । नाकमीषमुपात्येत्यथाक्रन्ददित्येतामन्वाहाथ दक्षिणमंसमभि पर्यावर्तते ऽग्ने ऽभ्यावर्तिन्नग्ने अङ्गिरः पुनरूर्जा सह रय्येति चतसृभिरथोदङ् पर्यावृत्य कृष्णाजिनमुन्मुच्य शिक्यपाशमुन्मुञ्चत उदुत्तमं वरुण पाशमस्मदित्यथैनमाहरत्या त्वाहार्षमग्रे बृहन्नुषसामूर्ध्वो अस्थादिति द्वाभ्यामथ यं कामयेत राजन्यं राष्ट्रं स्यादिति तं मनसा ध्यायेद्राष्ट्रमेव भवतीति ब्राह्मणमथैनं यथाहृतं प्रतिपर्यावृत्यान्तर्वेद्यासादयति सीद त्वं मातुरस्या उपस्थ इति चतसृभिः सहंसाभिरेव मुष्टी च करोति वाचं च यच्छत्यथास्मै व्रतं प्रदास्यन्वाचस्पतीयां समिधमभ्यादधाति वा जपति वाचस्पते ऽच्छिद्रया नो देवीत्यथोखामुपसमिन्द्धे येन देवा ज्योतिषोर्ध्वा उदायन्निति । स यावत्कालो ऽस्मै व्रतं प्रदास्यन्भवत्येवमेव वाचस्पतीयां समिधमभ्यादधाति वा जपति वैवमुख्यमुपसमिन्द्धे । ऽथ प्रातरुदित

१ Thus M Tr Be BHU (sec. m.); °पाद्याः Ms. U (pr. m.) Bhav.

२ Thus M (only सर्ती) Be BHU Bu Ms. Bhav. (one MS.) ; सोचैवसति Tr Bhav. (another MS.) Keś. ; according to Msc. the words are: सो ऽथ वा एव सति (sc. क्रमते) ।

Digitized by Google

आदित्ये विसृष्टायां वाचि ब्राह्मणेनोपतिष्ठते दिवस्परि प्रथमं जज्ञे अग्निरित्येतेनैकादशर्चेन । स एवमेव पूर्वेद्युः प्रातरावृत्तरेषूपतिष्ठते । ऽथास्योपवसथीये ऽहन्याग्नेयं संपद्यते । ॥ १६ ॥ चतुर्थः ॥

अथातः प्रयाणस्यैव मीमांसा । दीक्षितं वाचंयमं चेज्जो विन्दन्त्यन्य वा देवयजनाद्दीयते मध्यन्दिने यते । संवर्गिन तन्तुमयोर्वाचावाचयति यदाथेवं भवति नीचे गार्हपत्यं प्रयज ञायनीयमित्यंशोजसुपयन्त[1] उदु त्वा विश्वे देवा इत्यवैनमयतः प्रयज आत्मनि यच्छति योदं न मातुरथा उपस्थ इति एतस्याभिः षडृचाभिरथैताग्निष्ठोपादाम्बनमेषु अथात्तु विनिवर्तन्ते । प्रयते वसमे विहरणायां प्रथम्न्यपि वारथोरग्नीन्समारोह्य प्रयाति अद्वादभि मेषः प्रेहि प्रेद्यमे ज्योतिषावानीति ह्राभ्यानंय ययथ उत्तर्वंयमस्य दित्योलासन्याशांपायकिते एतानुविमाः षमिधमभ्यादधाति समिधाग्निं दुवस्यत घृतैर्बोधयतातिथिम् । आग्निमव्या जुहोत्य वाहेति गायत्र्या ब्राह्मणस्य प्रयायामग्निर्भरतस्य शृण्व इति त्रिष्टुभा राजन्यस्य । स ब्राह्मणः प्रयाणमयज्ञेवमेवैतत्सर्वं करोति । ॥ १७ ॥

अथातो भक्षण एवातिहृत्य मीमांसा । भक्ष चेदतिवर्धते स उपकल्पयते सतमयोदर्वीं संदंशमित्येतत्समादाय

---

१ After आयतनीयम् M Tr H Bn om. इति ; Mso. : इविषतो इविषाग्निं आपयनीति इतिमन्त्र: उपवक्ति ; in the collateral passage (Vol. I, p. 165, 11) however, no इति is found.

ऽस्मानवत्विति योक्ता । अथैतमग्निं संवत्सेन परिगृह्य यदि
अथाप्यायोद्वर्यायुं भस्म प्रवेशयत्यापो देवीः प्रतिगृभ्णीत भस्मै-
तत्स्योने यथिष्टव गर्भो यथोषधीनामिति तिसृभिरनुच्छन्द-
समवेतं ज्योतिष्मतीभ्यां प्रत्यवदधाति प्रसद्य भस्मना योनिं
पुनरापश्च सदनमस्येति द्वाभ्यामथ पुनरूर्जा सह रय्येति
द्वाभ्यां पुनरुदैत्यपीत्यनुपस्थिन्द्रे[1] पुनस्त्वादित्या रुद्रा वसवः
समिन्धतामित्यथैनं यथाहृतं प्रतिपर्याहृत्य यजमानायतने
निदधुपतिष्ठते बोधा च बोधीत्यन्तादनुवाकस्य । स याव-
न्मात्रो मात्रातिवर्धेत एवमेवैतत्सर्वं करोत्यथातः काम्यायैवोपश्रेते
संभारेभ्यः । ॥ १८ ॥ पञ्चमः ॥

अथातः क्रमस्यैवोपवसथः पर्यावर्तते । स उपकल्पयते
प्रज्ञातमिष्टका अपरिमिता अपस्या वैश्वानरीः कृष्णाजिनमुप-
यमं भस्म पुरीषभूमाश्चिकता इत्यथोपवसथीये ऽहन्देवयजन-
मध्यवसायेदमगन्माप्रेतेति द्वाभ्यामथ महावेदिं विमिमीत
एतामेव व्याख्यः प्रक्रमान्प्रक्रम्य द्व्याया मानेन प्रमाय समन्तं
रज्ज्वा परितनोति । पृष्ठ्यामातनोत्यथैतमग्निं प्रत्यञ्चं यूपा-
वटीयाच्छ्रोणिं विमिमीते पुरुषमात्रेण वेणुना[2] समपचपुरुषम-
रत्निना[2] पक्षौ द्राघीयांसौ भवतः । षड्विधं वा सप्तविधं वा
द्वादशविधं वा यावद्विधं वा चेष्यमाणो भवत्यथैनमध्युष्य

---

१ उद्धैति only MH, cp. TS. v. 2.2.5; उदैति all the other MSS.

२ वेणुनासमप० and पुरत्निना वा M.

Digitized by Google

मानेन प्रमाय समन्तꣳ स्रक्त्या परितनोत्यनुस्रक्त्यं लेखां लिखत्यपोद्धृत्य स्रक्त्यां कर्षूः खानयन्त्युदञ्चयन्त्यपरस्या । दक्षिणतश्च पश्चाच्च वर्षीयसीः कुर्वन्त्येतावदेवैतदहः कर्म क्रियते । वसन्त्येताꣳ रात्रिमथाध्वर्युरपररात्र आद्रुत्य सꣳशास्ति विस्तनम्रतं दोहयतेत्यथैतमग्निꣳ मते समुप्य दक्षिणतो ज्वलयन्त आसते । ऽथैतदग्न्यायतनꣳ शकृत्पिण्डेन परिलेपयति । तस्मिꣳस्ततः प्राचीरिष्टका आयातयति द्वे पुरस्तात्समीची द्वे पश्चात्समीची । अथैनं प्रदक्षिणं त्रयोदशभिरिष्टकाभिः परिचिनोत्यन्विष्टकं लेखां लिखत्यपोद्धृत्येष्टकाः कर्षूः खानयन्त्युदञ्चयन्त्यपरस्या । दक्षिणतश्च पश्चाच्च वर्षीयसीः कुर्वन्ति । ॥ १९ ॥

अथ दाभ्यामात्मन्यग्निं[1] गृह्णीते मयि गृह्णाम्यग्रे अग्निं यो नो अग्निरिति । स्वयंचितिं जपति यास्ते अग्ने समिधो यानि धामेति । श्वेतमश्वमभिमृश्यान्तःशर्करमिमामुपदधाति प्रजापतिस्त्वा सादयतु तया देवतयाङ्गिरस्वद्ध्रुवा सीदेत्यथ संभारान्निवपत्यग्नेर्भस्मासीति भस्माग्नेः पुरीषमसीति पुरीषꣳ संज्ञानमसि कामधरणमित्यूषान्मयि ते कामधरणं भूयादिति सिकता । अथैनान्संप्रयौति सं या वः प्रियास्तनुवः सं प्रिया हृदयानि वः । आत्मा वो अस्तु संप्रियः संप्रियास्तनुवो ममेत्यथैनान्कल्पयति कल्पेतां द्यावापृथिवी कल्पन्तामाप ओषधीः । कल्पन्तामग्नयः पृथङ्मम ज्यैष्ठ्याय सव्रता इत्यथोर्ध्वचित उप-

१ Thus MB Be U Tr, Bhav.; चात्मन्नग्निं H.

Digitized by Google

दधाति चित स्थ परिचित ऊर्ध्वचितः श्रयध्वं तया देवतयाङ्गिरस्वद्ध्रुवाः सीदतेत्यथानुव्यूहत्याप्यायस्वेति गायत्र्या ब्राह्मणस्य सं ते पयाꣳसीति त्रिष्टुभा राजन्यस्य । यथास्तु यथाग्नर्करमनुव्यूहति । तस्मिꣳस्ततः प्राचीर्याजुषीरुपदधाति ॥ २० ॥

अयꣳ सो अग्निरग्ने दिवो अर्णमच्छा जिगास्यग्ने यत्ते दिवि वर्चः पृथिव्यां पुरीष्यासो अग्नय इति । द्वे पुरस्तात्प्रतीची इडामग्न इति दक्षिणामयं ते योनिर्ऋत्विय इत्युत्तरां । द्वे पश्चात्प्राची चिदसीति दक्षिणां परिचिदसीत्युत्तरामथैनं प्रदक्षिणं पञ्चोदग्रभिर्लोकंपृणाभिः परिचिनोति लोकं पृण छिद्रं पृणाथो सीद शिवा त्वम् । इन्द्राग्नी त्वा बृहस्पतिरस्मिन्योनावसीषदन्निति । तयादेवतं करोति तया देवतयाङ्गिरस्वद्ध्रुवा सीदेत्यथ सूददोहसं करोति ता अस्य सूददोहसः सोमꣳ श्रीणन्ति पृश्नयः । जन्मन्देवानां विशस्त्रिष्वा रोचने दिव इत्यथावकृत्य कृष्णमश्ममभिन्हम्य तनुपुरीषमुपदधाति पृष्टो दिवीति । तयादेवतं कृत्वा सूददोहसं करोतीति न्वा इयं प्रथमा चितिर्निष्ठीयत । एवमेव द्वितीया निष्ठीयत एवं तृतीयैवं चतुर्थ्येवं पञ्चमी । तान्यदि[1] चेष्यत आदित्यो ऽभ्युदियाद्वाचंयमो ऽध्वर्यु यजमानो ऽन्वारभेत । वज्रमेवाध्वर्युरादत्ते प्रतिसमेधनीयं प्रतिप्रस्थाता । तौ पुरस्तात्प्रत्यञ्चौ समितमिति चतसृभिः संनिवपतो ऽथ शिक्यादुखां निरूहति ॥ २१ ॥

१ Thus (तान्) M Tr. H Bhav. (तानध्वर्युब्रह्मयजमानान् according to Bhav.); ता यदि B Be Bu U Ms (ताः पञ्च चितीः according to Msc.).

मातेव पुत्रं पृथिवी पुरीष्यमग्निꣳ स्वे योनावभारुखा । तां विश्वैर्देवैर्ऋतुभिः संविदानः प्रजापतिर्विश्वकर्मा विमुञ्चत्विति । तां नावेक्षेतेत्याहुः शुच्यत्येव हि भवतीति । तस्यामन्ववेक्षमाणो[1] दधिद्रप्सान्प्रास्यत्यसु[2] ते शुष्मि दधामीति
वा तूष्णीं वाथैनाꣳ सिकताभिः पूरयित्वा दर्भोपरिष्टात्संप्र- ९
क्षाल्योत्तरे ग्रावाणश्च निदधात्येवमेव द्वितीयां पूरयत्येवं तृतीयां । ता या काशात्परिश्रेरे । अथ वैश्वानर्या शिक्यमादत्ते परस्य पारे रजसः शुक्रं ज्योतिरजायत । तत्र पर्षदति द्विष इत्यथ याचति नैर्ऋतीः कृष्णास्तिस्रस्तुषपक्वा आसन्दीꣳ[3]
रुक्मं च प्रबन्धनमुदपात्रमित्येतत्समादाय दक्षिणया द्वारोप- १०
निष्क्रम्य तां दिशं यन्ति यत्रास्य स्वकृतमिरिणꣳ स्याद्भवति प्रदरो वा । तदेतत्पराचीनपाशꣳ शिक्यं व्यस्यत्यग्ने[4] वैश्वानर स्वाहेति । शिक्यपाशमनु पराचीर्नैर्ऋतीरुपदधाति नमः सु ते निर्ऋते विश्वरूपे यत्ते देवी निर्ऋतिराबबन्ध यस्यास्ते अस्याः
क्रूर आसञ्जुहोमीत्युपास्यत्यासन्दीꣳ रुक्मं प्रबन्धनमुप- ११
तिष्ठते ऽसुन्वन्तमयजमानमिच्छ देवीमहं निर्ऋतिं वन्दमान इति द्वाभ्यामथापो व्यतिषिच्य पराञ्च आयन्त्यनवेक्षमाणा

---

१ अन्ववेक्षावेक्ष॰ Bhav.; अन्ववेक्ष॰ Tr.

२ ॰द्रप्सान् U (sec. m.) Ms, Dvaidha and probably also M; द्रप्सं Be H Tr U (pr. m.). Bhav., Keś.

३ M ins., perhaps rightly: शिक्यं ।

४ Thus Tr Bu U (sec. m.) Ms Bhav.; निरस्यति MHB Be U (pr. m.)

Digitized by Google

वाचयति । चतुष्पाद्भ्यश्चत्वारीतीत्येव यथेतमेत्य गार्हपत्यमुपतिष्ठन्ते निवेशनः संगमनो वसूनामित्याहवनीयमु हैक उपतिष्ठन्ते प्रणीतो ऽधि गार्हपत्यो भविष्यतीति । ॥ २२ ॥ षष्ठः ॥

अथ प्रायणीयेन चरति । प्रायणीयेन चरित्वा पदेन चरति । पदेन चरित्वा राजानं क्रीत्वातिथ्यं निर्वपत्यातिथ्येन प्रचर्य प्रथमाभ्यां प्रवर्ग्योपसद्भ्यां प्रचरत्यथोपनिष्क्रम्य[१] संप्रेष्यमाह सुब्रह्मण्य सुब्रह्मण्यामाह्वय चितनव्रतं प्रयच्छेत्याह्वयति सुब्रह्मण्यः सुब्रह्मण्याम् । चितनव्रतं प्रयच्छति[१] । स पुरस्ताद्दिवायै चतुरः प्रतीचः प्रक्रमान्प्रक्रामति दक्षिणा पञ्चमं । तत्पदं निदधाति । स उपरवाणां कालो । ऽथ महावेद्या उत्तरा-द्रूपीयाच्छ्रोणेर्वेद्यन्तेन द्वादश प्रतीचः प्रक्रमान्प्रक्रामत्युदञ्चं त्रयोदशं । तदाग्नीध्र उपसीदति । स उत्करस्य कालो । ऽथो-परवाणां कालात्सम्यञ्चुर्हरतीदमेव प्रसिद्धं पौरोडाशिकं निरुप्या तूष्णीं चतुर्थं । पूर्वं परिग्राहं परिगृह्णाति । करणं अपत्यु द्रुम्व द्रुताद्राग्नीध्रः खनिर्हरति । यदाग्नीध्रः खनिर्हरत्यथाप्येव-माणां तिष्ठन्संप्रेष्यमाह वेदिकारा वेदिं कल्पयतेति । यथा-संप्रैषं ते कुर्वन्त्यथ कार्ष्णाजिनीरुपानह उपमुञ्चन्ते चिते त्वेत्य-ध्वर्युराचिते त्वेति प्रतिप्रस्थाता मनश्चिते त्वेति ब्रह्मा तपश्चिते त्वेति यजमानश्चिते त्वा चिते त्वेत्येव वा सर्वे । ऽपि वा तूष्णीमेवाथ याचति धनुर्वाणवच्चतुरो ऽश्मन ऐन्द्रीमिष्टकां विभक्तिमुदपात्रं दर्भस्तम्बं दूर्वामाच्छ्याख्योटं वसुवामित्येत-

[१] The clause चथोपनिष्क्रम्य...प्रयच्छति is not found in M Tr H.

Digitized by Google

समादायोत्तरे श्रोण्यन्ते सꣳसादयन्नथ[1] द्वाभ्यामात्मन्नग्निं[2] गृह्णीते मयि गृह्णाम्यग्रे अग्निं यो नो अग्निरिति । स्वयंचितिं जपति यास्ते अग्ने समिधो यानि धामेति । श्वेतमश्वमभिमृश्यान्तःशर्करमिमामुपदधाति प्रजापतिस्त्वा सादयतु तया देवतयाङ्गिरस्वद्ध्रुवा सीदेत्यथादत्ते धनुर्बाणवच्चतुरो ऽश्मन इत्येतत्समादाय जघनेन दक्षिणेनाग्निं परीत्याग्रेण यूपावटीयꣳ शङ्कुं तिष्ठन्धनुरधिज्यं कृत्वायत्यान्तःशर्करमिषुं निरस्ति ॥ २३ ॥

इन्द्रस्य वज्रो ऽसि वार्त्रघ्नस्तनूपा नः प्रतिस्पश इत्यादृश्याश्मानमुपदधाति यो नः पुरस्तादघायुरभिदासत्येतꣳ सो ऽश्मानमृच्छत्वित्यथ दक्षिणस्य पक्षस्य दक्षिणे पक्षोपप्लवे[3] आयत्यान्तःशर्करमिषुं निरस्याद्दृश्याश्मानमुपदधाति[4] यो नो दक्षिणत इत्यथ पुच्छस्यापरे पुच्छोपप्लवे[3] आयत्यान्तःशर्करमिषुं निरस्याद्दृश्याश्मानमुपदधाति यो नः पश्चादित्यथोत्तरस्य पक्षस्योत्तरे पक्षोपप्लवे[3] आयत्यान्तःशर्करमिषुं निरस्याद्दृश्याश्मानमुप-

---

१ Thus (plural) Tr U Be B Ms (sc. परिकर्मिणः according to Msc); •सादयन्नथ MH.

२ Thus M Tr Be Ms; •आत्मन्• H; •आत्मंन• B.

३ Instead of उपप्लव (cf. Śulba-sūtra 6, where, however, the var. r. उपप्लव and उपप्लुव, cp. Lāṭy. I. 5.7, Drāhy. II. 1.10, are found) the MSS. have mostly उपप्लाव or उपप्लव ।

४ Here Bu breaks off; here and infra M Tr U (pr. m.) every time विरस्याद्दश्य• ।

Digitized by Google

दधाति यो न उत्तरत इति । दिव्युपदधातीति ब्राह्मणं । तयादेवतं कृत्वा सूददोहसः[1] करोत्यथैतामैन्द्रीमिष्टकामाक्रमणं प्रत्युपदधाति स ईं पाहि य ऋजीषी तरुत्रो यः शिप्रवान्वृषभो यो मतीनाम् । यो गोत्रभिद्वज्रभृद्यो हरिष्ठाः स इन्द्र चित्राꣳ अभितृन्धि वाजानिति । तयादेवतं कृत्वा सूददोहसं करोत्यथ[2] दक्षिणतो विभक्तिमुपदधात्यग्न आयाहि वीतय इति । तयादेवतं कृत्वा सूददोहसं करोत्यथाधिद्रुत्य[2] स्वयमातृण्णायाꣳ शङ्कुमुद्धृत्योदपात्रमुपनिनीय दर्भस्तम्बमुपदधाति वाक्का समुद्र उपदधात्विति वा तूष्णीं वाथैनꣳ स्रुवाहुतिभिरभिजुहोति सजूरब्दो ऽयावभिरिति पञ्चभिरथ दूर्वामुपदधात्यायने ते परायणे दूर्वा रोहन्तु पुष्पिणीः । उत्सो वा तत्र जायातै ह्रदो वा पुण्डरीकवानिति[3] । तयादेवतं कृत्वा सूददोहसौ करोत्यथाश्वैतत्पुरस्तादेवौदुम्बरं युगलाङ्गलं कारितं भवति ॥ २४ ॥

[4]षड्गवं वा द्वादशगवं वा । तस्य वरत्राः सम्मृशति सं वरत्रा दधातन निष्कृताहावमवटमिति द्वाभ्यां । युनक्ति सीरा

---

१ °दोहसं M Tr H.

२ Thus B Bhav. Ms.; the passage अथ दक्षिणतो…करोति (l. 7) is inserted by M Tr BHU infra l. 13 after °दोहसौ करोति; but cp. the order, in which supra p. 21, 20 the substances are enumerated.

३ cp. Ath. V. vi. 106. 1.

४ cp. Pitṛmedhasūtra p. 22, 5 sqq.

Digitized by Google

युञ्जन्ति कवयो युगा युनक्त सीरेति द्वाभ्यां । कृषति लाङ्गलं पवीरवत् शुनं नः फाला इति द्वाभ्याम् । सीतां प्रत्यवेक्षते कामं कामदुघे धुक्ष्व घृतेन सीतेति द्वाभ्याम् । स पुरस्तादेवाग्रे तिस्रः प्राचीः सीताः कृषत्युत्तरार्धे श्रोणेर्दक्षिणमंसमभि तिस्रो । दक्षिणार्धे श्रोणेरुत्तरमंसमभि[1] तिस्रो । दक्षिणात्पक्षादुत्तरं पक्षमभि तिस्रो । ऽथैतामिसृप्य प्रदक्षिणमावर्तास्त्रिरभ्युद्धोदीच उत्सृजति[2] । त एते ऽखर्वीभवन्ति यदि दक्षिणावता यजते । बहु वै सनियो[3] ऽग्निर्व्यागतं युह्यन्ति[4] । कौवानद्यादयदुवजानूपमंसान्तपुरस्तादेवौदुम्बरे द्रोणे सर्वौषधं दध्नाज्येन समुदायुतं भवति । स पुरस्तादेवाग्रे तिस्रः प्राचीः सीता वपति या जाता ओषधय इति तिसृभिरनुष्टुब्भिरुत्तरार्धे श्रोणेर्दक्षिणमंसमभि तिसृभिर्दक्षिणार्धे श्रोणेरुत्तरमंसमभि[5] तिसृभिर्दक्षिणात्पक्षादुत्तरं[6] पक्षमभि पञ्चभिश्चतुर्दशभिर्वपतीति ब्राह्मणमथ दिग्भ्यो लोष्टान्समस्यति । यो ऽत एव प्राङ् हुत्वा बहिःशर्करालोष्टमादत्ते । तमन्तःशर्करं न्यस्यति ॥ २५ ॥

---

१ Thus MT Ms; श्रोणेरोत्तर° all the other MSS.

२ Thus M Tr UHB Be Keś. (the MS. of the India Office has twice उत्सृजंति, both times corrected into singular); उत्सृजंति Msc; cp. TS. v. 2.5.3.

३ Thus (or सनियो) all exc. MB Keś., which have सनिवो ।

४ Thus B; वाद्वन्ति Ms; युद्धंवंति M Tr Be U (pr. m.); युद्धंयंति U (sec. m.).

५ Thus M (pr. m.) and Ms; the other MSS. श्रोणेरोत्तर° ।

६ Thus Ms only; all the other MSS. पक्षादोत्तरं ।

Digitized by Google

मा नो हिꣳसीज्जनिता यः पृथिव्या इत्यथ दक्षिणं पक्षमनुद्रुत्य बहिःशर्करां लोष्टमादत्ते । तमन्तःशर्करं न्यस्यत्यथाभ्यावर्तस्व पृथिवीत्यथ पुच्छमनुद्रुत्य बहिःशर्करां लोष्टमादत्ते । तमन्तःशर्करं न्यस्यत्यग्ने यत्ते शुक्रं यच्चन्द्रमित्यथोत्तरं पक्षमनुद्रुत्य बहिःशर्करौ लोष्टावादत्त इषमूर्जमहमित आदद इति । तयोरन्यतरमन्तःशर्करं न्यस्यत्या नो गोषु विशत्वौषधीष्विति । तं दिशमितरं निरस्यति यस्यामस्य दिशि द्वेष्यो भवति जहामि सेदिमनिराममीवामित्यादधान एवैतां दिशमभि संपादयेदित्येतदेकं । यजुषा[1] यजुर्विपरिहरेदित्येतदपरमथ महावेद्या उत्तरादꣳसीयाच्छ्रोणेर्वेद्यन्तेन पौम्प्रतीपः प्रक्रमान्प्रक्रामत्युदञ्चं चतुर्थं । तच्चात्वालस्यावृता चात्वालं परिलिख्यत्युत्तरवेदेरावृतोत्तरवेदिं निवपत्युत्तरनाभिमुत्खाय सिकता निवपत्यग्ने तव श्रवो वय इति पङ्क्तिरनुष्टुब्द्वयमथोर्ध्वचित उपदधाति चित स्थ परिचित ऊर्ध्वचितः श्रयध्वं तया देवतयाङ्गिरस्वद्ध्रुवाः सीदतेत्यथानुव्यूहत्याप्यायस्वेति गायत्र्या ब्राह्मणस्य सं ते पयाꣳसीति त्रिष्टुभा राजन्यस्य । यथावस्तु यथाशर्करमनुव्यूहति । ॥ २९ ॥ सप्तमः ॥

अथैतां महाचितिꣳ संसादयन्त्यग्रेण[2] प्राचामुच्छ्राय्यां वा

---

१ MB Be Tr U Ms ins. वा ; H om. this word as also the Dvaidhasūtra.

२ संपादयन्त्य° H Tr Bhav.

Digitized by Google

चर्मणि वा द्वाविꣳशतिं[1] च[1] दर्भपुञ्जीलानि पयःप्रोक्षं चाज्यप्रोक्षं चाश्मं चौत्तरवेदिकाꣳश्च संभारान्बार्हस्पत्यचरोद्ग्रासश्च[2] कुम्भेष्टकास्तावत एव हिरण्यशल्कान्सुतं[3] चोदकुम्भं च पुष्करपर्णं च रुक्मं च हिरण्मयं च पुरुषं स्रुचौ च सर्पशिरश्च सर्वं च स्वयमातृण्णानिकोतं दूर्वा च स्तम्भ्या अश्वकाश्च वा स चान्या उपधास्यन्भवति ता दधि च मधुमिश्रं कूर्मं चौदुम्बरं चोलूखलमुसलꣳ सर्वौषधं चोखाश्च पशुशीर्षाणि चेति । द्वाविꣳशतिं[4] दर्भपुञ्जीलानि पयःप्रोक्षे ऽवधाय तैः प्रोक्षयत्यग्नीऽग्निभ्यो जुष्टान्प्रोक्षामीति वा तूष्णीं वाग्निनाग्निः समिध्यत इत्याज्यप्रोक्षणाय संप्रैषमाहाग्निभ्यः प्रणीयमानेभ्यो ऽनुब्रूहीति । यदि होता न कामयते यजमान एव पुरीष्यासो अग्नय इत्येतामेकां त्रिरन्वाहाथाग्निप्रथमाः[5] प्रतिपद्यन्ते[6] । ऽथैतेनाग्नेन प्राचाधिद्रवति ॥ २७ ॥

अभ्यस्थाद्विश्वाः पृतना अरातीरित्यथ दक्षिणमꣳसमभ्यवकामन्नमनुमन्त्रयते यदक्रन्दः प्रथमं जायमान इत्युत्तरे

---

१ om. HM ; च only found in U (sec. m.) and Ms.

२ Thus TB Be U (sec. m) ; बार्हस्पत्यं चरुचरो॰ HU (pr. m.) ; बार्हस्पत्यचरुं चरो॰ M.

३ Thus (॰शल्का॰) M Tr. Be U Ms ; ॰शल्का॰ Be. ; शल्का॰ HU (pr. m.).

४ Most of the MSS. ins. च ।

५ चाथाग्निप्रथमाः MH.

६ प्रपद्यते H.

शीर्षन्ते मध्ये सादयन्त्यथ[1] ताभ्यामात्मन्यग्निं[2] गृह्णीते मयि गृह्णाम्यग्रे अग्निं यो नो अग्निरिति। अग्नेश्चितिं जपति याश्ते अग्ने समिधो यानि धामेति। अथैतमश्वमभिक्रम्याधिद्रवत्यपामिदं न्ययनं नमस्व इति ताभ्यामथ पुष्करपर्णौ चात्मपर्णौ च एतं निदधात्यथोदकुम्भं[3] पर्यस्यत्योदन्ते दक्षिणेन कुम्भꣳ सव्येन कुम्भीꣳ एतात्पूरयित्वा हिरण्यशकलौ प्रत्यस्य या एता दक्षिणादङ्गात्स्वयमातृण्णामभ्याद्रवन्ति तासु विषुवत्यनुषीतमुपदधाति ॥ २८ ॥

हिरण्यवर्णाः शुचयः पावका यासाꣳ राजा वरुणो याति मध्य इति ताभ्यामेवमेवात्र पूरयित्वैवं प्रत्यस्य या एता उत्तरार्धे श्रोणेः स्वयमातृण्णामभ्याद्रवन्ति तासु विषुवत्यनुषीतमुपदधाति तृतीयया च चतुर्थ्या चैवमेव पूरयित्वैवं प्रत्यस्य या एता दक्षिणार्धे श्रोणेः स्वयमातृण्णामभ्याद्रवन्ति तासु विषुवत्यनुषीतमुपदधाति पञ्चम्या च षष्ठ्या चैवमेव पूरयित्वैवं प्रत्यस्य या एता उत्तरादङ्गात्स्वयमातृण्णामभ्याद्रवन्ति तासु विषुवत्यनुषीतमुपदधाति सप्तम्या चाष्टम्या चैवमेव पूरयित्वैवं प्रत्यस्य या एता दक्षिणात्पश्चात्स्वयमातृण्णामभ्याद्रवन्ति तासु विषुवत्यनुषीतमुपदधाति नवम्या च दशम्या चैवमेव पूरयित्वैवं प्रत्यस्य या एता उत्तरात्पश्चात्स्वयमातृण्णामभ्याद्रवन्ति तासु

---

१ °सादयंत्य° Tr Be BU Ms; °सादयत्य° MH.

२ Thus M Tr Be U Ms; °त्मंन° BH.

३ निधाय instead of निदधाति M Tr HU, omitting the following अथ।

Digitized by Google

विषुवत्यनुषीतमुपदधात्येकादश्यां च द्वादश्यां च। तासां चार्धस्त्यं मध्य[1] उपदधाति दिवि श्रयस्वान्तरिक्षे यतस्व पृथिव्या संभव ब्रह्मवर्चसमसि ब्रह्मवर्चसाय त्वेत्यनुषीतमुपदधातीति ब्राह्मणं। तयादेवतं कृत्वा सूददोहसः करोति। ॥ २९ ॥

अथोत्तरवेदेरावृतोत्तरवेदिमवस्तृणोत्यथोत्तरवेद्यामपां पृष्ठमसीति पुष्करपर्णमुपदधाति। तयादेवतं कृत्वा सूददोहसं करोत्यथोत्तरवेद्यामेवोत्तरनिर्बाधꣳ रुक्ममुपदधाति ब्रह्म जज्ञानमित्यथैनमहृणीया पञ्चगृहीतेन व्याघारयति कृणुष्व पाजः प्रसितिं न पृथ्वीमित्यथ दक्षिणतः प्राञ्चꣳ हिरण्मयं पुरुषमुपदधाति हिरण्यगर्भः समवर्तताग्र इत्यथैनमभिप्राणिति द्रप्सश्चस्कन्देति। तयादेवतं कृत्वा सूददोहसौ करोत्यथोत्तरतः प्रक्रमवेलायाꣳ स्रुचावुपदधात्याज्यस्य पूर्णां कार्ष्मर्यमयीं दध्नः पूर्णामौदुम्बरीं दक्षिणां कार्ष्मर्यमयीमुत्तरामौदुम्बरीमियमसीति कार्ष्मर्यमयीमदावसीत्यौदुम्बरीं मनसैव। तयादेवतं कृत्वा सूददोहसौ करोत्यथ दक्षिणे प्रललाटे सर्पशिर उपदधाति नमो अस्तु सर्पेभ्य इति तिसृभिरनुच्छन्दसमपि वा यतउच्चारं जनपदस्य जन्यं भयं मन्यते। तयादेवतं कृत्वा सूददोहसं करोति। ॥ ३० ॥ अष्टमः ॥

अथ स्वयमातृण्णां यजुषा करोति ध्रुवासि धरुणास्तृता विश्वकर्मणा सुकृता। मा त्वा समुद्र उद्वधीन्मा सुपर्णो ऽव्यथ-

[1] मध्यत M only.

माना पृथिवीं दृꣳहेत्यथैनामश्वमवघ्राप्याविदुषा ब्राह्मणेन ब्रह्माधिहृत्योपदधाति यथैतस्य पुरुषस्य प्राणैः प्राणाः संनिधीयेरन्नापिधीयेरन्भूः प्रजापतिस्त्वा सादयत्वित्यनुद्रुत्याग्निस्त्वाभिपातु मह्या स्वस्त्या छर्दिषा शंतमेन तया देवतयाङ्गिरस्वद्ध्रुवा सीदेत्यनुप्राण्यात्प्रथमाꣳ स्वयमातृण्णामुपधायेत्यनुप्राणित्येव ब्राह्मणो वरं ददात्यथ स्रुचि चतुर्गृहीतं गृहीत्वा स्वयमातृण्णावकाशे जुहोति चित्तिं जुहोमि मनसा घृतेनेत्यथैनामन्वारभ्यान्वारोहं वाचयति पृथिवीमाक्रमिषं प्राणो मा मा हासीदित्यपरे बिले हिरण्येष्टकामुपदधाति तेजोऽसि तेजो मे यच्छ पृथिवीं यच्छ पृथिव्यै मा पाहीति। तां जघनेन प्रक्रमवेलायां मण्डलेष्टकामुपदधाति पृथिव्युदपुरमन्नेन विष्टेति। दक्षिणतो रेतःसिचमुपदधाति पृथिवी रेतःसिक्ता मे रेतो दधातु सा मे रेतः प्रजनयत्विति। तयादेवतं कृत्वा सूददोहसः करोति। ॥ २१ ॥

अथैता दश स्कन्ध्याः प्राचीरायातयति द्वे ऋतव्ये द्वे द्वियजुषी विराजं च विश्वज्योतिषं च सयुजं चाषाढां च द्वे संयान्यावृतव्ये उपदधाति मधुश्च माधवश्चेत्येकामनूपदधात्यग्नेर्यांगिरसीत्यथ द्वियजुषी उपदधाति काण्डात्काण्डात्प्ररोहन्ती या शतेन प्रतनोषीति द्वाभ्यां दूर्वेष्टकामथ हिरण्यमूर्ध्नीमुपदधाति यास्ते अग्ने सूर्ये रुचो या वो देवाः सूर्ये रुच इति। विराजं च विश्वज्योतिषं च विराट् ज्योतिरधारयद्बृहस्पतिस्त्वा सादयत्वित्युत्तरामथ सयुजमुपदधातीन्द्राग्निभ्यां त्वा सयुजा

युञ्जा पुनश्चेत्यथाषाढां ज्यालिखितामुत्तरश्रोण्यामुपदधात्यषाढासि सहमानेत्यथ संयान्या उपदधात्यग्नेर्यान्यसि देवानामग्नेयान्यसीति। तथादेवतं कृत्वा सूददोहसः करोति। ॥ ३२ ॥

अथोत्तरेण ज्यालिखितामुपविश्य याचति दधि च मधुमिश्रं कूर्मं च। तं दध्ना मधुमिश्रेणाभ्यनक्ति मधु वाता ऋतायत इति तिसृभिरनुच्छन्दसमथैनमवकाभारेण परिवेष्ट्य पुरस्तात्प्रत्यञ्चमुपदधाति मही द्यौः पृथिवी च नस्तनश्च आप्याः प्रचरन्त्वग्नय इति द्वाभ्यामथैनं शङ्कुभिः परिचिनोत्यभितो ऽनपसर्पणाय। तथादेवतं कृत्वा सूददोहसं करोत्यथाचैव तिष्ठन्याचत्यौदुम्बरं चोलूखलमुसलं सर्वौषधं च। तदेतत्प्रादेशमात्रमुलूखलं भवत्यरत्निमात्रं मुसलं। तस्मिन्सर्वौषधमवहत्यूर्जो भागो ऽस्यूर्जः पवित्रमूर्गमन्नाद्यायेत्यथैनदुत्तरतः[1] प्रक्रमवेलायामुपदधाति तद्विष्णोः परमं पदमिति। लोकंपृणामुत्तरतो मुसलं करोति। तथादेवतं कृत्वा सूददोहसौ करोत्यथ स्रुच्यामुखां याचति। तस्यामन्तरवस्थाविणौ द्वे स्रुवाहुती जुहोत्यग्ने युक्ष्वा हि ये तवेति दक्षिणे बिले जुहोति युक्ष्वा हि देवहूतमानित्युत्तरे। अथैनामुत्तरतः प्रक्रमवेलायामुपदधाति ध्रुवासि पृथिवि सहस्व पृतन्यत इति। लोकंपृणे उत्तरत इतिरे करोति। तथादेवतं कृत्वा सूददोहसः करोत्यथैतत्पुरुषशिरो याचति। तस्य प्राणेषु हिरण्यशकलान्प्रत्यस्यति

१ Thus U (sec. m.) and Ms (एवम् सर्वौषधेन पूर्वमुलूखलम् Msc.); अथैनमु° all the other MSS. and U (pr. m).

हुपचक्षन्हेत्याज्ये ऽभूदिदं विश्वस्य भुवनस्य वाजिनमिति दक्षिणस्यां नासिकायामग्नेर्वैश्वानरस्य चेत्युत्तरस्यामग्निर्ज्योतिषा ज्योतिष्मानिति दक्षिणे ऽक्ष्णि रुक्मो वर्चसा वर्चस्वानित्युत्तर ऋचे त्वेति दक्षिणे कर्णे रुचे त्वेत्युत्तरे । अथ स्रुचि चतुर्गृहीतं गृहीत्वा दक्षिणे ऽक्ष्णि जुहोति चित्रं देवानामुदगादनीकमित्यपरं चतुर्गृहीतं गृहीत्वोत्तरे ऽक्ष्णि जुहोति चित्रं देवानामिति । समान्या जुहोतीति ब्राह्मणमथैनद्दध्ना मधुमिश्रेण पूरयति समिन्स्रवन्ति सरितो न धेना हृद्यान्तादनुवाकशेषेणाथैनं प्राचीनमुत्तानमुखायामुपदधाति ॥ ३३ ॥

आदित्यं गर्भं पयसा समङ्ग्धीत्यनुद्रुत्येमं मा हिंसीर्द्विपादं पशूनामिति । मयुमारण्यमनु ते दिशामीति शुचमनूत्सृजति । ललाटे हिरण्येष्टकामुपदधाति विश्वकर्मा दिशां पतिरित्यथ पुरस्तात्प्रत्यङ्मुख उपविश्यान्तरात्मनश्वस्य शिर उपदधाति वातस्य ध्राजिं वरुणस्य नाभिमित्यनुद्रुत्येमं मा हिंसीरेकशफं पशूनामिति । गौरमारण्यमनु ते दिशामीति शुचमनूत्सृजति । ललाटे हिरण्येष्टकामुपदधाति प्रजापतिर्दिशां पतिरित्यथ पश्चात्प्राङ्मुख उपविश्यान्तरात्मनृषभस्य शिर उपदधात्यजस्रमिन्दुमरुषं भुरण्युमित्यनुद्रुत्येमꣳ समुद्रꣳ शतधारमुत्समिति । गवयमारण्यमनु ते दिशामीति शुचमनूत्सृजति । ललाटे हिरण्येष्टकामुपदधाति रुद्रो दिशां पतिरित्यथ दक्षिणत उदङ्मुख उपविश्यान्तरात्मन्वृष्णेः शिर उपदधाति वरूत्रिं त्वष्टुर्वरुणस्य नाभिमित्यनुद्रुत्येमामूर्णायुं वरुणस्य मायामित्युष्ट्र-

मारण्यमनु ते दिशामीति शुचमनूत्सृजति । ललाटे हिरण्येष्टकामुपदधाति वरुणो दिशां पतिरित्यथोत्तरतो दक्षिणामुख उपविश्यान्तरात्मन्वस्तस्य शिर उपदधाति यो अग्निरग्नेस्तपसो ऽधि जात इत्यनुद्रुत्याजा ह्यग्नेरजनिष्ट गर्भादिति । शरभमारण्यमनु ते दिशामीति शुचमनूत्सृजति । ललाटे हिरण्येष्टकामुपदधात्यग्निर्दिशां पतिरित्यन्तेषु तस्य शुद्रूघोपदध्यादिति ब्राह्मणं । तथादेवतं कृत्वा सूददोहसः करोति । ॥ ३४ ॥ नवमः ॥

अथापस्या उपदधात्यपां त्वेमन्त्सादयामीति पञ्च पुरस्तात्प्रतीचीरुपदधाति पञ्च दक्षिणतः पञ्च पश्चात्प्राचीः पञ्चोत्तरतश्छन्दस्यास्तथादेवतं कृत्वा सूददोहसः करोत्यथ प्राणभृत उपदधात्ययं पुरो भुवस्तस्य प्राणो भौवायनो वसन्तः प्राणायनो गायत्री वासन्ती गायत्र्यै गायत्रं गायत्रादुपाꣳशुरुपाꣳशोस्त्रिवृत्त्रिवृतो रथंतरꣳ रथंतराद्वसिष्ठ ऋषिः प्रजापतिगृहीतया त्वया प्राणं गृह्णामि प्रजाभ्य इति । दश प्राचीरायातयति स्वयमातृण्णाया अयं दक्षिणा विश्वकर्मेति । दश दक्षिणा आयातयति स्वयमातृण्णाया अयं पश्चाद्विश्वव्यचा इति । दश प्रतीचीरायातयति स्वयमातृण्णाया इदमुत्तरात्स्वरिति । दशोदीचीरायातयति स्वयमातृण्णाया इयमुपरि मतिरिति । दशभिरुपरिष्टात्प्रदक्षिणं परिचिनोत्यक्ष्णयोपदधातीति ब्राह्मणं । तथादेवतं कृत्वा सूददोहसः करोत्यथ संयत उपदधात्यायुषः प्राणꣳ संतन्विति द्वादश तिस्रस्तिस्रो दिक्षु न मध्ये । तथा-

देवतं कृत्वा सूददोहसः करोत्यथाषाढा उपदधाति प्राची दिशां वसन्त ऋतूनामग्निर्देवता ब्रह्म द्रविणं त्रिवृत्स्तोमः स उ पञ्चदशवर्तनिस्त्र्यविर्वयः कृतमयानां पुरोवातो वातः सानग ऋषिरिति । वाचयति पितरः पितामहा इति । दक्षिणेन प्राणभृतो दश प्रतीचीरायातयति स्वयमातृण्णामभि दक्षिणां दिशामिति । जघनेन प्राणभृतो दशोदीचीरायातयति स्वयमातृण्णामभि प्रतीचीं दिशामित्युत्तरेण प्राणभृतो दश प्राचीरायातयति[१] स्वयमातृण्णामभ्युदीचीं दिशामित्यग्रेण प्राणभृतो दश दक्षिणा आयातयति स्वयमातृण्णामभ्यूर्ध्वां दिशामिति । वामेन प्राणभृतो दशभिरुपरिष्टादपस्यैः परिचिनोति । विषूचीरुपदधातीति ब्राह्मणमेषामनुक्लृप्तिराप्यते । तथादेवतं कृत्वा सूददोहसः करोत्यथाग्निं सर्वतोमुखं चिनुते[२] । ॥ ३५ ॥

गायत्रीं पुरस्तादुपदधाति त्रिष्टुभं दक्षिणतो जगतीं पश्चादनुष्टुभमुत्तरतः पङ्क्तिं मध्ये[३] । तथादेवतं कृत्वा सूददोहसः करोत्यथाग्नेरङ्गान्युपदधाति प्राच्या त्वा दिशा सादयामि गायत्रेण छन्दसाग्निना देवतयाग्नेः शीर्ष्णाग्नेः शिर उपदधामि दक्षिणया त्वा दिशा सादयामि प्रतीच्या त्वा दिशा सादयाम्युदीच्या त्वा दिशा सादयाम्यूर्ध्वया त्वा दिशा सादयामि पाङ्क्तेन छन्दसेति । तथादेवतं कृत्वा सूददोहसः करोत्यथोत्त-

---

१ Thus Tr HBU Ms; प्रतीचीर॰ M Be.

२ Thus Tr Be BU Ms; चिनोति MH.

३ मध्य इति M.

रतः प्राजापत्यामुपदधाति संवत्सरस्य प्रतिमामिति तां जघनेन प्रक्रमवेलायां प्राश्वमृषभमुपदधाति त्वामग्ने वृषभं चेकितानमिति तथादेवतं कृत्वा सूददोहसौ करोत्यथ लोकंपृणा उपदधाति लोकं पृण छिद्रं पृणाथ सीद शिवा त्वम्। इन्द्राग्नी त्वा बृहस्पतिरस्मिन्योनावसीषदन्निति तथादेवतं[1] करोति तया देवतयाङ्गिरस्वद्ध्रुवा सीदेत्यथ सूददोहसं करोति ता अस्य सूददोहसः सोमँ श्रीणन्ति पृश्नयः। जन्मन्देवानां विशस्त्रिष्वा रोचने दिव इति प्राच्याथ लोकंपृणया प्रणौत्यग्निं प्राचीभिः संप्रच्छादयन्ति संप्रच्छन्नं पलाशशाखया परिकर्षति लोकं पृण छिद्रं पृणेत्यथ चितिक्लृप्त्याभिमृशति चित्तिमचित्तिं चिनवद्वि विद्वानित्याग्नेय्या गायत्र्यैतां चितिमभिमृश्य ताभ्यामनुद्रवति वाङ्म आसन्प्राणदा इत्यथापराह्णिकीभ्यां[2] प्रवर्ग्योपसद्भ्यां प्रचरत्येतावदेवैतदहः कर्म क्रियते वसन्त्येताँ रात्रिम् ॥ ३६ ॥ दशमः ॥

अथ द्वितीयेऽभ्युदित आदित्ये प्रवर्ग्योपसद्भ्यां प्रचरत्यथ कार्ष्णाजिनौ[3] उपानहावुपमुञ्चेते[3] अध्वर्युश्च यजमानश्चाथ ताभ्यामात्मन्नग्निं गृह्णीते मयि गृह्णाम्यग्रे अग्निं यो नो अग्निरिति स्वयंचितिं जपति यास्ते अग्ने समिधो यानि

---

१ Thus M Tr. Ms; the other MSS. abbreviate the following passage.

२ अथापराह्ण (or ह्न) आपराह्णि॰ Be U Ms.

३ Thus M Tr U Ms; ॰जिनौपा॰ B; ॰जिनिवपा॰ H; Be defect.

धामेति । कृष्णमश्वमभिमृश्य तनुपुरीषमुपदधाति पृष्ठो दिवीति । तथादेवतं कृत्वा सूददोहसं करोत्यथापराह्णिकीभ्यां[1] प्रवर्ग्योपसद्भ्यां प्रचरत्येतावदेवैतदहः कर्म क्रियते । वसन्त्येताꣳ रात्रिमथ तृतीये ऽहन्नुदित आदित्ये प्रवर्ग्योपसद्भ्यां प्रचरति । सर्व एव कार्ष्णाजिनीरुपानह उपमुञ्चन्ते । ऽथ यावत्याश्व-त्थालीꣳ सस्रुवां विभक्तिमुदपात्रं पञ्च च स्कन्ध्या अवकाश्या याश्चान्या उपधास्यन्भवति ता । एतत्समादायोत्तरे श्रोण्यन्ते सꣳसादयन्नथ द्वाभ्यामात्मन्नग्निं गृह्णीते मयि गृह्णाम्यग्रे अग्निं यो नो अग्निरिति । स्वयंचितिं जपति यास्ते अग्ने समिधो यानि धामेति । श्वेतमश्वमभिमृश्याधिद्रवत्यपामिदं न्ययनं नमस्व इति द्वाभ्यामथाधिद्रुत्य प्रथमे संचिताहुती जुहोत्यग्न उदधे तत्त्वा यामीति । दक्षिणतो विभक्तिमुपदधात्यग्निं दूतं वृणीमह इति । तथादेवतं कृत्वा सूददोहसं करोति । ॥ ३७ ॥

अथैताः पञ्च स्कन्ध्याः प्राचीरायातयति द्वे ऋतव्ये द्वे सयुजावेकाꣳ संयानीमृतव्ये उपदधाति शुक्रश्च शुचिश्चेत्येव-कामनूपदधात्यग्नेर्दानिरसीत्यथ सयुजावुपदधात्याचाराभ्यां त्वा सयुजा युजा युनज्मि तेजसा त्वा सयुजा युजा युनज्मीत्यथ संयानीमुपदधाति वायोर्यान्त्यसीति । तथादेवतं कृत्वा सूद-दोहसः करोत्यथाश्विनीरुपदधाति ध्रुवक्षितिर्ध्रुवयोनिरिति पञ्चैकैकां दिक्ष्वेकां मध्ये । तथादेवतं कृत्वा सूददोहसः करो-

---

[1] अथापराह्णिक आप° Be UH Ms.

त्र्यवतंव्या उपदधाति सजूरृतुभिः सजूर्विधाभिरिति पञ्चैकैका दिश्येका मध्ये। समानप्रभृतयो भवन्ति समानोदर्का इति ब्राह्मणं। तथादेवतं कृत्वा सूददोहसः करोत्यथ प्राणभृत उपदधाति प्राणं मे पाह्यपानं मे पाहीति पञ्चैकैका दिश्येका मध्ये। तथादेवतं कृत्वा सूददोहसः करोत्यथ दृष्टिमतीरुपदधात्यपस्पिन्वौषधीर्जिन्वेति पञ्चैकैका दिश्येका मध्ये। ऽनुपरिहारꣳ सादयतीति ब्राह्मणं। तथादेवतं कृत्वा सूददोहसः करोत्यथ मूर्धन्वतीरुपदधाति विष्टम्भो वय इति चतस्रः पुरस्तादꣳसपातिनीस्तथादेवतं[1] कृत्वा सूददोहसः करोत्यथ वयस्या
उपदधाति। यविर्वय इति पञ्च दक्षिणायाꣳ श्रोण्यामुप- १०
दधाति पष्ठवाद्वय इति पश्चोत्तरस्यां। बस्तो वय इति दक्षिणे ऽꣳस उपदधाति। वृष्णिर्वय इत्युत्तरे। व्याघ्रो वय इति दक्षिणे पक्ष उपदधाति। सिꣳहो वय इत्युत्तरे। पुरुषो वय इति मध्ये। पुरुषेण चितिराप्यते। तथादेवतं कृत्वा सूद-
दोहसः करोत्यथाग्निꣳ सर्वतोमुखं चिनुते ऽग्नेरꣳशान् प्राजा- ११
पत्यामृषभं लोकंपृणा। उदीच्याश्च लोकंपृणया प्रचीत्यग्निमुदीचीभिः संप्रच्छादयन्ति। संप्रच्छन्नं पलाशशाखया परिकर्षति लोकं पृण छिद्रं पृणेत्यथ चितिकॢप्त्याभिमृशति चित्ति-

[1] Thus (॰पातिनीस्) MBU Bhav. (one MS.); पातीनीस् Be; ॰पाटिनीस् Tr H Bhav. (another MS.), Keś. (twice), Ms. (but Msc.: ꣳसपतनवत् वक्रया अया चाखेयाः, and यथा भवेयुरꣳसपातिन्य इति गोपालः)।

मपचितिं चिनवदि किद्रानित्याग्नेय्या त्रिष्टुभैतां चितिमभिमृश्य द्वाभ्यामवद्रुयति यात्म्न मायण्यायद्दा इत्यथापरास्विकीभ्यां प्रवर्ग्योपसद्भ्यां प्रचरत्येतावदेवैतदहः कर्म क्रियते। वसन्त्येताꣳ रात्रिम्। ॥ ३८ ॥ एकादशः ॥

अथ चतुर्थे ऽनुदित आदित्ये प्रवर्ग्योपसद्भ्यां प्रचरति। समानं पुरीषस्योपधानमथ पञ्चमे ऽनुदित आदित्ये प्रवर्ग्योपसद्भ्यां प्रचरति। सर्वं एव कार्ष्णाजिनीरुपानह उपमुञ्चन्ते ऽथ यावत्यावत्यासीरन् यावतीं विभक्तिमुदपाद्यन्ꣳ सर्वं न्यायमात्मनिवीतं इत्र च स्कन्ध्या अवकाश्या उ पान्या उपयायवति ता। एतत्समादायोत्तरे श्रोण्यन्ते यऽसादयन्त्यथ द्वाभ्यामात्मन्वग्निं गृह्णीते मयि गृह्णाम्यग्रे अग्निं यो नो अग्निरिति। स्वयंचितिं जपति यास्ते अग्ने समिधो यानि धामेति। सैतमथमभिमृश्याधिद्रवत्यपामिदं न्ययनं नमस्त इति द्वाभ्यामथाधिद्रुत्य द्वितीये संचिताहुती जुहोत्यग्ने युक्ष्वा यामीति। दक्षिणतो विभक्तिमुपदधात्यग्निनाग्निः समिध्यत इति। तथादेवतं कृत्वा सूददोहसं करोत्यथ स्वयमातृण्णामयमवघ्राय्याविदुषा ब्राह्मणेन सहाधिद्रुत्योपदधाति ध्रुव इन्द्राग्नी अव्ययमानामित्यनुद्रुत्य वायुस्त्वाभिपातु मह्या स्वस्त्या छर्दिषा शंतमेन तया देवतयाङ्गिरस्वद्ध्रुवा सीदेति। अन्याद्वितीयामुपधायेति। प्राणापानाविति। स व्यानो ऽथैव ब्राह्मणो वरं ददात्यथ स्रुचि चतुर्गृहीतं गृहीत्वा स्वयमातृण्णायामग्नौ जुहोति चित्तिं जुहोमि मनसा घृतेनेत्यनुद्रुत्याभ्यामन्वारभ्या-

न्यारोहं बाधयत्यन्तरिक्षमाक्रमिषं प्रजा मा मा हासीदित्यपरे बिले हिरण्येष्टकामुपदधाति ज्योतिरसि ज्योतिर्मे यच्छान्तरिक्षं यच्छान्तरिक्षान्मा पाहीति । तां जघनेन प्रक्रमवेलायां मण्डलेष्टकामुपदधात्यधिद्यौरन्तरिक्षं ब्रह्मणा विष्टेति । दक्षिणतो रेतःसिचमुपदधात्यन्तरिक्षꣳ रेतःसिक्तस्मै रेतो दधातु तस्मै रेतः प्रजनयत्विति मनसैव । तथादेवतं कृत्वा सूददोहसः करोति । ॥ ३९ ॥

अथैता दश स्कन्ध्याः प्राचीरायातयति यतश्च ऋतव्याः सम्राजं च विश्वज्योतिषं च द्वे अयुजौ द्वे संयान्यावृतव्या उपदधाति नभश्च नभस्यश्चेत्यवकामनूपदधात्यग्नेर्योनिरसीतीषश्चोर्जश्चेत्यवकामनूपदधात्यग्नेर्योनिरसीति सम्राजं च विश्वज्योतिषं च सम्राट् ज्योतिरधारयद्विश्वकर्मा त्वा सादयत्वित्युत्तरामेव अयुजावुपदधाति वर्षेण त्वा अयुजा युजा युनज्म्युक्थेभिस्त्वा अयुजा युजा युनज्मीत्यथ संयान्यावुपदधाति देवानां वायोयान्यस्यन्तरिक्षस्य यान्यसीति । तथादेवतं कृत्वा सूददोहसः करोत्यथ दिश्या उपदधाति राज्ञ्यसि प्राची दिगिति पञ्चैकैकां दिक्ष्वेकां मध्ये । तथादेवतं कृत्वा सूददोहसः करोत्यथ प्राणभृत उपदधात्यायुर्मे पाहि प्राणं मे पाहीति दश पुरस्तात्प्राचीस्तासां ज्योतिष्मतीमुत्तमामुपदधाति । तथादेवतं कृत्वा सूददोहसः करोत्यथ बृहतीरुपदधाति मा छन्द इति द्वादश दक्षिणतः पृथिवी छन्द इति द्वादश पश्चादग्निर्देवतेति द्वादशोत्तरतस्तथादेवतं कृत्वा सूददोहसः

करोत्यथ वायव्यस्या उपदधाति ' मूर्धासि राडिति सप्त पुरस्तात्प्रतीचीरुपदधाति यन्त्री राडिति सप्त पश्चात्प्राचीर्वायव्याभिश्चितिराप्यते ' तयादेवतं कृत्वा सूददोहसः करोत्यथाग्निꣳ सर्वतोमुखं चिनुते ऽग्नेरङ्गानि प्राजापत्यान्यृषभं लोकंपृणाः ' प्राच्याच लोकंपृणया प्रचीत्यथापि प्राचीभिः संप्रच्छादयन्ति ' संप्रच्छन्नं पलाशशाखया परिकर्षति लोकं पृण छिद्रं पृणेत्यथ चितिकृप्याभिमृशति चित्तिमचित्तिं चिनवद्वि विद्वानित्याग्नेय्या जगत्यैतां चितिमभिमृश्य द्वाभ्यामवद्रवति वाश्र चात्मप्राच्छदा इत्यथापराह्णिकीभ्यां प्रवर्ग्योपसद्भ्यां प्रचरत्येतावदेवैतदहः कर्म क्रियते ' वसन्त्येताꣳ रात्रिम् ' ॥ ४० ॥ द्वादशः ॥

अथ षष्ठे ऽभ्युदित आदित्ये प्रवर्ग्योपसद्भ्यां प्रचरति ' समानं पुरीषस्योपधानमथ सप्तमे ऽभ्युदित आदित्ये प्रवर्ग्योपसद्भ्यां प्रचरति ' सर्व एव कार्ष्णाजिनीरुपानह उपमुञ्चन्ते ' ऽथ याचत्याव्यस्वाचीꣳ सतुवां विभक्तिमुद्धापं पञ्च च स्कन्ध्या अवकाश्च या च चान्या उपधास्यन्भवति ता ' एतत्समादायोत्तरे सोष्यन्ते सङ्गादयन्त्यथ द्वाभ्यामात्मन्यग्निं गृह्णीते मयि गृह्णाम्यग्रे अग्निं यो नो अग्निरिति ' स्वयंचितिं जपति यास्ते अग्ने समिधो यानि धामेति ' श्वेतमश्वमभिमृश्याधिद्रवत्यपामिदं न्ययनं नमस्त इति द्वाभ्यामथाधिद्रुत्य तृतीये संचितावुक्ती जुहोत्यग्ने गच्छ तत्त्वा यामीति ' दक्षिणतो विभक्तिमुपदधात्यग्निर्हचाषि जन्मदिति ' तयादेवतं कृत्वा सूददोहसं करोत्यथैताः पञ्च स्कन्ध्याः प्राचीरायातयति द्वे चतस्रे द्वे

सयुजावेकां संयानीमन्तत उपदधाति सहश्च सहस्यश्चेत्येव-कामनूपदधात्यग्नेर्योनिरसीत्येव सयुजावुपदधाति स्तोमैस्त्वा सयुजा युजा युनज्मि छन्दोभिस्त्वा सयुजा युजा युनज्मीत्येव संयानीमुपदधाति देवानामन्तरिक्षाण्यसीति । तथादेवतं कृत्वा सूददोहसः करोति । ॥ ४१ ॥

अथाहुत्यां स्तोमीया उपदधात्याशुस्त्रिवृदिति पुरस्तादुप-दधाति व्योम सप्तदश इति दक्षिणतो धरुण एकविंश इति पश्चाद्भान्तः पञ्चदश इत्युत्तरतः । प्रतूर्तिरष्टादश इति पुरस्ता-दुपदधात्यभिवर्तः सविंश इति दक्षिणतो वर्चो द्वाविंश इति पश्चात्तपो नवदश इत्युत्तरतो । योनिश्चतुर्विंश इति पुरस्तादुपदधाति गर्भाः पञ्चविंश इति दक्षिणत ओजस्त्रि-णव इति पश्चात्संभरणस्त्रयोविंश इत्युत्तरतः । क्रतुरेकत्रिंश इति पुरस्तादुपदधाति ब्रध्नस्य विष्टपं चतुस्त्रिंश इति दक्षि-णतः प्रतिष्ठा त्रयस्त्रिंश इति पश्चान्नाकः षट्त्रिंश इत्युत्त-रतो । ऽग्नेर्भागोऽसीति पुरस्तादुपदधाति नृचक्षसां भागो ऽसीति दक्षिणतो मित्रस्य भागोऽसीति पश्चादिन्द्रस्य भागो ऽसीत्युत्तरतो । वसूनां भागोऽसीति पुरस्तादुपदधात्या-दित्यानां भागोऽसीति दक्षिणतोऽदित्यै भागोऽसीति पश्चाद्देवस्य सवितुर्भागोऽसीत्युत्तरतो । धर्त्रश्चतुष्टोम इति पुरस्तादुपदधाति यावानां भागोऽसीति दक्षिणत ऋभूणां भागोऽसीति पश्चाद्विवर्तोऽष्टाचत्वारिंश इत्युत्तरतो । ऽन्यथानूच्यान्यथोपदधातीति ब्राह्मणं । तथादेवतं कृत्वा सूददो-

हसः करोत्यथ व्युष्टीरुपदधात्येकयास्तुवत प्रजा अधीयन्तेति मध्यतः । चतस्रो दक्षिणे ऽंस उपदधात्यथ तिस्रो ऽथ तिस्रो ऽथ चतस्रो । दक्षिणादंसाद्दक्षिणाꣳ श्रोणिमभ्यायातयति[1] । यथादेवतं कृत्वा सूददोहसः करोत्यथ व्युष्टीरुपदधातीयमेव सा या प्रथमा व्यौच्छदिति पश्चात् । तिस्रस्तिस्रो दिक्षु तिस्रो मध्ये । व्युष्टीभिश्चितिराप्यते[2] । यथादेवतं कृत्वा सूददोहसः करोति । ॥ ४२ ॥

अथाग्निꣳ सर्वतोमुखं चिनुते ऽग्नेरङ्गानि प्राजापत्यामृषभं लोकंपृणा । उद्दीप्याय लोकंपृणया प्रच्छाद्याग्निमुदीचीभिः संप्रच्छादयन्ति । संप्रच्छन्नं पञ्चाग्रमावया परिकर्षति लोकं पृण छिद्रं पृणेत्यथ चितिक्लृप्ताभिमृशति चित्तिमचित्तिं चिनवद्वि विद्वानित्याग्नेय्यानुष्टुभैतां चितिमभिमृश्य दाभ्यामनुद्रवति वाश्र आसन्प्रावर्द्धा इत्यथापराह्णिकीभ्यां प्रवर्ग्योपसद्भ्यां प्रचरत्येतावदेवैतदहः कर्म क्रियते । वसन्त्येताꣳ रात्रिम् । ॥ ४३ ॥ त्रयोदशः ॥

अथाष्टमे ऽनुदित आदित्ये प्रवर्ग्योपसद्भ्यां प्रचरति । समानं पुरीषवत्योपधानमथ नवमे ऽनुदित आदित्ये प्रवर्ग्योपसद्भ्यां प्रचरति । सर्व एव कार्ष्णाजिनीरुपानह उपमुञ्चन्ते ऽथ चात्वालाध्वर्यवाग्नीꣳ सस्रुवां विभक्तिमुदपात्रꣳ सर्वं च सुषमाहत्यानिकोतꣳ सप्त च स्कन्ध्या अवकाश या उ चान्या

---

[1] श्रोणीम० some of the MSS.

[2] वृष्टिभि० H. Ms.

Digitized by Google

उपधायाभ्यवति ता। एतस्मादाग्नीध्रोत्तरे श्रोणन्ते सङ्कादश-
न्त्यथ द्वाभ्यामात्मन्यग्निं गृह्णीते मयि गृह्णाम्यग्रे अग्निं यो नो
अग्निरिति। स्वयंचितिं जपति यास्ते अग्ने समिधो यानि
धामेति। श्येनमश्वमभिमृश्याधिद्रवत्यपामिदं न्ययनं नमस्त
इति द्वाभ्यामथाधिद्रुत्य चतुर्थे संचिताहुती जुहोत्यग्ने
किंशिल तत्वा यामीति। दक्षिणतो विभक्तिमुपदधात्यग्ने
स्तोमं मनामह इति। तथादेवतं कृत्वा सूददोहसं करोत्यथैताः
सप्त स्कन्ध्याः प्राचीराघातयति द्वे चतव्ये स्वराजं च विश्व-
ज्योतिषं चैकाष्ट यजुषं द्वे संयान्यावृतव्ये उपदधाति तपश्च
तपस्यश्चेत्यथैकामनूपदधात्यग्नेर्योनिरसीति स्वराजं च विश्व-
ज्योतिषं च स्वराट् ज्योतिरधारयत्प्रजापतिस्त्वा सादयत्वित्यु-
त्तरामथ यजुषमुपदधाति रय्यै पोषाय सजातानां मध्यमस्थे-
याय मया त्वा सयुजा युजा युनज्मीत्यथ संयान्यावुपदधा-
त्यन्तरिक्षमस्यन्तरिक्षाय त्वेति। तथादेवतं कृत्वा सूददोहसः
करोति। ॥ ४४ ॥

अथाषाढा उपदधात्यग्ने जातान्प्रणुदा नः सपत्नानिति
पुरस्तादुपदधाति सहसा जातानिति पश्चाच्चतुश्चत्वारिंश
स्तोम इति दक्षिणतः षोडश स्तोम इत्युत्तरतस्तासां पुरीष-
वतीं मध्य उपदधाति पृथिव्याः पुरीषमस्यप्सो नामेति। तथा-
देवतं कृत्वा सूददोहसः करोत्यथ विराज उपदधात्येवञ्छन्दो
वरिवश्छन्द इति चत्वारिंशतं दशदश दिक्षु न मध्ये। ऽस्तृ-
चोपदधातीति ब्राह्मणं। तथादेवतं कृत्वा सूददोहसः करो-

त्यथ सोमभागा उपदधाति रश्मिरसि क्षयाय त्वा क्षयं जिन्वेत्येकविंशतिꣳ सप्तसप्त दिक्षु तिस्रो मध्ये। तथादेवतं कृत्वा सूददोहसः करोत्यथ नाकसद उपदधाति राज्ञ्यसि प्राची दिग्वसवस्ते देवा अधिपतय इति पञ्चैकैकां दिक्ष्वेकां मध्ये। तथादेवतं कृत्वा सूददोहसः करोत्यथ पञ्चचोडा उपरिष्टान्नाकसदामुपदधात्ययं पुरो हरिकेशः सूर्यरश्मिरिति पञ्चैकैकां दिक्ष्वेकां मध्ये। तासां पश्चात्प्राचीमुत्तमामुपदधात्यथ यं यजमानो द्वेष्टि तं मनसा ध्यायति। तथादेवतं कृत्वा सूददोहसः करोत्यथ छन्दाꣳस्युपदधात्यग्निर्मूर्धा दिव इत्येतस्यानुवाकस्य तिस्रस्तिस्रो यथाजातं। गायत्रीः पुरस्तादुपदधाति त्रिष्टुभो दक्षिणतो जगतीः पश्चादनुष्टुभ उत्तरतो बृहतीर्मध्य। उष्णिहः पुरस्तादुपदधाति पङ्क्तीर्दक्षिणतोऽक्षरपङ्क्तीः पश्चादतिच्छन्दसमुत्तरतो द्विपदा मध्ये। अपि वातिच्छन्दसं मध्ये द्विपदा उत्तरतस्तथादेवतं कृत्वा सूददोहसः करोत्यथ दक्षिणेऽꣳसे कृत्तिका उपदधात्यम्बा नामासि दुला नामासीति सप्त गुल्मकृतास्तथादेवतं कृत्वा सूददोहसः करोत्यथ वृष्टिसनीरुपदधाति पुरोवातसनिरस्यभ्रसनिरसीति पञ्चैकैकां दिक्ष्वेकां मध्ये। अनुपरिहारꣳ सादयतीति ब्राह्मणं। तथादेवतं कृत्वा सूददोहसः करोत्यथादित्येष्टका उपदधाति सलिलाय त्वा सर्णीकाय त्वेत्यष्टौ द्वे द्वे दिक्षु न मध्ये। तथादेवतं कृत्वा सूददोहसः करोत्यथ घृतेष्टका उपदधात्यृचे त्वा रुचे त्वेति पञ्चैकैकां दिक्ष्वेकां मध्ये। अनुपरिहारꣳ सादयतीति ब्राह्मणं।

तथादेवतं कृत्वा सूददोहसः करोत्यथ यशोदा उपदधाति यशोदां त्वा यशसि सादयामीति पञ्चैकैकां दिक्ष्वेकां मध्ये । तथादेवतं कृत्वा सूददोहसः करोत्यथ भूयस्कृत उपदधाति भूयस्कृदसि वरिवस्कृदसीति पञ्चैकैकां दिक्ष्वेकां मध्ये । तथादेवतं कृत्वा सूददोहसः करोत्यथाप्सुषद उपदधात्यप्सुषदसि श्येनसदसीति पञ्चैकैकां दिक्ष्वेकां मध्ये । तथादेवतं कृत्वा सूददोहसः करोत्यथ द्रविणोदा उपदधाति पृथिव्यास्त्वा द्रविणे सादयामीति पञ्चैकैकां दिक्ष्वेकां मध्ये । तथादेवतं कृत्वा सूददोहसः करोत्यथायुष्या उपदधाति प्राणं मे पाह्यपानं मे पाहीति सप्तैकैकां दिक्षु तिस्रो मध्ये । तथादेवतं कृत्वा सूददोहसः करोत्यथर्तुनामान्युपदधाति यावा अयावा इति सप्तैकैकां दिक्षु तिस्रो मध्ये । तथादेवतं कृत्वा सूददोहसः करोति । ॥ ४५ ॥ चतुर्दशः ॥

अथेन्द्रतनूरुपदधात्यग्निना विश्वाषाडिति द्वाविंशतिं पञ्च पञ्च दिक्षु द्वे मध्ये । तथादेवतं कृत्वा सूददोहसः करोत्यथ यज्ञतनूरुपदधाति प्रजापतिर्मनसान्धोऽच्छेत इति चतुस्त्रिंशतमष्टावष्टौ दिक्ष्वेकां मध्ये । तथादेवतं कृत्वा सूददोहसः करोत्यथ ज्योतिष्मतीरुपदधाति ज्योतिष्मतीं त्वा सादयामीति द्वादश तिस्रस्तिस्रो दिक्षु न मध्ये । तथादेवतं कृत्वा सूददोहसः करोत्यथ भूतेष्टका उपदधाति पृथिव्यै स्वाहान्तरिक्षाय स्वाहेति द्वादश तिस्रस्तिस्रो दिक्षु न मध्ये । तथादेवतं कृत्वा सूददोहसः करोत्यथाव्यानीरुपदधाति व्रतायुधाय व्रत-

Digitized by Google

वीर्यायेति पञ्चैकैकां दिक्ष्वेकां मध्ये । तथादेवतं कृत्वा सूद-
दोहसः करोत्यथ राष्ट्रभृत उपदधात्यग्ने यशस्विन्यशसेमम-
र्पयेति चतस्र एकैकां दिक्षु न मध्ये । तथादेवतं कृत्वा सूद-
दोहसः करोत्यथ दक्षिणेऽंसे पौर्णमासीमुपदधाति पूर्णा
९ पश्चादिति । तथादेवतं कृत्वा सूददोहसं करोत्यथ दक्षिण
एवांसे नक्षत्रेष्टका उपदधाति कृत्तिका नक्षत्रमग्निर्देवतेत्येता
रोचयत्यग्ने रुच स्थ प्रजापतेर्धातुः सोमस्यर्चे त्वा रुचे त्वा द्युते
त्वा भासे त्वा ज्योतिषे त्वेत्येतं नक्षत्रपथं रोहिणीप्रभृत्या
विशाखाभ्यामायातयति[1] । दक्षिणादंसाद्दक्षिणां श्रोणिमभ्या-
१० यातयत्यथ[2] पुच्छसन्धौ चात्मसन्धौ चामावास्यामुपदधाति यत्ते
देवा अदधुर्भागधेयमित्येतं नक्षत्रपथमनूराधाप्रभृत्यापभर-
णीभ्य आयातयत्युत्तरायै श्रोणेरुत्तरमंसमभ्यायातयत्यथोत्तर[3]
एवांसे पौर्णमासीमुपदधाति पूर्णा पश्चादित्यसंस्पृष्टां उप-
दधातीति ब्राह्मणं । नक्षत्रेष्टकाभिश्चितिराप्यते । तथादेवतं
११ कृत्वा सूददोहसः करोत्यथावहृत्य कृष्णमश्वमभिघ्रस्य तनु-
पुरीषमुपदधाति पृष्टो दिवीति । तथादेवतं कृत्वा सूददोहसं
करोत्यथ[4] षष्ठीं चितिं चिनुते संयच्च प्रचेताश्चेति पञ्चैकैकां
दिक्ष्वेकां मध्ये । तथादेवतं कृत्वा सूददोहसः करोत्यथाग्निं

---

१ Thus M Tr U; °शाखाभ्यां चायात° Be B; °शाखाभ्यामभ्यायात° H.

२ °श्रोणीम° some of the MSS.

३ Thus corrected; all MSS.: °श्रोणेरोत्तरम°।

४ चय i.s. of चय BH.

सर्वतोमुखं चिनुते ऽग्नेरङ्गानि प्राजापत्यामृषभं लोकंपृणाः । प्राच्याच लोकंपृणया प्रचीत्यग्निं प्राचीभिः संप्रच्छादयन्त्यथो-दीचीभिः । प्राचीभिस्त्वेव निस्तिष्ठन्ति । यावदन्नं चेष्यमाणो भवति तावदन्नं[1] चिनुते । ऽथानभिमृष्टं चितिक्लृप्त्या भवति । तदेतास्ततः स्वयमातृण्णा याचति । ता दिक्षूपदधाति प्राणाय त्वा चक्षुषे त्वा तया देवतयाङ्गिरस्वद्ध्रुवा सीद व्यानाय त्वा[2] चक्षुषे त्वा तया देवतयाङ्गिरस्वद्ध्रुवा सीदापानाय त्वा चक्षुषे त्वा तया देवतयाङ्गिरस्वद्ध्रुवा सीद वाचे त्वा चक्षुषे त्वा तया देवतयाङ्गिरस्वद्ध्रुवा सीदेत्यथ स्वयमातृण्णामश्वमवघ्राप्याविदुषा
ब्राह्मणेन सहाधिद्रुत्योपदधाति सुवरायोस्त्वा सदने सादया- १०
मीत्यनुद्रुत्य सूर्यस्त्वाभिपातु मह्या स्वस्त्या छर्दिषा शंतमेन तया देवतयाङ्गिरस्वद्ध्रुवा सीदेत्यपान्यात्तृतीयामुपधायेत्यपानित्य-थैव ब्राह्मणो वरं ददात्यथ स्रुचि चतुर्गृहीतं गृहीत्वा स्वयमा-तृण्णावकाशे जुहोति चित्तिं जुहोमि मनसा घृतेनेत्यङ्गुष्ठाभ्या-
मन्वारभ्यान्वारोहं वाचयति दिवमाक्रमिषꣳ सुवरगन्मेत्यपरे ११
चिते हिरण्येष्टकामुपदधाति सुवरसि सुवर्मे यच्छ दिवं यच्छ दिवो मा पाहीति । तां जघनेन प्रक्रमवेलायां मण्डलेष्टका-मुपदधाति द्यौरपराजितामृतेन विष्टेति । दक्षिणतो रेतः-सिचमुपदधाति या रेतःसिक् सा मे रेतो दधातु सा मे

---

१ B Be Ms. ins. चितिं।

२ The following words, unto सीदेत्यथ, l. 9, are found thus in U only; all the other MSS. abbreviate.

रेतः प्रजनयत्विति । तथादेवतं कृत्वा सूददोहसः करोत्यथोत्त-
रतः प्रक्रमवेलायां विकर्णीमुपदधाति प्रोषदश्वो न यवसे
अविष्यन्निति । तथादेवतं कृत्वा सूददोहसं करोत्यथ लोकंपृणा
उपदधाति लोकं पृण छिद्रं पृणेत्यथ¹ चितिकॢप्त्याभिमृशति
९ चित्तिमचित्तिं चिनवद्वि विद्वानित्याग्नेय्या पङ्क्त्यैतां चिति-
मभिमृश्य द्वाभ्यामवद्रवति वाश्र आसन्प्राष्वदा इत्यथापराह्णि-
कीभ्यां प्रवर्ग्योपसद्भ्यां प्रचरत्येतावदेवैतदहः कर्म क्रियते । वस-
न्त्येताꣳ रात्रीम् । ॥ ४६ ॥ पञ्चदशः ॥

अथैतस्मिन्नेव नवमे ऽह्नि दशमायाह्न उपकल्पयते सहस्रꣳ
१० हिरण्यशल्कानूर्ध्वं चिभ्यो ऽपरिमितानित्येक आहुस्तं यदि
सहस्रं भवन्ति द्वे शते पञ्चनाडीश्वोते² भवतो । ऽथ दशमे
ऽभ्युदित आदित्ये प्रवर्ग्योपसद्भ्यां प्रचरति । समानं पुरीष-
स्योपधानमथ पात्र्यामप आनीय हिरण्यशल्कान्संप्रकीर्य द्वाभ्यां-
द्वाभ्याꣳ शताभ्यां प्रोक्षति सहस्रस्य प्रमासीति यत्प्राङ्
११ स्वयमातृण्णायै भवति सहस्रस्य प्रतिमासीति यद्दक्षिणा
स्वयमातृण्णायै भवति सहस्रस्य विमासीति यत्प्रत्यक् स्वय-
मातृण्णायै भवति सहस्रस्योन्मासीति यदुदक् स्वयमातृण्णायै
भवत्यथ मध्ये द्वाभ्याꣳ शताभ्यां प्रोक्षति साहस्रो ऽसि सहस्राय
त्वेत्यथोत्तरे ओषन्ते तिष्ठन्निष्टका धेनूः कुरुत इमा मे अग्न

---

¹ अथ MTr; अथा the other MSS.

² पञ्च॰ all; ॰नाडीश्वोवे Tr UH Ms; ॰नाडीश्वेते BeM; ॰नाडीषोवे B; Bhav.: पञ्चनाडीषु पञ्चिपथपुरुष्वितिषु निचिषे[षु] भवतः ।

Digitized by Google

इष्टका धेनवः सन्त्वित्यन्तादनुवाकस्याथापराह्णिकीभ्यां प्रवर्ग्यो-
पसद्भ्यां प्रचरत्येतावदेवैतदहः कर्म क्रियते । वसन्त्येताꣳ रात्रि-
मथैतस्मिन्नेव दशमे ऽह्न्येकादशायाञ्च उपकल्पयते ऽर्कपर्ण-
मजक्षीरं गावीधुकं चरुं तिसृधन्वमश्मानमुदकुम्भं मण्डूक-
मवकां वेतसशाखां दर्भस्तम्बमाज्यस्थालीꣳ सस्रुवां दीर्घवꣳशं
द्वादशमित्यथैकादशे ऽभ्युदित आदित्ये प्रवर्ग्योपसद्भ्यां प्रच-
रति । स दीर्घवꣳशे स्रुवं प्रबध्योत्तमे संचिताहुती जुहोत्यग्ने
वन्य तन्वा यामीति । ॥ ४७ ॥

यावदेवाध्वर्युश्चेष्टति तावदेष प्रतिप्रस्थातोत्तरस्य पक्षस्य
चरमयेष्टकया प्रत्यूढपुरीषयोपरमत्यथैतस्यार्कपर्णस्य पुटमन्तर-
वर्त्माविषं कृत्वोदङ् तिष्ठन्मुखदघ्ने धारयन्नाहाहरानयेति । स
यत्र धारेष्टकां प्राप्नोति तत्प्रतिपद्यते नमस्ते रुद्र मन्यव
इत्यान्तमेतमनुवाकं निगद्य द्वितीयं तृतीयं । चतुर्थस्य यथाभि-
जानाति नमः क्षत्तृभ्य इति तत्स्वाहाकरोति । सो ऽत एव
प्राङावृत्य नाभिदघ्ने धारयन्संपत्नीभ्य इति प्रतिपद्यातिशिष्ट-
मनुवाकस्य[1] निगद्य पञ्चमꣳ षष्ठꣳ । सप्तमस्य यथाभिजानाति
नमो वर्ष्याय चेति तत्स्वाहाकरोति । सो ऽत एव दक्षिणा-
वृत्य जानुदघ्ने धारयन्नवर्ष्याय चेति प्रतिपद्यातिशिष्टमनुवाकस्य[1]
निगद्याष्टमं नवमं दशममेकादशस्य यथाभिजानाति य एता-
वन्तश्च भूयाꣳसश्चेति तत्स्वाहाकरोति । सो ऽत एव प्रत्यङा-

---

१ Thus M only ; मनुवाकं all the other MSS.

हृत्य गुल्फदघ्ने धारयन्नमो रुद्रेभ्यो ये पृथिव्यामित्येतद्यजमानं वाचयति । नाभिदघ्ने धारयन्नमो रुद्रेभ्यो ये ऽन्तरिक्ष इत्येतद्यजमानं वाचयति । ग्रीवदघ्ने[1] धारयन्नमो रुद्रेभ्यो ये दिवीत्येतद्यजमानं वाचयत्यथैतदर्कपर्णं यं द्वेष्टि तस्य संचरे पशूनां न्यस्यति । यदु वै न द्विष्यात्स्ववटे न्यस्यत्यथैतं गावीधुकं चरुं चरमायामिष्टकायां निदधाति यो रुद्रो अग्नौ यो अप्सु य ओषधीषु यो रुद्रो विश्वा भुवनाविवेश तस्मै रुद्राय नमो अस्त्वित्यथैतत्त्रिःसृधन्वं याचति । तेनोत्तरे श्रोण्यन्ते तिष्ठन्नुपतिष्ठते । ऽपि वानुपरिक्रामं यत्ते रुद्र पुरो धनुस्तद्वातो अनुवातु ते तस्मै ते रुद्र संवत्सरेण नमस्करोमि यत्ते रुद्र दक्षिणा धनुर्यत्ते रुद्र पश्चाद्धनुर्यत्ते रुद्रोत्तराद्धनुर्यत्ते रुद्रोपरि धनुरित्यथैनद्याचितं ब्राह्मणाय दद्यादथास्यैष उदकुम्भ उत्तरे श्रोण्यन्ते ऽश्मना संसृष्टः[2] शेते । स यो बलवांस्तमाहानेनोदकुम्भेन संततया धारया त्रिः प्रदक्षिणं परिषिञ्चन्परीहीति । स तथा करोति । परिषिच्यमाने यजमानं वाचयत्यश्मन्नूर्जं पर्वते शिश्रियाणां वाते पर्जन्ये वरुणस्य शुष्मे। अद्भ्य ओषधीभ्यो वनस्पतिभ्यो ऽधि संभृतां तां न इषमूर्जं धत्त मरुतः संरराणा इत्यथैतं कुम्भमश्मना संसृष्टं सादयत्यश्मंस्ते क्षुदमुं ते शुगृच्छतु यं द्विष्म इति । निधाय कुम्भं

---

1 Thus M Tr BU (sec. m.) Ms Keś.; ग्रीवा° Be U (pr. m.).

2 Thus Bhav. (one Ms.) and Ms.; श्मानं ससृष्टं M; संसृष्टः Tr Be BC Bhav. (another Ms.) संसक्तः H.

Digitized by Google

यथेतं त्रिः पुनः प्रतिपर्येत्यथैतस्मिन्नेव दीर्घवंशे प्रबध्नाति मण्डूकमवकां वेतसशाखां दर्भस्तम्बमिति । तेन वल्शाग्रं स्वयमातृण्णायै भवति तद्विकर्षति समुद्रस्य त्वावकया हिमस्य त्वा जरायुणेति ॥ ४८ ॥

द्वाभ्यां पुरस्ताद्द्वाभ्यां दक्षिणतो द्वाभ्यां पश्चाद्द्वाभ्यामुत्तरतो ऽष्टाभिर्विकर्षतीति ब्राह्मणमथैतास्वेव कार्ष्णाजिनीरुपानह एतं[1] च[1] दीर्घवंशꣳ संछिद्य चात्वाले संप्रकिरन्त्यथ प्रान्तो ऽग्नि-रित्याज्यस्थालीꣳ सस्रुवामादायाधिद्रुत्याज्यस्थाल्याः[2] स्रुवेणोप-घातꣳ सर्पाहुतीर्जुहोति । समीची नामासि प्राची दिगिति पश्चादासीनः पूर्वे बिले जुहोत्योजस्विनी नामासि दक्षिणा दिगित्युत्तरत आसीनो दक्षिणे बिले जुहोति । प्राची नामासि प्रतीची दिगिति पुरस्तादासीनो ऽपरे बिले जुहो-त्यवस्थावा नामास्युदीची दिगिति दक्षिणत आसीन उत्तरे बिले जुहोत्यथैतेनैव यथेतमेत्य यथैव प्रथममहौषीत्तद्दु जुहो-त्यधिपत्नी नामासि वशिनी नामासीत्यथावद्रुत्याग्निꣳ साम-भिरुपस्थापयति । गायत्रेण पुरस्तादुपतिष्ठते ऽग्नेर्हृदयेन दक्षिणमुपपक्षꣳ रथंतरेण दक्षिणं पक्षं वारवन्तीयेन दक्षिणाꣳ श्रोणिमृतुस्थायज्ञायज्ञियेन[3] पुच्छꣳ श्यैतेनोत्तराꣳ श्रोणिं

---

१ Thus Tr BU Ms; एतंच Be; एतच MH.

२ Thus U (sec. m.) only; °स्थाल्या all the other MSS., also Ms; but Msc: चाज्यस्थालास्थकामात् ।

३ °यज्ञीयेन Tr H Ms.

दक्षिणोत्तरं पथं प्रजापतेर्हृदयेनोत्तरमुपपद्यं वामदेव्येन मध्यमं याह होतरग्नेरुक्थेनाग्निमनुशꣳसेति । यदि होता न कामयते प्रयमाण एव अयनेन पुच्छं तृणानि सꣳस्तीर्य तेषूपविश्याग्नेरुक्थेनाग्निमनुशꣳसति पिता मातरिश्वाच्छिद्रा पदा धा अच्छिद्रा उशिजः पदानुतक्षुः सोमो विश्वविन्नेता नेषद्बृहस्पतिरुक्थामदानि शꣳसिषदोमिति यज्ञस्य पिर्वीथेनꣳ स्तुतशस्त्रयोर्दोहं वाचयतीष्टो यज्ञो भृगुभिराशीर्दा वसुभिस्तस्य त इष्टस्य वीतस्य द्रविणेह भक्षीयेत्यथापराह्णिकीभ्यां प्रवर्ग्योपसद्भ्यां प्रचरत्येतावदेवैतदहः कर्म क्रियते । वसन्त्येताꣳ रात्रिम् । ॥ ४९ ॥ षोडशः ॥

अथैतस्मिन्नेवैकादशे ऽह्नि दाशरात्रिकान् उपकल्पयत औदुम्बरꣳ स्रुवमौदुम्बरं द्रोणमौदुम्बरं प्रसेकमौदुम्बरीं वितष्टिं[1] तस्यां पञ्चगृहीतमाज्यं भवति दध्नः पूर्णामौदुम्बरीं तिस्र औदुम्बरीः समिधस्तिस्रो नानावृक्ष्या नानावृक्ष्यमिध्मं दधि मधुमिश्रं पृषुष्टिमवकाभारं पृश्निमश्मानमाज्यप्रोक्षं द्वितीयꣳ होतारमप्रतिरथस्यानुवक्तारं विलीनोत्पूतस्याज्यस्य द्वौ वा त्रीन्वा कुम्भान्मानौदनिकान्व्रीहीन्सर्वौषधꣳ[2] रोहितं चर्मानडुहं कृष्णाजिनं श्वेतवत्साया पयो रथं वपावहोमीयꣳ शाकलान्परिधीन्निध्मं दाशमे ऽनुदित आदित्ये प्रवर्ग्योपसद्भ्यां प्रचरत्यथोपनिष्क्रम्य संप्रैषमाह सुब्रह्मण्य सुब्रह्मण्यामाह्वयार्धस्तनमतं प्रच-

[1] Thus Tr U Be B Ms; वितर्दीं MH.

[2] Thus MU Tr Ms; सर्वौषधि॰ B Be H.

च्छतेत्याह्वयति सुब्रह्मण्यः सुब्रह्मण्यामर्धस्तनप्रतं प्रयच्छत्यथादत्ते पञ्चगृहीतमाज्यं दधि मधुमिश्रं पुमुष्टिमवकाभारमित्येत-त्समादायाधिद्रुत्याह्वण्या पञ्चगृहीतेन स्वयमातृण्णां[1] व्याघार-यति नृषदे वडप्सुषदे वड्वनसदे वड् बर्हिषदे वट् सुवर्विदे वडित्येतयैव स्रुचोपघातं दध्ना मधुमिश्रेण गन्धर्वाहुती-र्जुहोति । हेतयो नाम स्थ तेषां वः पुरो गृहा इति पश्चा-दासीनः पूर्वे बिले जुहोति । निलिम्पा नाम स्थ तेषां वो दक्षिणा गृहा इत्युत्तरत आसीनो दक्षिणे बिले जुहोति । वज्रिणो नाम स्थ तेषां वः पश्चाद्गृहा इति पुरस्तादासीनो ऽपरे बिले जुहोत्यवस्थावानो नाम स्थ तेषां व उत्तराद्गृहा इति दक्षिणत आसीन उत्तरे बिले जुहोत्यथैतेनैव यथेत-मेत्य यथैव प्रथममहौषीत्तद्धे जुहोत्यधिपतयो नाम स्थ कव्या नाम स्थेत्यथाह प्रतिप्रस्थातरिममग्निं कूर्मंपृषन्तं कुर्विति । तं स कूर्मंपृषन्तं करोति । नाप्रोक्षितमधितिष्ठत्यथ पुमुष्टिमादाय दध्ना मधुमिश्रेणावोक्षति ये देवा देवानां ये देवा देवेष्वधि देवत्वमायन्निति ॥ ५० ॥

द्वाभ्यां पुरस्तात्ताभ्यां दक्षिणतस्ताभ्यां पश्चात्ताभ्यामुत्तरतो । ऽनुपरिचारमवोक्षतीति[2] ब्राह्मणमथैनमवकाभारेण प्रतिच्छाद्य गोप्तारं समादिश्यावद्रुत्यापराजिकाभ्यां प्रवर्ग्योपसद्भ्यां प्रचर-त्यथोपनिष्क्रम्य संप्रैषमाह सुब्रह्मण्य सुब्रह्मण्यामाह्वयाग्नीदेध्मा-

1 Thus M Tr UH; °ण्णा the other MSS.

2 नुपरिचारम° M, but cp. TS. v. 4.5.3.

न्मारुतान्निर्वप[1] प्रतिप्रस्थातः प्रवर्ग्यस्यावृता प्रवर्ग्यꣳ सꣳसाद्योद्वासनायेति । प्रैषैतत्पदं कुर्वन्ति । गार्हपत्ये तृतीयमुपयमनीषु तृतीयं नि तृतीयं दधत्यथ प्रवर्ग्यस्यावृता प्रवर्ग्यमुखास्याधिश्रयति वैश्वानरं द्वादशकपालं मारुताꣳश्च सप्तकपालानथ गार्हपत्य आज्यं विलाप्योत्पूय स्रुचि चतुर्गृहीतं गृहीत्वाहवनीये ऽनीकवन्तं जुहोत्यग्निस्तिग्मेन शोचिषेत्यनुद्रुत्य सेनानीकेन सुविदत्रो अस्मे इति जुहोत्यपरं चतुर्गृहीतं गृहीत्वाहवनीय एव वैश्वकर्मणानि जुहोति । य इमा विश्वा भुवनानि जुह्वदित्यनुद्रुत्य विश्वकर्मा ह्यजनिष्ट देव इति जुहोत्यपरं चतुर्गृहीतं गृहीत्वा चक्षुषः पितेत्यनुद्रुत्य विश्वकर्मन्हविषा वर्धनेनेति जुहोति । नानेव सूक्ताभ्यां जुहोति नानेव सूक्तयोर्वीर्यं दधातीति ब्राह्मणमथ तिस्र औदुम्बरीः समिध आदधात्युदेनमुत्तरां नयेन्द्रेमं प्रतरां कृधि यस्य कुर्मो हविर्गृहे इत्येताभ्यादधात्यथ प्रणयनीयमुपोपयमनीः कल्पयन्ति चात्वालादथ संप्रैषमाहाग्नये प्रणीयमानायानुब्रूह्यग्नीदेकस्फ्ययानुसंधेहि द्वितीयो होताप्रतिरथमन्वब्रवीत्विति । प्रतिपद्यत एष द्वितीयो होताप्रतिरथमाशुः शिशान इति । दशर्चं भवतीति ब्राह्मणमथैतेनैव सहाग्निमाददते पृश्निमश्मानमाज्यप्रोक्षं दर्भाः पूर्णामौदुम्बरीं तिस्रो नानावृक्ष्या नानावृक्ष्यमिध्मꣳ शाकलान्परिधीनित्यथैनमुद्यच्छत उदु त्वा विश्वे देवा इति । पञ्चभिर्हरतीति

१ Thus Tr H Ms; मारुताभि॰ Be; मारुतंभि॰ MUB.

Digitized by Google

ब्राह्मणं । तासां द्वे परिग्रहवती भवतो । ऽथ विषुवत्याग्नीध्रस्य काले पृश्निमश्मानं निदधाति विमान एष दिवो मध्य आस्त इति द्वाभ्यामथ चतसृभिरा पुच्छादेतीन्द्रं विश्वा अवीवृधन्निति । धारयन्त्येतमग्निमथैनꣳ संचितमाज्यप्रोक्षेण प्रोक्षति ॥ ५१ ॥

वसवस्त्वा रुद्रैः पुरस्तात्पान्त्विति पुरस्तात्पितरस्त्वा यमराजानः पितृभिर्दक्षिणतः पान्त्विति दक्षिणत आदित्यास्त्वा विश्वैर्देवैः पश्चात्पान्त्विति पश्चाद्द्युतानस्त्वा मारुतो मरुद्भिरुत्तरतः पात्वित्युत्तरतो देवास्त्वेन्द्रज्येष्ठा वरुणराजानो ऽधस्ताच्चोपरिष्टाच्च पान्त्वित्युपरिष्टादथैतेनैव सहाग्निनाधिद्रवति प्राचीमनु प्रदिशं प्रेहि विद्वानग्नेरग्ने पुरो अग्निर्भवेह नाकमुख्यं पृथिव्या अध्युदन्तरिक्षमारुहꣳ सुवर्यन्तो नापेक्षन्ते अग्ने प्रेहि प्रथमो देवयतामिति पञ्चभिर्धारयन्त्येतमग्निमथ दध्नः पूर्णामौदुम्बरीꣳ स्वयमातृण्णायां जुहोति । नक्तोषासेति पुरोऽनुवाक्यामनूच्याग्ने सहस्राक्षेति जुहोत्यथ प्रदक्षिणमावृत्यैनं प्रतिष्ठापयति सुपर्णो ऽसि गरुत्मानिति । तिसृभिः सादयतीति ब्राह्मणमथैनं विश्वस्याहुतिषाहं कृत्वाध्वराहुतिभिरभिजुहोत्यग्निर्यज्ञं नयतु प्रजानन्नेनं यज्ञहनो विदन्देवेभ्यः प्रभूताद्यज्ञं प्रप्र यज्ञपतिं तिर स्वाहा वायुर्यज्ञं नयतु प्रजानन्सूर्यो यज्ञं नयतु प्रजानन्यज्ञो यज्ञं नयतु प्रजानन्नेनं यज्ञहनो विदन्देवेभ्यः प्रभूताद्यज्ञं प्रप्र यज्ञपतिं तिर स्वाहेत्यथावहृत्याग्निवत्युत्तरं परिग्राहं परिगृह्य योयुपित्वा तिर्यञ्चꣳ रथꣳ कृत्वा संप्रेष्यमाह

प्रोक्षणीरासादयेमार्बर्हिरुपसादयेत्यथाधिहृत्य प्राकृतात्परि-
धीन्परिधाय नानावृक्ष्यमिध्ममभ्यज्य स्वाहाकारेणाभ्याधाय
तिस्रो नानावृक्ष्याः समिध आदधाति प्रेद्धो अग्ने दीदिहि
पुरो न इत्यौदुम्बरीं विधेम ते परमे जन्मन्नग्न इति वैकङ्कतीं
ताꣳ सवितुर्वरेण्यस्य चित्रामिति शमीमयीमथ द्वे स्रुवाहुती
जुहोति चित्तिं जुहोम्यग्ने तमद्येत्यथ स्रुचि चतुर्गृहीतं गृहीत्वा
नाध्वस्य पूर्णाꣳ स्रुचं जुहोति सप्त ते अग्ने समिधः सप्त जिह्वा
इत्यथ जुह्वमनसा द्विरग्नो ध्यायेद्दिग्भ्य एवैनमवरुन्द्धे दध्ना
पुरस्ताज्जुहोत्याज्येनोपरिष्टात्तेजसैवास्मा इन्द्रियं च समीचो
दधातीति ब्राह्मणमथात्रैव तिष्ठन्याचति वैश्वानरं द्वादशकपालं
मारुताꣳश्च सप्तकपालानथोपस्तीर्य सर्वश एव वैश्वानरमवदध-
दाहाग्नये वैश्वानरायानुब्रूहीति द्विरभिघारयत्यत्याक्रम्याश्रा-
व्याहाग्निं वैश्वानरं यजेति वषट्कृते मध्ये जुहोत्यथैनꣳ
स्रुवाहुतिभिरभिजुहोति सुवर्न[1] घर्मः स्वाहेति पञ्चभिरथ
मारुतैः प्रचरति[2] ॥ ५२ ॥

पर्युपस्तारं दर्विहोमाकारमौदुम्[3] चान्यावृत् सत्यमुद्धृत्य
शुक्रज्योतिश्च चित्रज्योतिश्चेति जुहोति शुक्रज्योतिश्च चित्र-
ज्योतिश्चेत्यनुद्रुत्य ऋतजिच्च सत्यजिच्चेति जुहोत्यृतजिच्च सत्य-
जिच्चेत्यनुद्रुत्यर्तश्च सत्यश्चेति जुहोत्यृतश्च सत्यश्चेत्यनुद्रुत्य यो

१ Thus U Ms, cp. TS. v. 7. 5. b; सुवर्ण the other MSS.

२ •तैः प्रचरति Tr U B Ms; •तैश्चरति MH Be Bhav.

३ दार्विहो• M.

ऽरण्ये ऽनुवाक्यो गणस्तमनुद्रुत्य जुहोति । यो ऽरण्ये ऽनुवाक्यो गणस्तमनुद्रुत्येदृक्षास एतादृक्षास इति जुहोतीदृक्षास एतादृक्षास इत्यनुद्रुत्य मितासश्च संमितासश्च न इति जुहोति । मितासश्च संमितासश्च न इत्यनुद्रुत्येदृङ् चान्यादृङ् चेति जुहोति । तानभितो वैश्वानरं परिचिनोति । गणेन गणमनुद्रुत्य जुहोत्यु।च्चैर्वैश्वानरस्याश्रावयत्युपांशु मारुताञ्जुहोतीति ब्राह्मणम् । ॥ ५३ ॥

अथैतं प्रसेकमग्नावायातयति दक्षिणतो वोदञ्चं पश्चाद्वा प्राञ्चं । तस्य स्रुगिव पूर्वार्धो भवत्येवमेव मध्यं । चमस इव बुध्नस्तस्मिंश्चतुर उपस्तृणान आहाप्रमत्तः संततमानय वसोर्धारां निगदिष्यामीति । स यत्र धाराग्निं प्राप्नोति तत्प्रतिपद्यते ऽग्नाविष्णू सजोषसेति सर्वामान्तं[1] वसोर्धारामथैतं प्रसेकमग्नावनुप्रहरत्यथैनं संस्रावेणाभिजुहोत्यथ यदाज्यमुच्छिष्यते तस्मिन्ब्रह्मौदनं पचति । तं ब्राह्मणाश्चत्वारः प्राश्नन्ति । तेभ्यश्चतस्रो धेनूर्दद्यादिति[2] ब्राह्मणमथास्यैतत्पुरस्तादेवौदुम्बरे द्रोणे सर्वौषधं दध्नाज्येन समुदायुतं भवति । तस्मादौदुम्बरेण स्रुवेणोपघातं वाजप्रसवीयं जुहोति वाजस्येमं प्रसवः सुषुवे ऽग्रे वाजो नः सप्त प्रदिश इति चतुर्दश स्रुवाहुतीरभिषेकाय प्ररेकं परिशिनष्ट्यथैनमपिधाय प्रज्ञातं निदधात्यथ नक्तोषासेति

---

१ सर्वेम॰ M Tr H Ms; सर्वाम॰ U Be B Bhav.

२ Thus MU Be B Ms (cp. TS. v. 7.3.4); ददाति i.s. of दद्यादिति H.

Digitized by Google

कृष्णायै श्वेतवत्सायै पयो जुहोत्यथ षड्ढाप्रहुतो जुहोत्यृताषाडृतधामेति। भुवनस्य पत इति रथमुखे पञ्चाहुतीर्जुहोत्यथ तिस्रो रुचो जुहोति याते अग्ने सूर्ये रुचो या वो देवाः सूर्ये रुचो रुचं नो धेहि ब्राह्मणेष्वित्यथ पाद्यामाज्यमानीयाञ्जलिनोपघ्नतं वातनामानि जुहोति समुद्रो ऽसि नभस्वानार्द्रदानुः शंभूर्मयोभूरभि मा वाहि स्वाहा मारुतो ऽसि मरुतां गणः शंभूर्मयोभूरभि मा वाहि स्वाहावस्युरसि दुवस्वाञ्छंभूर्मयोभूरभि मा वाहि स्वाहेति। वातस्तु हैके जुह्वतो मन्यन्ते[1]। ऽथैताञ्छाकलान्परिधीनग्नावनुप्रहरति। तदेतच्छाकलान्तम्। ॥ ५४ ॥ सप्तदशः ॥

अथ सदोहविर्धाने संमिनोति। सदोहविर्धाने संमित्याधरधिष्ण्यान्निवपति। तेषूपर्यग्निधिष्ण्यानुपदधाति अग्नाग्ने वर्षां विश्वेभ्यस्त्वेत्याग्नीध्रीय एकां च याजुषीं सप्त च लोकंपृणा। अथ होतुर्धिष्ण्य एकां चैव याजुषीमेकादश च लोकंपृणा। अथेतरेष्वेकैकां चैव याजुषीं सप्तसप्त च लोकंपृणा। अथ[2] मार्जालीय एकां च याजुषीं पञ्च च लोकंपृणा। अथाग्नीषोमौ प्रणयत्यग्नीषोमौ प्रणीय यूपस्याहुता यूपमुच्छ्रयति। सर्वान्तं यूपमुत्सृज्याग्नीषोमीयं पशुमुपाकरोति। तस्य प्रसिद्धं वपया चरित्वा वपाश्रपणी अनुप्रहृत्य[3] वसतीवरीर्गृहीत्वाथ[4]

---

१ Thus M Tr U H Bhav. Keś.; मन्वते Be; मन्यवे B.

२ B ins. च, Be च लोकंपृणा।

३ Here Tr ins.: वसुत्कामस्य चात्वाले मार्जयन्ते च

४ °वरीः परिस्तृ° U Be B Ms.

पशुपुरोडाशं निर्वपति। तमनुवर्तन्ते ऽष्टौ देवसुवाꣳ हवीꣳ-ष्यग्नये गृहपतये इत्येतानि। तानि नानावह्नन्ति[1]। नाना श्रपयन्ति। नानाधान्यानि भवन्ति। प्रैषवान्पशुपुरोडाशो ऽनुब्रूहि यजेतीतरेषाꣳ हविषाꣳ। स यत्र वारुणस्यावद्यन्नाह वरुणाय धर्मपतये ऽनुब्रूहीति तदुपभृति स्विष्टकृते सर्वेषाꣳ सकृत्सकृदुत्तरार्धादवद्यति। द्विरभिघारयति। न प्रत्यनक्त्य-त्याक्रम्याश्राव्याह वरुणं धर्मपतिं यजेति। वषट्कृते जुहोत्यथ वै भवतीष्टो वरुणो भवत्यनिष्टः स्विष्टकृदथास्य ब्रह्मा हस्तं गृह्णा-तीति। स[2] यजेष्टो वरुणो भवत्यनिष्टः स्विष्टकृदथास्य ब्रह्मा हस्तं गृह्णाति[2] ॥ ५५ ॥

सविता त्वा प्रसवानाꣳ सुवतामग्निर्गृहपतीनाꣳ सोमो वनस्पतीनाꣳ रुद्रः पशूनां बृहस्पतिर्वाचामिन्द्रो ज्येष्ठानां मित्रः सत्यानां वरुणो धर्मपतीनामित्येतदेव सर्वं भवति ये देवा देवसुव स्थ त इममामुष्यायणमनमित्राय सुवध्वं महते क्षत्राय महत आधिपत्याय महते जानराज्यायेत्यथैनं यज-मानायतने तिष्ठन्तं प्राहैष वो ऽमी[3] राजेति येषाꣳ श्रेष्ठी भवति। सोमो ऽस्माकं ब्राह्मणानां राजेतीतरे प्रत्याहुरथ भूर्भुवः सुवरिति वाचं विसृजते। दार्भ्यां मुखं विमृष्टे प्रति

---

१ Thus MU Be; नानावह्नति H; नानावधंति B; नानाविह्नन्ति Ms; तानि नाना पृथक् षविह्नन्ति (sic) Msc.

२ This clause is omitted in most of the MSS.

३ भरता (as TS. i. 8.10. d) Tr only, i. s. of मी।

Digitized by Google

त्वचाम राज्यमधायि सर्वे प्राता वरुणस्याभूवन्निति । गायत्रा-
भिष्णुक्रमाक्रमते[1] विष्णोः क्रमो ऽसि विष्णोः क्रान्तमसि
विष्णोर्विक्रान्तमसीत्यथ स्विष्टकृता चरति । न रौद्रेणेडाम-
वद्यत्यथासेनमभ्यवहरन्ति गभिष्ठमिडान्ताः[2] पुरोडाशाः संति-
ष्ठन्ते । पत्नीसंयाजान्तः पशुरैंद्रयशूलान्त इत्येके । ऽथ वसतीवरीः
परिहृत्य पयांसि विग्रिह्योपवसन्ति । ॥ ५६ ॥ अष्टादशः ॥

अथातो महाराज एव बुध्यन्ते । समानं कर्मा स्रुचांस्
सादनात्सादयित्वा स्रुचो ऽग्निं योगेन युनक्त्यग्निं युनज्मीमौ ते
पक्षौ चिदसि समुद्रयोनिरिति तिसृभिरथ राजानमुपावहृत्य
प्रातरनुवाकमुपाकरोति । परिहिते प्रातरनुवाके ऽपो ऽच्छैत्य-
ग्निरदैति[3] । यः क्रतुस्तमुपैति । प्रसिद्धो ऽभिषवः । प्रसिद्धं
ग्रहा गृह्यन्ते । समानं कर्माग्निनाग्रहादाश्विनं ग्रहं गृहीत्वैका-
दश रशना आदाय यूपमभ्येति । सर्वन्तं यूपमुत्सृज्यैकादशि-
नान्पशूनुपाकरोत्याग्नेयं कृष्णग्रीवं सारस्वतीं मेषीं बभ्रुं सौम्यं
पौष्णं श्यामं शितिपृष्ठं बार्हस्पत्यं शिल्पं वैश्वदेवमैन्द्रमरुणं
मारुतं कल्माषमैन्द्राग्नं संहितमधोरामं सावित्रं वारुणं पेत्व-
मिति । तेषां प्रसिद्धं वपाभिश्चरित्वा प्रसर्पन्ति प्रातःसवनाय ।

---

१ Thus Mu Tr BH; गायत्राग्नि॰ Be.

२ Thus U (sec. m.) Ms; गंभीर॰ Tr HU (pr. m.) गंविष्ठ॰ Be B; गभीरे ह्रदे M, which seems to be a periphrase of वपां गभिष्ठम्. Bhav.: तोऽन्नं पयसोपसन्नु निनयन्ति गभीरे ह्रदे ।

३ Thus only M; all the other MSS. उदैति ।

Digitized by Google

तदृजुधा संतिष्ठते । प्रसर्पन्ति माध्यंदिनाय सवनाय । स[1] कस्य क च मध्यंदिनो[2] भवति तदेतद्धिरण्यपात्रं मधोः पूरयित्वा सौवर्चिनवत्यावेष्ठ्याश्वमवघ्राप्य ब्रह्मणे ददाति । प्रसिद्धो ऽभिषवः । प्रसिद्धं यथा स्तुवन्ते । समानं कर्मा दाक्षिणेभ्यो । दाक्षिणानि हुत्वा त्रिभिर्मरुत्वतीयैश्चरति । सीदन्ति नाराशंसा आप्यायिता दक्षिणस्य हविर्धानस्यापालम्बमधोऽधो माहेन्द्रस्याथ पुरस्तादभिषेकस्य षट् पार्थानि जुहोत्यग्नये स्वाहा सोमाय स्वाहेत्येव यजमानायतने कृष्णाजिनं प्राचीनग्रीवमुत्तरलोमोपस्तृणाति । तस्मिन्यजमानं प्राञ्चमुपवेश्य सुवर्णरजताभ्याꣳ रुक्माभ्यां पर्युपास्य सर्वौषधेन पुरस्तात्प्रत्यञ्चमभिषिञ्चति । शौर्पतो ऽभिषिञ्चत्या मुखादन्ववस्रावयति ॥ ५७ ॥

देवस्य त्वा सवितुः प्रसवे ऽश्विनोर्बाहुभ्यां पूष्णो हस्ताभ्याꣳ सरस्वत्यै वाचो यन्तुर्यन्त्रेणाग्नेस्त्वा साम्राज्येनाभिषिञ्चामीन्द्रस्य त्वा साम्राज्येनाभिषिञ्चामि बृहस्पतेस्त्वा साम्राज्येनाभिषिञ्चामीति[3] । समुन्मृष्टे समुत्क्रोशन्त्यभिषिच्यमसावामुष्यायणो ऽमुष्य पुत्रो ऽमुष्य पौत्रो ऽमुष्य नप्ताग्निचवेनेत्येव भूर्भुवः सुवरिति वाचं

---

१ om. Be H.

२ माध्यंदिनो Tr H.

३ Some of the MSS. (MU Tr) give the formula बृहस्पतेस्त्वा etc. before इन्द्रस्य त्वा etc.; B Be give a text exactly as found TS. i. 7.10.h; H abbreviates thus: ०ग्नेस्त्वा साम्राज्येनाभिषिंचामसिन्द्रस्य त्वा ०मिति

विसृजते । हाभ्यां मुखं विमृष्टे । गायत्र्यान्विष्णुक्रमानक्रमते[1] । ऽथोपरिष्टादभिषेकस्य षट् पार्थानि जुहोति ॥ ५८ ॥

इन्द्राय स्वाहा घोषाय स्वाहेति । द्वादश भूतानामवेष्टीर्जुहोति पृथिव्यै स्वाहान्तरिक्षाय स्वाहेत्यथ माध्यंदिनं सवनं संतिष्ठते । प्रसर्पन्ति तृतीयसवनाय । प्रसिद्धमादित्यग्रहेण चरित्वाग्रयणं गृह्णाति । समानं कर्म पवमानात्पवमानेन चरित्वा स्वे धामन्पशुभिश्चरति[2] । तेषां नाना मनोता नाना देवता नाना प्रत्यभिमर्शना नाना वपाहोमाः समानो वनस्पतिः समानः स्विष्टकृत्प्रैषवान्समानीडा समान्यो दिशो । नाना दिश इत्येके । समानं कर्म यज्ञायज्ञियस्य[3] स्तोत्राद्यज्ञायज्ञियस्य[3] स्तोत्र एकयास्तुतं भवत्यथाग्निमभिमृशति नमस्ते अस्तु मा मा हिंसीरुद्धृतो दृप्तोदधिं भिन्धीति हाभ्याम् । समानं कर्म पत्नीसंयाजेभ्यः । पत्नीः संयाज्य प्राकृत्य ध्रुवामाप्याय्याध्वरिकाणि समिष्टयजूंषि हुत्वा दशाग्निकान्युपजुहोति यदाकूतात्समसुस्रोदिति । समानं कर्मावभृथादथैतस्मिन्नवभृथे द्वितीयामवभृथाहुतिं जुहोति समुद्राय वयुनाय सिन्धूनां पतये नम इति । प्रसिद्धो ऽवभृथ । उदयनीयेष्ट्वा[4]

---

1 Thus Tr BHU Ms; गायत्र्याम् Be; गायत्र्या M.

2 Thus M Tr BU (sec. m.) Ms; चरंति U (pr. m.) H Be.

3 Thus, with *i*, U Be H (the second time); with ī (both times) M Tr Ms.

4 Thus H; उदयनीयेनेष्ट्वा Tr BU; उदयनीयेष्ट्वा M.

Digitized by Google

मैत्रावरुणीं वशामुपाकरोति । तस्यै मैत्रावरुण्यामिक्षाप्यव-
दानीया भवति । सर्वशृ॑स्तां पशोः कुर्वन्त्यथ गार्हपत्य आज्यं
विलाप्योत्पूय स्रुचि चतुर्गृहीतं गृहीत्वाऽऽज्यस्य पूर्णाँ स्रुचमग्ने-
र्विमोकं जुहोतीम॑ स्तनमूर्जस्वन्तं धयापामित्यथैनमुपतिष्ठते
ये ऽग्नयः पुरीष्या इत्यथैनमाप्तिभिरुपतिष्ठत आपं त्वाग्ने मन-
सेति नवभिरनुष्टुप्छन्दसमथोदवसानीयया यजते । ऽथ देविका-
हविर्भिर्यजते । ऽथ त्रैधातवीयया यजते । ऽथ सौत्रामण्या
यजते । संवत्सरं न कंचन प्रत्यवरोहति । न शीर्षमांसं
खादति न वयसां मांसं । नाग्निं चित्वा रामामुपेयान्नाग्नि-
चिद्वर्षति धावेद्यदि धावेदुपावर्तेतामायमेवाभ्युपावर्तेत इति
ब्राह्मणम् । ॥ ५८ ॥ एकोनविंशः ॥

॥ इति दशमः प्रश्नः ॥

वाजपेयेन यक्ष्यमाणो भवति । स उपकल्पयते कृष्णाजिनꣳ सुवर्णरजतौ च रुक्मौ बस्ताजिनꣳ शतमानꣳ हिरण्यꣳ सप्तदश सुवर्णानि[1] कृष्णलानि हिरण्यपात्रं मधोः पूर्णमौदुम्बरꣳ रथचक्रꣳ सप्तदशारꣳ सप्तदशफलकां च श्रितिं[2] यूपं च तूपरं चतुरश्रिꣳ सप्तदशारत्निं गोधूमकलापीमुष्णीषं[3] नैवारꣳ सप्तदशशरावꣳ सप्तदशोषपुटान्सप्तदश[4] वायव्यानि सप्तदश पृथुबुध्नानुपयामान्सतं च वालं च सप्तदश निष्कान्सप्तदश वसनानि सप्तदश वासोभारान्सप्तदश रथान्सप्तदश दुन्दुभीन्सप्तदश हस्तिनः सप्तदश दास्यः सप्तदशानाꣳसि युक्तानि सप्तदश गवाꣳ शतानि वयसोवयसो वा सप्तदश सहस्रं[5] वा । तस्मिन्हि सर्वाणि वयाꣳसि भवन्ति । चतुर्विꣳशतिं पशूनेकपञ्चाशत-मग्न्याम्नादिरौं विहर्षौ[6] बभ्रेर्यूतां[7] । प्रज्ञाता आग्निष्टोमिकाः संभाराः । स पौषस्य जघन्याहःसु पुरस्तादाषाढ्यै पौर्णमास्यै

---

१ सौवर्णानि U Be 11.

२ Thus M Tr Be (sec. m.) Bhav. (one copy); श्रुतिं U (sec. m.); the other MSS. श्रीतिं, सौतिं, स्रुतिं (Bhav. another copy).

३ Thus MU Be 11; •कलापि• T Be B; •कलापा• F.

४ •पुटिकान् M (Bhav.).

५ साहस्रं M.

६ Thus M Tr Bhav.; विहर्षां U Be 11; विहर्षौं Be B; विहर्षा F; विह H.

७ Thus FH; बभ्रेर्यू• Be 11 Bhav. (one copy); बभ्र्येर्यू• Be and M (without, however, the r); बभ्रेयू• U; बेधेयू• B; बभ्रींयू• Tr.

दीयते। तस्य त्रयोदश दीक्षास्तिस्र उपसदः सप्तदश्यां[1] प्रसुतो ऽपि वा सप्तदश दीक्षास्तिस्र उपसद एकविꣳशत्यां प्रसुतो ऽपि वा तिस्र एव दीक्षास्तिस्र उपसदः सप्तम्यां प्रसुतः॥ १॥

अथ वै भवति सावित्रं जुहोति कर्मणःकर्मणः पुरस्तादिति। दीक्षणीयां[2] निर्वपस्यन्सावित्रं[2] जुहोति देव सवितः प्रसुव यज्ञं प्रसुव यज्ञपतिं भगाय दिव्यो गन्धर्वः केतपूः केतं नः पुनातु वाचस्पतिर्वाचमद्य स्वदाति नः स्वाहेति। दीक्षाहुतीर्होष्यन्सावित्रं जुहोति। प्रायणीयां[3] निर्वपस्यन्सावित्रं[3] जुहोत्यन्तर्हिरण्याꣳ[4] होष्यन्सावित्रं जुहोति। पदेन चरति। पदेन चरित्वा राजानं क्रीत्वातिथ्यं निर्वपस्यन्सावित्रं जुहोति। प्रथमाभ्यां प्रवर्ग्योपसद्भ्यां प्रचरिष्यन्सावित्रं जुहोत्येतस्मिन्काले प्रतिप्रस्थाता दक्षिणे प्राग्वꣳशे ऽवटं खानयित्वा वाजपेयसुराꣳ संधापयति। महावेदिं पूर्वं परिग्राहं परिग्रहीष्यन्सावित्रं जुहोत्याहवनीयं प्रणेष्यन्सावित्रं जुहोति। रथवाहने सदोहविर्धाने संमेष्यन्सावित्रं जुहोत्यग्नीषोमौ प्रणेष्यन्सावित्रं जुहोतीति

१ Thus M Tr U Be 11 Be (sec. m.); सप्तदशौ (as Āp. xviii. 1.6) B Be (pr. m.); सप्तदशा F.

२ Thus M Be (sec. m.) Be 11 F; °दीक्षाग्नि° Tr BH Be (pr. m.); दीक्षणीयायां U.

३ Thus Be UF; प्रायणीयाग्नि° Tr BH Be; प्रायणीयं M.

४ Thus U Tr HF Be 11 Bhav.; °हिरण्याꣳ M Be.

इध्माग्नेः प्राच्यमहीधीदध्यात्[१] आग्नीध्र[२] एव होष्यति । यूपमुच्छ्रयिष्यन्नाविषं जुहोति । यदाध्वर्युश्च[३] यजमानश्च पुरस्तात्प्रत्यञ्चावञ्जनावभिसर्पतो[४] ऽथ प्रतिप्रस्थाता पश्चात्प्राङ् वासोभिर्वेष्टयन्नभिसर्पत्युदीचीनदशैर्वा विपश्नाति धनुर्वेष्टीर्वा[५] प्रवेष्टयत्येतस्मिन्काले[५] प्रतिप्रस्थाता गोधूमकलापीमुभयतः समां कृत्वोष्णीषेण विपश्नाति । तस्यां तद्वेष्टन्ति यज्ञपात्रे । सर्वस्तं यूपमुत्सृज्याग्नीषोमीयं पशुमुपाकरिष्यन्नाविषं जुहोति । तस्य प्रसिद्धं वपया चरित्वा वसतीवरीर्परिहरिष्यन्नाविषं जुहोति । पशुपुरोडाशं निर्वप्स्यन्नाविषं जुहोत्यनुसवनं चैषि । तानि षट्दशापि[६] वा[६] सवनेसवन एव जुहुयादित्येतदपरमथ पशुपुरोडाशं निर्वपति । तमनुवर्तन्ते ऽष्टौ देवसुवाꣳ हवीꣳष्यग्नये गृहपतय इत्येतानि । तेषामुक्तं चरणं यथाग्नेर्विधायामिष्टान्ताः

---

१ After यहीधीद् B Be U ins. इति ; Keś. cites the clause without इति ; it could, however, be right, cp. Vol. I. p. 193, 15.

२ चाग्नीध्रीय Tr.

३ यथा॰ Be B ; the passage referred to is Vol. I., p. 113, 5 sqq.

४ Thus Be (sec. m.) Bhav. ; प्रत्यञ्चावाञ्जनावभि॰ Tr ; ॰वंजंनावभिस॰ Be (pr. m.) B ; ॰वंजनावयसर्पतो U H ; ॰वांजनावयसर्पतो Be11 ; ॰वंजनो-पयस M ; ॰वाजनयवस॰ F ; read perhaps ॰प्रत्यञ्चावञ्जनोपसर्पतो ।

५ धनुर्वेष्टीर्वा प्रवे॰ Tr Be B ; धनुर्वेष्टिं वा प्रवे॰ Be 11 HF ; धनुर्वेष्टिर्न प्रवे॰ U ; धनुर्वेष्ट इव प्रतिवे॰ M. The Dvaidhasūtra citing this passage reads धनुर्वेष्टीर्वा प्रवे॰ ; I am not certain about the correct reading and the meaning of these words. Bhav. comments : धनुर्वेष्टनवद्वेष्टयति वा ।

६ अपि वा om. B Be.

पुरोडाशाः संतिष्ठन्ते । पत्नीसंयाजान्ताः पशुरैन्द्रयपूषान्त इत्येके । ऽथैतान्कुम्भीनुद्दिश्यमासञ्जयति पञ्च दक्षिणायाꣳ श्रोण्यां पञ्चोत्तरस्यां चतुरो दक्षिणे ऽꣳसे चीनुत्तरे ऽꣳसे । तथा ह्यस्मै दिग्भ्यो वाचमवरुन्धत इति ह स्माह बौधायनो । ऽपेयाश्रीश्रं शुक्लता मासका: स्युरित्याश्रीमविरंमित: सद इति कात्यो । ऽथ वसतीवरीः परिहृत्य पयाꣳसि विश्रिच्योपवसन्ति । ॥ २ ॥ प्रथमः ॥

अथातो महाराज एव बुध्यन्ते । प्रातराज्यानि गृहीत्वा राजानमुपावहृत्य प्रातरनुवाकमुपाकरोति । परिहिते प्रातरनुवाके ऽपो ऽच्छैत्यपो ह्याध्वर्युरभिद्रवत्येतस्मिन्काले[१] प्रतिप्रस्थाता वाजपेयसुराꣳ संपवय्य[२] सग्रस्तामादाय दक्षिणया द्वारोपनिर्हृत्य दक्षिणेन सदः परीत्य दक्षिणेन मार्जालीयं धिष्णियं पर्याहृत्यापरया द्वारा हविर्धानं प्रपाद्य दक्षिणस्य हविर्धानस्य पश्चादक्षमुपसादयत्यथाध्वर्युरङ्गिरदैति[३] । सर्वान्क्रतूनुपैति । प्रथिष्ठो ऽभिषवः । प्रथिष्ठं यथा गृह्यन्ते । समानं कर्माग्रयणाद्ध्रुवदाग्रयणं[४] गृहीत्वा पञ्चैन्द्रानतिग्राह्यान्गृह्णात्युपयामगृहीतो ऽसि नृषदं त्वा द्रुषदमित्येताभिः पञ्चभिरथैना-

१ च before आध्वर्यु० only in Tr Be B ; याध्वर्यु० M and चाभिद्रवति Be 11 Tr ; चभिद्रवति H.

२ Thus Tr U Be Be 11 (pr. m.) ; सपंवय्य F ; संपवयति M ; संपवर्यति Be 11 (sec. m.) ; संपवयत्व H.

३ Thus M ; चरेति all the other MSS.

४ Some of the MSS. insert एवं ।

न्यक्तिमार्धपूर्वार्धे शफस्य गृहीतामासादयति । यावदेवाध्वर्यु-श्चेष्टति तावदेव प्रतिप्रस्थाता शत उद्गीथमानद्भेन वालेन सुरां पुनाति पुनातु ते परिस्रुतꣳ सोमꣳ सूर्यस्य दुहिता । वारेण शश्वता तनेति । वायव्यमेवाध्वर्युरादत्त उपयामं प्रतिप्रस्थाताध्वर्युः पूर्वो वायव्येन द्रोणकलशात्सोमग्रहान्गृह्णात्यया विष्टा अनयक्कवेराणीत्यनुद्रुत्योपयामगृहीतोऽसि प्रजापतये त्वा जुष्टं गृह्णामीति । परिमृज्य सादयत्येष ते योनिः प्रजापतये त्वेत्यथ प्रतिप्रस्थातोपयामेन शतात्सुरापात्राद्गृह्णाति कुविदङ्ग यवमन्त इत्यनुद्रुत्योपयामगृहीतोऽसि प्रजापतये[1] त्वेति गृह्णाति । प्रजापतये त्वेति सादयति । नैव[1] जुष्टं करोति न[1] योनिं । तावेवमेव व्यतिषक्तं पात्राभ्यां गृहीतः सन्नद्ग्रोतरः सन्नद्ग्रोतरः । पुरो ऽध्वर्युरेवाध्वर्युः सोमपात्राण्हिश्मेषि[2] वा श्मिशेषि[2] वोदीच आयातयति । पश्चादयं प्रतिप्रस्थाता सुरापात्राण्हिश्मेषि[2] वा चिमेषि[2] वोदीच आयातयत्यथ षोडशिनं गृह्णात्यातिष्ठ वृत्रहन्रथमित्यनुद्रुत्योपयामगृहीतोऽसीन्द्राय त्वा षोडशिने जुष्टं गृह्णामीति । परिमृज्य सादयत्येष ते योनिरिन्द्राय त्वा षोडशिन इत्यथोक्थ्यं गृह्णाति । समानं कर्मा-

---

१...१ Thus according to B Be Tr; MFH only: प्रजापतये त्वेति सादयति नैव; Be 11 U: प्रजापतये त्वा गृह्णामीति हृभैः परिमृज्य प्रजापतये त्वेति सादयति नैव ।

२ नैव Be 11 U.

३ हि:॰ and चि:॰ HU.

श्विमाद्ध्रुवाद्वाग्निर्न यह्वं[1] गृहीत्वा षड्भना आदाय यूपमभ्येति[2]।
सर्वन्तं यूपकुरमृज्याथैतान्पशूनुपाकरोत्याग्नेयमैन्द्राग्नमैन्द्रं मारुतीं
गोवशाऽ षष्ठष्ठ प्राजापत्यान्श्यामानेकरूपान्सारस्वतीमन्ततो।
ऽथ निर्मन्थ्यस्यावृता निर्मन्थ्येन चरति। प्रहृत्याभिहुत्याथैता-
न्नानादेवत्यान्पशून्पृथग्दिग्गुणाभिरभिधाय पृथक् त्रिगुणासु
नियुनक्त्यथैतान्समानदेवत्यान्पशून्पृथग्दिग्गुणाभिरभिधायैकस्यां
यूप्यायां नियुनक्त्यपि वा पश्नौ पशुं प्रसजति[3]। सारस्वती-
मन्ततो नियुज्याथैनान्प्रोक्ष्य निपाय्योपोक्ष्योदूह्य प्रोक्षणी-
धानम् ॥ ३ ॥

अथेध्मात्समिधमाददान आश्राग्नये समिध्यमानायानुब्रूही- १४
त्यभ्यादधातीध्मं। परि समिधः शिनष्टि। वेदेनोपवाजय-
त्यनूक्तासु सामिधेनीषु स्रुवेणाघारमाघारयति। संस्पृष्टे
स्रुग्भ्यामुत्तरमथाघःसमंयन्स्रुचावुदङ्कृत्याक्रम्य युक्त्वा पशूनसमन्व
षाद्यित्वा स्रुचौ प्रवरं प्रवृणीते। अग्निर्होत्विजो वृणीते।
सीदति होता। प्रसवमाकाङ्क्षति। प्रसूतः स्रुचावादायात्या- १५
क्रम्याश्राव्याह समिद्धः प्रेष्येति। वषट्कृते जुहोति प्रेष्य प्रेष्येति
चतुर्थाष्टमयोः समानयमानो ऽष्टमे सर्वः समानयते। परि
स्वाहाकृतीभ्यः संस्रावः शिनष्टि। दश प्रयाजानिष्ट्वोदङ्कृत्या-

---

१ Om. M Tr Be U.

२ Thus M Tr B Be Keś.; चम्मेति Be11 UFH.

३ Thus Be11 F; प्रसंजति Tr; प्रतिसजति U; प्रसजाति H; प्रसंजयति M; नियुनक्ति Be.

Digitized by Google

कस्य स्वधायैः पशूंस्समनक्ति । त[1] एते[1] नानादेवत्याः पशवो नानास्वरवो नानाशाखा अथैते समानदेवत्याः पशवः समानस्वरवो नानाशाखाः[2] । समानं कर्म पर्यग्निकरणादथ पर्यग्निकृतैः पशुभिरुदञ्चः प्रतिपद्यन्ते । तेषाꣳ सारस्वत्युत्तरार्ध्या भवत्याग्नेय उपचारत[3] । आग्नेयमेवाध्वर्युर्वपाश्रपणीभ्यामन्वारभते । पृथगितरान्परिकर्मिण उदञ्चो नयन्त्यनुपूर्वमव्यतिषजन्त[4] । आग्नेयायैवाध्वर्युः पशवे नियुज्यमानाय बर्हिरुपास्यति पृथगितरेभ्यस्तान् इतरान्प्राचो वोदीचो वा निघ्नन्त्यकृण्वतो मायूꣳ संज्ञपयतेत्युक्त्वैतेनैव यथेतमेत्य पृषदाज्यावकाश आसत इह प्रजा[5] विश्वरूपा रमन्तामस्मिन्यज्ञे विश्वविदो घृताचीः । अग्निं कुलायमभिसंवसाना अस्माꣳ अवन्तु पयसा घृतेनेति । संज्ञप्ताश्चाहुतिं जुहोति संज्ञप्ताहुतिं यत्पशवो मायुमकृतेत्यपाव्येति[6] शमितार उपेतनेति । पाशेभ्यः पशून्प्रमुच्यमानाननुमन्त्रयतेऽदितिः पाशान्प्रमुमोक्त्वेतानिति । पृथगविशाखाभिरुपसृज्येमां दिशं निरस्यत्यरातीयन्तमधरं कृणोमि यं द्विष्मस्तस्मिन्प्रतिमुञ्चामि पाशानिति । ॥ ४ ॥

---

१ Thus M Tr Be 11 HF; यथैवे B Be U (sec. m.).

२ समानाशाखाः M.

३ उपचरत M Tr U.

४ Thus M Be 11 UHF; °नुपूर्व्यम° Be B Tr.

५ Thus (cp. Vol. I., p. 118, 1) Be 11 F; पशवो M Tr Be UH Keś.; Āp. (vii. 17. 1) has also पशवो but the fem. घृताचीः (घृताच Tr F) points to प्रजाः, cp. also Maitr. S. iv. 2. 10.

६ Thus all exc. B (: यावेति).

Digitized by Google

अथ प्रतिप्रस्थाता पत्नीमुदानयत्युदकमण्डलुमुत्थाप्य यथानुपूर्वं[1] पशूनां प्राणानाप्याययत्यन्वगध्वर्युर्वपा उत्खिदन्नेत्यो-द्गेषश्चैवाध्वर्युर्वपया[2] प्रथमया प्रतिपद्यते ऽनूचीरितरा आहर-न्त्याग्नेयस्यैव वपायै प्रतितप्यमानायै बर्हिषो ऽग्रमुपास्यत्युपेतरा यच्छन्त्याग्नेयस्यैव वपाꣳ स्रुवाहुत्याभिजुहोत्युपेतरा यच्छन्त्यथ स्वाहाकृतिप्रैषेण चरित्वा संस्रावेण पृषदाज्यमभिघार्याग्नेयस्यैव वपामभिघारयत्युपेतरा यच्छन्त्यथ पुरस्तात्स्वाहाकृतिꣳ स्रुवा-हुतिꣳ हुत्वाथैतेषां नानादेवत्यानां पशूनामनुब्रूहि प्रेष्येति वपाभिघारयन्त्येतेषाꣳ[3] समानदेवत्यानां पशूनां मुख्यस्य वपाꣳ समवद्यन्नाह प्रजापतय इत्युपांश्वन्यासां वपानां मेदसो[4] ऽवदीयमानस्यानुब्रूहीत्युच्चैर्यावतीः[5] स्रुक्संभवन्त्येतराः[6] प्राच्य वेदमूलेन वोपोद्यच्छन्ते द्विरभिघारयत्यथात्याक्रम्याश्राव्याह प्रजा-

---

१ Thus Tr B Be F; यानुपूर्वं U Be 11 H; उत्थाप्यानुपूर्वं M.

२ Thus (उत्खिदन्नेति) Tr; उत्खिदंनेति M Be; उत्खिदन्वेति B; उत्खि-दति or उद्धरति the other MSS.; Bhav.: उद्धरन्नच्छति ।

३ चरित्वाथै॰ Tr Be B.

४ मेदसोऽवदीयमानस्य Tr Be (pr. m.) BF; ॰वदीयमानानाम॰ Be 11 U; H is partly corr. but reads अवदीयमानस्य; M pr. m. gen. sing., sec. m. (not wholly certain) gen. plur. of the part.; मेदसोऽवदीयमानानाम॰ Be 11 U Keś; वपानां मेदसामवदीयमानानाम॰ Be (sec. m.).

५ यावतीः (sc. वपाः ?) M Be 11 U; यावद् Be B; यावति Tr.

६ Thus only Tr, cp. xv. 31. स्रुक्स्वांभवति U H; स्रुक्संभवंति F; स्रुवसंस्वभवति B; स्रुक्तंभवति M; स्रुक्स्वांभवति Be 11 Be.

Digitized by Google

पचति हुत्वोपांशु छागानां वपा[1] मेदः प्रस्थितं प्रेष्येत्युच्चैर्वषट्कृते वपा[2] जुहोत्युपांशु सारस्वत्यै वपया [3]चरत्यथोपरिष्टात्स्वाहाकृतिं स्रुवाहुतिं हुत्वा वपाश्रपणीरनुप्रहृत्य समुत्क्रम्य चात्वाले मार्जयन्ते ।ऽथ पशून्विशाधि[4] शमितरित्याह यथाहुत्वा यथावदानीयं तदध्वर्योरुपयतादित्यथ[5] सावित्रं हुत्वा प्रसर्पन्ति प्रातःसवनाय । तदृजुधा संतिष्ठते । ॥ ५ ॥ द्वितीयः ॥

अथ सावित्रं हुत्वा प्रसर्पन्ति माध्यंदिनाय सवनाय देवी द्वारावित्यत एवोर्ध्वं । संप्रसृप्तान्विदित्वाध्वर्युः प्राङावचाद् चात्वाले रथचक्रं निमिनुत रथवाहने रथमाधत्ताश्वान्पल्पूलयत यद्दाखमसि[6] तद्धविधान उपस्थापयाभिषोतार[7] एत कृष्णल यावत्स्तनेहि यजमानेति । प्रसिद्धो ऽभिषवः । प्रसिद्धं ग्रहा गृह्यन्ते । समानं कर्माग्रयणाद्ग्रहादाग्रयणं गृहीत्वा षोडशिन-

---

१ वपा Be 11 HF; वपानां M Tr Be B.

२ वपा om. all exc. Be B.

३ प्रचरत्य° B Be H.

४ विशास्तीति Be U (sec. m.); विशाधिति B; विशाधि the other MSS. (also U pr. m.).

५ Thus Be 11 (sec. m.); तदध्वर्यु° M; तदध्वर्यो° Tr; तदध्वर्यु° Be 11 (pr. m.); तपध्वरा(?)ऋ° H; the other MSS. corr.; Bhav. seems to have read अध्वर्योत्; the meaning is इयत् ।

६ Thus U Be 11 H; ददाखमसि F; वेददाखो B; यद्दाखो Be, यद्दाख (broken off) मितोदधिव° M; यद्दाखो Tr; after मसि H ins. वेदेद्, Be B: मार्जालीये, Tr: मार्जालीयं; these MSS. om. तद् ।

७ Thus Be 11 UHF; °स्थापयताभि° M Tr B Be.

अभिप्रयातीन्द्रमिष्टुरी वहत इत्यनुद्रुत्योपयामगृहीतो ऽसी-न्द्राय त्वा षोडशिने जुष्टं गृह्णामीति । परिमृज्य सादयत्येष ते योनिरिन्द्राय त्वा षोडशिन इत्यथोक्थ्यं गृह्णाति । समानं कर्मा द्राविणेभ्यो । द्राविणानि शोध्मन्यायत्याध्वर्यवीञ् सस्रुवाञ् स्रुचं चावधायैतस्य वसनस्यान्तमायां दशायां निष्क-रज्जुः प्रग्रथिता[1] भवत्यैतन्समादायाहेहि[2] यजमानेत्युत्तरे-णाग्नीध्रीयं परीत्योत्तरेण[3] सदः परीत्यापेण प्राच्यां तिष्ठते[4] प्रतिप्रस्थाय एतानि प्रस्थाणि प्रयच्छत्यथाहेहि यजमानेति । रथ एष दक्षिणे श्रोण्यन्ते रथवाहन आहितो भवति । तमुपा-वहरतीन्द्रस्य[5] वज्रो ऽसि वार्त्रघ्नस्त्वयायं वृत्रं वध्यादित्यथैनं धूर्गृहीतमन्तर्वेद्यभ्यववर्तयन्ति[6] वाजस्य नु प्रसवे मातरं मही-मदितिं नाम वचसा करामहे । यस्यामिदं विश्वं भुवनमावि-वेश तस्यां नो देवः सविता धर्म साविषदित्यथाप्स्वन्तरमृतमप्सु[7] भेषजमपामुत प्रशस्तिष्वश्वा भवत वाजिन इत्यथ दक्षिणं योग्यं युनक्ति वायुर्वा त्वा मनुर्वा त्वा

1 Thus Be 11 UF, Bhav., Keś.; •थितो the other MSS.

2 भवतीत्येत• M Tr.

3 पर्यावृत्य i. s. o. परीत्य Be B.

4 तिष्ठन् M; तिष्ठति F; तिष्ठते the other MSS.

5 Thus Tr Be 11 Be BU (sec. m.); pluralis verbi the other MSS.; अवतारयति Bhav. Keś.

6 Thus M Tr U (pr. m.); अभ्यावर्तयंति Be BTU (sec. m.). अवर्तयति H; प्रवेशयंति Keś.; cf. infra xii. 7 (p. 95, l. 10).

7 The first अप्सु om. MH.

गन्धर्वाः सप्तविंशतिः । ते ऽग्रे ऽश्वमयुञ्जन्ते अस्मिञ्जवमादधुरित्येतयास्य पृष्ठं समृञ्ज्यते ऽपां नपादाशुहेमन्य ऊर्मिः ककुद्मान्प्रतूर्तिर्वाजसातमस्तेनायं वाजꣳ सेदित्येवमेवोत्तरं योग्यं युनक्ति । तस्यैवमेवोत्तरतः प्रष्टिमुपनियुनक्ति । तयोरेवमेव पृष्ठे[1] समृञ्ज्यत । एतस्य योगमनु सर्वमाश्विवहुच्यते । ऽधिकक्ष्यान्हस्तिनः कुर्वन्ति । प्रवेष्टयन्ति वासोभारान्वसनानां द्रप्सांश्च निष्कान्स्रजः प्रयच्छन्ति । पूर्णग्रो दक्षिणा आयातयत्यथ सौरीभ्यामृग्भ्यां गार्हपत्ये जुहोति । नयवत्यर्चाग्नीध्रे जुहोति[2] । उच्यन्ते[2] दक्षिणा दक्षिणापथेन । स यत्किंचिद्ददाति[3] हिरण्यमुखमेव ददात्यथ वासाꣳस्यथ[4] युक्तानि गोअश्वꣳ हस्तिपुरुषमन्ततो[5] । ऽद्ग्ता एवैते रथा अतिवर्तन्ते । नैते ऽन्यस्य सन्त आजिं धावन्ति । मनसैव स्वरथमध्वर्यवे ददाति मनसा समनुदिश्य[6] दक्षिणाभिस्तिभिर्मंद्यलतीयैश्चरति । सीदन्ति नाराशꣳसा आप्यायिता दक्षिणस्य हविर्धानस्यापाश्रममधो-ऽधो[7] माहेन्द्राय । ॥ ६ ॥

---

१ ष्ठे M Tr Be U; ष्ठं BFH.

२ Thus M Tr Be 11 HF; जुहोत्युच्यंते Be B; जुहोति उच्यंति U.

३ यत्किंचद्० Tr.

४ Thus Tr HF; Be B यनाꣳसि i.s. of यथ; M (injured): यथवा ...सि ददाति यथ युक्ता यथो ।

५ Before पुरुष० Tr F ins. दास०, H दासी; Bhav.: हस्तिपुरुषम्; cf. infra xii. 7.

६ समनुदिश्य UH Be 11; समुदिश्य M Tr Be B; समुदिश्यं F.

७ Thus, with पा, all, also Keś. but Be sec. m. ०पावाङ्ग्वम० ।

Digitized by Google

अथ याचति नैवारꣳ सप्तदशशरावꣳ स एष क्षीरे श्रुतो
भवति । तेन चरति[1] बृहस्पतये ऽनुब्रूहि बृहस्पतिं यजेति ।
तमनिष्टस्विष्टकृतमपिधाय पश्चात् निदधात्यथैतत्पुरस्ता-
दौदुम्बरे द्रोणे सर्वौषधं दध्नाज्येन समुदायुतं भवति । तमौ-
दुम्बरेण स्रुवेणोपघातꣳ सप्तान्नहोमाञ्जुहोति वाजस्येमं प्रसवः
सुषुवे अग्र इत्यभिषेकाय प्रत्येकं परिश्रिणत्त्यथैनमपिधाय पश्चात्
निदधात्यथ पुरस्तादभिषेकस्य षट् पार्थानि जुहोत्यग्नये स्वाहा
सोमाय स्वाहेत्यथ यजमानायतने कृष्णाजिनं प्राचीनग्रीव-
मुत्तरलोमोपस्तृणाति । तद्यजमानं प्राञ्चमुपवेश्य सुवर्णरज-
ताभ्याꣳ रुक्माभ्यां पर्युपास्य सर्वौषधेन पुरस्तात्प्रत्यञ्चमभिषि- १
ञ्चति । शीर्षतो ऽभिषिञ्चत्या मुखादन्ववस्रावयति देवस्य
त्वा सवितुः प्रसवे ऽश्विनोर्बाहुभ्यां पूष्णो हस्ताभ्याꣳ सरस्वत्यै
वाचो यन्तुर्यन्त्रेणाग्नेस्त्वा साम्राज्येनाभिषिञ्चामीन्द्रस्य त्वा[2]
साम्राज्येनाभिषिञ्चामि[2] बृहस्पतेस्त्वा साम्राज्येनाभिषिञ्चा-
मीति । समुन्मृष्टे समुत्क्रोशन्त्यभ्यषेच्ययमसावामुष्यायणो ऽमुष्य १
पुत्रो ऽमुष्य पौत्रो ऽमुष्य नप्ता वाजपेयेनेत्यथ भूर्भुवः सुव-
रिति वाचं विसृजते । हाभ्यां मुखं विमृष्टे । गायत्र्याम्विष्णु-
क्रमात्क्रमते[3] । ऽथोपरिष्टादभिषेकस्य षट् पार्थानि जुहोतो-

---

1 प्रचरति Be B.

2 Tr Be B U (sec. m.) om.; M places बृहस्पतेस्त्वा etc. befo[re] इन्द्रस्य त्वा ।

3 Thus Tr U Be H H F; गायत्र्यापि॰ M Be B.

Digitized by Google

श्राय स्वाहा घोषाय स्वाहेति । द्वादश भूतानामवेष्टीर्जुहोति पृथिव्यै स्वाहान्तरिक्षाय स्वाहेत्यथैनस्य गार्हपत्यस्य स्विष्टकृता चरन्त्यथैनमाग्नीध्रमन्तरेण चात्वालोत्करावुदङ्ङुपनिष्क्रामत्युत्तरत[1] एते[2] रथा युक्तास्तिष्ठन्ति[3] । तदेतान्यजुर्भुजो ऽश्वानवघ्रापयति वाजिनो वाजजितो वाजꣳ सरिष्यन्तो वाजं जेष्यन्तो बृहस्पतेर्भागमवजिघ्रतेत्यथैनमपिधाय प्रज्ञातं निदधात्यथ रथमभिप्रैति विष्णोः क्रमो ऽसि विष्णोः क्रान्तमसि विष्णोर्विक्रान्तमसीत्यथ रथस्य पक्षसी संमृशत्यङ्कौ न्यङ्कावभितो रथं याविति[4] । रथमातिष्ठति देवस्याहꣳ सवितुः प्रसवे बृहस्पतिना वाजजिता वाजं जेषमित्यथैतस्मिन्काले चात्वाले रथचक्रं निमितं अध्यारोहति । तमत[5] एवानुमन्त्रयते देवस्याहꣳ सवितुः प्रसवे बृहस्पतिना वाजजिता वर्षिष्ठं नाकꣳ रुहेयमित्यथ यजमानमन्वास्थापयो ऽग्नीर्वाचयत्यग्निरेकाक्षरेण वाचमुदजयदिति सप्तदशास्मा अश्वाजनी[6] प्रयच्छत्यश्वाजनि वाजिनि वाजेषु वाजिनीवत्यश्वान्समत्सु वाजयेति । तथा यथायुक्तमश्वानभिप-

---

१ ॰ङ्ङुपनिष्क्रामत्यु॰ M U Be 11 Bo Be (pr. m.); ॰क्रामत्यु॰ Tr Be (sec. m.) Bhav., Keś.

२ एवैते Tr Be 11 U.

३ युक्तास् om. Be B.

४ Tr Be B ins. यच ।

५ यजमान i.s.o. यत M.

६ Thus Be 11 U F, Keś., Bhav. (one copy); अश्वाजनिं Tr; अश्वाजनी M; अश्वाजिनिं Be; अश्वाजिनं B; अश्वावाजिनीं H.

Digitized by Google

त्यर्वासीति दक्षिणꣳ सप्तिरसीति मध्यमं वाज्यसीत्युत्तरमथै-तामाजिसृतो[1] ऽवख्यापयति[2] वाजिनो वाजं धावत मरुतां प्रसवे जयत वि योजना मिमीध्वमध्वन स्कभ्नीत काष्ठां गच्छते-त्यौदुम्बर्येषा स्थूणा सप्तदशसु प्रव्याधप्रव्याधेषु निमिता । तां काष्ठे-त्याचक्षते । तामाजिसृतो ऽतीत्य[3] मा[3] गच्छत[3] मो[4] एनाम-प्राप्य[4] निवर्तताऽन्तःपरमेनां[5] कृत्वा सव्यामवस्थाय दक्षिणैरनु-परिवर्तयाध्वै[6] मो[6] अप्रसृताः[6] सर्पतेति[6] । ॥ ७ ॥ तृतीयः ॥

अथाहाभिषर्प यजमान माहेन्द्रं ग्रहं ग्रहीष्यामीत्यन्वारब्धे यजमाने माहेन्द्रं ग्रहं गृह्णाति महाꣳ इन्द्रो य ओजसेत्यनु-द्रुत्योपयामगृहीतो ऽसि महेन्द्राय त्वा जुष्टं गृह्णामीति । परिमृज्य सादयत्येष ते योनिर्महेन्द्राय त्वेति । तदेतान्पञ्चै-न्द्रानतिग्राह्यान्सह संꣳसादयत्यथाप[7] उपस्पृश्य बर्हिषी आदाय वाग्यमः प्रत्यङ् द्रुत्वा स्तोत्रमुपाकरोति । स्तुवते

१ ०मथैताम० Be B Keś.; ०मथैनाम० the other MSS.

२ Thus M Tr Be B F H Keś.; विख्याप० Be 11 U and Comm. on Taitt. S. Vol. I, p. 1024.

३ These three words only in Be B and Bhav.; the other MSS. and Keś. omit them.

४ Thus Tr Be B Keś.; नैनाम० the other MSS.

५ Thus Be B; निवर्तन्तां० Tr; निवर्तन्ताः० M Be 11 U; निवर्तन्तान्तः० H; निवर्त्यान्तान्त० F.

६ Thus Be B; ०याध्वैर्मो FH; ०यध्वंप्रसृतास्सर्पतेति Tr.; ०यध्वंमाप्रसृताः सर्पतेति M; ०याध्वैमाः प्रसृताः सर्पतेति Keś.

७ ०सादयन्त्य० MH Keś.

Digitized by Google

माहेन्द्राय[1] । प्रस्तुते साम्नि संप्रैषमाह ब्रह्मन्वाजिनाᳪ साम
गायाजिं सृत आजिं धावत दुन्दुभीन्समाघ्नताभिषोतारो[2] ऽभि-
षुणुताग्नीद्राग्निरं विनयोरूखसमुद्रादय प्रतिप्रस्थातर्वारुणमेक-
कपालं निर्वप सौम्यस्य विद्धीति । यथासंप्रैषं ते कुर्वन्ति ।
९ गायति ब्रह्मा वाजिनाᳪ साम । तं य एव कश्च[3] परिकर्म्या-
वेष्टयति । धावन्त्याजिं सृत । आघ्नन्ति दुन्दुभीन्संप्रवदन्ति
वाचः । संप्रोदिता[4] वाचो ऽनुमन्त्रयत इन्द्राय वाचं वदतेन्द्रं
वाजं जापयतेन्द्रो वाजमजयिदित्यथ रथान्धावतो ऽनुमन्त्रयते
वाजेवाजे ऽवत वाजिनो न इति चतसृभिरनुच्छन्दसᳪ ।
१० आयन्ति घोषाः ब्रह्माय । होत एषोत्तमेति प्राङ्होतुः
काष्ठात्पराङावर्तते ऽध्वर्युरश्वेनमाह्वयते होता । प्रत्याह्वयते
ऽध्वर्युः । शᳪसति । प्रतिगृणाति । प्रथितमुक्थं प्रतिगीर्य
प्राह्णेत्योपगच्छत एतं माहेन्द्रं ग्रहमनूपगच्छन्त इतरानुपोपगच्छन्ते
नाराशᳪसानथाश्रावयत्यो श्रावयास्तु श्रौषडुक्थशा[5] यज सोम-

---

१ माहे॰ M Tr U Be B Be 11; महे॰ HF.

२ Thus (समाघ्नत, cp. Pitṛmedhasūtra, p. 37. 14) Tr U Be B Be 11; समाहत MHF.

३ Thus M Tr U Be B; कश्चन Be11 H; कश्चत F.

४ संप्रदिता, संप्रहिता, संप्रवदंता or संप्रवदतो the MSS.; this last reading, presented by M, could also be defended, if we take the part. as an acc. pl. masc., but cp. Bhav. ता अनुमन्त्रयते and infra xii. 13, where the correct reading is given by M.

५ Be B ins. इति after श्रौषट्।

Digitized by Google

योनिरसीति दर्भमयं पत्नीमयैताꣳ श्रितिं[1] यजमानायतना-न्प्राचीं वोदीचीं वा यूपमभ्यायातयत्यथ जायामामन्त्रयते जाय एहि सुवो रोहावेति । रोहाव हि सुवरितीतरा प्रत्याहाहं नावुभयोः सुवो रोक्ष्यामीति यजमानस्त्वं नावुभयोः सुवो रोहेति पत्नी । तां दक्षभिः कर्ण्यै[2] रोहत्यायुर्यज्ञेन[2] कल्पतामित्यांन्तं गत्वा बाहू उद्गृह्णाति सुवर्देवाꣳ अगन्मामृता अभूम प्रजापतेः प्रजा अभूमेत्यथेमं लोकं प्रत्यवेक्षते समहं प्रजया सं मया प्रजा समहꣳ रायस्पोषेण सं मया रायस्पोष इत्यथैनामुपावरोहति । स यावति मन्यत एतावति मोदा-स्यामीति[3] तदेनमाषपुटैर्घ्नन्ति[4] ॥ ११ ॥

अन्नाय त्वेति पुरस्तादध्वर्युरन्नाद्याय त्वेति दक्षिणतो ब्रह्मा वाजाय त्वेति पश्चाद्धोता वाजजित्यायै त्वेत्युद्गातोत्तरतो । यद्यु वा एते न कामयन्ते ऽध्वर्युरेव पुरस्ताद्घ्नन्ति दक्षिणतः प्रति-

---

१ Thus M Tr Be B; सीतिं U Bell H F; मीतिं Bhav. (one copy), सितिरं (the other copies); Keś. has thrice सीतिं corrected from original सितिं or मीतिं ।

२ Thus (as TBr. I. 3. 7. 4.) M Tr UBF Dvaidhasūtra and Bhav. on this passage of the Dvaidha; कर्ण्यैरारोह° Be H; thus also Bhav. on the passage of the Vājap.

३ Thus, conjecturally, corrected; मोदास्यंतीति M Tr; मेदास्यंतीति UHF; मांप्रास्यंतीति Be B.

४ जपपुटै° FH Be (pr. m.); although at the beginning of this praśna the जपपुटाः have been mentioned, माषपुटैः is here the correct reading, cp. Bhav. a. h. l.

Digitized by Google

प्रस्रुता पश्चादाग्नीध्र उच्छेतोत्तरतस्तेषां[1] तथा विभागो यथा दुन्दुभीनामंसावे[2] प्रत्यवरोहत[3] आसन्दीं निदधाति । तस्यां कृष्णाजिनमास्तृणाति कृष्णाजिने शतमानꣳ हिरण्यमथ दक्षिणं पादꣳ हिरण्य[4] उपावरोहत्यमृतमसीति[4] पुष्टिरसि प्रजननमसीति सव्यं कृष्णाजिने । ऽथैनमेतयासन्द्या सह आवहन्त्य[5] वा[5] प्रजत्यंन्यायन्त्येनमेते[5] चमसा । अथैतस्य गार्हपत्यस्यैतामुपह्वयत । हूतोपहूतं माहेन्द्रꣳ होता चैवाध्वर्युश्च संभक्षयतो नराशꣳसपीतेन नाराशꣳसानचैतेषामतिपात्राणां मुख्ये पात्रे सꣳस्रावान्समवनीय यजमान एव प्रत्यक्षं भक्षयत्यपि वैनान्त्सर्वंश एव चमसेषु व्यवनीय भक्षयेयुरित्येतदपरꣳ । होतृचमसमेवैते ऽथः समुपहूय भक्षयन्ति । यथाचमसं चमसान्निन्व म इत्यात्मानं प्रत्यभिमृशन्ते । नाप्याययन्ति चमसान्सर्वभक्षा

---

1 Thus M Tr; उत्तरत उच्छ्रेता all the other MSS.

2 Thus Tr Be B Be 11 (sec. m.); असावे UFH Be 11 (pr. m.); अस om. M.

3 Thus corrected on account of the collateral passage xviii. 17 s. f. and the Vivaraṇa: प्रत्यवरोह(त)तः यत प्रत्यवरोहति तत ; MSS. प्रत्यवरोहत ।

4 हिरण्यमुपा॰ M U Be 11 H F; हिरण्यउपा॰ Be; हिरण्येउपा॰ B; हिरण्य om. Tr.

5 Thus Be 11; ॰वहंत्यानाप्रजात्य॰ U; ॰वहंत्ययथाप्रजांत्य॰ M; ॰प्रजांत्य॰ Tr Be B H F, but cp. Bhav.: तथैवासन्द्योपस्थ सहः प्रापयन्ति स्वयमेव वा गच्छति ।

Digitized by Google

मार्जयन्ते । ऽथेन्द्राय त्वेन्द्राय त्वेत्येवं त्रिभिरुक्थ्यपर्यायैश्चरति[1] । संतिष्ठते माध्यंदिनꣳ सवनम् । ॥ १२ ॥ चतुर्थः ॥

अथ सावित्रꣳ हुत्वा प्रसर्पन्ति तृतीयसवनाय । प्रथिष्ठु-मादित्यग्रहेण चरित्वाग्रयणं गृहीत्वाथ षोडशिनमभिगृह्णा-त्यसावि सोम इन्द्र त इत्यनुद्रुत्योपयामगृहीतो ऽसीन्द्राय त्वा षोडशिने जुष्टं गृह्णामीति । परिमृज्य सादयत्येष ते योनिरिन्द्राय त्वा षोडशिन इत्यथोक्थ्यं गृह्णाति । समानं कर्मा पवमानात्पवमानेन चरित्वा स्वे धामन्पशुभिश्चरति[2] । तेषां नाना मनोता नाना देवता नाना प्रत्यभिमर्शना नाना वपाहोमाः समानो वनस्पतिः समानः स्विष्टकृत्प्रैषवान्समानीडा समान्यो दिशो । नाना दिश इत्येके । समानं कर्मा ध्रुववद्भ्य-श्चमसेभ्यो । ध्रुववद्भिश्चमसैश्चरित्वा त्रिभिरुक्थ्यपर्यायैश्चरतीन्द्रा-वरुणाभ्यामिन्द्राबृहस्पतिभ्यामिन्द्राविष्णुभ्यामित्यथ[3] षोडशिना चरत्यथ प्राकाशन्नाह होतुश्चमसमनून्नयध्वमुन्नेतः सर्वश्च एव राजानमुन्नय मातिरीरिच इति । होतृचमसमेव प्रथममुन्नयन्ति यथोपपादमितरान्सर्वश्च एव राजानꣳ समुन्नीयोत्तरवेद्याꣳ सꣳसादयन्ति । तदेतान्प्राजापत्यान्सꣳसादयन्त्यथाप उप-स्पृश्य बर्हिषी आदाय वाचंयमः प्रत्यङ् द्रुत्वा स्तोत्रमुपा-

---

१ Thus M Tr; चरंति UB Be H Be 11 F.

२ Thus M Tr BHF; चरंति Be 11 U.

३ ॰चरतीन्द्रा॰ M Tr; the other MSS. read plural.

Digitized by Google

करोति। स्तुवते। तदेतद्बहुसामैकविंशं वैष्णवीषु शिपिविष्टवतीषु कुर्वन्ति। होत्र एषोऽन्तमेति प्राकृतोऽतः कालात्पराङावर्तते ऽध्वर्युरभ्येनमाह्वयते होता। प्रत्याह्वयतेऽध्वर्युः। शंसति। प्रतिगृणाति। प्रसिद्धमुक्थं प्रतिगीर्य प्राङ्त्योद्यच्छन्त एतᳲ होतृचमसमनूद्यच्छन्त इतराननुपोद्यच्छन्ते चमसानथाश्रावयत्याश्रावयास्तु श्रौषडुक्थशा यज सोमानामिति। वषट्कृते जुहोति। तदेतान्प्राजापत्यान्सह जुह्वति। वषट्कृतानुवषट्कृते द्विर्जुहोति। तथैव द्विर्द्विः सर्वाᳲश्चमसाञ्जुह्वत्यथ भक्षैः प्रत्यक्ष्म शाट्वण्यनुसवनभक्षः प्रजापतिना पीतस्येत्यथैतेषां[1] प्राजापत्यानां मुख्ये पात्रे सᳲस्रावान्समवनीय[2] यजमान एव प्रत्यक्षं भक्षयत्यपि वैनान्सर्वत्र एव चमसेषु व्यवनीय भक्षयेयुरित्येतदपरमथ यन्माहुत्या अनवद्राणीयं तद्ऋत्विग्भ्य उपहरति[3]। तदेतत्समावच्छो[4] विभज्य प्राश्नन्ति। होतृचमसमेवैते सर्वः समुपहूय भक्षयन्ति। यथाचमसं चमसांश्चिन्न म इत्यात्मानं प्रत्यभिमृशन्ते। नाप्याययन्ति चमसान्सर्वभक्षा मार्जयन्ते। अथ संप्रैषमाहाग्नीदौपयजानङ्गारानाहरोपयष्टरुपसीद ब्रह्मन्प्रस्थास्यामः समिधमाधायाग्नीदग्नीन्सकृत्सकृत्संमृड्ढीत्याहर-

---

1 Thus M Tr U Be 11; अथैषां Be BFH.

2 Thus M Tr; संस्रावमवनीय Be 11 UH Keś.; संस्रावानवनीय F; सᳲस्रावान्प्रत्यवनीय B Be; cp. supra p. 81, 9.

3 °हरति Be BH Bhav.; हरंति M Tr F.

4 Thus MUHF; तत्सेषमा° Tr Be B; तदेतैषमा° Be (sec. m.).

न्येतानाग्नीध्राद्‌औपयजानङ्गाराꣳस्तानग्रेण[१] होतारं निवपत्युप- घ्नीदत्युपयष्टा गुदतृतीयैश्चैतानि गुदतृतीयान्येकादशधा कृत्वो- पयष्टोपयजति । समानमत ऊर्ध्वꣳ । संतिष्ठते वाजपेयो । वाजपेयेनेष्ट्वा प्रत्यवरोहणीयेनाग्निष्टोमेन[२] यजेत । संतिष्ठते वाजपेयः संतिष्ठते वाजपेयः । ॥ १४ ॥ पञ्चमः ॥

॥ इत्येकादशः प्रश्नः ॥

---

१ Thus (॰चरंत्वो॰) all exc. B, which has the sing. and M, which omits this passage altogether.

२ चतुष्टोमेन ins. Tr.

Digitized by Google

राजसूयेन[१] यक्ष्यमाणो भवति। स पुरस्तात्फाल्गुन्यै वा चैत्र्यै वा पौर्णमास्या आमावास्येन[१] हविषेष्ट्वा दीक्षते। तस्य तिस्रो दीक्षास्तिस्र उपसदः सप्तम्यां प्रसुतः। संतिष्ठत एष प्रायणीयो ऽग्निष्टोमश्चतुष्टोमः सहस्रदक्षिण उदवसानीयान्तो। ऽथाष्टमे ऽह्न्यानुमतं निर्वपति। हविष्कृता वाचं विसृजते। समानं कर्माधिवपनादुद्धृत्य दक्षिणार्धे गार्हपत्यस्याष्टौ कपाला-न्युपदधात्येकं प्रतिप्रस्थातोत्तरतो नैर्ऋताय। हविःपेष्यै प्रयच्छ-न्नाह प्राचश्च प्रतीचश्च व्यवमातयन्ती पिंष्वीति[२]। स ये प्राञ्चः शम्याया अवशीयन्ते तानध्वर्युः समुप्य संयुत्यानुमतꣳ श्रपयत्यथ ये प्रत्यञ्चः शम्याया अवशीयन्ते तान्प्रतिप्रस्थाता समुप्य संयुत्य नैर्ऋतꣳ श्रपयत्यादद्त[३] एतं[४] नैर्ऋतमुपस्तीर्णा-भिघारितं[४] कृष्णं वासः कृष्णतूषमन्तमागारादेकोल्मुकमुद्-पाचमित्येतत्समादाय गार्हपत्ये स्रुवाहुतिं जुहोति वीहि स्वाहाहुतिं जुषाण इत्यथ दक्षिणया द्वारोपनिष्क्रम्य तां दिशं यन्ति यत्रास्य स्वकृतमिरिणꣳ स्पृष्टं भवति प्रदरो वा।

---

१ ... १ Thus MT Be 11 (the last two om. however च); the other MSS.: राजा राजसूयेन यजेत फल्गुन्यै वा चैत्र्यै वा पुरस्तादामावास्येन। The Vivaraṇa begins also: राजा राजसूयेन यजेतेति, but infra it cites the words यक्ष्यमाणो भवति and cp. comm. on T.S. i. 1.8 and on Tāṇḍ. br. xviii. 8.1.

२ पिंषीति M; the other MSS. still more corrupted.

३ Thus M; अपयित्वाददत T Be 11; Be BU om. त्वाददत।

४ Thus M; एतन्नै° all the other MSS.

तदेतदेकोल्मुकमुपसमाधाय संपरिस्तीर्याङ्गुष्ठाभ्यां[1] परिगृह्य नैर्ऋतं जुहोत्येष ते निर्ऋते भागो भूते हविष्मत्यसि मुञ्चेममꣳहसः स्वाहेत्यथ कृष्णं वासः कृष्णतूषं ददात्यथापो व्यतिषिच्य परास्य पात्रमनवेक्षमाणा आयन्ति हस्तपादान्प्रक्षाल्यैतेनैव यथेतमेत्य गार्हपत्ये स्रुवाहुतिं जुहोति स्वाहा नमो य इदं चकारेत्यथानुमतेन[2] सꣳस्थां करोति । धेनुं ददाति[3] । ॥ १ ॥

अथ नवमे ऽहन्यादित्यं चरुं निर्वपति । वरं ददात्यथ दशमे ऽहन्याग्नावैष्णवमेकादशकपालं । वामनं वहिनं ददात्यथैकादशे ऽहन्यग्नीषोमीयमेकादशकपालꣳ । हिरण्यं ददात्यथ द्वादशे ऽहन्यैन्द्रमेकादशकपालमृषभं वहिनं ददात्यथ त्रयोदशे ऽहन्याग्नेयमष्टाकपालमैन्द्रं दध्यृषभं वहिनं ददात्यथोपातीत्याग्रयणस्वीऽपि चतुर्दशे ऽहनि सरस्वत्यै चरुं । वत्सतरीं ददात्यथ पञ्चदशे ऽहनि सरस्वते चरुं । वत्सतरं ददाति । यद्धु वै चतुर्दशामेवोपवसथः संपद्यत एतस्मिन्नेवैतदहरेताभ्यामिष्टिभ्यां[4] नानाबर्हिर्भ्यां[5] यजेतायास्मैतद्धविर्भ्यो देवेभ्यो वत्सा अपाकृता भवन्ति । वैश्वदेवं पयो दोहयित्वोपवसति सांनाय्यस्य

---

१ ०स्तीर्भ्यां i.s.o. ०ङ्गुष्ठाभ्यां B Be U.

२ ०चकारेत्यनुमते: Be BU.

३ धेनुर्दक्षिणा Be BU.

४ एतस्मि० i.s.o. एतस्मै० M Be BU.

५ Thus M; ०बर्हिर्भ्यां Be BU; ०मौषिभ्यां Be 11 T.

Digitized by Google

वाहृता तूष्णीं वाथ श्वो भूते वैश्वदेववविर्भिरिष्ट्वा पौर्णमासवैमृधाभ्यामिष्ट्वा प्रश्रिष्टं निवर्तयते । ऽथ श्वो भूत इन्द्राय सुत्राम्णे पुरोडाशमेकादशकपालं निर्वपत्यभिषितो रथ उभाकाङ्क्षकवचो[1] गर्भिणीभिर्वा वडवाभिर्युक्तः साण्डैर्वाश्वैरावेष्टो निष्कसहद्दात्यथ श्वो भूत इन्द्रायाङ्होमुचे पुरोडाशमेकादशकपालं निर्वपत्यनभिषितो रथो[2] ऽकाङ्क्षकवचो[2] ऽगर्भाभिर्वा वडवाभिर्युक्तो निरष्टैर्वाश्वैः[3] सहस्रको[3] निष्कसहद्दाति । ॥ २ ॥

एते संतनी इत्याचक्षते । ऽथ श्वो भूते संतनीभ्यामेव प्रतिपद्यते । स एवमेव संतनीभ्यामहरहर्विपर्यासं[4] यजमानश्चतुरो मास[5] एति[5] काममिष्ट्वा कामं पशुबन्धेन कामं

---

१ Thus hesitatingly emended. उभे कांक्षेकवचो M; इभैकक्षकवचो T Be 11; उभोकांक्षकवचो Be BU; Bhav. उभे कांक्षकवचो निरवाथम्, but this may be a periphrase of our compositum. So much, at any rate, is certain, that an adj. is required with the sense उभयतः कांक्षकवच (cp. Kāty. xxii. 10. 30-31, Lāṭy. ix. 4. 14).

२ Again emended; रथो न उकांक्षो उकवचो उग॰ M; could उ in Nandināgarī represent the avagraha? Then the reading of M would be; रथो [न] ऽकांक्षो ऽकवचो ऽग॰ ; रथः कांक्षकवचो Be BU; इभैकक्षकवचो Be 11 T (omitting रथो).

३ ॰र्वाश्वै सहस्रको M; ॰र्वाश्वैवचवका T Be 11; ॰र्वाश्वैसहस्रसह॰ Be; ॰र्वाश्वैसहस्रसह॰ B, the last two om. निष्कस् ।

४ Here and infra B Be U have sometimes विपर्यासाभ्यां; Be 11 T om. the word every time.

५ Thus here and infra M; मास इति B Be U; मासानेति Be 11 T.

यवाग्रयणेनाथ चतुर्षु मासेषु पर्यवेतेषु संतन्येष्ट्वा[1] वरुणप्रघासहविर्भिरिष्ट्वा पौर्णमासवैमृधाभ्यामिष्ट्वा प्रथिष्ठं निवर्तयते। ऽथ श्वो भूते संतनीभ्यामेव प्रतिपद्यते। स एवमेव संतनीभ्यामहरहर्विपर्यासं यजमानो ऽपराङ्ग्चतुरो मास एति काममिष्ट्वा कामं पशुबन्धेन कामङ्ग् श्यामाकाग्रयणेनाथ चतुर्षु मासेषु पर्यवेतेषु संतन्येष्ट्वा साकमेधहविर्भिरिष्ट्वा पौर्णमासवैमृधाभ्यामिष्ट्वा प्रथिष्ठं निवर्तयते। ऽथ श्वो भूते संतनीभ्यामेव प्रतिपद्यते। स एवमेव संतनीभ्यामहरहर्विपर्यासं यजमानो ऽपराङ्ग्चतुरो मास एति काममिष्ट्वा कामं पशुबन्धेन कामं व्रीह्याग्रयणेनाथ चतुर्षु मासेषु पर्यवेतेषु संतन्येष्ट्वा शुनासीरीयहविर्भिरिष्ट्वा पौर्णमासवैमृधाभ्यामिष्ट्वा प्रथिष्ठं निवर्तयते। ऽथ श्वो भूते संतनीभ्यामेव प्रतिपद्यते। स एवमेव संतनीभ्यामहरहर्विपर्यासं यजमानः सप्ताहान्येति काममिष्ट्वा कामं पशुबन्धेनाथाष्टमे ऽह्नश्चतुरीयमाग्नेयमष्टाकपालं निर्वपति रौद्रं गावीधुकं चरुमैन्द्रं दधि वारुणं यवमयं चरुमन्वाहार्यमासाद्य वहिनीं धेनुं ददाति। ॥ ३ ॥

अथ तदानीमेव पञ्चेध्मीयेन प्रतिपद्यते। पञ्चधाङ्गारान्निहृत्य पञ्चधानभ्यादधाति पर्णमयं पुरस्तान्न्यग्रोधं दक्षिणत आश्वत्थं पश्चादौदुम्बरमुत्तरतः प्लाक्षं मध्ये। ऽथैनानाज्येन व्याघारयति ये देवाः पुरःसदो ऽग्निनेत्रा रक्षोहणस्ते नः पान्तु

१ Thus here and infra MT Bo 11; संतन्येष्टा B Be.

ते नो ऽवन्तु तेभ्यो नमस्तेभ्यः स्वाहा ये देवा दक्षिणसदो ये देवाः पश्चात्सदो ये देवा उत्तरसदो ये देवा उपरिषद इत्यथोपवेषेणाङ्गारान्समूहति[1] समूढꣳ रक्षः संदग्धꣳ रक्ष इहमहꣳ रक्षो ऽभिसंदहामीत्यथैनान्स्रुवाहुतिभिरभिजुहोत्यग्नये[2] रक्षोघ्ने स्वाहेति पञ्चभिरथ[3] प्रष्टिवाहिनꣳ रथं ददात्यथ याचति पर्णमयꣳ स्रुवमपामार्गसक्तून्प्रतिवसनीयं वासो ऽन्तमागारादेकोल्मुकमुदपात्रमित्येतत्समादायोदञ्चो निष्क्रम्य तां दिशं यन्ति यत्रास्य स्वक्तमिरिणꣳ स्पष्टं भवति प्रदरो वा । तदेतदेकोल्मुकमुपसमाधाय संपरिस्तीर्य पर्णमयेन स्रुवेणापामार्गसक्तूञ्जुहोति देवस्य त्वा सवितुः प्रसवे ऽश्विनोर्बाहुभ्यां पूष्णो हस्ताभ्याꣳ रक्षसो वधं जुहोमि स्वाहेति[4] । हतꣳ रक्ष इति स्रुवमनुप्रहरत्यवधिष्म[5] रक्ष इत्युपतिष्ठते[6] । ऽथ[7] यद्वस्ते तद्ददात्यथापो व्यतिषिच्य परास्य पात्रमनवेक्षमाणा आयन्ति हस्तपादान्प्रक्षाल्यैतेन यथेतमेत्यैन्द्रतुरीयेण सꣳस्थां करोत्यथ नवमे ऽह्नि पूर्वाह्णे देविकाहवीꣳषि निर्वपत्यनुमत्यै चरुꣳ राकायै चरुं धात्रे पुरोडाशं द्वादशकपालमित्यन्वाहार्य-

---

१ निरूहति Be T.

२ स्रुवाहुतीभि॰ M Be U ; स्रुवाहुतीर॰ BT Be 11.

३ पंचभिर om. Be BU.

४ इति om. Be BU.

५ ॰नुप्रहृत्याव॰ Be BU.

६ उपोतिष्ठते MT Be 11, but cp. Āp. xviii. 9. 18.

७ om. B Be U .

मासाय[1] वत्सतरीं[2] ददात्यथ दशमे ऽहन्युत्तराणि देविकाहवींषि निर्वपति सिनीवाल्यै चरुं कुह्वै चरुं धात्र एव[3] पुरोडाशं द्वादशकपालमित्यन्वाहार्यमासाय[4] वत्सतरं[5] ददात्यथैकादशे ऽहनि त्रिषंयुक्तैः प्रतिपद्यत आग्नावैष्णवं निर्वपत्यैन्द्रावैष्णवमेकादशकपालं वैष्णवं त्रिकपालं । वामनमृषभं दक्षिणं ददात्यथ द्वादशे ऽग्नीषोमीयमेकादशकपालं निर्वपत्यैन्द्रासोमीयमेकादशकपालꣳ सौम्यं चरुं । बभ्रुं ददात्यथ त्रयोदशे ऽहनि सोमापौष्णं चरुं निर्वपत्यैन्द्रापौष्णं चरुं पौष्णं चरुꣳ । श्यामं ददात्यथ चतुर्दशे ऽहनि वैश्वानरं द्वादशकपालं निर्वपति । हिरण्यं ददात्यथ पञ्चदशे ऽहनि वारुणं यवमयं १० चरुमश्वं ददाति । ॥ ४ ॥ प्रथमः ॥

अथैनमामावास्येन हविषेजानꣳ रत्निनः पर्यवयन्ति[6] दक्षिणतो वोदञ्चो पश्चाद्वा प्राञ्चस्तेषामवसितानां ब्रह्मैव दक्षिणार्ध्यो वापरार्ध्यो वा भवति । स[7] यत्किंच यज्ञपरिभोजनं[8] ब्रह्मण एव[9] तद्गृहे[9] भवत्यथारण्योरग्नीन्समारोप्य ब्रह्मणो ११

---

१ इति om. T Be 11 U.

२ ॰तरं Be 11 T.

३ om. B Be U; the word should be supplied, also Vol. i. p. 264, 4.

४ इति om. all the MSS.

५ ॰तरीं Be 11 T.

६ पर्युपविशंति B Be U.

७ om. Be 11 T.

८ ॰भाजनं B Be U.

९ Thus M Be 11 T; एवैत॰ B Bc.

Digitized by Google

गृहानध्यवसाय मथित्वाग्नीन्निरुप्य बार्हस्पत्यं चरुं निर्वपति ब्रह्मणो गृहे । शितिपृष्ठं ददात्यथारण्योरग्नीन्समारोह्य[१] स्वान्यन्यायतनान्यभिप्रव्रजति[२] । तं यन्तमनुमन्त्रयते ऽयं नो राजा वृत्रहा राजा भूत्वा वृत्रं वध्यादित्यथ स्वान्यन्यायतनान्यध्यवसाय मथित्वाग्नीन्निरुप्यैन्द्राय सुत्राम्णे पुरोडाशमेकादशकपालं प्रतिनिर्वपत्यथाप्येतदहः[३] श्वेतायै श्वेतवत्सायै पयो दोहयित्वा समानत्र निदधात्यथ श्वो भूते ऽरण्योरग्नीन्समारोह्य राजन्यस्य गृहानध्यवसाय मथित्वाग्नीन्निरुप्यैन्द्रमेकादशकपालं राजन्यस्य गृहे । ऋषभं ददाति । तथारण्योरग्नीन्समारोह्य स्वान्येवान्यायतनान्यभिप्रव्रजति[४] । तं तथैव[५] यन्तमनुमन्त्रयते । यस्य यस्य गृहे यजते ततो ऽनुमन्त्रयते ऽयं नो राजा वृत्रहा राजा भूत्वा वृत्रं वध्यादित्यथ स्वान्येवान्यायतनान्यध्यवसाय मथित्वाग्नीन्निरुप्यैन्द्रायांहोमुचे पुरोडाशमेकादशकपालं प्रतिनिर्वपति । अज्ञातमेवाप्येतदहः श्वेतायै श्वेतवत्सायै पयो दोहयित्वा समानत्रैव[६] निदधात्यथ तृतीये ऽह्न्यादित्यं चरुं महिष्यै गृहे । धेनुं ददात्यथ चतुर्थे ऽहनि भगाय चरुं वावातायै गृहे । विचित्तगर्भां पष्ठौहीं ददात्यथ पञ्चमे ऽहनि

१ ॰रोप्य here and infra sometimes B Be U.

२ ॰व्रजंति MT Be Be 11 ; ॰इति B.

३ प्रति om. MT Be 11 but cp. Āp. xviii. 10. 28.

४ एव after स्वानि om. MT Be 11 ; ॰व्रजति T Be 11. B ; ॰व्रजंति M Be.

५ Thus MUB Be ; एव om. Be 11 T.

६ एव om. Be BU.

नैर्ऋतं चरुं परिवृक्त्यै गृहे कृष्णानां व्रीहीणां नखनिर्भिन्नं । कृष्णां कूटां ददात्यथ षष्ठे ऽहन्याग्नेयमष्टाकपालꣳ सेनान्यो गृहे । हिरण्यं ददात्यथ सप्तमे ऽहनि वारुणं दशकपालꣳ सूतस्य गृहे । महानिरष्टं ददात्यथाष्टमे ऽहनि मारुतꣳ सप्तकपालं ग्रामण्यो गृहे । पृश्निं ददात्यथ नवमे ऽहनि सावित्रं द्वादशकपालं क्षत्तुर्गृहे । उपध्वस्तं ददात्यथ दशमे ऽहन्याश्विनं द्विकपालꣳ संग्रहीतुर्गृहे । सवात्यौ ददात्यथैकादशे ऽहनि पौष्णं चरुं भागदुघस्य गृहे । श्यामं ददात्यथ द्वादशे ऽहनि रौद्रं गावीधुकं चरुमक्षावापस्य गृहे । शबलमुद्वारं ददाति । प्रसिद्धमेवाश्वैतदहः[1] श्वेतायै श्वेतवत्सायै पयो दोहयित्वा[2] समानत्रैव[3] निदधात्यथ त्रयोदशे ऽहनि मैत्राबार्हस्पत्यं भवति । ॥ ५ ॥

अथ वै भवति श्वेतायै श्वेतवत्सायै दुग्धे स्वयंमूर्ते स्वयंमथित आज्य आश्वत्थे पात्रे चतुःस्रक्तौ स्वयमवपन्नायै शाखायै कर्णाꣳश्चाकर्णाꣳश्च तण्डुलान्विचिनुयादित्यथ वै भवति स्वयंकृता वेदिर्भवति स्वयंदिनं बर्हिः स्वयंकृत इध्म इति । राजैवायꣳ[4] स्वयं कर्मभिः पूजितो भवति । स[5] स्वयमेव वेदिं करोति स्वयमिध्माबर्हिः संनह्यति स्वयमाश्वत्थं पात्रं चतुःस्रक्ति[6]

---

१ Thus B Be U; प्रसिद्धमेवाश्वेनं द्वादशाहं M; अथ प्रसिद्धमेवाश्वैद्वादशा T Be 11.

२ दोहयित्वादोहयित्वा M.

३ समानत्रसमानत्रैव M; मानधेमाधाद्त्रैव Be 11 T.

४ corrected; राजैवायतु M Be BU; राजैवैवं Be 11 T.

५ om. T Be 11.

६ चक्रि T Be 11, but cp. Āp. xviii. 11. 2.

करोति[1] स्वयमवपन्नायै स्राक्त्यायै कर्णांश्चाकर्णांश्च तण्डुला-न्विविनोत्यथ वै भवति ये कर्णाः स पयसि बार्हस्पत्यो ये ऽकर्णाः स आज्ये मैत्र इत्यथोत्तरतो भस्ममिश्रानङ्गारान्निरूह्य तेषु नवं पात्रमधिश्रित्य तिरः पवित्रमाज्यमानीय[2] तिरः[2] पवित्रमकर्णानोप्य[2] तेन[2] बार्हस्पत्यमपिदधाति[3] । तं तथापि-हितमन्तर्वेद्यासादयति[4] । समानं कर्म प्रयाजेभ्यः । पञ्च प्रयाजानिष्ट्वोद्धृत्याक्रम्य संस्रावेण बार्हस्पत्यमभिघार्य मैत्र-मभिघारयति । बार्हस्पत्येन पूर्वेण प्रचरत्यथ मैत्रेण । बार्ह-स्पत्यस्य पूर्वस्य स्विष्टकृते ऽवद्यत्यथ मैत्रस्य । बार्हस्पत्यस्य पूर्व-स्यैडामवद्यत्यथ मैत्रस्यान्वाहार्यमासाद्यैतामेव श्वेताꣳ श्वेतवत्सां ददाति । संतिष्ठते मैत्राबार्हस्पत्यꣳ हविः । ॥ ६ ॥ द्वितीयः ॥

अथैतस्मिन्नेव पूर्वपक्ष उक्थ्यायाभिषेचनीयाय दीक्षते । तस्यापरिमिता दीक्षाः षडुपसदः । स यदा राजानं क्रीणाति यदा मन्यते ऽमावास्यायै मे यक्ष्ये[5] ऽहम्सुत्या संपत्स्यत इति ।

---

१ वापति B Be U.

२ Thus M; Be BT om. चाज्यमानीय तिरः पवित्रं and Be BU have कर्णान् i.s.o. चकर्णान् ।

३ चभिद॰ Be 11 T.

४ वेदमपिहित॰ T Be 11.

५ Thus MB Be; यज्ञीये U; यजनीये T Be 11; this latter might be the right reading, but as the expression यक्ष्ये ऽहम् occurs several times infra, xvii. 55-61, without any various reading, I did not venture to write यजनीये in the text.

Digitized by Google

तस्य तथा संपद्यते । ऽथ प्रायणीयेन चरति । प्रायणीयेन चरित्वा पद्येन चरति । पद्येन चरित्वा रोहिते[1] चर्मण्यधि[2] राजानं क्रीत्वातिथ्यं निर्वपत्यातिथ्येन प्रचर्यान्वहमुपसद्भि- श्चरत्यथाग्नीषोमीयं प्रचरत्याग्नीषोमीयं प्रणीय रथवाहने सदो- हविर्धाने संमिनोति । रथवाहने सदोहविर्धाने संमित्याग्नी- षोमौ प्रणयत्यग्नीषोमौ प्रणीय यूपस्यावृता यूपमुच्छ्रयति । सर्वान्तं यूपमुच्छ्रित्याग्नीषोमीयं पशुमुपाकरोति । तस्य प्रसिद्धं वपया चरित्वा वसतीवरीर्गृहीत्वाथैष पशुपुरोडाशं निर्वपति । तमनुवर्तन्ते ऽष्टौ देवसुवाꣳ हवीꣳष्यग्नये गृहपतय इत्येतानि तेषामुक्तं चरणं यथाग्नेर्विधानात्सिद्धान्ताः पुरोडाशाः संति- १४
ष्ठन्ते । पत्नीसंयाजान्ताः पशुर्हृदयशूलान्त इत्येके । ऽथैतामनु- भौवमुदिग्रहाणावर्तयंश्च वसतीवरीः परिहृत्य यथाꣳसि विभिन्नोपचरन्त्यथातो महारात्र एव बुध्यन्ते । प्रातराज्यानि गृहीत्वा राजानमुपावहृत्य प्रातरनुवाकमुपाकरोति । परि- हिते प्रातरनुवाके ऽपो ऽच्छैत्यग्निवदेत्युक्थ्य[1] क्रतुमुपैति । १५
प्रसिद्धो ऽभिषवः । प्रसिद्धं ग्रहा गृह्यन्ते । समानं कर्माग्निमा- रुतादाग्निमं यद्वै[2] हुत्वा द्वे रशने आदाय यूपमभ्येति । सर्वान्तं यूपमुच्छ्रित्याग्नेयं पशुमुपाकरोति । तथैन्द्राग्न उपा- लम्भ्यो भवति । तयोः प्रसिद्धं वपाभ्यां चरित्वा प्रसर्पन्ति

---

१ Missing in M Be T, but cp. the Dvaidhasūtra.

२ ॰चरेत्॰ Be U; ॰वरेत्॰ the other MSS.

३ om. M Be.

Digitized by Google

प्रातःसवनाय । तद्यथा संतिष्ठते । प्रसर्पन्ति माध्यंदिनाय सव-
नाय । प्रसिद्धो ऽभिषवः । प्रसिद्धं पात्रा गृह्यन्ते । समानं कर्मा
दाक्षिणेभ्यो । दाक्षिणानि होष्यन्नपत्याग्नीध्रशालायाः यजुषा
युपं वासयन्तेनैतस्य वत्सचर्माणमायां दृष्मायां निष्करज्जुः प्रप-
९ चिता[1] भवत्येतस्मादाघाड्ढेहि[2] यजमानेत्युत्तरेणाग्नीध्रीयं
परीत्योत्तरेण सदः परीत्यापेण प्राचां तिष्ठते प्रतिप्रस्थाता
एतानि सत्राणि प्रयच्छत्यत्याढेहि यजमानेति । रथ एव
दक्षिणे श्रोण्यन्ते रथवाहन आहितो भवति । तमुपावहर-
न्तीन्द्रस्य[3] वज्रो ऽसि वार्त्रघ्नस्त्वयायं वृत्रं वध्यादित्यथैनं धूर्ष-
१० हीतमन्तर्वेद्यभ्यवर्तयन्ति[4] तूष्णीमथास्य वाम्यम्भूस्यति तूष्णी-
मेव दक्षिणं योग्यं युनक्ति[5] मित्रावरुणयोस्त्वा प्रशास्त्रोः
प्रशिषा युनज्मि यज्ञस्य योगेनेत्यथास्य पृष्ठं मर्मृज्यते तूष्णी-
मेवमेवोत्तरं योग्यं युनक्ति । तस्यैवमेवोत्तरतः प्रष्टिमुपनि-
युनक्ति । तयोरेवमेव पृष्ठे[6] मर्मृज्यत[6] । एतस्य योगमनु
११ सर्वमाश्विनमुच्यते । ऽधिकक्षान्ववसितान् कुर्वन्ति । प्रवेष्टयन्ति
वासोभारान्वसनानां दृग्मासु निष्करज्जूः प्रयच्छन्ति । पूर्णमो
दक्षिणा प्रयात्यथाय सौरीभ्यामृग्भ्यां गार्हपत्ये जुहोति ।

---

१ ॰चितो MSS.

२ भवतीत्येत॰ M.

३ ॰हरती॰ Be BU ; ॰हरंति॰ MT Be 11.

४ Thus M only ; ॰भ्यवर्तयंति T Be 11 U Be ; ॰भ्यावर्तयंति B.

५ Here Be BU ins. तस्यैवमेवोत्तरतः प्रष्टिमुपनियुनक्ति ।

६ Thus MB Be U ; पृष्ठमुन्मृज्य T Be 11.

Digitized by Google

मयवत्यर्चाग्नीध्रे जुहोति । सृज्यन्ते[१] दक्षिणा दक्षिणापथेन । स यत्किंचिद्ददाति[२] हिरण्यमुखमेव ददात्यथ वासाꣳस्यथ[३] धुक्षाणि[३] गोअश्वꣳ हस्तिपुरुषमन्ततो[४] । ऽदत्ता एवैते रथा अतिवर्तन्ते[५] । नैते ऽन्यस्य सन्त आजिं धावन्ति । मनसैव सारथमध्वर्यवे ददाति । मनसा चतुष्पात्स्वेचं[६] ब्रह्मण आदिशति । मनसा समनुदिश्य[७] दक्षिणाभिर्मरुत्वतीयैश्चरति[८] । सीदन्ति नाराशꣳसा आप्यायिता दक्षिणस्य हविर्धानस्यापालम्बमधोऽधो[९] माहेन्द्राय । ॥ ७ ॥

अथ याचति वैतसं[१०] द्रोणकलशꣳ षोडश[११] वायव्यान्यथाश्चैतत्पुरस्तादेव[१२] षोडशतयं आपो दिग्भ्यः संभृता[१३]

---

१ संसृज्यते T Be 11.

२ यत्किंचद० M.

३ Thus M; उत i.s. of अथ T Be 11; B Be again (cp. s… p. 73, 10) वसांसि i.s.o. अथ।

४ Thus MUB Be; हस्तिदासपुरुष० T Be 11.

५ Thus M only; अतिनिवर्तंते Be BU; अतिपतंते Be 11 T.

६ चतुष्पात्स्वेचं all MSS. exc. M which has चतुष्पत्स्वेचं; one copy… Bhav. has the word with ā, another with a, cp. Ait. Br. viii. 20.…

७ Thus MB; समनुदिश्य Be U; समुद्दिश्य Be 11 T.

८ चरति M; चरंति the other MSS.

९ ०स्यापालंब० Be (sec. m.).

१० च ins. MT Be 11.

११ षोडशंच M.

१२ एताः i.s.o. एव Be BU.

१३ Thus M Be; संभृता BU; समाहृता Be 11 T.

Digitized by Google

Nityācārapaddhati, Fasc. 1–7 @ /10/ each ... ... Rs.	4	6
Nityācārapradīpa, Fasc. 1–8 @ /10/ each	5	0
Nyāyabindutīka, Fasc. 1 @ /10/ each	0	10
*Nyaya Kusumāñjali Prakaraṇa, Vol. I, Fasc. 2–6; Vol. II, Fasc. 1–3 @ /10/ each	5	0
Padumawati, Fasc. 1–4 @ 2/-	8	0
Pariçiṣṭa Parvan, Fasc. 1–5 @ /10/ each	3	2
Prākrita-Paingalam, Fasc. 1–7 @ /10/ each	4	6
Prithvīrāj Rāsa, Part II, Fasc. 1-5 @ /10/ each	3	2
Ditto (English) Part II, Fasc. 1 @ 1/- each	1	0
Prākṛta Lakṣaṇam, Fasc. 1 @ /1/8 each	1	8
Parāçara Smṛti, Vol. I, Fasc. 1-8, Vol. II, Fasc. 1-6; Vol. III, Fasc. 1-6 @ /10/ each	12	8
Parāçara, Institutes of (English) @ 1/- each	1	0
Prabandhacintāmaṇi (English) Fasc. 1-3 @ 1/4/ each	3	12
Saddarśana-Samuccaya, Fasc. 1, @ /10/ each	0	10
*Sāma Vēda Saṁhitā, Vols. I, Fasc. 5-10; II, 1-6; III, 1-7; IV, 1-6; V, 1-8 @ /10/ each	20	10
Sāṅkhya Sūtra Vṛtti, Fasc. 1-4 @ /10/ each	2	8
to (English) Fasc. 1-3 @ 1/- each	3	0
Vejaya, Fasc. 2-3 @ /10/ each	1	4
Kriyā Kaumudī, Fasc. 1-6 @ /10/ each	3	12
tra Latyayan, Fasc. 1-9 @ /10/ each	5	10
,, Asbalayana, Fasc. 1-11 @ /10/ each	6	14
mhitā, (Eng.) Fasc. 1 @ 1/- each	1	0
umudī, Fasc. 1-4 @ /10/ each	2	8
a Brahmana, Fasc. 3-25 @ /10/ each	14	6
Pratisakhya, Fasc. 1-3 @ /10/ each	1	14
Saṁhitā, Fasc. 22-45 @ /10/ each	15	0
āhmaṇa, Fasc. 1–19 @ /10/ each	11	14
rtika (English) Fasc. 1-6 @ 1/4/	7	8
ntāmaṇi, Vol. I, Fasc. 1-9; Vol II, Fasc. 2-10; Vol. III, 2; Vol. IV, Fasc. 1; Vol. V, Fasc. 1-5; Part IV, Vol. II, -12 @ /10/ each	23	12
hādhigama Sutram, Fasc. 1-3 @ /10/	1	14
a-Maṇḍanam, Fasc. 1-3 @ /10/	1	14
atsai, Fasc. 1-5 @ /10/	3	2
a-bhava-prapañca-kathā, Fasc. 1-11 @ /10/ each	6	14
dasāo, (Text and English) Fasc. 1-6 @ 1/-	6	0
arita, Fasc. 1 @ /10/	0	10
ā Kaumudī, Fasc. 1-6 @ /10/	3	12
na, Vol. I, Fasc. 2-6; Vol. II, Fasc. 1-7; @ /10/ each ...	7	8
rijata, Fasc. 1-8 @ /10/	5	0
ākara, Fasc. 1-7 @ /10/ each	4	6
mbhū Purāṇa, Fasc. 1-6 @ /10/	3	12
risms of Patanjali, Fasc. 2-5 @ /1/ each	2	8

Tibetan Series.

hi S'īñ, Fasc. 1-4 @ 1/- each	4	0
Sh , Vol. I, Fasc. 1-5; Vol. II, Fasc. 1-3; Vol. III, Fasc. 1-6 h	14	0
Rt dpag hkhri S'iñ (Tib. & Sans. Avadāña Kalpalatā) Vol. I, Fasc. ; Vol. II, Fasc. 1-5 @ 1/- each	11	0

Arabic and Persian Series.

'Ālamgīrnāmah, with Index, (Text) Fasc. 1-13 @ /10/ each ...	8	2
Al-Muqaddasi (English) Vol. I, Fasc. 1-3 @ 1/-	3	0
Āīn-i-Akbarī, Fasc, 1-22 @ 1/8/ each	33	0
Ditto (English) Vol. I, Fasc. 1-7, Vol. II, Fasc. 1-5, Vol. III, Fasc. 1-5, @ 2/- each	34	0
Akbarnāmah, with Index, Fasc. 1-37 @ 1/8/ each	55	8
Ditto English Vol. I, Fasc. 1-8; Vol. II, Fasc. 1-3 @ 1/4/ each	13	12
Arabic Bibliography, by Dr. A. Sprenger @ /10/	0	10
*Bādshāhnāmah, with Index, Fasc 1-19 @ /10/ each	11	14
Conquest of Syria, Fasc. 1-9 @ /10/ each	5	10
Catalogue of Arabic Books and Manuscripts 1-2 @ 1/- each ...	2	0
Catalogue of the Persian Books and Manuscripts in the Library of the Asiatic Society of Bengal, Fasc. 1-3 @ 1/- each	3	0
Dictionary of Arabic Technical Terms, and Appendix, Fasc. 1-21 @ 1/8/ each	31	8
Farhang-i-Rashidī, Fasc. 1-14 @ 1/8/ each	21	0
Fihrist-i-Tūsī, or Ṭūsy's list of Shy'ah Books, Fasc. 1-4 @ 1/- each	4	0
Futūḥ-ush-Shām of Wāqidi, Fasc. 1-9 @ /10/ each	5	10
Ditto of Āzādī, Fasc. 1-4 @ /10/ each	2	8

* The other Fasciculi of these works are out of stock, and complete copies cannot be supplied.

Digitized by Google

LIST OF BOOKS FOR SALE

AT THE LIBRARY OF THE

ASIATIC SOCIETY OF BENGA

No. 57, PARK STREET, CALCUTTA,

AND OBTAINABLE FROM

The Society's Agents—

MR. BERNARD QUARITCH, 11, *Grafton Street, New Bond Street, Lo*

AND MR. OTTO HARRASSOWITZ, BOOKSELLER, *Leipzig, Germany.*

*Complete copies of those works marked with an asterisk * cannot be suppli*
of the Fasciculi being out of stock.

BIBLIOTHECA INDICA.

Sanskrit Series.

		Rs.
*Advaita Brahma Siddhi, Fasc. 2,4 @ /10/ each	...	
Advaitachintā Kaustubha, Fasc. 1–3 @ /10/ each	...	...
*Agni Purāṇa, Fasc. 3–14 @ /10/ each	...	...
Aitarēya Brāhmaṇa, Vol. I, Fasc. 1–5; Vol. II, Fasc. 1–5; Vol. III, Fasc. 1–5, Vol. IV, Fasc. 1–8 @ /10/ each	...	...
Aitareyalocana	...	...
*Anu Bhāshya, Fasc. 2-5 @ /10/ each	...	...
Aphorisms of Sāṇḍilya (English), Fasc. 1 @ 1/-	...	...
Aṣṭasāhasrikā Prajñāpāramitā, Fasc. 1-6 @ /10/ each		...
*Atharvana Upanishad, Fasc. 3-5 @ /10/ each	...	...
Ātmatattvaviveka, Fasc. I	...	...
Açvavaidyaka, Fasc. 1–5 @ /10/ each ...	...	...
Avadāna Kalpalatā, (Sans. and Tibetan) Vol. I, Fasc. 1–6; Vol. II, Fasc. 1–5 @ 1/ each	...	... 1
A Lower Ladakhi version of Kesarsaga, Fasc. 1-3 @ 1/- each		...
Bālam Bhaṭṭī, Vol. I, Fasc. 1–2, Vol. II, Fasc. 1, @ /10/ each		

(7), 1902 ... ṇa Srauta Sūtra, Fasc. 1–3 ... 1899 (8), 1900 (7), 19
... 1904 (16) @ 1/8 per No. to Members a
@ 2/- per No. to Non-Members.

N.B.—The figures encl... brackets give the number of Nos. in e

4. Journal and Proceedings, N. S., 1905, to date, @ 1-8 per ... Members and Rs. 2 per No. to Non-Members ... (cp. s
5. Memoirs, 1905, to date. Pric... number to ... count of 25°/ₒ to Members.
6. Centenary Review of the Researches of the Society from 1784 ...
   A sketch of the Turki language as spoken in Eastern Turkista... R. B. Shaw (Extra No., *J.A.S.B.*, 1878) ... ...
   Catalogue of Mammals and Birds of Burmah, by E. Blyth (E... No., *J.A.S.B.*, 1875) ... ... 11 T.
7. Catalogue of the Library of the Asiatic Society, Bengal, 1884. ... one co
8. Mahābhārata, Vols. III and IV, @ 20/ each ... ...
9. Moore and Hewitson's Descriptions of New Indian Lepidop... Parts I-III, with 8 coloured Plates, 4 to. @ 6/- each ...
10. Tibetan Dictionary, Csoma de Kőrös ... ...
11. Ditto Grammar " " ... ...
12. Kaçmīraçabdāmṛta, Parts I and II @ 1/8/ ... ...
13. A descriptive catalogue of the paintings, statues, &c., in the ro... of the Asiatic Society of Bengal, by C. R. Wilson ... 1
14. Memoir on maps illustrating the Ancient Geography of Kaśmir, by M. A. Stein, PhD., Jl. Extra No. 2 of 1899 4
15. Persian Translation of Haji Baba of Ispahan, by Haji Shaikh Ahmad-i-Kirmani, and edited with notes by Major D. C. Phillott. ... 10

Notice of Sanskrit Manuscripts, Fasc. 1-33 @ 1/- each 33
Nepalese Buddhist Sanskrit Literature, by Dr. R. L. Mitra ... 5

N.B.—All Cheques, Money Orders, &c., must be made payable to the "Trea... Asiatic Society," only.

Digitized by Google

1-1-07

Books are supplied by V.P.P.

INDEX.

icayanam ... ... Praśna X.
apeyaḥ ... ... „ XI.
asūyaḥ ... ... „ XII.
alpaḥ ... .. „ XIII.
ānuvākyam ... ... „ XIV.
medhaḥ ... ... „ XV.
aśāhaḥ ... ... „ XVI. 1-12 (adhy. 1-3).
m ayanam ... ... „ „ 13-23 („ 4-6).
āh ... ... „ „ 24-fin.
rātraḥ, trirātraḥ ... ... „ „ 24-27 („ 7).
ūrātraḥ ... ... „ „ 28
icarātraḥ, sārasvatam aya-
am ... ... „ „ 29 („ 8).
nyayanam ... ... „ „ 30
tarātraḥ-daśarātraḥ ... „ „ 31
daśarātraḥ-trayodaśarā-
raḥ ... ... „ „ 32 („ 9).
rdaśarātraḥ-viṃśatirātraḥ „ „ 33 („ 10).
rviṃśatirātraḥ-catustriṃ-
adrātraḥ ... ... „ „ 34-35 („ 11).
... 12)

MDCCXLVI-MDCCXCIV

EDITED BY

DR. W. CALAND OF UTRECHT.

VOL. II, FASCICULUS II.

CALCUTTA:
PRINTED AT THE BAPTIST MISSION PRESS,
AND PUBLISHED BY THE
ASIATIC SOCIETY, 57, PARK STREET.
1908.

Digitized by Google

LIST OF BOOKS FOR SALE

AT THE LIBRARY OF THE

ASIATIC SOCIETY OF BENGA[L]

No. 57, PARK STREET, CALCUTTA,

AND OBTAINABLE FROM

The Society's Agents—

MR. BERNARD QUARITCH, 11, *Grafton Street, New Bond Street, Lon[don]*

AND MR. OTTO HARRASSOWITZ, BOOKSELLER, *Leipzig, Germany.*

Complete copies of those works marked with an asterisk * cannot be supplie[d] of the Fasciculi being out of stock.

BIBLIOTHECA INDICA.

Sanskrit Series.

*Advaita Brahma Siddhi, Fasc. 2,4 @ /10/ each ... Rs.
Advaitachintā Kaustubha, Fasc. 1-3 @ /10/ each ... ...
*Agni Purāṇa, Fasc. 3-14 @ /10/ each ... ...
Aitarēya Brāhmaṇa, Vol. I, Fasc. 1-5; Vol. II, Fasc. 1-5; Vol. III, Fasc. 1-5, Vol. IV, Fasc. 1-8 @ /10/ each ... ...
Aitareyaloçana ... ...
*Anu Bhāshya, Fasc. 2-5 @ /10/ each ... ...
Aphorisms of Sāṇḍilya (English), Fasc. 1 @ 1/- ... ...
Aṣṭasāhasrikā Prajñāpāramitā, Fasc. 1-6 @ /10/ each ...
*Atharvana Upanishad, Fasc. 3-5 @ /10/ each ... ...
Ātmatattvaviveka, Fasc. I ... ...
Açvavaidyaka, Fasc. 1-5 @ /10/ each ... ...
Avadāna Kalpalatā, (Sans. and Tibetan) Vol. I, Fasc. 1-6; Vol. II, Fasc. 1-5 @ 1/ each ... ...
A Lower Ladakhi version of Kesarsaga, Fasc. 1-3 @ 1/- each ...
Bālam Bhaṭṭī, Vol. I, Fasc. 1-2, Vol. II, Fasc. 1, @ /10/ each
Baudhāyana Śrauta Sūtra, Fasc. 1-3; Vol. II, Fasc. 1 @ /10/ each ...
*Bhāmati, Fasc. 4-8 @ /10/ each ... ...
Bhāṭṭa Dīpikā, Vol. I, Fasc. 1-5 @ /10/ each ... ...
Brahma Sūtra, Fasc. 1 @ /10/ each ... ...
Bṛhaddevatā, Fasc. 1-4 @ /10/ each ... ...
Bṛhaddharma Purāṇa, Fasc. 1-6 @ /10/ each ... ...
Bodhicaryāvatāra of Çāntideva, Fasc. 1-5 @ /10/ each ...
Çatadūṣaṇī, Fasc. 1-2 @ /10/ each ... ...
Catalogue of Sanskrit Books and MSS., Fasc. 1-4 @ 2/ each ...
Çatapatha Brāhmaṇa, Vol. I, Fasc. 1-7; Vol. II, Fasc. 1-5 Vol. III, Fasc. 1-7; Vol. V, Fasc. 1-4 @ /10/ each 14
Ditto Vol. VI, Fasc. 1-2 @ 1/4/ each 2
Çatasāhasrikā-prajñāpāramitā, Part I, Fasc. 1-12 @ /10/ each ... 7
*Caturvarga Chintāmaṇi, Vol. II, Fasc. 1-25; Vol. III, Part I, Fasc. 1-18, Part II, Fasc. 1-10; Vol. IV, Fasc. 1-6 @ /10/ each ... 36
Ditto Vol. IV, Fasc. 7, @ 1/4/ each 1
Çlokavartika, (English), Fasc. 1-7 @ 1/4/ each 8
*Çrauta Sūtra of Āpastamba, Fasc. 9-17 @ /10/ each ... 5
Ditto Çāṅkhāyana, Vol I, Fasc. 1-7; Vol. II, Fasc. 1-4; Vol. III, Fasc. 1-4; Vol. 4, Fasc. 1 @ /10/ each 10
Çrī Bhāshyam, Fasc. 1-3 @ /10/ each ... ...
Dāna Kriyā Kaumudī, Fasc. 1-2 @ /10/ each ... ...
Gadadhara Paddhati Kālasāra, Vol. 1, Fasc. 1-7 @ /10/ each ...
Ditto Ācārasāra, Vol. II, Fasc. 1-3 @ /10/ each ...
*Gobhilīya Gṛhya Sūtra, Fasc. 4-12 @ /10/ each ... ...
Ditto Vol. II, Fasc. 1-2 @ 1/4 /each ... ...
Kāla Viveka, Fasc. 1-7 @ /10/ each ... ...
Kātantra, Fasc. 1-6 @ /12/ each ... ...
Kathā Sarit Sāgara, (English) Fasc. 1-14 @ 1/4/ each ...
Kūrma Purāṇa, Fasc. 3-9 @ /10/ each ... ...
Lalita-Vistara, (English) Fasc. 1-3 @ 1/- each ... ...
*Lalitavistara, Fasc 3-6 @ /10/ each ... ...
Madana Pārijāta, Fasc 1-11 @ /10/ each ... ...
Mahā-bhāṣya-pradīpodyota, Vol. I, Fasc. 1-9; Vol. II, Fasc. 1-12; Vol. III, Fasc. 1-8 @ /10/ each ... ...
Manuṭīkā Saṅgraha, Fasc. 1-3 @ /10/ each ... ...
Mārkaṇḍeya Purāṇa, (English) Fasc. 1-9 @ 1/- each ... ...

Digitized by Google

INDEX.

...icayanam	Praśna X.		
...apeyaḥ	„ XI.		
...sūyaḥ	„ XII.		
...alpaḥ	„ XIII.		
...ānuvākyam	„ XIV.		
...medhaḥ	„ XV.		
...aśāhaḥ	„ XVI.	1-12	(adhy. 1-3).
...m ayanam	„ „	13-23	(„ 4-6).
...āḥ	„ „	24-fin.	
...rātraḥ, trirātraḥ	„ „	24-27	(„ 7).
...urātraḥ	„ „	28	(„ 8).
...carātraḥ, sārasvatam ayanam	„ „	29	
...nyayanam	„ „	30	
...tarātraḥ-daśarātraḥ	„ „	31	(„ 9).
...daśarātraḥ-trayodaśarātraḥ	„ „	32	
...rdaśarātraḥ-viṃśatirātraḥ	„ „	33	(„ 10).
...rviṃśatirātraḥ-catustriṃśadrātraḥ	„ „	34-35	(„ 11).
...riṃśadrātraḥ-sahasrarātraḥ	„ „	36	(„ 12).
...ā tatiḥ	Praśnas XVII and XVIII.		
...ātraḥ	Praśna XVII.	1-10	(adhy. 1).
...daśinī	„ „	11-16	(„ 2-3).
...naścitiḥ	„ „	17	(„ 4).
...pasattram	„ „	18	(„ 5).
...vasṛjāṃ sattram	„ „	19	(„ 6).
...ḍapāyinām ayanam	„ „	20, 21	(„ 7).
...rgiṇām ayanam	„ „	22	(„ 8).
...citām ayanam	„ „	23	(„ 9).
...haścayanam	„ „	24	
...māsam	„ „	25	
...māsam	„ „	26	
...'yanam	„ „	27	
...itayaḥ	„ „	28-30	(„ 10).
...ṇī	„ „	31-38	(„ 11).
...tanam	„ „	39-44	(„ 12,13).
...yanāni	„ „	45-46	(„ 14).
...yā darśapūrṇamāsāḥ	„ „	47-54	(„ 15).
...rmāsyāḥ somāḥ	„ „	55-58	(„ 16).
...tirayanam	„ „	59-60	(„ 17).
...hāyajñaḥ	„ „	61-62	(„ 18).
...āḥ	„ XVIII.		
...haspatisavaḥ	„ „	1-2	(„ 1).
...apatisavaḥ	„ „	3	
...tasavaḥ	„ „	4	

Digitized by Google

somasavaḥ ... ... Praśna XVII, 5
pṛthisavaḥ ... ... " " 6 (adhy. 2)
gosavaḥ ... ... " " 7
odanasavaḥ ... ... " " 8-10 (" 3)
pañcaśāradīyaḥ ... ... " " 11
agniṣṭut ... ... " " 12-13
indrastut .. .. " " 14 (" 4)
aptoryāmaḥ ... ... " " 15
mṛtyusavaḥ ... ... " " 16-19 (" 5)
sadyaskrī, anukrī, parikrī, atikrī ... ... " " 20-23 (" 6)
vrātyastomāḥ ... ... " " 24-26
bhāllavistomāḥ ... ... " " 27 (" 7)
upahavyaḥ ... ... " " 28
tīvrasomaḥ, vighanaḥ ... ... " " 29-30 (" 8)
udbhid, valabhid ... ... " " 31
ṛtapeyaḥ, diśāṃ catuṣṭomaḥ, chandasām ekatrikaḥ, stomānām ekatrikaḥ, indrāgnyo stomaḥ ... ... " " 32-35 (" 9)
śyenaḥ, iṣuḥ, indravajraḥ ... " " 36
duraśaḥ, durṇāśaḥ, apacitiḥ, tviṣiḥ ... ... " " 37-39 (" 10)
ṛṣabhaḥ, vaniṣṭhusavaḥ, kānāndhayajñaḥ ... ... " " 40-41
manuyajñaḥ, vāca stomaḥ ... " " 42 (" 11)
yamastomaḥ ... ... " " 43
śadopaśadau paurūravasau, prājāpatyau, naidhruvasya kaśyapasya " " 44 (" 12).
punastomau ... . " " 45-47 (" 13).
praṇodaḥ, vibādhaḥ, pratinodaḥ, agner ativyādhaḥ, indravajraḥ, śunaskarṇayajñaḥ, rāśimarāyau, āñjanābhyañjanau, viṣūcīnaśālaḥ, sarvatomukhaḥ, sahasraśālaḥ " " 48-49 (" 14).
yamau stomau, agnyādityayo stomaḥ (?) ... ... " " 50 (" 15).
peyāni, diśāṃ stomaḥ, ṛtūnāṃ st., ṛṣiṇāṃ st., devatānāṃ st., darśapūrṇamāsayor ayanam ... . " " 51-53 (" 16).
Kāṭhakam ... ... " XIX.
sāvitraḥ ... ... " " 1-5 (adhy. 1-3).
nāciketaḥ ... ... " " 6 (" 4).
brahmacit ... ... " " 7 (" 5).
samastaḥ ... ... " " 8 (" 6).
vaiśvasṛjaḥ ... ... " " 9 (" 7).
āruṇaketukaḥ ... ... " " 10 (" 8).

Digitized by Google

हविष्मत्[१] हविर्धानस्य प्राञ्चौ ऽवाञ्चौ च उपस्थापयत्य-
भितः प्रेरते । तासां कलशः पूर्वार्ध्यो भवति धारयन्तो
ऽरत्नाः । स वहन्तीरभिगृह्णीतार्थेत स्थापो देवीर्मधुमतीर-
गृभ्णन्नूर्जस्वती राजसूयाय चितानाः । याभिर्मित्रावरुणाव-
भ्यषिञ्चन्याभिरिन्द्रमनयन्नत्यरातीः ॥ राष्ट्रदा स्थ राष्ट्रं दत्त
स्वाहेति । जुहोति पर्णमयेन राष्ट्रदा स्थ राष्ट्रममुष्मै दत्ता-
मुष्यायामुष्य पुत्रायामुष्य पौत्राय दत्तेत्यपां पतिरसीत्यपां प्र-
वाहः पुंस्यो[१] वोत्सम्[२] समुद्रियश्च वा । वृषास्यूर्मिरित्यौर्म्यो ।
वृषसेनो ऽसीति स्यन्दमाना । व्रजक्षित स्थेति कूप्याः । ओजस्वतीस्थ
स्थेति निवेष्याः[३] । सूर्यवर्चस स्थेत्यतिकृष्णाः[४] । सूर्यत्वचस स्थेत्यात-
पति वर्ष्या । मान्दा स्थेति स्थावर्यो[५] । वाशा स्थेति कुल्याः[६] ।
शक्वरी स्थेति गोरुल्का । विश्वभृत स्थेति पयो । जनभृत स्थेति
दध्यग्नेस्तेजस्या स्थेत्याज्यमपामोषधीनां[५] रस स्थेति मधुनश्च

१ Thus Be BU Bhav.; उपस्थाप MT Be 11.

२ Thus M Bhav.; पुत्रायोत्सम् Be U; पुत्रायो वाधस्यं B; पुत्रा-
यम् Be 11 T.

३ Thus M Be11 T and the best MSS of the Karmānta-
sūtra; परिवेष्याः B Be and Bhav.; निवेष्य the Vājasaneyins.

४ Thus only M and Bhav.; सूर्यवर्चसस्थेतिदृष्टं Be 11 T.; •स्थेति-
कृष्णाः Be; in BU the passage is missing; the Karmānta MSS.
read वर्षिष्ठाः ।

५ Thus M Be; the other MSS. defective.

६ Thus M Be Bhav.; कुल्या Be 11 T; but cp. TS. VII. 4. 13.

Digitized by Google

सारस्वतीरभिजुहोत्यपो[1] देवीर्मधुमतीरगृह्णन्नूर्जस्वती राज-सूयाय चितानाः । याभिर्मित्रावरुणावभ्यषिञ्चन्याभिरिन्द्रमनयन्नत्यरातीः ॥ राष्ट्रदा स्थ राष्ट्रं दत्त स्वाहेति । गृह्णाति पर्णमयेन राष्ट्रदा स्थ राष्ट्रममुष्मा आमुष्यायणायामुष्य पुत्रायामुष्य पौत्राय दत्तेत्यथैना वैतसे द्रोणकलशे समवनयति देवीरापः सं मधुमतीर्मधुमतीभिः सृज्यध्वं महि वर्चः क्षत्रियाय वन्वाना इत्यथैना अन्तरेण होतुश्च धिष्ण्यं ब्राह्मणाच्छंसिनश्च सादयत्यनाधृष्टाः सीदतोर्जस्वतीर्महि वर्चः क्षत्रियाय दधतीरित्यथ ये ऽर्घ्याः[2] प्ररेका अध्वर्योस्तानावसथꣳ हरन्त्यथ ये[3] ऽनर्घ्याः[3] अपस्तानभ्यवहरन्त्यनभिहुतानाꣳ सारस्वतीनां वसतीवरीर्दशपेयाय परिशाययन्ति । ॥ ८ ॥ तृतीयः ॥

अथापैव तिष्ठन्याचति दर्भनाडीꣳ शतमानꣳ[4] हिरण्यं चत्वारि नानारूपाणि पात्राणि[5] तार्प्यं चोष्णीषं चैकशतं च दर्भपुञ्जीलानि दध्युदुम्बरꣳ शष्पाणि धनुश्चेषूꣳश्चेति[6] । स दर्भनाड्याꣳ शतमानꣳ हिरण्यं प्रग्रथ्नात्यनिभृष्टमसि वाचो बन्धुस्तपोजा इत्यथैनद्वैतसे[7] द्रोणकलशे ऽवदधाति सोमस्य

---

१ Thus M Be U ; the other MSS. more or less corrupted.

२ तीर्घ्याः M Be 11 T.

३ मेनतीर्घ्या M Be 11 T.

४ च ins. T Be 11.

५ चाणि ins. Be BU.

६ इति om. Be BU.

७ Thus M only ; अथैतद्दै° Be BU ; अथैतद्वै° Be11 T.

द्रावमसीति । हिरण्येनोत्पुनाति शुक्रा वः शुक्रेणोत्पुनामि
चन्द्रांश्चन्द्रेणामृता अमृतेन स्वाहा राजसूयाय चितानाः इति ।
गृह्णाति पर्णमयेन सधमादो द्युम्निनीरूर्ज एता अनिभृष्टा
अपस्युवो वसानाः । पस्त्यासु चक्रे वरुणः सधस्थमपाꣳ शिशु-
९ र्मातृतमास्वन्तरिति । पुरस्तादासीनाय ब्रह्मणे प्रयच्छत्येतयैव
गृहीत्वा दक्षिणत आसीनायौदुम्बरेण राजन्याय प्रयच्छत्येत-
यैव गृहीत्वा पश्चादासीनायाश्वत्थेन वैश्याय प्रयच्छत्येतयैव
गृहीत्वोत्तरत आसीनाय नैयग्रोधेन जन्याय प्रयच्छत्यथैतं[1]
परेकमाग्नीध्रꣳ[1] कृत्वापिधाय[1] प्रज्ञातं निदधात्यथ यजमानं
१० तार्प्यं परिधापयति क्षत्रस्योल्बमसीति । क्षत्रस्य योनिरसी-
त्यावजते[2] तार्प्यमभीव नाभिमुष्णीषं पर्यस्यत्यथैनमेकशतेन
दर्भपुञ्जीलैः पवयति नित्येन पवनेनाथैनमुन्मृजन्नाग्रयति[3]
दध्युदुम्बरꣳ मध्वापणीत्यथैनमाविन्नैः प्राञ्चमानयत्याविन्नो
अग्निर्गृहपतिरिति सप्तभिरनुच्छन्दसमथैनं यजमानायतने
११ तिष्ठन्तं प्राहैष वो भरता राजेति येषाꣳ श्रेष्ठो[4] भवति ।
सोमो ऽस्माकं ब्राह्मणानाꣳ राजेतीतरे प्रत्याहुरथास्मै धनुः

---

१ Thus M only (reading however एनं i.s.o. एतं); Be U om. चाग्नीध्रं. Be 11 T are wholly corrupted.

२ Thus M Be B U; चावचवे Be 11 T; Bhav. reads अवते or चावचवे ।

३ Uncertain reading: °मुन्मृजन्नाग्रयति M U Be B; T Be 11 totally corrupted: °मुदुंबरमाग्रयति ।

४ Thus T Be 11; राजा M U Be B.

धाराः समुन्मृष्टे समावहन्तमधरागुदीचीरहिं बुध्नियमनुसंचर-
न्तीस्ताः पर्वतस्य वृषभस्य पृष्ठे नावश्चरन्ति स्वसिच इयाना
इत्यथैतेषामभिषेकाणां मुख्ये पात्रे संस्रावान्समवनीय[1]
प्रतिहितस्य स्थानेत्यथान्वारब्धयोः प्रतिहिते च महिष्यां च
जुहोति प्रजापते न त्वदेतान्यन्य इत्यथास्मा एष प्रतिहितो
वरं ददात्यथ प्रतिहिताय पात्रं प्रयच्छन्नाहेदं ते पात्रं दाया-
दमसदद्रा[2] त्वाभिषिञ्चामीदं ते ऽसदित्यथैतेनैव यथेतमेत्या-
ग्नीध्रे[3] प्ररेकं जुहोति रुद्र यत्ते क्रयी परं नाम तस्मै हुतमसि
यमेष्टमसि स्वाहेत्यथास्मै धनुः प्रयच्छति यदि पुरस्तादप्रत्तं
भवति । समुन्मृष्टे समुन्मोऽग्न्यभ्यषेच्ययमसावामुष्यायणो ऽमुष्य १०
पुत्रो ऽमुष्य पौत्रो ऽमुष्य नप्ता राजसूयेनेत्यथ भूर्भुवः स्वरिति
वाचं विसृजते । द्वाभ्यां मुखं विमृष्टे । गायत्राभिर्विष्णुक्रमान्क्र-
मते[4] । ऽथोपरिष्टादभिषेकस्य षट् पार्थानि जुहोतीन्द्राय
स्वाहा घोषाय स्वाहेति । द्वादश भूतानामवेष्टीर्जुहोति
पृथिव्यै स्वाहान्तरिक्षाय स्वाहेत्यथैतयोर्हविषोः स्विष्टकृता ११
चरत्यथैने अपिधाय प्रज्ञाते निदधाति । ॥ ११ ॥

अथ वाराही उपानहावुपमुञ्चते पशूनां मन्युरसीति

---

१ °स्रावमवनीय M.

२ Thus M, which omits only सद्रा, but cp. infra XII. 13 s. f.; दायादंसदसदा Be U; the other three MSS. are wholly corrupted; my copies of Bhav. read सद् i.s.o. असद् ।

३ आग्नीध्रे om. Be BU.

४ Thus Be 11 T; गायत्राभि° MU Be B.

दक्षिणे पादे तवैव मे मन्युर्भूयादिति सव्ये ऽथेमामभिमृशति नमो मात्रे पृथिव्या इति तस्यां दक्षिणं पादमुपावहरति[1] माहं मातरं पृथिवीꣳ हिꣳसिषमिति मा मां माता पृथिवी हिꣳसीदिति सव्यमथान्तरेण चात्वालोत्करावुदङुपनिष्क्रामति[2] विष्णोः क्रमो ऽसि विष्णोः क्रान्तमसि विष्णोर्विक्रान्तमसीत्युत्तरत एते रथा युक्तास्तिष्ठन्ति तान्हैव प्रतिष्ठितो ऽवतिष्ठत्यथ प्रतिष्ठितस्य धनुरादायाधिज्यं कृत्वा रथमातिष्ठति मरुतां प्रसवे जेषमित्याप्तं मन इति कूबरमभिनिश्वयते[3] तं तदानीमेव प्रतिष्ठितो ऽध्यातिष्ठति प्रसवाविषे पुरुहूत प्रभूनिति त्रिष्टुभान्वारभत इति ब्राह्मणमथ[4] प्रतिष्ठिताय[4] धनुः प्रयच्छत्याह राजन्य एव षट्त्रिꣳशद्धु शम्याप्रव्याधेषु निर्जयेन[5] सहस्रेणावसितस्तस्मा[6] इषुमस्यतादपैनꣳ[7] राध्नुताज्जिनैनं[8] दक्षिणापथेनात्याकुरुतादिति राजन्य

---

१ Thus MT Be 11; उपवहति Be BU.

२ °ष्क्रामति Be 11 T Be BU; °ष्क्रामंति M; Bhav. reads the plural, cf. p. 75, 3.

३ Thus corrected (cp. p. 79, 2; 105, 16); °भिनिश्वयते M Be U; °भिनियते B; °भिश्रायते Be 11 T.

४ Thus M only; ब्राह्मणंयतिप्रतिष्ठिताय Be 11 T; ब्राह्मणमयनिष्ठिताय Be BU.

५ Thus MU Be B; निर्जयेव Be 11 T.

६ Thus Be BU; °वसितस्तास्मा M; °वसीततस्मा Be 11 T.

७ Thus corrected; °मस्यतादावैनं Be 11 T; °मस्यतादयैनं M; °मास्यताउपैनां Be BU.

८ Thus corrected; °ध्नुताज्जिनैनं Be BU; °ध्नुताजलैनं T Be 11; °ध्नुताजिनैनं M.

Digitized by Google

इव संश्लिष्टो[१] भवति राजपुत्रस्य इषुमर्षयिष्यति[२] स सोप-
राज्यति[३] तस्मा उत्तरवर्ग्येण[४] संहत्येषुं[५] प्रयच्छतादिति[६] स
तथा करोति। ॥ १२ ॥ चतुर्थः ॥

अथाग्राभिषवं यजमान माहेन्द्रं ग्रहं गृहीत्वाग्नीध्रीयमासन्ने
यजमाने माहेन्द्रं ग्रहं ग्रहाति महाँ इन्द्रो य ओजसेत्यनु-
द्रुत्योपयामगृहीतोऽसि महेन्द्राय त्वा जुष्टं गृह्णामीति। परि-
मृज्य सादयत्येष ते योनिर्महेन्द्राय त्वेत्यथैतान्मणीन्वासयति
राजतमौदुम्बरꣳ सौवर्णमिति। न एते[१] नानासूत्रेष्वोता
भवन्ति। तानुत्तरस्य हविर्धानस्य मध्यमे वꣳशे प्रबध्नाति
उपस्पृश्य बर्हिषी आदाय वाचंयमः प्रत्यङ् द्रुत्वा स्तोत्रमुपा-
करोति। स्तुवते माहेन्द्राय। प्रस्तुते सामि संप्रेषमावाकिस्तुत

१ Thus corrected; संश्लष्टो M; श्लिष्टो T Be 11; संश्लिष्टो Be BU.

२ Thus corrected; इषुमाषिष्यति Be BU; इषुमर्षिष्यति M; इषु-
मस्यति T Be 11.

३ Thus corrected; •पराज्यति MSS.

४ Thus M Be BU; •वर्गेण T Be 11.

५ Thus M; समत्येषुं T Be 11; संहत्येषुं Be BU. I subjoin the
vivarana of this difficult passage as found in my two copies:
राजन्यः क्षत्रियः एव षड्विंशत्सु सख्यायेषु औतथ्येन (read •थ्येन) औपम्येना
वक्षितः श्लिष्टः तस्मै राजन्याय इषुमस्यतादित्याशिष एवमपराभूतां (sic) सोपा
प्रहार्षीत् (sic) पार्श्वे विध्यतो जित्वा तं दक्षिणापथेन दक्षिणायनमार्गेण वर्धी
क्षत्रियः पूर्वमेव श्लिष्टो (read संश्लिष्टो) भवति राजपुत्रस्येषुमस्यति स त्वा सोपा
क्षिपति तस्मै उत्तराधरेण तमप्रक्षिप्तं (read •पक्षि• ?) संहत्य दद्यादिति गृही-
संहत्य प्रयच्छति।

६ om. MT Be 11.

आजिं धावत दुन्दुभीन्समाघ्नताभिषोतारो[1] ऽभिषुणुताग्नीद्राग्निरं विनयोल्मुकमुदाद्य प्रतिप्रस्थातर्वारुणमेककपालं निर्वप सौम्यस्य विद्धीति । यथासंप्रैषं ते कुर्वन्ति । धावन्त्याजिसृत आघ्नन्ति दुन्दुभीन्संप्रवदन्ति वाद्यः । संप्रोदिता[2] वाद्यो ऽनुमन्त्रयते । प्राप्नुवन्ति घोषाः ग्रस्ताय । होत एषोत्तमेति प्राङ्होतुः कालात्पराङावर्तते ऽध्वर्युरभ्येनमाह्वयते होता । प्रत्याह्वयते ऽध्वर्युः । प्रशंसति । प्रतिगृणाति । प्रथिद्धमुक्थं प्रतिगीर्य प्राहेत्योपगच्छत एतं माहेन्द्रं ग्रहमनूपगच्छन्त इतरानुपोपगच्छन्ते नाराशंसानथाश्रावयत्यो श्रावयास्तु श्रौषडुक्थशा यज सोमस्येति । वषट्कृतानुवषट्कृते द्विर्जुहोति । तथैव द्विर्द्विर्नाराशंसाननुप्रकम्पयन्ति । द्विर्हुतो माहेन्द्रः परिश्रेत । आयन्ति रथाः । आगतास्तथान्दृष्ट्वा जपति[3] समहमिन्द्रियेण वीर्येण सं मयेन्द्रियं वीर्यमित्यथान्तरेण चात्वालोत्करावुदङुपनिष्क्रामत्युत्तरत[4] एते रथा युक्तास्तिष्ठन्ति । तान्दृष्ट्वैव प्रतिहितो ऽवतिष्ठत्यथ प्रतिहितस्य धनुरादायाधिज्यं[5] कृत्वा रथमातिष्ठति मरुतां प्रसवे जेषमित्याप्तं मन इति कूबरमभिनिम्र-

---

१ °समाहताभि° MB.

२ Thus only M; संप्रवदिता T Be 11; in the other MSS. this whole passage is missing.

३ Thus MU Be B; यजति Be 11 T.

४ °ष्क्रामत्यु° Be BU; °ष्क्रामंत्यु° M Be 11 T,

५ °राधायाज्यं M only.

यते[१] । तं तदानीमेव प्रतिषिक्तो ऽभ्युत्तिष्ठति प्रथमाश्रिये सुमङ्गल प्रभूरिति । विष्णुक्रमान्क्रमत इति आख्यायंत प्रति-षिताय धनुः प्रयच्छत्याहेदं ते धनुर्वीर्याय मघवद्भ्या[२] अभि-षिञ्चामीदं ते ऽभिहितमेतेनैव जयेत्येतमन्वारेभ धनुष्कोटि-रानुपातीत्य मूर्वया दारा हविर्धानं प्रपाद्य प्राङ् रथमात्स्थी[३] तिष्ठति । ॥ १३ ॥

तदेनमक्षाणीभ्यावपति राजतमौदुम्बरं सौवर्णमिति । सव्ये हस्ते राजतं प्रतिमुञ्चत इत्यदस्यायुरस्यायुर्मे धेहीति दक्षिण औदुम्बरमूर्गस्यूर्जं मे धेहीति दक्षिण एव सौवर्णं शुक्र(?) वर्चो ऽसि वर्चो मयि धेहीत्यथास्मा आसन्दीमुपोपच्छते[४] । तस्यां दक्षिणं हस्तमुपावहरति मित्रो ऽसीति वरुणो ऽसीति सव्यमथैनामभिमृशति[५] समहं विश्वैर्देवैरित्यथैनामपिधाय प्रज्ञातां[६] निदधाति । तदेनमक्षाणीनेकविंशतिमुप वाचयति[७] मध्यत औदुम्बरं करोति । तान्यौवाच प्रतिपद्यतेनैव जयेत-

१ Thus M and cp. supra p. 79, 2; infra 103, 9; °मधिषिच° B... BU; °मथिष° Be 11; °मपिष° T.

२ All the MSS. are more or less corrupted exc. M, which h... however °घमघद्ा; cp. supra p. 102, 7.

३ °इत्य all.

४ Plural M Be BU; singular Be 11 T.

५ सव्यमथैनामभि° Be 11 T.

६ प्रज्ञातामिद° Be; प्रज्ञातं the other MSS., exc. M the readin... of which is uncertain (प्रज्ञातं or प्रज्ञातां) ।

७ Thus M; चावपति Be 11 T; चावयति Be BU.

Digitized by Google

तेनाग्नेयेनाग्नीध्रं[1] प्राङ् रथमावर्त्यावतिष्ठत्यथाग्नीध्रे[1] दृढविमो-
चनीया[2] जुहोत्यग्नये[3] त्वचमने स्वाहेति वरुणः सुवाजनीर-
थाप्यैतत्पुरस्तादेवाग्नेयाग्नीध्रे रथवाहनं प्राचीनं योग्यमतमुप-
हितं भवति । तस्मिन्नव संवीया रथवाहने रथमादधाति ।
उत्तरार्धेयेनं श्रोणादन्तर्दधाति । पश्चः पुचिमदिशाद्धाति[4] ।
सहायैवैनमुपावहरति[4] सहसादधात्वितिमत्वम्बादधातीति ब्रा-
ह्मणं यथैतत्पुरस्तादेव जघनेनाग्नीध्रं चतुरश्रमात्रं[5] चाहाप-
सार्धं[5] वा विमितं कारितं भवति । तत्र मध्यत औदुम्बरी-
मासन्दीं निमिनोति तस्य नाभिरसीति । तस्यामुत्तरमह-
समधीवासमास्तृणाति[6] तस्य योनिरसीत्यथैनामासीदस्याभी-
दमतमनुमन्त्रयते स्योनामासीद सुषदामासीद मा त्वा हिं-
सीदिति । मा मा हिंसीदित्येतरः प्रत्यावर्तमानमभिमन्त्र-
यते[7] निषसाद धृतव्रतो वरुणः पस्त्यास्वा साम्राज्याय सुक्रतु-

---

1 Here and infra Be 11 T every time •ग्नीध्रीयं and •ध्रीये ।

2 रथमाहत्य• MSS.

3 Thus (cp. TBr. I. 7. 9. 5) M Be U; •विमोचनीयाज्जु• Be 11 T; B corrupted.

4 •दधातीति ब्राह्मणमथैनमुपा• M; the Brāhmaṇa (TBr. I. 7. 9. 6) is quoted in abbreviated form by all the MSS. exc. M.

5 Thus M, cp. infra XV. 2 and Āp. XVIII. 18. 5; •चपचार्धं U Be; all the other MSS. and Bhav. both times •वचार्धं ।

6 Thus M; उत्तरमहतं चधिवास• Be; उत्तरमहव चधिवास• BU; उत्तरमवधीवास• Be 11 T; Bhav.: उत्तरमहवसुपरिष्टेनाधिवासं ।

7 Thus MT Be 11; चनु i.s.o. चभि• B Be U.

रित्यथैनमृत्विजः पर्युपविशन्ति। पुरस्तादध्वर्युरुपविशति दक्षिणतो ब्रह्मा पश्चाद्धोतोद्गातोत्तरतस्ततः[1] प्राञ्चो वोदञ्चो वा रत्निनः। सो ऽध्वर्युमभिवदति[2] ॥ १४ ॥

[3]ब्रह्मा३न्निति। त्वꣳ राजन्ब्रह्मासीत्याहाध्वर्युः सवितासि सत्यसव इति। ब्रह्मा३न्निति ब्रह्माणं। त्वꣳ राजन्ब्रह्मासीत्याह ब्रह्मेन्द्रो ऽसि सत्यौजा इति। ब्रह्मा३न्निति होतारं। त्वꣳ राजन्ब्रह्मासीत्याह होता मित्रो ऽसि सुशेव इति। ब्रह्मा३न्नित्युद्गातारं। त्वꣳ राजन्ब्रह्मासीत्याहोद्गाता वरुणो ऽसि सत्यधर्मेति। सुश्लोका३ꣳ इति चत्तारं। त्वꣳ राजन्सुश्लोको ऽसीत्याह चत्ता। सुमङ्गला३ꣳ इति संग्रहीतारं। त्वꣳ राजन्सुमङ्गलो ऽसीत्याह संग्रहीता। सत्यराजा३न्निति भागदुघं। त्वꣳ राजन्सत्यराजासीत्याह भागधुक्। सप्त पुरुषमात्रो ऽभ्युद्यायास्मै[4] स्फ्यं प्रयच्छतीन्द्रस्य वज्रो ऽसि वार्त्रघ्नस्तेन मे रध्येति। तेन[5] ते[5] रध्यासमितीतरः[5] प्रतिष्ठापाति। तꣳ संप्रयच्छति सूताय सूतग्रामणिने सजाताय सजातग्रामणिने संग्रहीत्रे ऽक्षावापगोव्यच्छाभ्यामन्ततस्तेन[6] तौ[6] मध्यतो ऽधिदेव-

---

१ ततः om. Be 11 T.

२ Thus M only; all the other MSS. ध्वर्युरभिवदति।

३ Here and in the following lines sometimes T Be 11, sometimes Be BU are defective; M only is in good order.

४ Thus M only; भच्च (i.s.o. अभ्युद्य) T Be 11; भ्युत्वाय B Be U.

५ तेनमेरध्या॰ M; तेनमेराध्या॰ Be 11 T; तेनतेनराध्या॰ Be BU.

६ तेनतेनतौ Be BU; ततौ M; T Be 11 def.

समुद्धृत्य[1] तिस्रः पञ्चायतः सौवर्णानक्षानिवपतो ऽयाक्षे पञ्चाक्षानपच्छिद्य प्रयच्छति दिशो ऽभयꣳ राजाभूदिति । ताꣳस्तद्गानीमेवाक्षेष्वपिसृजत्यथैतमोदनमुद्धवते । नानाꣳग्निनौ ब्रह्मा च यजमानश्च समानाꣳग्निनौ सूतग्रामण्यौ समानाꣳग्निनौ क्षत्तसंग्रहीतारौ । स यो नु मताश्च इव स राज्ञ आसन[2] उपविश्य[2] चतुःशतमक्षानपच्छिद्याहोऽजिनꣳ राज्ञ इति । तानेव[3] मनाक्षमक्तानिव[3] हलाह हतं ब्राह्मणस्येत्यथैतमोदनमुद्धवते । समानाꣳग्निनौ ब्रह्मा च यजमानश्च नानाꣳग्निनौ सूतग्रामण्यौ नानाꣳग्निनौ क्षत्तसंग्रहीतारौ । स यः पराजयते तस्यैनं कुले चत्ता पाचयति । यावदेव ओदनः पच्यते तावदेव होता शौनःशेपमाख्यापयते हिरण्मये कशिपावासीनस्तस्मा अध्वर्युः प्रतिगृणाति हिरण्मये कूर्च आसीनः[4] ॥ १५ ॥

ओꣳ होतस्तथा होतः सत्यꣳ[5] होतररात्स्म होतरिति । यशु वै होता नाध्येत्यन्य[6] उ[6] होचाग्रꣳसी ग्रꣳसति । तस्मा

---

1 अधीता i.s.o. उवाच M.

2 आसनमुपविश्यM.

3 तानेवमन्यकुसम॰ M.

4 As the MSS. with the exception of M are hopelessly spoiled, the text of the last 13 lines has been reconstructed as best possible. Only the various reading of M is given, as the var. of the other MSS. is nearly worthless.

5 MSS. exc. M ins. च, cp. XVI. 8.

6 नाध्येवन्यो T Be 11; यषीत्यन्यउ (॰न्युउ) Be BU; नदाध्येत्यन्यꣳ M.

Digitized by Google

ञ्च प्रतिप्रस्थाता प्रतिगृणाति । परःशतं भवतीति ब्राह्मणं ।
यदैव श्वोदनः पक्वो भवत्यथैनमेकधोद्धृत्य ब्रह्मण उपहरति ।
तस्मा एताᳪश्चैव सप्तीन्ददाति[1] शतं विपथं चतुष्पाल्कचमथ[2]
होत्रे ददाति शतं विपथᳪ हिरण्मयं कक्षिग्रैवोद्गात्रे ददाति
शतं विपथमथाध्वर्यवे[3] ददाति शतं विपथᳪ रथं तिस्रः
पञ्चाशतः सौवर्णानश्वान्हिरण्मयं कूर्चमित्यथैभ्य एतन्निर्जयᳪ[4]
सहस्रं चतुर्धा कृत्वा ददात्यथैनमेतयासन्द्या सह श्रावयन्त्या[5]
वा[5] प्रजन्त्यन्वायन्त्येनमेते[5] चमसा । अथैतयोर्हविषोरिडामुपह्व-
यत । इडोपहूतं माहेन्द्रᳪ होता चैवाध्वर्युश्च[6] संभक्षयतो ।
नराशᳪसपीतेन नाराशᳪसान् । होतृचमसमेवैते भक्षः समुप-
हूय भक्षयन्ति । यथाचमसं चमसान्हिन्व म इत्यात्मानं
प्रत्यभिमृशन्ते । आप्याययन्ति चमसान्संभक्ष्या मार्जयन्ते ।
ऽथेन्द्राय त्वेन्द्राय त्वेत्येवं[7] त्रिभिरुक्थ्यपर्यायैश्चरति[8] । संतिष्ठते
माध्यंदिनᳪ सवनं । प्रसर्पन्ति तृतीयसवनाय । प्रविद्धमादित्य-

---

१ सर्वान् before सप्तीन् ins. Be B; सर्वसप्तीन् U.

२ चतुष्पल्कचं all (also Āp. XVIII. 19. 7), but cp. supra p. 96, 5.

३ Thus M; अथ om. Be BU; विपथमथाध्वर्यवे T Be 11.

४ स्वांनिर्जयं all.

५ श्रावयंत्यासन्नकंस॰ Be BUT Be 11; श्रावयंत्याप्रकंस॰ M, but cp. supra p. 81, 5.

६ इतरार्थं ins. T Be 11.

७ Thus MT Be 11; त्वेत्येव Be; त्वेत्येव इवं BU.

८ ॰श्चरति M Be BU; ॰श्चरंति T Be 11.

Digitized by Google

वद्वैव परित्यजनं प्रज्ञातमौक्ष्णं प्रज्ञाति । समानं कर्मा पर्यग्निकरणादेव परिता ये वामन्यप्रभृत्यं चरति । मयोर्वाणा मयोदे[1] अथवा देवते[2] नाना प्रत्यभिमर्शनौ[3] नाना व्याहोमौ नानाग्नी वनस्पतिः समानः स्विष्टकृन्मेषा नाना बर्हिष समान्यो द्विजो । नाना द्विज्य दक्षिणे । समानं कर्माविकृत्याद्-मेषस्विष्टकृत उमाद्दद्ये गार्हपत्यावुपागतौ[4] । प्रसाद्य वाराही चार्मयणीभ्यामुद्धेति[5] । यो ऽपाकृते जुहोत्यर्पा तत्रे स्वाहेति । विपुष्यति दर्भस्तम्बे जुहोत्यूर्णी तत्रे स्वाहेति । पुक्रेश्य[6] गार्हपत्ये जुहोत्यग्नये गृहपतये स्वाहेति । प्रतिहुते स्यस्य । उदयनीयेष्ट्या वैश्वानर्यां वपायामुपाकरोति । तस्मै प्रतिहुतं वपया परिता चैव प्रभूति नमते च सेमन्भुंसिक्त स्व उक्थ्यो ऽभिषेचनीयप्रभृतिरुद्ध्रयमाणः[7] प्रसन्दचित उदवसानीयान्तः । ॥ १९ ॥ सप्तमः ॥

अथातोऽपा पुरस्तादेव कुर्वे देवयजने यजस्व अग्न्याधानेषु प्रत्य कारिता भवति । सो ऽसौ वैश्वानरमेकादशकपालं निर्वपति ।

---

१ मयोदे M Be 11 T; मयोता Be BU.

२ Thus M; देवता Be BU; T Be 11 om. this passage.

३ °मर्शनो M; °मर्शने T Be 11; °मर्शं B; °मर्शना Be.

४ Thus M; चर्मपच्या उपागतो T Be 11; चापिच्या उपागतो BU; चापिचा उ° Be; cp. infra XVIII. 19 init.

५ Thus T Be 11; चार्मपचिभ्या° M; चर्मपचीभ्या° B; चर्मपचिभ्या° Be U.

६ Thus M; प्रातरेव Be BU; Be 11 T defective.

७ °तुर्विंशमय° U Bhav.

हिरण्यं ददाति । अन्यान्याम उदवसाय वसति । सारस्वतं चरुं । वत्सतरीं ददाति । द्वितीये अन्यान्याम उदवसाय वसति । सावित्रं द्वादशकपालमुपध्वस्तं ददाति । तृतीये अन्यान्याम उदवसाय वसति । पौष्णं चरुं । श्यामं ददाति । चतुर्थे अन्यान्याम उदवसाय वसति । बार्हस्पत्यं चरुं । शितिपृष्ठं ददाति । पञ्चमे अन्यान्याम उदवसाय वसत्यैन्द्रमेकादशकपालमृषभं ददाति । षष्ठे अन्यान्याम उदवसाय वसति । वारुणं दशकपालं । महानिरष्टं ददात्यथ सप्तमेऽह्नाणामध्यवसत्यैतद्वा यद्दीक्षते[1] । अथ वै भवति यद्वो दीक्षयन्ति यद्वः सोमं क्रीणन्ति पुष्करस्रजं प्रयच्छतीत्यथैनं तीर्थादानीय पवयित्वा पुष्करस्रजिनमुदानीय दीक्षणीयामिष्टिं निर्वपति । तस्मात्संस्थितायां मुष्टी चैव न करोति वाचं च न यच्छति । निदधत्यस्मा एतद्धविरुच्छिष्टं व्रतभाजनमथ प्रायणीयामिष्टिं निर्वपति । हविष्कृता वाचं विसृजते । ऽथास्मा एतद्धविरुच्छिष्टं प्रयच्छन्ति[2] व्रतभाजनमथ प्रायणीयेन चरति । प्रायणीयेन चरित्वा पदेन चरति । पदेन चरित्वा दशभिः साण्डैर्वत्सतरै राजानं क्रीत्वोत्रातिथ्यं निर्वपत्यातिथ्येन प्रचर्य पुरस्तादुपसदां सौम्यं चरुं । बभ्रुं ददात्यथ मध्यमे उपसदावन्तरेण त्वाष्ट्रमष्टाकपालं । शुण्ठं ददात्यथोपरिष्टादुपसदां वैष्णवं त्रिकपालं । वामनं ददात्य-

१ दीक्षते Be BU ; दीक्षंते M; दीक्षयंते T Be 11.
२ ०यच्छंति M Be 11 T; ०यच्छति Be BU.

वारुणीयं प्रथमयाज्यावनीयं प्रणीय यद्दोपविधानि संमिनोति । यद्दोपविधानि संमित्याग्नीषोमौ प्रथयन्त्यग्नीषोमौ प्रणीय यूपमाहृत्य यूपमुच्छ्रयति । सन्नन्तं यूपमुच्छ्रित्याग्नीषोमीयं पशुमुपाकरोति । तस्य प्रविद्धं वपया चरित्वा सारस्वतीयमनीवरीहैर्यमुत्प्रयव पशुपुरोडाशं निर्वपतीडान्तः पशुपुरोडाशः संतिष्ठते । पत्नीसंयाजान्तः पशुरिद्यपूर्वानत इत्येके । ऽथ वसतीवरीः परिहृत्य यथाऽऽयि विविधोपवसथ्यात्यो महारात्र एव बुध्यन्ते । प्रातरनुवाकाय होता राजानमुपावहृत्य प्रातरनुवाकमुपाकरोति । परिहिते प्रातरनुवाके ऽपो ऽच्छैत्यावृद्धिहरेति[1] । ॥ १७ ॥

अग्निष्टोमं क्रतुमुपैति । प्रविद्धो ऽभिषवः । प्रविद्धं ग्रहा गृह्यन्ते । समानं कर्माभिषवाद्दाक्षिणं ग्रहं[2] गृहीत्वा दे रथे घाट्स्य यूपमभ्येति[3] । सर्वं यूपमुच्छ्रित्याग्नेयं पशुमुपाकरोति । तस्य प्राजापत्यमनुष्टुप् उपालम्भ्यो भवति । तयोः प्रविद्धं वपाभ्यां चरित्वा प्रसर्पन्ति प्रातःसवनाय । पूर्वस्यां द्वारि[4] सूतग्रामण्यावुपतिष्ठतो[5] ऽपरस्यां क्षत्रसंग्रहीतारौ । प्रसर्पतः पृच्छतः का ते माता का ते[6] मातामहीति । स च

---

१ °हेति MT Be 11 ; °हेति Be BU.

२ om. MT Be 11.

३ °भ्येति M Be BU ; °भ्येति T Be 11.

४ द्विरि M.

५ °वुपतिष्ठतो B Be U ; °वुपतिष्ठतो M ; °वुपतिष्ठ T Be 11.

६ om. Be BU.

Digitized by Google

न्या इयमसौ[1] संपादयत्यति तꣳ हाजन्धय यो न संपादयति
दीर्घवꣳशेन तमुपानुदन्ति[2] । स ह स्माह वैश्या मे माता
सावित्रीति[3] वाति तꣳ हाजन्ति विप्रो विवाहान् गोमार
इति वदन्तो । इयदश्राय यमसमभिसंजानत । अञ्जुधा
प्रातःसवनꣳ संतिष्ठते । प्रसर्पन्ति माध्यंदिनाय सवनाय ।
प्रसिद्धो ऽभिषवः । प्रसिद्धं ग्रहा गृह्यन्ते । समानं कर्मा
दाक्षिणेभ्यो । दाक्षिणानि हुत्वा प्राकाशावध्वर्यवे ददाति
स्रजमुद्गात्रे रुक्मꣳ होत्रे ऽश्वं प्रस्तोतृप्रतिहर्तृभ्यां द्वादश पष्ठौ-
हीर्ब्रह्मणे वशां मैत्रावरुणायर्षभं ब्राह्मणाच्छꣳसिने वाससी
नेष्टापोतृभ्याꣳ स्थूरि यवाचितमच्छावाकायानड्वाहमग्नीधे । १०
भार्गवो होता भवति । श्रायन्तीयं ब्रह्मसामं भवति वारव-
न्तीयमग्निष्टोमसामन्वञ्जुधा माध्यंदिनꣳ सवनꣳ संतिष्ठते ।
प्रसर्पन्ति तृतीयसवनाय । प्रसिद्धमादित्यग्रहेण चरित्वाग्रयणं
गृह्णाति । समानं कर्मा पवमानात्पवमानेन चरित्वा स्वे
धामन्पशुभ्यां चरति । तयोर्नाना मनोते[4] नाना देवते[5] । ११
नाना प्रत्यभिमर्शनौ[6] नाना वपाहोमौ समानो वनस्पतिः
समानः स्विष्टकृत्प्रैषवान्समानीडा समान्यो दिशो । नाना

---

१ Thus Be BU ; इमतव्ये M ; T Be 11 om. this passage altogether.

२ Thus M Be U ; तमुपावहंति B ; तंवजुहंति T Be 11.

३ Thus MT ; सावित्रीनि Be 11 ; सावित्रीवि Be BU.

४ मनीवे MT Be 11 ; मनोता Be BU.

५ देवदे M ; देवता Be BU ; om. T Be 11.

६ Thus T Be 11 ; ॰भिमर्शौ M ; ॰भिमर्शना Be BU.

Digitized by Google

द्विष इत्येके । समानं कर्मावभृथात् । प्रसिद्धो ऽवभृथः । उदयनीयेनेष्ट्वा मैत्रावरुणीं वशामुपाकरोति । तस्यै प्रसिद्धं वपया चरित्वा दक्षिणे वेद्यन्ते श्मश्रूण्येव वपते न केशान् । संतिष्ठत एषो ऽग्निष्टोमः सप्तदशो दशपेयः सहस्रदक्षिण उदवसानीयान्तः । ॥ १८ ॥ षष्ठः ॥

अथ पञ्चहविषा द्विरात्रमेष्ट्वा यजते[1] । आग्नेयमष्टाकपालं निर्वपत्यैन्द्रमेकादशकपालं वैश्वदेवं चरुं मैत्रावरुणीमामिक्षां बार्हस्पत्यं चरुमित्येष वै भवति हविषोहविष इष्ट्वा बार्हस्पत्यमभिघारयतीति । स हविषोहविष इष्ट्वा बार्हस्पत्यमभिघारयत्यन्वाहार्यमासादयेता[2] आदिष्टदक्षिणा ददात्यथ द्विपशुना पशुबन्धेन यजत । आदित्यां मल्हां गर्भिणीमालभते मारुतीं पृश्निं पष्ठौहीं । गर्भिण्यादित्या भवत्यगर्भा[3] मारुत्यादित्यया पूर्वया प्रचरति मारुत्योत्तरयोच्चैरादित्याया आश्रावयत्युपाꣳशु मारुत्यै । संतिष्ठते यथा द्विपशुः पशुबन्धस्थाय सात्यदूतानाꣳ[4] हविर्भिर्यजते । ऽश्विभ्यां पूष्णे पुरोडाशं द्वादशकपालं निर्वपति सरस्वते सत्यवाचे चरुꣳ सवित्रे सत्यप्रसवाय पुरोडाशं द्वादशकपालमन्वाहार्यमासाद्य तिसृधन्वꣳ शुष्कदृतिं ददाति । तं प्रतिराजभ्यः प्रहिणोति । स

1 यक्षत Be BU.

2 Thus M only; °मासाद्यता Be BU; °मासाद्येता T Be 11.

3 Thus M only; भवतिगर्भा Be BU; T Be 11 om. these words.

4 Thus M; the other MSS. are partly corrupted, partly incomplete.

यः प्रतिगृह्णाति मित्रो म इति तं वेदाथ यो न प्रतिगृह्णात्यमित्रो म इति तं वेदाथ पूर्वैः प्रयुजाꣳ हविर्भिर्यजत । आग्नेयमष्टाकपालं निर्वपति सौम्यं चरुꣳ सावित्रं द्वादशकपालं बार्हस्पत्यं चरुं त्वाष्ट्रमष्टाकपालं वैश्वानरं द्वादशकपालमन्वाहार्यमासाद्य दक्षिणाꣳ रथवाहनवाहं[1] ददात्यथ पौर्णमासवैमृधाभ्यामिष्ट्वोत्तरैः प्रयुजाꣳ हविर्भिर्यजते । सारस्वतं चरुं निर्वपति पौष्णं चरुं मैत्रं चरुं वारुणं चरुं क्षैत्रपत्यं चरुमादित्यं चरुमन्वाहार्यमासाद्योत्तरꣳ रथवाहनवाहं[2] ददाति ।
॥ १९ ॥

अथैतद्द्वादशाहं व्रतं चरत्याङ्क्ते[3] । न दतो धावते । ऽभ्यङ्क्ते । न प्रमन्दयते । युध्यते युद्धं जानते । ऽग्निहोत्रोच्छेषणव्रतो वा[4] यजमानो भवति । भक्तमु[5] पत्न्या आहरन्त्यथैतत्पुरस्तादेव जुष्टे देवयजने तिस्रः शालाः कारिता भवन्ति । स दक्षिणार्धाꣳ[6] शालामध्यवसाय मथित्वाग्नीन्वि-

---

१ Thus Be BU; रथवाहनं MT Be 11, but cp. Āp. XVIII. 22. 6, 8.

२ Thus again, Be BU; रथवाहं M; T Be 11 om.

३ These and the following words thus in M; चरत्याङ्क्ते नदतोधावतेभ्यंक्तेनप्रमंदयते Be BU; चरतिनात्यंतेनदतोधावतेभ्यंक्तेनप्रमनयते Be 11 T; Bhav. reads प्रमन्दयते explaining this word, as it seems, by न खट्वायां शेते न केशान्छिन्ते ।

४ वा Be 11 T; च Be BU; M om.

५ M om. च, but cp. vol. I. 67. 4.

६ दक्षिणां T Be 11.

अथ प्रतीचीनस्तोमाय केशवपनीयायातिरात्राय दीक्षते । तस्यापरिमिता दीक्षा द्वादशोपसदः । स तथा राजानं क्रीणाति यथा मन्यते पौर्णमास्यै मे यजनीये[1] ऽहन्सुत्या संपत्स्यत इति । तच्च तथा संपद्यते । प्रसिद्धेन कर्मणोपवसथ्यादेत्यथ[2] वसतीवरीः परिहृत्य पयांसि विभिद्योपवसन्त्यथातो महारात्र एव बुध्यन्ते । प्रातराज्यानि गृहीत्वा राजानमुपावहृत्य प्रातरनुवाकमुपाकरोति । परिहिते प्रातरनुवाके ऽपो ऽच्छैत्याग्निष्टुद्देव्यतिरात्रं[3] क्रतुमुपैति । प्रसिद्धो ऽभिषवः । प्रसिद्धं ग्रहा गृह्यन्ते । समानं कर्मावभृथात्प्रसिद्धो ऽवभृथ उदयनीयचेष्टा मैत्रावरुणीं वशामुपाकरोति । तस्यै प्रसिद्धं वपया चरित्वा हवींषि वेद्यन्ते यानि कानि च सोमानि[4] वापयते । संतिष्ठत एष प्रतीचीनस्तोमः केशवपनीयो ऽतिरात्रः सहस्रदक्षिण उदवसानीयान्तो । ऽथ मध्यमाꣳ शालामध्यवसाय मथित्वाग्नीन्विहृत्य व्युष्टये द्विरात्राय दीक्षते । तस्यापरिमिता दीक्षा द्वादशोपसदः । स तथा राजानं क्रीणाति यथा मन्यते द्विरात्रस्य मे[5] सतो[5] ऽमावास्याया[5] उपवसथीये[5]

---

१ Thus U Be (sec. m.); यज्ञीये Be (pr. m.) B; यज्ञिये M; Be 11 T om. the passage.

२ •थीयवस• M Be.

३ Thus M Be 11 T; •ग्निष्टुद्देत्यातिरात्रं Be BU.

४ तानि ins. M.

५ Thus T Be 11 (only •वास्याये); मे before सतो om. M, but this MS.: मावास्याये म उप•; Be BU give मे before सतो and मा before उप•, reading •वास्याये ।

ऽहर्पूर्वमहः संपश्यत उत्तरमिमुत्तरमिति । संतिष्ठते व्युष्टिद्विरात्रो[1] । ऽथोत्तरार्ध्यां[2] प्राच्यामध्यवसाय मथित्वाग्नीन्विहृत्योदयनीयायाग्निष्टोमाय दीक्षते । तस्य तिस्रो दीक्षास्तिस्र उपसदः सप्तम्यां प्रसुतः । संतिष्ठत एष उदयनीयो ऽग्निष्टोमश्चतुष्टोमः षड्वदभिष उदवसानीयान्तो[3] । ऽथ देविकाहविर्भिर्यजते । ऽथ त्रैधातवीयया यजते । ऽथ सौत्रामण्या यजते । संतिष्ठते राजसूयो ऽर्धसद्ग्रैर्मासैः । संतिष्ठते राजसूयः संतिष्ठते राजसूयः । ॥ २० ॥ सप्तमः ॥

॥ इति द्वादशः प्रश्नः ॥

---

१ Thus all; are we to correct व्युष्टिर्द्विरात्रो ?, cp. 117, 14.

२ Thus BeBUM (sec. m.); चोत्तराध्र्या M (pr. m.) T Be 11 Karmāntasūtra.

३ उदयनीयान्तो Be 11 T.

[1]अथात इष्टीर्व्याख्यास्यामस्तासाꣳ सकृत्प्रदिष्टमेव दार्शपौर्णमासिकं तन्त्रं। दार्शपौर्णमासिकः[2] संस्कारः[2]। सर्वाः प्रथमाः सर्वा मध्यमाः सर्वा उत्तमा[3]। यथाकालं पर्वतिथ्या निर्वपेत्ता आदिष्टकाला। अथ या अनादिष्टकाला यानि पूर्वपक्षस्य पुण्याहान्येतत्तीर्थानि[4] भवन्ति या अनार्तेष्टयो। ऽथ या आर्तेष्टय उपाधिगमकालास्ता भवन्ति। यथैतदभ्युद्धृताभ्युदिताभिनिर्मुक्ताविज्ञातेति। व्युदितमभ्युत्थानं। नित्यं व्रतोपायनं। यावत्सिद्धि याजमानमनुसꣳहरेदन्यथावापदेवताभ्यस्तासां याः सोपनामास्ता उपाꣳश्वथेतरा उच्चैरादेशादेव। समृद्ध्य सामिधेन्यो आनीयाद्यथैतत्प्रागवौ यथौ धाय्ये कुर्यादुष्णिहककुभौ[5] धाय्ये त्रिष्टुभौ[6] संयाज्ये[6]। वार्त्रघ्नावाज्यभागौ पूर्वपक्षे। वृधन्वन्तावपरपक्ष इत्यौपमन्यवो। यानि स्वीꣳषि कामेन वा दक्षिणया वा व्यपेतानि[7] सुर्नामावहीꣳष्येव

---

1 The text of this first adhyāya is given principally according to M, in comparison with the vivaraṇa. All the other MSS. except D, contain a highly corrupted tradition. I do not give all their various readings, which are nearly ever so much corruptions.

2 Thus M and Bhav.; °मासिकाः संस्काराः all the other MSS.

3 °त्तमा M.

4 °तीर्थानि M.

5 कुर्याद् om. M.

6 Thus only D; M om.; त्रिष्टुभौ धाय्ये UB; त्रिष्टुभौ धाय्ये Be; त्रिष्टुभ स्याग्रेर् Be 8.

7 यवेतानि M.

तानि आग्नीध्राद्दिश आदेव दक्षिणाप्यपेतस्य[1] समानबर्हिर्भवति यथा दिशामवेष्टिर्न्हीरपांस्युपाजो[2] ऽनुसमेति। बह्वेवत्यस्य सविस्तर्हेवत्ये याज्यापुरोऽनुवाक्ये। पुरस्तात्स्विष्टकृत उपहोमा याज्यानुवाक्या उपहोमा। यागोदक्षिणः काम्या इष्टयो या-मनादिष्टदक्षिणा। गोदक्षिणः पशुबन्धो। नित्यो ऽन्वाहार्य। इति[3] न्या[3] इमा[3] इष्टयो[3] व्याख्याताः। ॥ १ ॥ प्रथमः ॥

अथ वै भवत्यैन्द्राग्नमेकादशकपालं निर्वपेत्प्रजाकाम इति। तस्या एते भवत उभा वामिन्द्राग्नी आहुवध्या इत्यैन्द्राग्नमेकादशकपालं निर्वपेत्स्पर्धमानः क्षेत्रे वा सजातेषु वेति। तस्या एते भवत इन्द्राग्नी रोचना दिवः श्नथद्वृत्रमित्यैन्द्राग्नमेकादशकपालं निर्वपेत्संग्राममुपप्रयास्यन्निति। तस्या एते भवत इन्द्राग्नी नवतिं पुरः श्नुथिं नु स्तोममित्यैन्द्राग्नमेकादशकपालं निर्वपेत्संग्रामं जित्वेति। तस्या एते भवत उभा वामिन्द्राग्नी आहुवध्या इत्यैन्द्राग्नमेकादशकपालं निर्वपेज्जनतामेष्यन्निति। तस्या एते भवत इन्द्राग्नी रोचना दिवः श्नथद्वृत्रमिति। पौष्णं चरुमनुनिर्वपेदिति। तस्या एते भवतो वयमु त्वा पथस्पते पथस्पथ इति। क्षेत्रपत्यं चरुं निर्वपेज्जनतामागत्येति। तस्या एते भवतः क्षेत्रस्य पतिना वयं क्षेत्रस्य पत इत्यैन्द्राग्न-

---

१ ०व्यपेतं M.

२ दिशामवेष्टीर्वे० M.

३ इतीन्विमा इष्टीर्व्याख्याताः M; all the other MSS. have also इति॰ or इष्टी॰।

मेकादशकपालमुपरिष्टान्निर्वपेदिति । तस्या एते भवतो ये संग्रामं जिग्युषः ॥ २ ॥

अग्नये पथिकृते पुरोडाशमष्टाकपालं निर्वपेद्यो दर्शपूर्णमासयाजी सन्नमावास्यां वा पौर्णमासीं वातिपादयेदित्येतयेष्ट्या यक्ष्यमाण उपकल्पयते पथो ऽन्तिकाद्बर्हिरनड्वाहं । तस्या एते भवतो ऽग्ने नया देवानामित्यन्वाहार्यमासाद्यानड्वाहं ददात्यग्नये व्रतपतये पुरोडाशमष्टाकपालं निर्वपेद्य आहिताग्निः सन्नव्रत्यमिव चरेदिति । तस्या एते भवतस्त्वमग्ने व्रतपा असि यद्वो वयं प्रमिनाम व्रतानीत्यग्नये रक्षोघ्ने पुरोडाशमष्टाकपालं निर्वपेद्यꣳ रक्षाꣳसि सचेरन्नित्यथ वै भवति निम्रितायां निर्वपेत्परिश्रिते याजयेदिति । स निम्रायां महारात्र उत्थायाग्नये रक्षोघ्ने पुरोडाशमष्टाकपालं निर्वपति । परिश्रिते याजयति । कृणुष्व पाजः प्रसितिं न पृथ्वीमित्येतस्यानुवाकस्य पञ्चदश सामिधेनीः पराचीरन्वाह । तस्या एते भवतो रक्षोहणं वि ज्योतिषेत्यथ पुरस्तात्स्विष्टकृतः स्रुवाहुतिमुपजुहोत्युत स्वानासो दिवि षन्त्वग्नेरिति । ॥ ३ ॥

अग्नये रुद्रवते पुरोडाशमष्टाकपालं निर्वपेदभिचरन्निति । तस्या एते भवतस्त्वमग्ने रुद्र आ वो राजानमित्यग्नये सुरभिमते पुरोडाशमष्टाकपालं निर्वपेद्यस्य गावो वा पुरुषा वा प्रमीयेरन्यो वा बिभीयादिति । तस्या एते भवतो ऽग्निर्होता साध्वीमकरित्यग्नये क्षामवते पुरोडाशमष्टाकपालं निर्वपेत्संग्रामे संयत्त इति । तस्या एते भवतो ऽक्रन्ददग्निस्ते वसूनीत्यथ वै

भवत्यभि वा एष एतानुच्यति येषां पूर्वापरा अन्वञ्चः प्रमीयन्ते । पुरुषाहुतिर्ह्यस्य प्रियतमाऽग्नये क्षामवते पुरोडाशमष्टाकपालं निर्वपेदिति । तस्या एते भवतो । ऽग्ने वै भवत्यभि वा एष एतस्य गृहानुच्यति यस्य गृहान्दहत्यग्नये क्षामवते पुरोडाशमष्टाकपालं निर्वपेदिति । तस्या एते भवतः । ॥ ४ ॥ ॥
द्वितीयः ॥

अथ वै भवत्यग्नये कामाय पुरोडाशमष्टाकपालं निर्वपेद्यं कामो नोपनमेदिति । तस्या एते भवतस्तुभ्यं ता अङ्गिरस्तमाश्याम तं काममग्न इत्यग्नये यविष्ठाय पुरोडाशमष्टाकपालं निर्वपेत्स्पर्धमानः क्षेत्रे वा सजातेषु वेति । तस्या एते भवतः श्रेष्ठं यविष्ठ भारत वं मिताम इत्यग्नये यविष्ठाय पुरोडाशमष्टाकपालं निर्वपेदभिचर्यमाण इति । तस्या एते भवतो ऽग्न आयुष्मते पुरोडाशमष्टाकपालं निर्वपेद्यः कामयेत सर्वमायुरियामिति । तस्या एते भवत आयुष्ट आयुर्दा अग्न इत्यग्नये जातवेदसे पुरोडाशमष्टाकपालं निर्वपेद्भूतिकाम इति । तस्या एते भवतस्तस्मै ते द्विवसरीत्यग्नये रुक्मते पुरोडाशमष्टाकपालं निर्वपेद्रुक्काम इति । तस्या एते भवतः शुचिः पावक वृग्मानो रुचा इत्यग्नये तेजस्वते पुरोडाशमष्टाकपालं निर्वपेत्तेजस्काम इति । तस्या एते भवत आ यद्दिषे नृपतिं च तेजौषधेत्यग्नये साहन्त्याय पुरोडाशमष्टाकपालं निर्वपेत्सौक्षमाण इति । तस्या एते भवतो ऽग्ने सहन्तमाभर तमग्ने प्रतमायच्छ रयिमिति । ॥ ५ ॥

अग्नये ऽन्नवते पुरोडाशमष्टाकपालं निर्वपेद्यः कामयेता-न्नवान्स्यामिति । तस्या एते भवत उपाजाय यमाजाय वल्गु हि सूनो हव्यमग्ने ऽन्नादाय पुरोडाशमष्टाकपालं निर्वपेद्यः कामयेतान्नादः स्यामिति । तस्या एते भवतो । अग्ने ऽन्नपतये पुरोडाशमष्टाकपालं निर्वपेद्यः कामयेतान्नपतिः स्यामिति । तस्या एते भवतो । अग्नये पवमानाय पुरोडाशमष्टाकपालं निर्व-पेदग्नये पावकायाग्नये शुचये ज्योगामयावीत्येतयेष्ट्या यक्ष्म-माण उपक्रामयते हिरण्यं । तस्या एता भवन्त्यग्न आयूंषि पवसे ऽग्ने पवस्वा पावक स नः पावकाभिः शुचिव्रततम उदग्ने शुचयस्तवेत्यन्वाहार्यमाहाय हिरण्यं ददात्येतामेव निर्वपेच्चक्षुष्काम इति । तस्या एता भवन्ति । ॥ ६ ॥

अग्नये पुत्रवते पुरोडाशमष्टाकपालं निर्वपेदिन्द्राय पुत्रिणे पुरोडाशमेकादशकपालं प्रजाकाम इति । तस्या एता भवन्त्यग्ना स्वदा कीरिणा मन्यमानो यस्मै त्वं सुकृते जातवेदस्त्वे सुयुज वहस्व खलकवत्सो सोम इन्द्रं ममादित्यग्नये रसवते ऽज-क्षीरे चरुं निर्वपेद्यः कामयेत रसवान्स्यामिति । तस्या एते भवतो ऽग्ने रसेनामो अन्वचारिषमित्यग्नये वसुमते पुरोडाश-मष्टाकपालं निर्वपेद्यः कामयेत वसुमान्स्यामिति । तस्या एते भवतो वसुर्वसुपतिरस्यामग्ने वसुपतिं वसूनामित्यग्नये वाज-सृते पुरोडाशमष्टाकपालं निर्वपेत्संग्रामे संयत्त इति । तस्या एते भवतस्त्वामग्ने वाजसातममग्नं यो अग्निरित्यग्नये ऽग्निवते पुरोडाशमष्टाकपालं निर्वपेद्यस्याग्नावग्निमभ्युद्धरेयुरिति । तस्या

एते भवतो ऽग्निनाग्निः समिध्यते त्वꣳ ह्यग्ने अग्निनेत्यग्नये ज्योतिष्मते पुरोडाशमष्टाकपालं निर्वपेद्यस्याग्निरुद्धृतो ऽहुते ऽग्निहोत्र उद्वायेदपर आदीप्यानूद्धृत्य इत्याहुस्तत्तथा न कार्यं यद्भागधेयमभि पूर्व उद्ध्रियते किमपरो ऽभ्युद्ध्रियेतेति तान्येवावक्षाणानि संनिधाय मन्थेदिति स तान्येवावक्षाणानि संनिधाय मन्थतीतः प्रथमं जज्ञे अग्निः स्वाद्योनेरधि जातवेदाः। स गायत्रिया त्रिष्टुभा जगत्या देवेभ्यो हव्यं वहतु प्रजानन्निति छन्दोभिरेवैनꣳ स्वाद्योनेः प्रजनयतीति ब्राह्मणमग्नये ज्योतिष्मते पुरोडाशमष्टाकपालं निर्वपेदिति तस्या एते भवत उदग्ने शुचयस्तव वि ज्योतिषेति ॥ ७ ॥

तृतीयः ॥

अथ वै भवति वैश्वानरं द्वादशकपालं निर्वपेद्वारुणं चरुं दधिक्राव्णे चरुमभिशस्यमान इत्येतयेष्ट्या यक्ष्यमाण उपकल्पयते हिरण्यं तस्या एता भवन्ति वैश्वानरो न ऊत्या त्वमग्ने शोचिषा शोशुचानो ऽव ते हेड उदुत्तमं दधिक्राव्णो अकारिषमा दधिक्रा इत्यन्वाहार्यमासाद्य हिरण्यं ददात्येतामेव निर्वपेत्प्रजाकाम इति तस्या एते भवन्ति वैश्वानरं द्वादशकपालं निर्वपेत्पुत्रे जात इति तस्या एते भवतो वैश्वानरस्य दꣳसनाभ्यो बृहदिति पृष्ठो यदग्न इति वैश्वानरं द्वादशकपालं निर्वपेदमावास्यां वा पौर्णमासीं वातिपाद्येति तस्या एते भवतो वैश्वानरो न ऊत्या पृष्टो दिवीत्याग्नेयमष्टाकपालं निर्वपेद्वैश्वानरं द्वादशकपालमग्निमुद्वासयिष्यन्निति

तस्या एता भवन्त्यग्निर्मूर्धा भुवो वैश्वानरो न ऊत्या त्वमग्ने शोचिषा शोशुचान इति। वैश्वानरं द्वादशकपालं निर्वपेन्मारुतꣳ सप्तकपालं ग्रामकाम इत्यथ वै भवत्याहवनीये वैश्वानरमधिश्रयति गार्हपत्ये मारुतमनूच्यमान आसादयतीति। काले प्रत्यक्षं वैश्वानरमासादयत्यनूच्यमानासु सामिधेनीषु मारुतं। तस्य एता भवन्ति वैश्वानरो न ऊत्या पृष्टो दिवि मरुतो यद्ध वो दिवो या वः शर्मेति। ॥ ८ ॥

आदित्यं चरुं निर्वपेत्संग्राममुपप्रयास्यन्निति। तस्या एते भवतोऽदितिर्न उरुष्यतु महीमू षु मातरमिति। वैश्वानरं द्वादशकपालं निर्वपेदायतनं गत्वेति। तस्या एते भवतो वैश्वानरो न ऊत्याऽस्माकमग्ने मघवत्सु धारयेति। वैश्वानरं द्वादशकपालं निर्वपेद्विद्विषाणयोरन्नं जग्ध्वेति। तस्या एते भवतो वैश्वानरो न ऊत्यर्तावानमिति। वैश्वानरं द्वादशकपालं निर्वपेत्सममानयोः पूर्वोऽभिद्रुह्येति। तस्या एते एव भवतो। वैश्वानरं द्वादशकपालं निर्वपेदविं प्रतिगृह्येति। तस्या एते भवतो वैश्वानरो न ऊत्या त्वमग्ने शोचिषा शोशुचान इति। वैश्वानरं द्वादशकपालं निर्वपेदुभयादत्प्रतिगृह्याश्वं वा पुरुषं वेति। तस्या एते एव भवतो। वैश्वानरं द्वादशकपालं निर्वपेत्सनिमेष्यन्निति। तस्या एते भवतो वैश्वानरो न ऊत्या वैश्वानरस्य सुमतौ स्यामेति। ॥ ९ ॥

अथ वै भवति यो वै संवत्सरं प्रयुज्य न विमुञ्चत्यप्रतिष्ठानो वै स भवत्येतमेव वैश्वानरं पुनरागत्य निर्वपेदिति।

स एतमेव वैश्वानरं पुनरागत्य निर्वपति । यमेव मन्युं तं भागधेयेन विमुञ्चति प्रतिष्ठित्या इति ब्राह्मणमेव हि भवति यथा रज्ज्वोत्तमां गामाजेत्तां प्राप्य प्रतिमुञ्चाहिति । स यथा रज्ज्वोत्तमां गामाजति तां प्राप्याथ प्रहित्य प्राप्यास्य गोष्ठे न्यस्यति । निर्ऋतिमेवास्मै प्रहिणोतीति ब्राह्मणं । तस्या एते भवतः । ॥ १० ॥ चतुर्थः ॥

अथ वै भवत्यैन्द्रं चरुं निर्वपेत्पशुकाम इति । तस्या एते भवत इन्द्रं वो विश्वतस्परीन्द्रं नर इतीन्द्रायेन्द्रियावते पुरोडाशमेकादशकपालं निर्वपेत्पशुकाम इति । तस्या एते भवत इन्द्रियाणि शतक्रतो ऽनु ते दायीतीन्द्राय घर्मवते पुरोडाशमेकादशकपालं निर्वपेद्ब्रह्मवर्चसकाम इति । तस्या एते भवत आ यस्मिन्सप्त वासवा आमासु पक्वमैरय इतीन्द्रायार्कवते पुरोडाशमेकादशकपालं निर्वपेदन्नकाम इति । तस्या एते भवत इन्द्रमिद्गाथिनो बृहद्गायन्ति त्वा गायत्रिण इतीन्द्राय घर्मवते पुरोडाशमेकादशकपालं निर्वपेदिन्द्रायेन्द्रियावत इन्द्रायार्कवते भूतिकाम इति । तस्य एता भवन्त्या यस्मिन्सप्त वासवा आमासु पक्वमैरय इन्द्रियाणि शतक्रतो ऽनु ते दायीन्द्रमिद्गाथिनो बृहद्गायन्ति त्वा गायत्रिण इति । ॥ ११ ॥

इन्द्रायांहोमुचे पुरोडाशमेकादशकपालं निर्वपेद्यः पाप्मना गृहीतः स्यादिति । तस्या एते भवतो ऽंहोमुचे विवेष यन्मेतीन्द्राय वैमृधाय पुरोडाशमेकादशकपालं निर्व-

Digitized by Google

पेद्यं मृधो ऽभि प्रवेपेरन्राष्ट्राणि वाभि समियुरिति । तस्या एते भवतो वि न इन्द्र मृधो जहि मृगो न भीम इत्यैन्द्राय मृधे पुरोडाशमेकादशकपालं निर्वपेद्बद्धो वा परियत्तो वेति । तस्या एते भवतस्त्रातारमिन्द्रं मा ते अस्यां सहसावन्नित्यैन्द्रायार्काश्वमेधवते पुरोडाशमेकादशकपालं निर्वपेद्यं महायज्ञो नोपनमेदिति । तस्या एते भवतो ऽनवद्ये रथं वृष्णे यत इति । ॥ १२ ॥

इन्द्रायान्वृजवे पुरोडाशमेकादशकपालं निर्वपेद्ग्रामकाम इति । तस्या एते भवतो ऽन्वह मासा अनु ते दायीतीन्द्राण्यै चरुं निर्वपेद्यस्य सेनासंशितेव स्यादिन्द्राणी वै भवति यस्मानमीये संशितोऽस्मदेवैनमभ्याददध्यादिति । तामदेवैनमभ्यादधाति । तस्या एते भवत इन्द्राणीमासु नारिषु नाहमिन्द्राणि रारणेत्यैन्द्राय मन्युमते मनस्वते पुरोडाशमेकादशकपालं निर्वपेत्संग्रामे संयत्त इति । तस्या एते भवतो यो जात एवा ते मह इन्द्रो ऽत्युग्र इत्येतामेव निर्वपेद्यो हतमना इव स्यादिति । तस्या एते भवत । एतामेव निर्वपेद्यः स्वयंपाप इव स्यादिति । तस्या एते एव भवतः । ॥ १३ ॥

इन्द्राय दात्रे पुरोडाशमेकादशकपालं निर्वपेद्यः कामयेत दानकामा मे प्रजाः स्युरिति । तस्या एते भवतो मा नो मर्धीरा तू भरेत्यैन्द्राय प्रदात्रे पुरोडाशमेकादशकपालं निर्वपेद्यस्मै प्रत्तमिव सन्न प्रदीयेतेति । तस्या एते भवतः प्रदातारं हवामहे प्रदाता वज्रीत्यैन्द्राय सुत्राम्णे पुरोडाश-

Digitized by Google

मैकादशकपालं निर्वपेदपरुद्धो वापरुध्यमानो वेति। तस्य एते भवत इन्द्रः सुत्रामा तस्य वयं सुमतौ यज्ञियस्येति। यो ऽस्मै श्रियै सम्भृत्य समानैः स्यात्तस्मा एतमैन्द्रमेकादशकपालं निर्वपेदित्यथ वै भवति रेवती पुरोऽनुवाक्या भवति ग्राम्या अप्रदाहाय शक्वरी याज्येति। तस्या एते भवतो रेवतीर्नः प्रो ष्वस्मै पुरोरथमिति। ॥ १४ ॥ पञ्चमः ॥

अथ वै भवत्याग्नावैष्णवमेकादशकपालं निर्वपेदभिचरन्त्सरस्वत्याज्यभागा स्याद्बार्हस्पत्यश्चरुरित्यथ वै भवति प्रति वै परस्तादभिचरन्तमभिचरन्ति। द्वे द्वे पुरोऽनुवाक्ये कुर्यादतिप्रयुक्त्या इति। स द्विर्द्विः पुरोऽनुवाक्यामन्वाह। त्रिस्त्रिर्हविषामवद्यति। तस्या एता भवन्त्यग्नाविष्णू अग्नाविष्णू प्र णो देव्या नो दिवो बृहस्पत एवा पित्र इत्येतयैव यजेताभिचर्यमाण इति। तस्या एता एव भवन्त्याग्नावैष्णवमेकादशकपालं निर्वपेद्यं यज्ञो नोपनमेदिति। तस्या एते भवतो ऽग्नाविष्णू अग्नाविष्णू इत्याग्नावैष्णवं घृते चरुं निर्वपेच्चक्षुष्काम इति। तस्या एते एव भवतः। ॥ १५ ॥

अथ वै भवतीन्द्रियं वै वीर्यं वृङ्क्ते भ्रातृव्यो यजमानो ऽयजमानस्याध्वरकल्पां प्रतिनिर्वपेद्भ्रातृव्ये यजमाने। नास्येन्द्रियं वीर्यं वृङ्क्ते। पुरा वाचः प्रवदितोर्निर्वपेदिति। स पुरा वाचः प्रवदितोर्महाराच उत्थायायाग्नावैष्णवमष्टाकपालं निर्वपेत्प्रातःसवनस्याकाले। सरस्वत्याज्यभागा स्याद्बार्हस्पत्यश्चरुरिति। तस्या एता भवन्त्यग्नाविष्णू अग्नाविष्णू प्र णो देव्या नो दिवो बृह-

Digitized by Google

स्त एवा पिब इत्याग्नावैष्णवमेकादशकपालं निर्वपेन्माध्यंदिनस्य सवनस्याकाले । सरस्वत्याज्यभागा स्याद्बार्हस्पत्यश्चरुरिति । तस्या एता एव भवन्त्याग्नावैष्णवं द्वादशकपालं निर्वपेत्तृतीयसवनस्याकाले । सरस्वत्याज्यभागा स्याद्बार्हस्पत्यश्चरुरिति । तस्या एता एव भवन्ति । मैत्रावरुणमेककपालं निर्वपेदग्रायै काल इति । तस्या एते भवत आ नो मित्रावरुणा प्र बाहवेति । ॥ १६ ॥

यो ब्रह्मवर्चसकामः स्यात्तस्मा एतꣳ सोमारौद्रं चरुं तिष्यापूर्णमासे निर्वपेदिति । स यो[१] ब्रह्मवर्चसकामः स्यात्स तैष्यां पौर्णमास्याꣳ सोमारौद्रं चरुं निर्वपति । परिश्रिते याजयत्येव[२] वै भवति श्वेतायै श्वेतवत्सायै दुग्धं मथितमाज्यं भवत्याज्यं प्रोक्षणमाज्येन मार्जयन्ते । यावदेव ब्रह्मवर्चसं तत्सर्वं करोत्यति ब्रह्मवर्चसं क्रियत इत्याहुरीश्वरो दुश्चर्मा भवितोरिति । मानवी ऋचौ धाय्ये कुर्यादिति । मधू देववतो रथ इत्येतासां द्वे धाय्यालोके[३] दधाति । तस्या एते भवतः सोमारुद्रा विवृहतं विषूचीꣳ सोमारुद्रा युवमेतानीति । ॥ १७ ॥

यदि बिभीयाद्दुश्चर्मा भविष्यामीति सोमापौष्णं चरुं निर्वपेदिति । तस्य एते भवतः सोमपूषणेमौ देवाविति । सोमारौद्रं चरुं निर्वपेत्प्रजाकाम इति । तस्या एते भवतः सोमारुद्रा विवृहतं विषूचीꣳ सोमारुद्रा युवमेतानीति ।

---

१ Thus M Be 8; यदि UD Be; B defect.

२ Thus M Be 8 UD; यजत्येव Be B.

३ Thus MU Be; धाय्ये Be 8 B; धाय्ये लोके D.

सोमारौद्रं चरुं निर्वपेदभिचरन्निति । तस्या एते एव भवतः । सोमारौद्रं चरुं निर्वपेज्ज्योगामयावीत्यैतयेष्ट्या यक्ष्मस्य उपकल्पयते श्वेतानड्वाहं[1] । तस्या एते एव भवतो । ऽन्वाहार्यमासाद्य श्वेतानड्वाहं ददाति । सोमारौद्रं चरुं निर्वपेद्यः कामयेत स्वे ऽस्मा आयतने भ्रातृव्यं जनयेयमिति । सो ऽपरस्यामर्यादायामध्यवसाय मथित्वाग्नीन्निहृत्य सोमारौद्रं चरुं निर्वपत्यैष वै भवति वेदिं परिगृह्यार्धमुद्धन्यादर्धं नार्धं बर्हिषः स्तृणीयादर्धं नार्धमिध्मस्याभ्यादध्यादर्धं न । स एवास्मा आयतने भ्रातृव्यं जनयतीति ब्राह्मणं । तस्या एते भवतः । ॥ १८ ॥ षष्ठः ॥

अथ वै भवत्यैन्द्रमेकादशकपालं निर्वपेन्मारुतं सप्तकपालं ग्रामकाम इत्यैष वै भवत्याहवनीय ऐन्द्रमधिश्रयति गार्हपत्ये मारुतमनूच्यमान आसादयतीति । काले प्रत्यक्षमैन्द्रमासादयत्यनूच्यमानासु सामिधेनीषु मारुतं । तस्या एता भवन्तीन्द्रं वो विश्वतस्परीन्द्रं नरो मरुतो यद्ध वो दिवो या वः शर्मेत्यैतामेव निर्वपेद्यः कामयेत क्षत्राय च विशे च समदं दध्यामित्यैन्द्रस्यावद्यन्ब्रूयादिन्द्रायानुब्रूहीतीन्द्रं वो विश्वतस्परीत्यन्वाहात्याक्रम्याश्राव्याह मरुतो यजेति । या वः शर्मेति यजति । मारुतस्यावद्यन्ब्रूयान्मरुद्भ्यो ऽनुब्रूहीति । मरुतो यद्ध वो दिव इत्यन्वाहात्याक्रम्याश्राव्याहेन्द्रं यजेतीन्द्रं नर इति यजति । स एवैभ्यो भागधेये समदं दधाति वितृँहाणास्तिष्ठन्तीति ब्राह्मण-

---

1 Thus MDB; श्वेतारमनड्वाहं Be U; Be 8 om., perhaps rightly, श्वेता ।

मैत्रामेव निर्वपेद्यः कामयेत कल्पेरन्निति । यथादेवतमवदाय यथादेवतं यजेद्भागधेयेनैवैनान्यथायथं कल्पयति । कल्पन्त एवेति ब्राह्मणं । तस्या एता भवन्ति याः पूर्वस्याः । ॥ १९ ॥

ऐन्द्रमेकादशकपालं निर्वपेद्वैश्वदेवं द्वादशकपालं ग्रामकाम इत्येतयेष्ट्या यक्ष्यमाण उपकल्पयत उपाधाय्यपूर्वयं वासो ऽथ वै भवत्यैन्द्रस्यावदाय वैश्वदेवस्यावद्येदथैन्द्रस्योपरिष्टादिति । स ऐन्द्रस्यावदाय द्विर्वैश्वदेवस्यावद्यत्यथैन्द्रस्योपरिष्टादिन्द्रियेणैवास्मा उभयतः सजातान्परिगृह्णातीति ब्राह्मणं । तस्या एते भवतो भरेष्विन्द्रं ममत्तु न इत्यन्वाहार्यमासाद्योपाधाय्यपूर्वयं वासो ददाति । पृश्नियै दुग्धे प्रैयङ्गवं चरुं निर्वपेन्मरुद्भ्यो ग्रामकाम इत्येष वै भवति प्रियवती याज्यानुवाक्ये भवत इति । तस्या एते भवतः प्रिया वो नाम हुवे तुराणाꣳ श्रियसे कं भानुभिरिति । यः समानैर्मिथो विप्रियः स्यात्तमेतया संज्ञान्या याजयेदिति । स[1] यैः[1] संजिज्ञासीत[1] तेषूपसमेतेष्वग्नये[1] वसुमते पुरोडाशमष्टाकपालं निर्वपति सोमाय रुद्रवते चरुमिन्द्राय मरुत्वते पुरोडाशमेकादशकपालं वरुणायादित्यवते चरुमिति । तस्या एते भवतो ऽग्निः प्रथमो वसुभिर्नो अव्यात्सं नो देवो वसुभिरिति । ॥ २० ॥

आदित्येभ्यो भुवद्वद्भ्यश्चरुं निर्वपेद्भूतिकाम इति । तस्या एते

---

१ Thus M only; all the other MSS. are badly corrupted: सयैर्संजिज्ञासीन्नतेषुपसमेतेष्व॰ U; तयैवसंजिज्ञासीतेषुपसमेतेष्व॰ B; तयैवसंज्ञाविन तेषूपसमेतेष्व॰ Be 8; तयैव संजज्ञासीनतेषुपसतेष्व॰ Be; तयैव संज्ञातेषुप्रसमेतेष्व॰ D.

भवतो यज्ञो देवानाꣳ शुचिरप इत्यादित्येभ्यो धारयद्भ्यश्चरुं निर्वपेदपरुद्धो वापरुध्यमानो वेत्यथादिते ऽनुमन्यस्वेत्यपरुध्यमानो ऽपरोत्सुः[1] पदपाꣳसूनादत्ते[1] । ऽथैनानादायाहरत्युपप्रेत[2] मरुतः सुदानव एना विश्पतिनाभ्यमुꣳ राजानमित्यथैनान्व्यवमानस्याध्यवावपति सत्याशीरितीह मन इत्युपनिमृद्नीते[2] । ऽथैतान्पदपाꣳसूनसंचरे परावपत्यथ यं यजमानो द्वेष्टि तं मनसा ध्यायति । तस्मा एते भवतो धारयन्त आदित्यासस्तिस्रो भूमीर्धारयन्निति । यः परस्ताद्ग्राम्यवादी स्यात्तस्य गृहाद्व्रीहीनाहरेच्छुक्लाꣳश्च कृष्णाꣳश्च विचिनुयादित्यथ वै भवति ये शुक्लाः स्युस्तमादित्यं चरुं निर्वपेदिति । तस्मा एते भवतस्त्वायु यज्ञियाय दधिषेत्यादित्या वै देवतया विशमेवावगच्छतीति ब्राह्मणमथ वै भवत्यवगतास्य विडनवगतꣳ राष्ट्रमित्यार्द्वे कृष्णाः स्युस्तं वारुणं चरुं निर्वपेदिति । तस्मा एते भवत इमं मे वरुण तत्त्वा यामीति । वारुणं वै राष्ट्रमुभे एव विशं च राष्ट्रं चावगच्छतीति ब्राह्मणम् । ॥ २१ ॥

अथ वै भवति यदि नावगच्छेदिममहमादित्येभ्यो[4] भागं निर्वपाम्यामुष्मादमुष्यै विशो ऽवगन्तोरिति निर्वपेदिति ।

Thus M and Bhav.; पवपद॰ Be BDU; ॰पदः पद॰ Be 8.

२ Thus M; यैनानादायहरंतु॰ Be 8; D om. चादाय; येनानायांतरतु॰ Be BU.

३ Thus M; मि om. all the other MSS.

४ Corrected (cp. TS. II. 3. 1. 4); all the MSS. have इदम् i. s. o. इमम्, only U: इदममहमा॰ ।

Digitized by Google

निरुप्योपरमत्यथावगच्छते यद्भ्राद्यति । तस्मा एते भवतो यन्नो देवानामादित्यानामवसा नूतनेनेत्यादित्या एवैनं भागधेयं प्रेप्सन्तो विशमवगमयन्तीति ब्राह्मणमथ वै भवति यदि नावगच्छेदाश्वत्थान्मयूखान्सप्त मध्यमेषायामुपहन्यादिति । प्राणीषमणो[1] ऽवस्थापयित्वाश्वत्थान्मयूखान्सप्त[1] मध्यमेषायामुपहन्ति[1] । मध्यमसुपहत्य[2] त्रीन्प्रतीचस्त्रीन्प्राच आयातयतीदमहमादित्यान्बध्नाम्यामुष्मादमुष्यै विशो ऽवगन्तोरित्यादित्या एवैनं बद्धवीरा विशमवगमयन्तीति ब्राह्मणमथ वै भवति यदि नावगच्छेत्तमेवादित्यं चरुं निर्वपेदिध्मे ऽपि मयूखान्संनह्येत्तान्सहैवेध्मेनाभ्यादध्यादिति । तान्सहैवेध्मेनाभ्यादधात्येनमपद्यसेवावगच्छतीति ब्राह्मणमथ वै भवत्याश्वत्था भवन्ति । मरुतां वा एतदोजो यदश्वत्थ । ओजसैव विशमवगच्छति । सप्त भवन्ति । सप्तगणा वै मरुतो । गणश एव विशमवगच्छतीति ब्राह्मणं । तस्मा एते एव भवतः । ॥ २२ ॥ सप्तमः ॥

अथ वै भवति यो मृत्योर्बिभीयात्तस्मा एतां प्राजापत्यां शतकृष्णलां निर्वपेदित्येतयेष्ट्या यक्ष्यमाण उपकल्पयते शतं सुवर्णानि कृष्णलानि नवं पात्रं प्रभूतमाज्यमित्यथ देवस्य त्वा सवितुः प्रसव इति प्रतिपदं कृत्वा प्रजापतये जुष्टं निर्वपामीति चतुरो मुष्टीन्कृष्णलानां[3] निर्वपति । अविक्षुता वाचं विसृज्य

---

१ This passage is found in M only.

२ Thus Be 8; मध्यत उपहत्य Be BD; मध्यम उप॰ M; मध्य उप॰ U; मध्यसुपहत्य Bhav.

३ Thus M; कृष्णलान् or कृष्णलां the other MSS.

गार्हपत्ये नवं पात्रमधिश्रित्य तिरः पवित्रमाज्यमानीय तिरः पवित्रं कृष्णलान्यावपत्यथाज्यं निर्वपत्यथाज्यमधिश्रित्योभयं[1] पर्यग्नि कृत्वान्तर्वेद्यासादयत्यथ वै भवति चत्वारिचत्वारि कृष्णलान्यवद्यति चतुरवत्तस्याप्त्या इत्यष्टौ देवताया अवद्यति चत्वारि स्विष्टकृते ऽष्टाविडायै[2] चत्वार्यवान्तरेडाया एकं प्राशित्रायैकं यजमानायाज्यमेव जुह्वतो जुह्वत्याज्यं प्राश्नन्तः[3] प्राश्नन्त्यथैनान्येकधोद्धृत्य[3] ब्रह्मण उपहरति । तस्या एते भवतो हिरण्यगर्भः प्रजापत इति । ॥ २३ ॥

यो ब्रह्मवर्चसकामः स्यात्तस्मा एतꣳ सौर्यं चरुं निर्वपेदित्येतयेष्ट्या यक्ष्यमाण उपकल्पयते पञ्च सुवर्णानि कृष्णलानि सुवर्णरजतौ च रुक्मावथैतं चरुꣳ श्रपयित्वाभिघार्योद्वास्योदास्य सुवर्णरजताभ्याꣳ रुक्माभ्यां परिगृह्यान्तर्वेद्यासादयति । समानं कर्मा प्रयाजेभ्यो । ऽथ वै भवति प्रयाजेप्रयाजे कृष्णलं जुहोतीति । स प्रयाजेप्रयाज एव कृष्णलमन्ववधाय जुहोति । तस्या एते भवत उदु त्यं चित्रमित्यथाहार्यमासाद्य सुवर्णरजतौ रुक्मौ ददात्याग्नेयमष्टाकपालं निर्वपेत्सावित्रं द्वादशकपालं भूम्यै चरुं यः कामयेत हिरण्यं विन्देय हिरण्यं मोपनमेदित्येतयेष्ट्या यक्ष्यमाण उपकल्पयते हिरण्यं । तस्या एता

१ ॰मधिश्रयत्युभयं M.

२ षड्ढो is found in M only.

३ Thus M; प्राश्नंतमेव प्राश्नंत्य॰ D; the other MSS. (i. s. o. प्राश्नन्ति) प्राश्नाते Be; प्राश्नंते U; प्राश्नते B; प्राश्नाति Be 8.— उद्धृत्य M Be 8, उपहृत्य the other MSS., but cp. supra XII. 16 (p. 68, 18).

Digitized by Google

भवन्ति स प्रसवति काव्या हिरण्यपाणिमूतये सामनस्य सवितर्वन्दित्वा पर्वतानाꣳ सोमायस्ता विचारिणीत्यन्वाहार्यमासाद्य हिरण्यं दद्यात्यैतामेव निर्वपेद्धिरण्यं विन्देति । तस्मा एता एव भवन्त्यैतामेव निर्वपेद्यस्य हिरण्यं नश्येदिति । तस्मा एता एव भवन्ति । ॥ २४ ॥

यः सोमवामी स्यात्तस्मा एतꣳ सोमेन्द्रꣳ श्यामाकं चरुं निर्वपेदिति । [1]तस्मा एते भवत उदूद्रेणापास्ममन्युरिति । सोमवामी वा अन्यो भवत्यन्यः सोमातिपवितो भवति । यः सोमातिपवितः स्यात्तस्मा एतꣳ सोमेन्द्रꣳ श्यामाकं चरुं निर्वपेदिति[1] । तस्मा एते भवतः प्र सुवानः सवाधस इत्यग्नये दात्रे पुरोडाशमष्टाकपालं निर्वपेदिन्द्राय प्रदात्रे पुरोडाशमेकादशकपालं पशुकाम इत्यैतयेष्टा यक्ष्यमाण उपकल्पयते दधि मधु घृतमपो यवानित्यथ देवस्य त्वा सवितुः प्रसव इति प्रतिपदं कृत्वाग्नये दात्रे जुष्टं निर्वपामीति चतुरो मुष्टीन्व्रीहीणां निर्वपत्यैतामेव प्रतिपदं कृत्वेन्द्राय प्रदात्रे जुष्टं निर्वपामीति चतुर एव व्रीहीणामेतामेव प्रतिपदं कृत्वा प्रजापतये जुष्टं निर्वपामीति चतुरो यवानां । तेषां व्रीहिष्वेव चविष्कृतमुद्वादयत्युपोत्पवन्ते यवानविष्कृता वाचं विसृजते । समानं

---

१ The passage marked between १ ... १ is not found in M Be BU. In the words as handed down by Be 8, I inserted अन्यो (l. 8, first time) and तस्मा (l. 9) and changed अन्यं (l. 8, second time) into अन्यः । D : सोमवामी चोन्यो भवत्यन्यं विदुः सोमातिपवितः (sic).

Digitized by Google

कर्माधिवपनादुद्धृत्य हविषार्धे गार्हपत्यस्याङ्गारौ कपालान्यु-पदधात्येकादशोत्तरतो ऽथैतान्यवानुपूर्वाणि परिमृज्य गार्हपत्य एककपालमधिश्रित्य धाना भर्जन्ति[1]। यदैते[2] हविषी अधिश्रयन्ति तदैता धानाः सक्तुसृष्टेनोपसृजति[3] दध्ना मधुना[4] घृतेनाद्भिरिति। तस्या एता भवन्त्यग्ने दा दाशुषे रयिं दा नो अग्ने प्रतिनः प्रदातारꣳ हवामहे प्रदाता वज्री घृतं न पूतस्तुभे सुयज्ञ सर्पिष इति। ॥ २५ ॥

यो यज्ञविभ्रष्टः स्यात्तस्मा एतामिष्टिं निर्वपेदाग्नेयमष्टा-कपालमैन्द्रमेकादशकपालꣳ सौम्यं चरुमित्यथ वै भवत्याग्नेयस्य च सौम्यस्य चैन्द्रे समावेशयेदिति। स आग्नेयस्य च सौम्यस्य चैन्द्रे समावेशयति। तेजश्चैवास्मिन्ब्रह्मवर्चसं[5] च[5] समीची[5] दधातीति ब्राह्मणं। तस्या एता भवन्ति स प्रत्नवन्निति काव्येन्द्रं वो विश्वतस्परीन्द्रं नरस्त्वं नः सोम या ते धामानीत्यग्नीषोमी-यमेकादशकपालं निर्वपेद्यं कामो नोपनमेदिति। तस्या एते भवतो ऽग्नीषोमा सवेदसा युवमेतानीत्यग्नीषोमीयमष्टाकपालं निर्वपेद्ब्रह्मवर्चसकाम इति। यो ब्रह्मवर्चसकामः स्यात्सो ऽग्नी-षोमीयमष्टाकपालꣳ श्यामाकानां निर्वपति। तस्या एते

---

१ Thus M (the same reading xvii. 31); भर्जयंति the other MSS.

२ Only found in M Be 8; BDU om.; Be has a lacuna of three akṣaras.

३ Thus M and Bhav.; the other MSS. have the plural.

४ मधुना M.

५ Thus corrected acc. to TS. II. 3. 3. 2; तेजश्चैवास्मा इन्द्रियं च समीची MUDB Be; तेजश्चैवास्मा इन्द्रियं च ब्रह्मवर्चसं च समीची Be 8.

Digitized by Google

भवतो ऽग्नीषोमाविमꣳ सु मे ऽग्नीषोमा हविषः प्रस्थितस्येति । सोमाय वाजिने श्यामाकं चरुं निर्वपेद्यः क्लैब्याद्बिभीयादिति । तस्या एते भवत आप्यायस्व सं त इति । ब्राह्मणस्पत्यमेकादशकपालं निर्वपेद्ग्रामकाम इत्यथ वै भवति गणवती याज्यानुवाक्ये भवत इति । तस्या एते भवतो गणानां त्वा गणपतिꣳ हवामहे स इज्जनेनेत्येतामेव निर्वपेद्यः कामयेत ब्रह्मन्विशं नाशयेयमिति । मारुती याज्यानुवाक्ये कुर्यादिति । तस्या एते भवतो मरुतो यद्ध वो दिवो या वः शर्मेति । ॥ २६ ॥

अर्यम्णे चरुं निर्वपेत्सुवर्गकाम इति । तस्या एते भवतो ऽर्यमा याति ये ते ऽर्यमन्नित्यर्यम्णे चरुं निर्वपेद्यः कामयेत दानकामा मे प्रजाः स्युरिति । तस्या एते भवतो । ऽर्यम्णे चरुं निर्वपेद्यः कामयेत स्वस्ति जनतामियामिति । तस्या एते एव भवतो । यो राजन्य आनुजावरः स्यात्तस्मा एतमैन्द्रमानुषूकमेकादशकपालं निर्वपेदित्यथ वै भवति बुध्नवती अग्रवती याज्यानुवाक्ये भवत इति । तस्या एते भवतो बुध्नादग्रमङ्गिरोभिर्गृणानो बुध्नादग्रेण विमिमाय मानैरिति । यो ब्राह्मण आनुजावरः स्यात्तस्मा एतं बार्हस्पत्यमानुषूकं चरुं निर्वपेदित्यथ वै भवति बुध्नवती अग्रवती याज्यानुवाक्ये भवत इति । तस्या एते भवतो महान्महो अस्तभायद्बुध्नाद्यो अग्रमभ्यत्योजसेति । ॥ २७ ॥ अष्टमः ॥

अथ वै भवति यः पाप्मगृहीतः स्यात्तस्मा एतमादित्यं चरुममावास्यायां निर्वपेदिति । तस्या एते भवतो नवोनवो

Digitized by Google

भवति जायमानो यमादित्या अꣳशुमाप्याययन्तीति । यं कामयेतान्नादः स्यादिति तस्मा एतं त्रिधातुं निर्वपेदिन्द्राय राज्ञे पुरोडाशमेकादशकपालमिन्द्रायाधिराजायेन्द्राय स्वराज्ञ इत्यथ देवस्य त्वा सवितुः प्रसव इति प्रतिपदं कृत्वेन्द्राय राज्ञे जुष्टं निर्वपामीति चतुरो मुष्टीन्व्रीहीणां निर्वपत्येतामेव प्रतिपदं कृत्वेन्द्रायाधिराजायेन्द्राय स्वराज्ञ इति चतुरश्चतुरो मुष्टीनेकैकस्यै देवतायै । हविष्कृता वाचं विसृजते । समानं कर्माधिवपनादधिवप्य गार्हपत्य एकादशोत्तानानि कपालान्युपदधात्यथ वै भवत्युत्तानेषु कपालेष्वधिश्रयत्ययातयामत्वाय । त्रयः पुरोडाशा भवन्ति । त्रय इमे लोका । एषां लोकानामाप्त्या । उत्तरउत्तरो ज्यायान्भवतीति । स उत्तरमुत्तरमेव ज्यायाꣳसं करोति । सर्वेषामभिगमयन्नवद्यतीति । सो ऽवद्यन्नाहेन्द्राय राज्ञे ऽनुब्रूहीति । प्राच्यां दिशि त्वमिन्द्रासि राजेत्यनूच्येन्द्रो जयाति न पराजयाता इति यजति । सो ऽवद्यन्नाहेन्द्रायाधिराजायानुब्रूहीतीन्द्रो जयाति न पराजयाता इत्यनूच्यास्येदेव प्ररिरिचे महित्वमिति यजति । सो ऽवद्यन्नाहेन्द्राय स्वराज्ञे ऽनुब्रूहीत्यस्येदेव प्ररिरिचे महित्वमित्यनूच्य प्राच्यां दिशि त्वमिन्द्रासि राजेति यजति । अत्यास्मन्नाद्यानिर्दाशायेति ब्राह्मणम् । ॥ २८ ॥

य इन्द्रियकामो वीर्यकामः स्यात्तमेतया सर्वपृष्ठया याजयेदित्यैतयेष्ट्या यक्ष्यमाण उपकल्पयते ऽश्वमृषभं वृष्णिं बस्तमित्यथ देवस्य त्वा सवितुः प्रसव इति प्रतिपदं कृत्वेन्द्राय राथंतराय

Digitized by Google

मुष्टं निर्वपामीति चतुरो मुष्टीन्गौरीणां निर्वपत्येताभेव प्रतिपदं ऐन्द्राय बार्हतायेन्द्राय वैरूपायेन्द्राय वैराजायेन्द्राय शाक्वरायेन्द्राय रैवतायेति चतुरश्चतुरो मुष्टीनेकैकस्यै देवतायै। हविष्कृता वाचं विसृजते। समानं कर्माधिवपनादृष्ध्वा गार्हपत्ये द्वादशोत्तानानि कपालान्युपदधात्यथ वै भवत्युत्तानेषु कपालेष्वधिश्रयत्ययातयामत्वाय। द्वादशकपालः पुरोडाशो भवति वैश्वदेवत्वाय। समन्तं पर्यंहतीति। सो ऽवदायाहेन्द्राय राथंतरायानुब्रूहीत्यभि त्वा शूर नोनुम इत्यनूच्य त्वामिद्धि हवामह इति यजति। सो ऽवदायाहेन्द्राय बार्हतायानुब्रूहीति। त्वामिद्धि हवामह इत्यनूच्य यद्वाव इन्द्र त इति यजति। सो ऽवदायाहेन्द्राय वैरूपायानुब्रूहीति। यद्वाव इन्द्र त इत्यनूच्य पिबा सोममिन्द्र मन्दतु त्वेति यजति। सो ऽवदायाहेन्द्राय वैराजायानुब्रूहीति। पिबा सोममिन्द्र मन्दतु त्वेत्यनूच्य कद्रा चन स्तरीरसीति यजति। सो ऽवदायाहेन्द्राय शाक्वरायानुब्रूहीति। कद्रा चन स्तरीरसीत्यनूच्य रेवतीर्नः सधमाद इति यजति। सो ऽवदायाहेन्द्राय रैवतायानुब्रूहीति। रेवतीर्नः सधमाद इत्यनूच्याभि त्वा शूर नोनुम इति यजति। यथासमन्वारब्धिर्दीक्षायेति ब्राह्मणम्। ॥ २९ ॥

अन्वाहार्यमासाद्यानड्वाहमृषभं दक्षिणां ददामिति दद्यात्तैतयैव यजेताभिक्रममाण इति। चैव[1] पूर्वा[1] सेधं[1]। यश्चतुष्कामः

१ Thus M; चैव पूर्वा सेति Be; चैव पूर्वसे Be 8; श्चैव पूर्वास्वेति U; गथा एवे भवंति या पूर्वस्था BD.

स्वात्तस्मा एतामिष्टिं निर्वपेदग्नये भ्राजस्वते पुरोडाशमष्टाकपालꣳ सौर्यं चरुमग्नये भ्राजस्वते पुरोडाशमष्टाकपालमिति । तस्या एते भवन्त्युदग्ने शुचयस्तव वि ज्योतिषोदु त्यं चित्रमुदग्ने शुचयस्तव वि ज्योतिषेत्युपहूतायामिडायामनाहितमग्नीधे भवत्यथ यजमानाय चौम्पिण्डान्प्रयच्छत्युदु त्यं जातवेदसꣳ सप्त त्वा हरितो रथे चित्रं देवानामुदगादनीकमिति पिण्डान्प्रयच्छति । चक्षुरेवास्मै प्रयच्छति । यदेव तस्य तदिति ब्राह्मणं । वैश्वदेवीꣳ सांग्रहणीं निर्वपेद्ग्रामकाम इति । वैश्वदेवं चरुꣳ संस्पृष्टान्त इव अपयन्त्यथ ध्रुवो ऽसि ध्रुवो ऽहꣳ सजातेषु भूयासमिति परिधीन्परिदधाति । तस्या एते भवतो विश्वे देवा विश्वे देवा इत्यथ पुरस्तात्स्विष्टकृतः स्रुवाहुतीरुपजुहोत्यामनमस्यामनस्य[1] देवा इति तिस्रः । ॥ २० ॥ नवमः ॥

अथ वै भवत्यग्निं वा एतस्य शरीरं गच्छति सोमꣳ रसो । वरुण एनं वरुणपाशेन गृह्णाति सरस्वतीं वागग्नाविष्णू आत्मा यस्य ज्योगामयति । यो ज्योगामयावी स्याद्यो वा कामयेत सर्वमायुरियामिति तस्मा एतामिष्टिं निर्वपेदित्येतयेष्ट्या यक्ष्यमाण उपकल्पयते खादिरं नवं पात्रं नवनीतमाज्यं यावतीः समा एष्यन्मन्येत तावन्मानं च प्रवर्तमथ देवस्य त्वा सवितुः प्रसव इति प्रतिपदं कृत्वाग्नेयमष्टाकपालं निर्वपति सौम्यं चरुं वारुणं दशकपालꣳ सारस्वतं चरुमाग्नावैष्णवमेकादशकपाल-

---

१ स्रुवाहुतीरुपजुहोत्य॰ MBD; स्रुवाहुतीर्जुहोत्य॰ U Be; स्रुवाहुतिं जुहोत्य॰ Be 8.

Digitized by Google

मिति[१] । समानं कर्माज्यावेक्षणात् । आज्यावेक्षणे[२] ऽनुवर्तयति अयमेतन्नवनीतमभवदिति । समानं कर्म स्रुचाꣳ सादनात् । सादयित्वा स्रुचो ऽथैतं प्रवर्तं खादिरे नवे पात्र उपस्तीर्णाभिघारितꣳ सह हविर्भिरन्तर्वेद्यासादयति । समानं[३] कर्म[३] प्रयाजेभ्यः[३] । प्रयाजैश्चरित्वा[३] हविर्भिश्चरति[३] । तस्या एता भवन्त्यायुष्ट आयुर्दा अग्न आप्यायस्व सं ते ऽव ते हेड उदुत्तमं प्र णो देव्या नो दिवो ऽग्नाविष्णू अग्नाविष्णू इत्यथ पुरस्तात्स्विष्टकृतः स्रुवाहुतीरुपजुहोति ॥ ३१ ॥

अश्विनोः प्राणो ऽसि तस्य ते दत्तां ययोः प्राणो ऽसि स्वाहेन्द्रस्य प्राणो ऽसि तस्य ते ददातु यस्य प्राणो ऽसि स्वाहा मित्रावरुणयोः प्राणो ऽसि तस्य ते दत्तां ययोः प्राणो ऽसि स्वाहा विश्वेषां देवानां प्राणो ऽसि तस्य ते ददतु येषां प्राणो ऽसि स्वाहेति । हुत्वाहुत्वैव संस्रावैः[४] प्रवर्तमभिघारयति राडसि विराडसि सम्राडसि स्वराडसीत्यथैतं प्रवर्तमग्रेणाहवनीयं पर्याहृत्य दक्षिणतो निदधात्यथ यजमानमाज्यमवेक्षयति घृतस्य धाराममृतस्य पन्थामिन्द्रेण दत्तां प्रयतां मरुद्भिः । तत्त्वा विष्णुः पर्यपश्यत्तत्त्वेडा गव्यैरयदित्यथ ब्रह्मणो हस्तमन्वारभ्यर्त्विजः[५] पर्याहुः पावमानेन त्वा स्तोमेन गायत्रस्य

१ Here BD ins. हविष्कृता वाचं विसृजते ।

२ Thus M Bhav.; स आज्यमवेक्षमाणो the other MSS.

३ om. M Be.

४ संस्रावेण Be 8.

५ ऋत्विजः only in M Be 8 D.

Digitized by Google

वर्तन्योपांशुपोर्वीर्येण देवस्त्वा सवितोत्सृजतु जीवातवे जीवन-
स्यायै बृहद्रथंतरयोस्त्वा स्तोमेन त्रिष्टुभो वर्तन्या शुक्रस्य
वीर्येण देवस्त्वा सवितोत्सृजतु जीवातवे जीवनस्याया अग्रेस्त्वा
मात्रया जगत्यै वर्तन्याग्रयणस्य वीर्येण देवस्त्वा सवितोत्सृजतु
जीवातवे जीवनस्याया इत्यथ हिरण्याहृतं निष्पिबति। ९
निष्पिबन्तमनुमन्त्रयत इममग्न आयुषे वर्चसे कृधि प्रियꣳ
रेतो वरुण सोम राजन्। मातेवास्मा अदिते शर्म यच्छ विश्वे
देवा जरदष्टिर्यथासदित्यथैतं[1] प्रवर्तमद्भिः प्रक्षाल्य दक्षिणे कर्ण
आबध्नीत[2] आयुष्टे[2] विश्वतो दधदित्यथैनमनुपरिवर्तयत[3]
आयुरसि विश्वायुरसि सर्वायुरसि सर्वमायुरसीत्यथास्य[4] मन्त्रा १०
एवं मृजात्यग्निरायुष्मानित्याम्नादनुवाकस्य। ॥ २२ ॥

यावतो ऽश्वान्प्रतिगृह्णीयात्तावतो वारुणांश्चतुष्कपालान्नि-
र्वपेदेकातिरिक्तानिति। तस्या एते भवत इमं मे वरुण तत्त्वा
यामीति। अथापरं प्रतिग्राही स्यात्सौर्यमेककपालमनुनिर्वपे-
दिति। तस्या एते भवत उदु त्यं चित्रमित्यथापो[5] ऽवभृथम- ११
वैत्यथ[5] वै[5] भवत्यपोनप्त्रीय[5] चरुं पुनरेत्य निर्वपेदिति।

---

१ Thus M; ॰थैनं all the other MSS.

२ Thus corrected, cp. infra XVII. 41 and XVIII. 9; आबध्नी॰नायु॰ M; आबध्नात्यायु॰ the other MSS.

३ All exc. M ins. प्रवर्तम् after एवं।

४ After सर्वमायुरसि M has some words more: सर्वं म आयुर्भूयात्सर्व॰मायुर्गेषम्, cp. Āp. XIX. 24. 10.

५ Thus MUD Be, the last three omitting the words अथ वै भवति। चित्रमित्यवभृथमेवैत्यपोन॰ Be 8; चित्रमित्यपोन॰ B.

Digitized by Google

तस्या एते भवतो ऽपां नपात्तमन्वा यन्तीति । यः पाप्मना[1] गृहीतः स्यात्तस्मा एतामैन्द्रावरुणीं पयस्यां निर्वपेदित्येतयेष्ट्वा यक्ष्यमाण उपकल्पयते दधि पय आमिक्षाया इत्यथ देवस्य त्वा सवितुः प्रसव इति प्रतिपदं कृत्वेन्द्रावरुणाभ्यां जुष्टं निर्वपामीति चतुरो मुष्टीन्व्रीहीणां निर्वपति । हविष्कृता वाचं विसृजते । समानं कर्माधिवपनाद्व्युष्य हविरार्धे गार्हपत्यस्यैकादश कपालान्युपदधाति । यदैतं पुरोडाशमधिश्रयति तदैतामामिक्षां गार्हपत्ये श्रपयत्यथैतं पुरोडाशमुपस्तीर्णाभिघारितमुदास्यामिक्षया संप्रच्छाद्यान्तर्वेद्यासादयति[2] । ॥ ३३ ॥

अथ वै भवति पयस्यायां पुरोडाशमवदधात्यात्मन्नेवैनं करोत्यथो आयतनवन्तमेव । चतुर्धा व्यूहति । दिक्ष्वेव प्रतितिष्ठति । पुनः समूहतीति । स आमिक्षां पुरोडाशाच्चतुर्धा[3] कृत्वा व्यूहति या वामिन्द्रावरुणा यतव्या तनूस्तयेममंहसो मुञ्चतं या वामिन्द्रावरुणा सहस्या रक्षस्या तेजस्या तनूस्तयेममंहसो मुञ्चतमिति । पुनः समूहति समूह्यावद्यतीति । तस्या एते भवत इन्द्रावरुणयोरहमिन्द्रावरुणा युवमध्वराय न इत्यथ पुरस्तात्स्विष्टकृतः स्रुवाहुतीरुपजुहोति यो वामिन्द्रावरुणावग्नौ स्रामस्तं वामेतेनावयज इत्यष्टौ । ॥ ३४ ॥ दशमः ॥

अथ वै भवति यो भ्रातृव्यवान्स्यात्स स्पर्धमान एतयेष्ट्वा

---

१ Thus M; पाप्मन° the other MSS.

२ Thus M; संसाद° all the other MSS.

३ Thus M and Bhav.; पुरोडाशं चतुर्धा all the other MSS.

यजेताग्नये व्रतवते पुरोडाशमष्टाकपालं निर्वपेदग्नये विबाधवते ऽग्नये प्रतीकवत इति । तस्या एता भवन्ति प्रप्रायमग्निः प्र ते यक्षि प्र त इयर्मि मन्म भुवो वि पाजसा वि ज्योतिषा स त्वमग्ने प्रतीकेन तꣳ सुप्रतीकꣳ सुदृशꣳ स्वञ्चमिति । यो भ्रातृव्यवान्स्यात्स स्पर्धमान एतयेष्ट्या यजेतेन्द्रायाꣳहोमुचे पुरोडाशमेकादशकपालं निर्वपेदिन्द्राय वैमृधायेन्द्रायेन्द्रियावत इत्यथ वै भवति त्रयस्त्रिꣳशत्कपालं पुरोडाशं निर्वपतीति । स एवैते त्रय एकादशकपालास्त[1] एवैत[1] उक्ता[1] भवन्ति । तस्या एता भवन्त्यꣳहोमुचे विवेष यन्मा वि न इन्द्रेन्द्र क्षत्रमिन्द्रियाणि शतक्रतो ऽनु ते दायीति । यो भ्रातृव्यवान्स्यात्स स्पर्धमान एतयेष्ट्या यजेताग्नये संवर्गाय पुरोडाशमष्टाकपालं निर्वपेत्तꣳ शृतमासन्नमेतेन यजुषाभिमृशेदिति । तꣳ शृतमासन्नमेतेन यजुषाभिमृशत्योजो ऽसि सहो ऽसि बलमसि भ्राजो ऽसि देवानां धाम नामासि विश्वमसि विश्वायुः सर्वमसि सर्वायुरभिभूरहमनेन हविषामुं भ्रातृव्यमभिभूयासमिति । युक्ष्वा हि देवहूतमानित्येतस्यानुवाकस्य सप्तदश सामिधेनीः पराचीरन्वाह । तस्या एते भवतः सखायः सं वः सम्यञ्चꣳ सꣳसमिद्युवसे वृषन्निति । ॥ ३५ ॥

यः प्रजाकामः स्यात्तस्मा एतं प्राजापत्यं गार्मुतं चरुं निर्वपेदिति । तस्या एते भवतः प्रजापते स वेदेति । यः पशुकामः

१ Thus Be 8 ; ता एवैत उक्ता M ; त एवोक्ता Be BU ; तयोक्ता D.

स्वान्तस्या एतᳬ सोमापौष्णं गार्मुतं चरुं निर्वपेदिति । तस्या एते भवतः सोमापूषणेमौ देवाविति । चित्रया यजेत पशुकाम इति । अश्विनयेत्युपवसत्यथ[1] प्रातराग्नेयमष्टाकपालं निर्वपति सौम्यं चरुं त्वाष्ट्रमष्टाकपालᳬ सरस्वत्यै चरुᳬ सरस्वते चरुᳬ सिनीवाल्यै चरुमैन्द्रमेकादशकपालमिति । तस्या एते भवन्त्यग्निना रयिमश्नवद्गोमाᳬ अग्न आप्यायस्व सं त इह त्वष्टारमग्रियं तन्नस्तुरीपं प्र णो देव्या नो दिवः पीपिवाᳬसᳬ सरस्वतो ये ते सरस्व ऊर्मयः सिनीवालि या सुपाणिरिन्द्रं वो विश्वतस्परीन्द्रं नर इत्यथ पुरस्तात्स्विष्टकृतः स्रुवाहुतीरुपजुहोत्यग्ने गोभिर्न आगहीति पञ्चर्चो द्वे यजुषी । ॥ ३६ ॥ एकादशः ॥

कारीर्या यक्ष्यमाणो भवति । स उपकल्पयते कृष्णं वासः कृष्णतूषं कृष्णमश्वं कृष्णाᳬ संदानं कृष्णाजिनं कृष्णमधु[2] करीरसक्तून्कृष्णां कुम्भीमामपक्वां[3] कृष्णमनस्विगधं कृष्णामविं कृष्णं वर्षाह्वस्तम्बं[4] वैतसमिध्माबर्हिरित्यथ यजमानायतने कृष्णं वासः कृष्णतूषं निदधात्यथाग्रेणाहवनीयं कृष्णमश्वं कृष्णेन संदानेन

---

१ अश्विनियेत्यु° Be 8 Be ; अश्विनेत्यु° BDU ; अश्विनयेत्यु° M.

२ कृष्णंमधु DU.

३ Thus corrected acc. to a Prayoga ; कुंभीमामपक्वां D ; instead of °चामपक्वां Be 8 (pr. m) : °चामवाकार्यं, (sec. m.) : °चामपाचंकरीचा ; °चामपाचकरीचा U ; °चामपाचकरी B ; °चामपाचंकरीचत् Be ; °चाममाचं-करीचां M.

४ वर्षाह्व° M here and later on consequently ; thus also some of the other MSS.

संहित्यान्तर्वेदि[1] कृष्णाजिने कृष्णमधु करीरसक्तूनित्येतान्संस्करे कुम्भीं निनिनीत्युत्तरवेण्योत्करं प्राचीनमनं स्थापयित्वा तस्याधि प्रोपस्थानं कृष्णामविं निपद्यात्युत्तरेणाहवनीयं कृष्णं वर्षाह्व वासं वैतममिभावर्षिरिति निदधात्येव यजमानः कृष्णं वासः कृष्णतूषं परिधत्ते ॥ ३७ ॥

मारुतमसि मरुतामोजो ऽपां धारां भिन्द्धीति रमयत मरुतः श्येनमायिनमिति पश्चाद्वातं प्रतिमीवति पुरोवातमेव जनयति वर्षस्यावरुद्ध्या इति ब्राह्मणमथैतमश्मानं संक्ष्णमञ्जु वोत्तरवर्षीर्वाभिविषिपत्यभिक्रन्द[2] स्तनय गर्भमाधा इति स यदि विधूनुते[3] यदि मेहति यदि प्रकाशरोति वर्षिष्यतीत्येव वेदाथ वातनामानि जुहोति पुरोवातो वर्षन्निन्वरा-डित्यथैतत्कृष्णवासान्तर्वेदि कृष्णाजिने मधुना करीरसक्तून्संयौति मान्दा वाशाः शुन्ध्यूरजिराः। ज्योतिष्मतीस्तमस्वरीरुन्दतीः सुफेनाः। मित्रभृतः क्षत्रभृतः सुराष्ट्रा इह मावतेति तिस्रः पिण्डीः कृत्वा मधुषित्त्व कृष्णाजिनस्यान्तान्संदानेनोपनह्यति वृष्णो अश्वस्य संदानमसि वृष्ट्यै त्वोपनह्यामीत्येतेना यजमानः प्रथमायां गन्धायामावध्नाति ॥ ३८ ॥

देवा वसव्या अग्ने सोम सूर्येत्यवोरावे उपरमति द्वितौ-

---

1 Thus M only; संहित्यान्तर्वेदि all the other MSS.

2 °वर्षीर्वा° M; °वर्षीर्वा the other MSS.; cp. supra p. 104. 2–
°भिविषिपत्य° M.

3 विधुनुते BD.

Digitized by Google

स्तनयित्नुभगिनि देवाः शर्मणा निघातकार्यमनिवारितोराये
गृहोपरमति । इलोकप्रामाभ्यागनि देवाः यतीतयो ऽपां
कपालद्वयकेनपिताङ्गोरसे प्लोपरमत्यंय वै भवति यदि
सर्वमवसेव ग्रोतव्यमिति । यदि चेव कर्षति यदि गोभक्तेन
९ चित्तीकुंहोति कृपोपचारोर्णाभिचारिता दिश तिरलमः
तन्तव्या शं वर यद्दीरकया मरुतः समुद्रत इत्यंपसां भूम-
मनौहति ऽभितज्वां हरः सुपर्ण इति । यदि न वर्षेद्धो
भूते हविर्निर्वपेदग्नये आज्यवदे पुरोडाशमष्टाकपालं निर्वपे-
न्द्रायतष्ट् इन्द्रकपालष्ट् सौर्यमेककपालमिति । तस्य स्ता
१० भवति सं वा निद्युलाये भरीचि त्व जातवेदसे दिवो
नो वृष्टिं मरुतो ररीध्वं पिन्वस्थपो मरुतः सुदानव उत तां
विनमित्यंय पुरस्तात्विष्टकृतः कुपात्कतीरपसुप्तोर्योऽभिह्रायवकु-
भिनसावसहाद्य इति तिष्ठो । ऽपेतां कुम्भीमद्भिः पूरयति
इमा वृष्टिं दिव आद्भिः समुद्रं पृणेति । सा यदि दीर्यते
११ यदि भिद्यते वर्षिष्यतीत्येव वेदायाविमभिजुहोत्यजा[1] यानि
शमनजा वननमपि समुद्रियमिति । सा यदि विधूनुते यदि
वेदति यदि प्रकारोति वर्षिष्यतीत्येव वेदाय वर्षाकामम-
भिजुहोति ॥ ३९ ॥

---

१ Thus M Bo S Bo; वेदाय मेघा उपरि जुहोत॰ BUD; then follows in B the beginning of kh. 40; the passage यावाविमभि-जुहोत॰ ... वर्षिष्यतीत्येव was given in this MS. already after the horse oracle.

Digitized by Google

उच्छ्रयस्व पृथिवीं भिन्द्धीदं दिव्यं नभः। उद्नो दिव्यस्य नो देहीशानो विसृजा दृतिमित्यथैनमाहवनीये ऽनुप्रहरति हिरण्यकेशो रजसो विसार इत्यथास्य धूममन्वीक्षते या ते सुपर्णा अमिनन्त एवैरित्यथान्तर्वेदि तिष्ठन्कृष्णाजिनमवधूनोति ये देवा दिविभागा इत्यान्तादनुवाकस्य। संतिष्ठते कारीर्यायातों ऽन्नःसवकारीर्याग्नेयमष्टाकपालं निर्वपति श्रपयित्वासादयति। तस्याः पञ्चदश सामिधेन्यः पञ्च प्रयाजा वार्त्रघ्नावाज्यभागावथ हविषो ऽग्निर्मूर्धा भुव इति। त्रिष्टुभौ संयाज्ये। याभिरेव पिण्डीराबध्नाति याभिश्च जुहोति याभ्यां च धूममन्वीक्षते ताः सꣳस्विध्यन्ति[1]। संतिष्ठते ऽन्नःसवकारीरी।

॥ ४० ॥ द्वादशः ॥

अथ वै भवति त्रैधातवीयेन यजेताभिचरन्वाभिचर्यमाणो वा सहस्रेण वा यक्ष्यमाणः[2] सहस्रेण वेजानो यो वा यज्ञ इत्युक्त्वा न यजेत इत्येतयेष्ट्या यक्ष्यमाण उपकल्पयते सहस्रꣳ हिरण्यं तार्प्यं धेनुमित्यथ देवस्य त्वा सवितुः प्रसव इति प्रतिपदं त्वेन्द्राविष्णुभ्यां जुष्टं निर्वपामीति चतुरो मुष्टीन्व्रीहीणां निर्वपत्येतामेव प्रतिपदं त्वेन्द्राविष्णुभ्यां जुष्टं निर्वपामीति चतुरो यवानामेतामेव प्रतिपदं त्वेन्द्राविष्णुभ्यां जुष्टं निर्वपामीति चतुर एव व्रीहीणां। तेषां व्रीहिष्वेव हवि-

१ Thus M; सं om. all the other MSS.

२ The following thus only in M; the other MSS. are partly corrupted partly incomplete.

Digitized by Google

ष्कृतमुद्वादश्यत्युपोषयच्छन्ते यवान्हविष्कृता वाचं विसृजते । समानं कर्माधिवपनादभ्युष्य गार्हपत्ये द्वादश कपालान्युपदधात्यथ वै भवति द्वादशकपालः पुरोडाशो भवति । ते त्रयश्चतुष्कपालास्त्रिष्वसृष्टत्वाय । त्रयः पुरोडाशा भवन्ति । त्रय इमे लोका । एषां लोकानामाप्त्या । उत्तरउत्तरो ज्यायान्भवतीति । स उत्तरमुत्तरमेव ज्यायाꣳसं करोति यवमयं[1] मध्ये[1] । ऽथ वै भवति ॥ ४१ ॥

सर्वाणि छन्दाꣳस्येतस्यामिष्ट्यामनूच्यानीत्याहुस्त्रिष्टुभो वा एतद्वीर्यं यत्ककुदुष्णिहा जगत्यै । यदुष्णिहककुभावन्वाह तेनैव सर्वाणि छन्दाꣳस्यवरुन्द्ध इति । प्र वो अग्ने तवोतिभिरित्येतासां द्वे धाय्यालोके दधात्यथाग्ने यो ते वाजिना यो षधस्थेति त्रिवत्या परिदधाति सरूपत्वायेति ब्राह्मणꣳ । सर्वेषामभिगमयन्नवद्यतीति । तस्या एते भवतः सं वां कर्मणोभा जिग्यथुरित्यन्वाहार्यमासाद्य सहस्रꣳ हिरण्यं तार्प्यं धेनुमिति ददाति । यं कामयेत राजन्यमनपोद्ध्यो जायेत वृत्राण्यꣳस्तरेदिति तस्मा एतमैन्द्राबार्हस्पत्यं चरुं निर्वपेदित्यैतयेष्ट्या यक्ष्यमाण उपकल्पयते हिरण्मयं दाम । तस्या एते भवतो ऽस्मे इन्द्राबृहस्पती बृहस्पतिर्नः परिपातु पश्चादित्यन्वाहार्यमासाद्य हिरण्मयं दाम ददाति । ॥ ४२ ॥

---

[1] Thus M only; यवमयमध्ये Be 8 Be; यवमयोमध्ये BU; यवमयंरमध्ये D.

वैश्वानरं द्वादशकपालं निर्वपेदभिशस्यमानो यस्याग्नौ वा गृह्णा यो वान्यस्याग्निषु यजेत यस्य वान्यो ऽग्निषु यजेत । यो ऽरण्योरग्नीन्समारोप्योद्वयाय मथित्वाग्नीन्विहृत्य वैश्वानरं द्वादशकपालं निर्वपति । तस्या एते भवतो वैश्वानरो न स्वाख्य पृष्ठो दिवीत्यग्नये तन्तुमते पुरोडाशमष्टाकपालं निर्वपेद्विच्छिन्नाग्निहोत्रो यो वा कामयेत प्रजायै मे तन्तुर्न विच्छिद्येतेति । यो ऽरण्योरग्नीन्समारोप्योद्वयाय¹ मथित्वाग्नीन्विहृत्याग्नये तन्तुमते पुरोडाशमष्टाकपालं निर्वपेदिति । तस्या एते भवतस्त्वं नस्तन्तुरुत सेतुरग्ने त्वं पन्था भवसि देवयानः । त्वयाग्ने पृष्ठं वयमारुहेम अथा देवैः सधमादं मदेम ॥ त्वं कृशानुः सुगमप्रवाधं तिग्मशृङ्गो वृषभः शोशुचानः । प्रत्नꣳ सधस्थमनुपश्यमान आ तन्तुमग्निर्दिव्यं ततानेति । त्रिवृतौ संवाच्ये हव्यवाहमभिमातिषाहꣳ रक्षोहणं पृतनासु जिष्णुम् । ज्योतिष्मन्तं दीद्यतं पुरन्धिमग्निꣳ स्विष्टकृतमाहुवेम ॥ स्विष्टमग्ने अभितत्पृणाहि विश्वा देव पृतना अभिष्य । उरुं नः पन्थां प्रदिशन्विभाहि ज्योतिष्मद्धेह्यजरं न आयुरित्यग्नये व्रतभृते पुरोडाशमष्टाकपालं निर्वपेद् आहिताग्निरश्रु कुर्यादिति । तस्या एते भवतस्त्वमग्ने व्रतभृच्छुचिर्देवाꣳ आसादया इह । अग्ने हव्याय वोढवे ॥ व्रता नु बिभ्रद्व्रतपा अदाभ्यो यजानो देवाꣳ अजरः सुवीरः । दधद्रत्नानि सुवि-

---

१ Thus MDU; °रोप्योद्वय° Be 8 Be; in B the last kh. is wanting.

Digitized by Google

हार्षी यशे गोपाय नो जीवसे जातवेद इत्येव यथाग्नयो हुताग्निभिः षड्ढोत्रेरभितो धामस्य वाग्निभिः सो ऽप्योर-ग्नीन्समारोप्योद्वसाय[1] मथित्वाग्नीन्विहृत्याग्नये विविचये पुरो-डाशमष्टाकपालं निर्वपत्यग्नये[2] ऽव्रतपतय इति । तस्या एता भवन्ति वि ते विष्वग्वातजूतासो ऽग्ने त्वामग्ने मानुषीरीडते विशस्त्वमग्ने व्रतपा असि यद्वो वयं प्रमिनाम व्रतानीति । संतिष्ठत इष्टिः संतिष्ठन्ते इष्टयः । ॥ ४२ ॥ त्रयोदशः ॥

॥ इति त्रयोदशः प्रश्नः ॥

---

१ °रोप्योद्वस° Be 8 Be.
२ च ins. M.

अथ वै भवति प्रजापतिरकामयत प्रजाः सृजेयेति । स तपो ऽतप्यत । स सर्पानसृजत । सो ऽकामयत प्रजाः सृजेयेति । स द्वितीयमतप्यत । स वयांस्यसृजत । सो ऽकामयत प्रजाः सृजेयेति । स तृतीयमतप्यत । स एतं दीक्षितवादमपश्यत्तमवदत्ततो वै स प्रजा असृजतेति । तत्पृच्छन्ति[1] कतमत्तत्तपो यत्तपस्तप्त्वा दीक्षितवादं वदतीत्यथ वै भवत्यङ्गिरसः सुवर्गं लोकं यन्तो ऽप्सु दीक्षातपसी प्रावेशयन्नप्सु स्नाति । साक्षादेव दीक्षातपसी अवरुन्ध इत्येतदिति ब्रूयादित्यथ वै भवति यद्वै दीक्षितो ऽमेध्यं पश्यत्यपास्माद्दीक्षा क्रामति । नीलमस्य हरो व्येतीति । सो ऽमेध्यं दृष्ट्वा जपत्यबद्धं मनो दरिद्रं चक्षुः सूर्यो ज्योतिषाꣳ श्रेष्ठो दीक्षे मा मा हासीरित्याह । नास्माद्दीक्षापक्रामति । नास्य नीलं न हरो व्येतीति ब्राह्मणमथ वै भवति यद्वै दीक्षितमभिवर्षति दिव्या आपो ऽशान्ता ओजो बलं दीक्षां तपो ऽस्य निर्घ्नन्तीति । सो ऽभिवृष्यमाणो जपत्युन्दतीर्बलं धत्तौजो धत्त बलं धत्त मा मे दीक्षां मा तपो निर्वधिष्टेत्याहैतदेव सर्वमात्मन्धत्ते । नास्यौजो बलं न दीक्षां न तपो निर्घ्नन्तीति ब्राह्मणमथ वै भवत्यग्निर्वै दीक्षितस्य देवता । सो ऽस्मादेतर्हि तिर इव यर्हि यातीति । सो ऽस्मात्तमारूढस्तिर इव[2]

१ पृच्छंति MG (pr. m.) U; पृच्छति Be BG (sec. m.); the plural is correct, the subject being, according to Bhav., ब्रह्मवादिनः ।

२ यर्हि ins. M.

भवति । यो ऽरण्योरग्नीन्समारोह्य बृहस्पतिवत्यर्चा प्रयाति । भद्रादभि श्रेयः प्रेहि बृहस्पतिः पुरएता ते अस्त्वित्याह । ब्रह्म वै देवानां बृहस्पतिस्तमेवान्वारभते । स एनꣳ संपारयतीति ब्राह्मणं । अध्वानमपाꣳ संधानलोकमध्यवसानलोकाय[1] वै भवति यो वै सोमꣳ राजानꣳ साम्राज्यं लोकं गमयित्वा क्रीणाति गच्छति स्वानाꣳ साम्राज्यं । छन्दाꣳसि खलु वै सोमस्य राज्ञः साम्राज्यो लोकः । पुरस्तात्सोमस्य क्रयादेवमभिमन्त्रयेतेति । स पुरस्तात्सोमस्य क्रयादेवमभिमन्त्रयते ॥ १ ॥

एष ते गायत्रो भाग इति मे सोमाय ब्रूतादेष ते त्रैष्टुभो भाग इति मे सोमाय ब्रूतादेष ते जागतो भाग इति मे सोमाय ब्रूताच्छन्दोमानाꣳ साम्राज्यं गच्छेति मे सोमाय ब्रूतादिति । साम्राज्यमेवैनं लोकं गमयित्वा क्रीणाति । गच्छति स्वानाꣳ साम्राज्यमिति ब्राह्मणमथ वै भवति यो वै तानूनप्त्रस्य प्रतिष्ठां वेद प्रत्येव तिष्ठति । ब्रह्मवादिनो वदन्ति न प्राश्नन्ति न जुह्वत्यथ क्व तानूनप्त्रं प्रतितिष्ठतीति । प्रजापतौ मनसीति ब्रूयात्त्रिरवजिघ्रेदिति । स त्रिरवजिघ्रति प्रजापतौ त्वा मनसि जुहोमीत्येषा वै तानूनप्त्रस्य प्रतिष्ठा । य एवं वेद प्रत्येव तिष्ठतीति ब्राह्मणमथ वै भवति यो वा अध्वर्योः प्रतिष्ठां वेद प्रत्येव तिष्ठति । यतो मन्येतानभिक्रम्य होष्यामीति तत्तिष्ठ-

---

१ Thus M Be G; ॰ध्यवसन्नस्य॰ B.

आश्रावयेदिति । स यतो मन्येतानभिक्रम्य होष्यामीति तत्स्थित-
आश्रावयत्येषा वा अध्वर्योः प्रतिष्ठा । य एवं वेद प्रत्येव
तिष्ठतीति ब्राह्मणमथ वै भवति यदभिक्रम्य जुहुयात्प्रतिष्ठाया
इयात्तस्मात्समानत्र तिष्ठता होतव्यं प्रतिष्ठित्या इति । तदेत-
द्व्याय हविर्यज्ञेभ्यो । ऽभिक्रामं जुहोतीति हविर्यज्ञेषु भवत्यथ
वै भवति यो वा अध्वर्योः स्वं वेद स्ववानेव भवति । स्रुग्वा
अस्य स्वं वायव्यमस्य स्वं चमसो ऽस्य स्वं । यद्वायव्यं वा चमसं
वानन्वारभ्याश्रावयेत्स्वादियादिति । स वायव्यं चैव चमसं
चान्वारभ्याश्रावयति । स्वादेव नैतीति ब्राह्मणमथ वै
भवति यो वै सोममप्रतिष्ठाप्य स्तोत्रमुपाकरोत्यप्रतिष्ठितः
सोमो भवत्यप्रतिष्ठित स्तोमो ऽप्रतिष्ठितान्युक्थान्यप्रतिष्ठितो
यजमानो ऽप्रतिष्ठितो ऽध्वर्युर्वायव्यं वै सोमस्य प्रतिष्ठा चमसो
ऽस्य प्रतिष्ठा सोम स्तोमस्य स्तोम उक्थानां । ग्रहं वा गृहीत्वा
चमसं वोन्नीय स्तोत्रमुपाकुर्यादित्युभयꣳ त्वेव[1] चमसञ्च
ग्रहꣳ । स ग्रहं चैव गृहीत्वा चमसं चोन्नीय स्तोत्रमुपा-
करोति । प्रत्येव सोमꣳ स्थापयति प्रति स्तोमं प्रत्युक्थानि ।
प्रति यजमानस्तिष्ठति प्रत्यध्वर्युरिति ब्राह्मणम् । ॥ २ ॥

अथ वै भवति यज्ञं वा एतत्संभरन्ति यत्सोमक्रयण्यै
पदं । यज्ञमुखꣳ हविर्धाने । यर्हि हविर्धाने प्राची प्रवर्तये-
युस्तर्हि तेनाक्षमुपाञ्ज्यादिति । स यर्हि हविर्धाने प्राची

१ MGB ins. न; Bhav. cites the passage without the negati[ve]
particle.

प्रवर्तयति[१] तर्हि[१] तेन यद्द्वितीयेन पत्न्यध्वर्युरनुपानक्ति ।
यज्ञमुख एव यज्ञमनुसंतनोतीति ब्राह्मणमथ वै भवति प्राच-
मग्निं प्रहरन्त्युत्पत्नीमानयन्त्यनाꣳसि प्रवर्तयन्त्यथ वा यद्येष
९ विच्छिन्नो हीयते यो ऽनुध्यायति स ईश्वरो रुद्रो भूत्वा प्रजां
पशून्यजमानस्य प्रमथितोर्यर्हि पशुमाग्नीध्रमुदञ्चं नयन्ति तर्हि
तस्य पशुश्रपणꣳ हरेदिति । स यर्हि पशुमाग्नीध्रमुदञ्चं नयन्ति
तर्हि तस्य पशुश्रपणꣳ हरति । तेनैवैनं भागिनं करोतीति
ब्राह्मणमथ वै भवति यजमानो वा आहवनीयो । यजमानं वा
१० एतद्विकर्षन्ति यदाहवनीयात्पशुश्रपणꣳ हरन्ति । स वैव
ऽभिमन्थ्यं वा कुर्यादिति । स यद्येनं[२] करिष्यन्भवति
नैनमन्वानयते । ऽयज एवास्यैव दीप्यमानः प्रैते । यद्यु वा
एनमन्वानयते तस्य पशुवेलायामुल्मुकमादायाग्नीध्र उपसंस्थाय
पूर्वः पशोः प्रतिपद्यते । निर्मन्थ्येनाथ[३] पशुꣳ श्रपयन्ति ।
११ वपया[४] तस्माद्दोल्मुकमाहरन्ति यजमानस्य सात्मत्वायेति
ब्राह्मणमथ वै भवति यदि पशोरवदानं नश्येदाज्यस्य प्रत्या-
म्नायमवद्येदिति । स यावन्ति पशोरवदानानि नश्यन्ति
तावत्कृत्व आज्यस्य प्रत्याम्नायमवद्यति । सैव ततः प्रायश्चित्ति-
रिति ब्राह्मणमथ वै भवति यं पशुं विमथ्नीरन्यस्तान्कामयेता-

---

१ Thus M; प्रवर्तयेयुस्तर्हि the other MSS.

२ यद्युवैनं B Be; cp. infra p. 163, 5.

३ Thus M only; निर्मथ्येनाथ the other MSS.

४ Thus MBG (sec. m.); यथा Be G (pr. m.).

Digitized by Google

र्तिमार्च्छेयुरिति कुविदङ्गेति नमोवृक्तिवत्यर्चाग्नीध्रे जुहुयादिति । स कुविदङ्गेति नमोवृक्तिवत्यर्चाग्नीध्रे जुहोति । नमोवृक्तिमेवैषां वृङ्क्ते । ताजगार्तिमार्च्छन्तीति ब्राह्मणं । यद्यु वा एकचरं विमथ्नीते ग्रामिव एतां जुहोति[1] । प्रज्ञातमुपाकरणप्रोक्षमपाव्यानां[2] चरणं । ब्राह्मणमुत्तरम् । ॥ ३ ॥ प्रथमः ॥

अथ वै भवति यो वा अयथादेवतं यज्ञमुपचरत्या देवताभ्यो वृश्च्यते पापीयान्भवति । यो यथादेवतं न देवताभ्य आवृश्च्यते वसीयान्भवत्याग्नेय्यर्चाग्नीध्रमभिमृशेद्वैष्णव्या हविर्धानमाग्नेय्या स्रुचो वायव्यया वायव्यान्यैन्द्रिया सद इति । स आग्नेय्यर्चाग्नीध्रमभिमृशति वैष्णव्या हविर्धानमाग्नेय्या स्रुचो वायव्यया वायव्यान्यैन्द्रिया सदो । यथादेवतमेव यज्ञमुपचरति । न देवताभ्य आवृश्च्यते वसीयान्भवतीति ब्राह्मणमुक्तमौदुम्बराणां महापरिधीनां [3]परिधानमुक्तं स्रुचां सादनमुक्तं पात्राणामभिमर्शनमथ वै भवतीष्टर्गो वा अध्वर्युर्यजमानस्येष्टर्गः खलु वै पूर्वो ऽर्ष्टुः क्षीयत । आसन्यान्मा मन्त्रात्पाहि कस्याश्चिदभिशस्त्या इति पुरा प्रातरनुवाकाज्जुहुयादिति । पुरा प्रातरनुवाकान्महारात्र उत्थायाग्नीध्र आसन्यां जुहोत्यासन्यान्मा मन्त्रात्पाहि कस्याश्चिदभिशस्त्याः[4] स्वाहेत्यात्मन एव

१ BG ins. प्रज्ञात एतां जुहोति ।

२ Thus M; उपाकरणीयस्य the other MSS.

३ From here unto निर्ऋणो• (p. 158, 12) is left out in B.

४ •भिशस्त्या M Be U and Padapāṭha at TS. III. 1. 7. 1; •भिशस्त्याः G.

Digitized by Google

तदध्वर्युः पुरस्तात्कर्म गच्छते ऽनात्यौ इति ब्राह्मणमथ वै भवति यो वै छन्दोभिरभिभवति स सꣳस्तुभ्वतोरभिभवतीति । स सꣳस्तुभ्वतोर्महाराव उत्थायाग्नीध्रे तिस्रो ऽभिभूतीर्जुहोति संवेशाय त्वोपवेशाय त्वा गायत्रिया अभिभूत्यै स्वाहा संवेशाय त्वोपवेशाय त्वा त्रिष्टुभो ऽभिभूत्यै स्वाहा संवेशाय त्वोपवेशाय त्वा जगत्या अभिभूत्यै स्वाहेत्यथ द्वे प्राणाहुती जुहोति प्राणापानौ मृत्योर्मा पातं प्राणापानौ मा मा हासिष्टमित्यथ वै भवति देवतासु वा एते प्राणापानयोर्व्यायच्छन्ते येषाꣳ सोमः समृच्छते । संवेशाय त्वोपवेशाय त्वेत्याह । छन्दाꣳसि वै संवेश उपवेशश्छन्दोभिरेवास्य छन्दाꣳसि वृङ्क्त इति ब्राह्मणमथ वै भवति यस्य भूयाꣳसो यज्ञक्रतव इत्याहुः स देवता वृङ्क्त इति । यद्यग्निष्टोमः सोमः परस्तात्स्यादुक्थ्यं कुर्वीतेत्युक्थ्यं क्रतुमुपैति । यद्युक्थ्यः स्यादतिरात्रं कुर्वीतेत्यतिरात्रं क्रतुमुपैति । यज्ञक्रतुभिरेवास्य देवता वृङ्क्ते वसीयान्भवतीति ब्राह्मणमिति[1] न्वा[1] अध्वर्युतो[1] । ऽथ छन्दोगतः । प्रेतिवन्ति[2] एतिवन्ति[2] आज्यानि[2] भवन्त्यभिजित्यै । मरुत्वतीः प्रतिपदो विजित्या । उभे बृहद्रथंतरे भवत ।

---

१ इतीन्वा अध्व॰ BGU; इतीन्वध्व॰ M.

२ Thus only Bhavasvāmin; प्रेतिवंत च इतिवंति चा॰ M; प्रेतिवंति अइतिवेति चाज्य॰ G; प्रेतिवंति अइतिवोति चाज्य॰ U; प्रेतिअइतिवेचाज्य॰ Be; cp. also TS. III. 1. 7. 2 with the comm. Vol. III, p. 41 and T Br. I. 4. 6. 1.

Digitized by Google

इति[1] सं[1]दोह्योमतो[1] । ऽथ दोहन:[2] । सजनीयꣳ शस्त्रं विहव्यꣳ शस्त्रमगस्त्यस्य कयाशुभीयꣳ शस्त्रमिति[3] त्वा[3] एकयाविनो[3] । ऽथ यच्चिष्णां महाराज उत्थानं चैव समानं पञ्चाभिभूतौदि प्रायाङ्कतौ । ते यथाकृतमेव यन्त्यादिष्टान्येवाध्यान्युपयन्त्युक्तं[4] निपाभ्यासु यावन्मंच वै भवत्योषधयो वै सोमस्य विशो । विशः खलु वै राज्ञः प्रदातोरीश्वरा । ऐन्द्रः सोम इति । यो ऽभिषोत्यमोषधीभ्यो ऽधि राजानं निर्यायते । ऽवीवृधं वो मनसा सुजाता ऋतप्रजाता भाग इद: स्याम । इन्द्रेण देवीर्वीरुधः संविदाना अनुमन्यन्ताꣳ सवनाय सोममित्याहौषधीभ्य एवैनꣳ स्वायै विशः स्वायै देवतायै निर्याच्याभिषुणोतीति ब्राह्मणमेव वै भवति यो वै सोमस्याभिषूयमाणस्य प्रथमो ऽꣳशु स्कन्दति स ईश्वर इन्द्रियं वीर्यं प्रजां पशून्यजमानस्य निर्हन्तोस्तमभिमन्त्रयेतेति । स यः सोमस्याभिषूयमाणस्य प्रथमो ऽꣳशु स्कन्दति तमभिमन्त्रयेता मास्कान्त्सह प्रजया सह रायस्पोषेणेन्द्रियं मे वीर्यं मा निर्वधीरित्याशिषमेवैतामाशास्त इन्द्रियस्य वीर्यस्य प्रजायै पशूनामनिर्घातायेति ब्राह्मणमेवैषा द्रप्सानुमन्त्रणीया[5] । तामितराभिः सह वक्ष्यामो । ऽथ वै भवति ॥ ४ ॥

---

१ Corrected; इति संदोम० M; इत्यु-संदोम० Be UG.

२ दोषन: M.

३ इतिम्नेकया० M; इतीत्वा एकया० Be UG.

४ Thus M; संत्यादिष्टानि ध्यायान्युप० GU; यत्यादिष्टानिध्यायान्युप० Be.

५ Thus MBG; ०मयया द्रप्सानुमंत्रणीया Be; ०मवैषा द्रप्सानुमंत्रणीया U.

Digitized by Google

यो वै देवान्देवयशसेनार्पयति मनुष्यान्मनुष्ययशसेन देवयशस्येव देवेषु भवति मनुष्ययशसी मनुष्येषु ' यान्प्राचीनमाग्रयणाद्ग्रहान्गृह्णीयात्तानुपांशु गृह्णीयाद्यानूर्ध्वांस्तानुपब्दिमत इति ' स यान्प्राचीनमाग्रयणाद्ग्रहान्गृह्णाति तानुपांशु गृह्णाति ' यानूर्ध्वांस्तानुपब्दिमतो ' देवानेव तद्देवयशसेनार्पयति मनुष्यान्मनुष्ययशसेन ' देवयशस्येव देवेषु भवति मनुष्ययशसी मनुष्येष्विति ब्राह्मणं ' ते यत्र बहिष्पवमानꣳ सर्पन्तो भवन्ति तेषु समन्वारब्धेष्वाहवनीये स्रुवाहुतिं जुहोत्यग्निः प्रातःसवने पात्वस्मान्वैश्वानरो महिना विश्वशम्भूः। स नः पावको द्रविणं दधात्वायुष्मन्तः सहभक्षाः स्याम स्वाहेति ' माध्यंदिने पवमाने तथैव समन्वारब्धेष्वाहवनीये स्रुवाहुतिं जुहोति विश्वे देवा मरुत इन्द्रो अस्मानस्मिन्द्वितीये सवने न जह्युः। आयुष्मन्तः प्रियमेषां वदन्तो वयं देवानाꣳ सुमतौ स्याम स्वाहेत्यार्भवे पवमाने तथैव समन्वारब्धेष्वाहवनीये स्रुवाहुतिं जुहोतीदं तृतीयꣳ सवनं कवीनामृतेन ये चमसमैरयन्त। ते सौधन्वनाः सुवरानशानाः स्विष्टिं नो अभि वसीयो नयन्तु स्वाहेत्येव वै भवत्यायतनवतीर्वा अन्या आहुतयो हूयन्ते ऽनायतना अन्या ' या आघारवतीस्ता आयतनवतीर्याः सौम्यास्ता अनायतना ' ऐन्द्रवायवमादायाघारमाघारयेदिति ' स ऐन्द्रवायवमादायाघारमाघारयत्यध्वरो यज्ञो ऽयमस्तु देवा ओषधीभ्यः पशवे नो जनाय। विश्वस्मै भूतायाध्वरो ऽसि स पिन्वस्व घृतवद्देव सोम स्वाहेति ' सौम्या एव तदाहुतीरायतनवतीः

करोत्यायतनवान्भवति य एवं वेदाथो द्यावापृथिवी एव एतेन
व्युषन्ति । ते व्युक्ते उपजीवनीये भवत । उपजीवनीयो भवति
य एवं वेदेति ब्राह्मणमथ प्रतिप्रस्थातोत्तरार्धे आहवनीयस्य
मन्थिनः संस्रावं जुहोत्येष ते रुद्र भागो यं निरयाचथास्तं
जुषस्व विदेर्गौपत्यꣳ रायस्पोषꣳ सुवीर्यꣳ संवत्सरीणाꣳ ९
स्वाहेत्यथ वै भवति मनुः पुत्रेभ्यो दायं व्यभजत्स नाभानेदिष्ठं
ब्रह्मचर्यं वसन्तं निरभजत्स आगच्छत्सोऽब्रवीत्कथा मा
निरभागिति । न त्वा निरभाक्षमित्यब्रवीदङ्गिरस इमे सत्र-
मासते । ते सुवर्गं लोकं न प्रजानन्ति । तेभ्य इदं ब्राह्मणं ब्रूहि ।
ते सुवर्गं लोकं यन्तो य एषां पशवस्ताꣳस्ते दास्यन्तीति । १०
तदेभ्यो ऽब्रवीदिति । तत्पृच्छन्ति[1] किमेभ्यस्तद्दुवाचेत्यपाव्यानि
सन्तनीर्दृष्णानुमन्त्रणीया अच्छावाकीया[2] स्तोत्रीयाः[2] शस्त्रीयाः
सत्यं वदत श्रद्धा वो मा विगादित्येतदेभ्यस्तद्दुवाचेति[3] । तं
पशुभिरयन्तं यज्ञवास्तौ रुद्र आगच्छदित्युक्तस्यैव कर्मणो
ऽनुवादो । ऽथ द्वे प्रहुताहुती जुहोति । जुष्टो वाचो भूयास- ११
मित्या सोमꣳ समर्धयेत्युपरिष्टात्ततीया[4] तासु[4] तत्रैव वक्ष्यामो ।
ऽथ द्रप्सानमन्त्रयते द्रप्सश्चस्कन्द यस्ते द्रप्सो यो द्रप्सो यस्ते
द्रप्स इत्यथ वै भवत्यध्वर्युर्वा ऋत्विजां प्रथमो युज्यते तेन

---

१ Thus MU; all the other MSS. read the singular.

२ Thus M only; all the other MSS. °वाकीयास्तार्तीयाः ।

३ Thus M; विगाद् i.s. of विगाह् all the other MSS.

४ Thus M; ततीयासु the other MSS.

Digitized by Google

सोमो योऽमृत इति । ते अथ बहिष्पवमानꣳ सर्पन्ति तत्राह एवाध्वर्युः प्रथमो बर्हिषो ध्रुवानः[1] सर्पति । वाग्यता अथ एनदुगा देवेभ्यो यज्ञो मयि दधती प्राणान्पशुषु प्रजां मयि च यजमाने चेत्याह । वाचमेव तद्यज्ञमुखे युनक्तीति ब्राह्मण-मथ वै भवति वाग्वा एतद्यज्ञस्य क्रियते यद्वाग्यता होता बहिष्पवमानꣳ सर्पन्ति । पराञ्चो हि यन्ति । पराचीभि स्तुवते । वैष्णव्यर्चा पुनरेत्योपतिष्ठत इति । स वैष्णव्यर्चा पुनरे-त्योपतिष्ठते । यज्ञो वै विष्णुर्यज्ञमेवाकर्विष्णो त्वं नो अन्तमः शर्म यच्छ सहन्त्य । प्र ते धारा मधुश्चुत उत्सं दुह्रते अक्षितमित्याह । यदेवास्य प्रयानस्योपदस्यति तदेवास्यैतेना-प्याययतीति ब्राह्मणम् । ॥ ५ ॥ द्वितीयः ॥

अथ वै भवति यो वै पवमानानामन्वारोहान्विद्वान्यजते ऽनु पवमानानारोहति । न पवमानेभ्यो ऽवच्छिद्यत इति । बहिष्पवमाने पञ्चम्यां प्रस्तुतायां वाचयति श्येनो ऽसि गायत्रच्छन्दा अनु त्वारभे स्वस्ति मा संपारयेति । माध्यंदिने पवमाने ऽष्टम्यां प्रस्तुतायां वाचयति सुपर्णो ऽसि त्रिष्टुप्छन्दा अनु त्वारभे स्वस्ति मा संपारयेत्यार्भवे पवमाने नवम्यां प्रस्तुतायां वाचयति सघासि जगतीछन्दा अनु त्वारभे स्वस्ति मा संपारयेत्याहैते वै पवमानानामन्वारोहास्तान्य एवं विद्वा-न्यजते ऽनु पवमानानारोहति । न पवमानेभ्यो ऽवच्छिद्यत

---

1 ध्रुवानः (cp. infra XV. 29) BG; भुवानः U; धुवानः M, but with a र written above the व; धून्वानः Be.

इति ब्राह्मणमेव वै भवति यो वै पवमानस्य संततिं वेद सर्वमायुरेति । न पुरायुषः प्रमीयते । पशुमान्भवति । विन्दते प्रजां । पवमानस्य ग्रहा गृह्यन्ते ऽथ वा यद्येते ऽगृहीता । द्रोणकलश आधवनीयः पूतभृत्तान्यदगृहीत्वोपाकुर्यात्पवमानं विच्छिन्द्यात्तं विच्छिद्यमानमध्वर्योः प्राणो ऽनु विच्छिद्येतोपयामगृहीतो ऽसि प्रजापतये त्वेति द्रोणकलशमभिमृशेदिति । स प्रजापतये त्वेति द्रोणकलशमभिमृशतीन्द्राय त्वेत्याधवनीयं । विश्वेभ्यस्त्वा देवेभ्य इति पूतभृतं । पवमानमेव तत्संतनोति । सर्वमायुरेति । न पुरायुषः प्रमी-
यते । पशुमान्भवति । विन्दते प्रजामिति ब्राह्मणमेव वै १४
भवति त्रीणि वाव सवनान्यथ तृतीयꣳ सवनमवलुम्पन्त्यनꣳशु कुर्वन्त । उपाꣳशुꣳ हुत्वोपाꣳशुपात्रे ऽꣳशुमवास्य तं तृतीयसवने ऽपिसृज्याभिषुणुयादिति । स[1] य[1] एवैष[1] उपाꣳशुपात्रे[1] ऽꣳशुः[1] प्राणो भवति तं माध्यंदिनीय ऋजीषे ऽपिसृज्या-
भिषुणोति । यदाप्याययति तेनाꣳशुमद्यदभिषुणोति तेन- १५
र्जीषि । सर्वाण्येव तत्सवनान्यꣳशुमन्ति शुक्रवन्ति समावद्वीर्याणि करोतीति ब्राह्मणम् । ॥ ६ ॥

अथातो दीर्घप्रवृत्तानामेव मीमाꣳसा । द्रोणकलशे दीर्घे वा प्रवृत्ते वा पात्र्यां चतुर्गृहीतं गृहीत्वाहवनीये जुहोत्यन्वारब्धे
यजमाने विधुं दद्राणꣳ समने बहूनां युवानꣳ सन्तं पलितो १०

---

१ Thus M; स एवैष etc. G; स वैष उपाꣳशुपात्रेꣳशुः BU; स एवैष उपाꣳशुपात्रेपशुः Be.

Digitized by Google

ममार । देवस्य पश्य काव्यं महित्वाद्या ममार स ह्यः समान स्वाहेत्यथ होतृचमसे वसतीवरीभ्यो ऽध्यपो निःषिच्य तस्य स्वधाग्ं संभरति भूतिः सोमेन वर्धतां तस्य मेदस्य वीतस्य द्रविणमागम्यादिति स्कन्नमनुमन्त्रयते भूपतये स्वाहा भुवनपतये स्वाहा भूतानां पतये स्वाहेति स यद्यह[1] दीर्णा भवति प्रतिलिम्पत्येनं[2] यद्यु वै प्रवृत्त उच्छ्रित्येनं बर्हिषी अन्तर्धाय स्वधामानयत्यपोद्धृत्य बर्हिषी आग्रयणादंशुं प्रस्कन्दयत्याधवनीये दीर्णे वा प्रवृत्ते वा तथैव पात्र्यां चतुर्गृहीतं गृहीत्वाहवनीये जुहोत्यन्वारब्धे यजमाने द्वौ समुद्रौ विततावजूर्यौ पर्यावर्तेते जठरेव पादाः । तयोः पश्यन्तो अतियन्त्यन्यमपश्यन्तः सेतुनातियन्त्यन्यग्ं स्वाहेत्यथ होतृचमसे वसतीवरीभ्यो ऽध्यपो निःषिच्य तस्य तथैव स्वधाग्ं संभरति भूतिः सोमेन वर्धतां तस्य मेदस्य वीतस्य द्रविणमागम्यादिति स्कन्नमनुमन्त्रयते भूपतये स्वाहा भुवनपतये स्वाहा भूतानां पतये स्वाहेति स यद्यह[1] दीर्णा भवति प्रतिलिम्पत्येनं यद्यु वै प्रवृत्त उच्छ्रित्येनं बर्हिषी अन्तर्धाय स्वधामानयत्यपोद्धृत्य बर्हिषी आग्रयणाद्वांशुं प्रस्कन्दयति पूतभृति दीर्णे वा प्रवृत्ते वा तथैव पात्र्यां चतुर्गृहीतं गृहीत्वाहवनीये जुहोत्यन्वारब्धे यजमाने द्वे द्रधसी

---

१ Thus here and infra (163. 15, 164. 6) M; also Be at these last mentioned passages; यदि the other MSS. and Be, here, but infra यद्युह ।

२ Thus here and infra M, the other MSS. every time the plural.

सत्तौ वत्स एकः केशी विश्वा भुवनानि विद्वान्। तिरोधा-
यैत्यसितं वसानः शुक्रमादत्ते अनुहाय जार्यै स्वाहेत्यथ
होतृचमसे वसतीवरीभ्यो ऽध्यपो निःषिच्य तस्य तथैव स्वधाꣳ
संभरति भूतिः सोमेन वर्धतां तस्य मेहस्व वीतस्य द्रविणमा-
गम्यादिति। स्कन्नमनुमन्त्रयते भूपतये स्वाहा भुवनपतये
स्वाहा भूतानां पतये स्वाहेति। स यद्यह दीर्घो भवति
प्रतिखिद्यत्येनं। यद्यु वै प्रहृत्त उच्छ्रित्यैनं बर्हिषी अन्तर्धाय
स्वधामानयत्यपोद्धृत्य बर्हिषी आग्रयणादेवांशुं [1]प्रस्कन्दयत्या-
ग्रयणे दीर्घे वा प्रहृत्ते वा तस्य पुरोरुचा उल्लोच्छ्रित्यैनं
बर्हिषी अन्तर्धाय स्वधामानयत्यपोद्धृत्य बर्हिषी द्रोणकल-
शादेवांशुं[1] प्रस्कन्दयत्यथाप्यस्मिन्यहे दीर्घे वा प्रहृत्ते वा
तस्यैव पुरोरुचा उल्लोच्छ्रित्यैनं बर्हिषी अन्तर्धाय स्वधा-
मानयत्यपोद्धृत्य बर्हिषी आग्रयणादेवांशुं प्रस्कन्दयति ॥ ७ ॥

अथ वै भवति देवा वै यज्ञे ऽकुर्वत तदसुरा अकुर्वत।
ते देवा एतं महायज्ञमपश्यन्तमतन्वताग्निहोत्रं व्रतमकुर्वत।
तस्माद्द्विव्रतः स्याद्द्विरग्निहोत्रं जुह्वति। पौर्णमासं यज्ञमग्नीषो-
मीयं पशुमकुर्वत। दार्श्यं यज्ञमाग्नेयं पशुमकुर्वत। वैश्वदेवं
प्रातःसवनमकुर्वत। वरुणप्रघासान्माध्यंदिनꣳ सवनꣳ साकमे-
धान्पितृयज्ञं त्र्यम्बकाꣳस्तृतीयसवनमकुर्वतेति। तत्पृच्छन्ति[2]
कतमः स महायज्ञ इत्ययमेव चातुर्मास्यैः सोम उक्तो भवत्ययो

१ This passage is left out by all the MSS exc. M.

२ •च्छति all the MSS. exc. M.

Digitized by Google

वस्तु य एव कश्च सौम्यो ऽध्वरः स महायज्ञस्तमेषामसुरा यज्ञमध्वराजिगाꣳसन्तं नान्ववायंस्ते ऽनुपलभ्यलेथा वा इमे देवा अभूवन्निति । तदध्वरस्याध्वरत्वं । ततो देवा अभवन्परासुरा । य एवं विद्वान्सोमेन यजते भवत्यात्मना परास्य भ्रातृव्यो भवतीति ब्राह्मणमथ चमसꣳ राजानमुपतिष्ठते परिभूरग्निं परिभूरिन्द्रं परिभूर्विश्वान्देवान्परिभूर्माꣳ सह ब्रह्मवर्चसेन स नः पवस्व शं गवे शं जनाय शमर्वते शꣳ राजन्नोषधीभ्यो ऽच्छिन्नस्य ते रयिपते सुवीर्यस्य रायस्पोषस्य ददितारः स्याम । तस्य मे रास्व तस्य ते भक्षीय तस्य त इदमुन्मृज इति । चमसो ब्राह्मणपर्यङ्काः कामास्तेषां यं[1] कामं[1] कामयते[1] तमादिश्योत्सृष्टे । ऽथावकाशैश्चरति । प्राणाय मे वर्चोदा वर्चसे पवस्वेत्युपाꣳशुपात्रमवेक्षते । ऽपानायेत्यन्तर्यामपात्रं[2] । व्यानायेत्युपाꣳशुसवनं । वाच इत्यैन्द्रवायवं । दक्षक्रतुभ्यामिति मैत्रावरुणꣳ । श्रोत्रायेत्याश्विनं । चक्षुर्भ्यामिति शुक्रामन्थिनावात्मन इत्याग्रयणमङ्गेभ्य इत्युक्थ्यमायुष इति ध्रुवं । प्रतिष्ठाया इत्यृतुपात्रे माध्यंदिने सवने । न प्रातःसवने । वीर्यायेत्यतिग्राह्यं वा षोडशिनं वावेक्षते । विष्णोर्जठरमसीति द्रोणकलशमवेक्षत । इन्द्रस्य जठरमसीत्याधवनीयं । विश्वेषां देवानां जठरमसीति पूतभृतमथ चमसमेव राजानमुपतिष्ठते को ऽसि को नाम कस्मै त्वा काय त्वा यं

---

1 Thus M; यंयं कामं कामयते Be; यं कामं कामयेत UG; यं कामयेत B.

2 यंतर्यामं i.s.o. यन्तर्यामपात्रं M.

त्वा सोमेनातीतृपं यं त्वा सोमेनामीमदꣳ सुप्रजाः प्रजया भूयासꣳ सुवीरो वीरैः सुवर्चा वर्चसा सुपोषैः पोषैर्विश्वेभ्यो मे रूपेभ्यो वर्चोदा वर्चसे पवस्व तस्य मे रास्व तस्य ते भक्षीय तस्य त इदमुन्मृज इति । चत्वारो ब्राह्मणसंपन्नाः कामास्तेषां यं[१] कामं[१] कामयते[१] तमादिश्योन्मृष्ट आयुरुन्मृजे भूतिमुन्मृजे ब्रह्मवर्चसमुन्मृजेऽमुष्य प्राणमुन्मृज इदमुन्मृज[२] इति । यमेव तर्पयति स एनं तृप्तः प्राणापानाभ्यां वाचो दक्षक्रतुभ्यां चक्षुर्भ्याꣳ श्रोत्राभ्यामात्मनोऽङ्गेभ्य आयुषोऽन्तरेति । तावद्वै प्रधन्वतीति ब्राह्मणमुक्तꣳ स्पष्टविधानानामुपस्थानमुक्तꣳ संप्रसर्पणमुक्तो भक्षानुवाकः । ॥ ८ ॥ तृतीयः ॥

उक्तं पृषदाज्यस्याविज्ञातस्य ग्रहणमुक्तो दधिघर्मो । ऽथ वै भवति यत्कृष्णशकुनः पृषदाज्यमवमृशेच्छूद्रा अस्य प्रमायुकाः स्युर्यच्छ्वावमृशेच्चतुष्पादोऽस्य पशवः प्रमायुकाः स्युर्यत्स्कन्देद्यजमानः प्रमायुकः स्यादित्यथ वै भवति पशवो वै पृषदाज्यं । पशवो वा एतस्य स्कन्दन्ति यस्य पृषदाज्यꣳ स्कन्दति । यत्पृषदाज्यं पुनर्गृह्णाति पशूनेवास्मै पुनर्गृह्णातीति ब्राह्मणमथ वै भवति प्राणो वै पृषदाज्यं । प्राणो वा एतस्य स्कन्दति यस्य पृषदाज्यꣳ स्कन्दति । यत्पृषदाज्यं पुनर्गृह्णाति प्राणमेवास्मै पुनर्गृह्णाति[३] ।

---

१ Thus M again; यं कामं कामयेत UBG; यंयं का॰ कामयेत Be.

२ om. U Be.

३ इति ins. BG.

Digitized by Google

हिरण्यमवधाय[1] गृह्णातीति । स्कन्ने पृषदाज्ये कण्ठं वा चमसं वा याचति । तमन्तर्वेदि निधाय तस्य स्रुचाꣳ संभरति भूतिर्दध्ना घृतेन वर्धतां तस्य मेहस्य वीतस्य द्रविणमागम्यादिति । स्कन्नमनुमन्त्रयते भूपतये स्वाहा भुवनपतये स्वाहा
९ भूतानां पतये स्वाहेत्यथैतस्याꣳ[2] स्रुच्यवदधाति शतमानꣳ हिरण्यं । निर्त्ये गृहणे वैष्णवीमृचमनुवर्तयति विष्णो त्वं नो अन्तम इत्यपोद्धृत्य हिरण्यमभ्यवघ्राय सादयत्यथातोऽमेध्यभूतस्यैव श्वावघ्रातस्य ध्वाङ्क्षावमृष्टस्य कीटावपन्नस्येति यद्व[3] चान्यदमेध्यं[3] मन्यते । सर्वस्य एवैताꣳ स्रुचमप्सु प्रवेश्याथान्यस्याꣳ
१० स्रुच्यवदधाति शतमानꣳ हिरण्यं । निर्त्ये गृहणे वैष्णवीमृचमनुवर्तयति विष्णो त्वं नो अन्तम इत्यपोद्धृत्य हिरण्यमभ्यवघ्रायैव सादयत्यथ वै भवति वि वा एतस्य यज्ञश्छिद्यते यस्य पृषदाज्यꣳ स्कन्दति । वैष्णव्यर्चा पुनर्गृह्णातीति । स वैष्णव्यर्चा पुनर्गृह्णाति । यज्ञो वै विष्णुर्यज्ञेनैव यज्ञꣳ संतनो-
११ तीति ब्राह्मणं । ते यद्यन्तःशावं प्रचरिष्यन्तो भवन्ति तदाह ब्रह्मन्प्रचरिष्यामो होतर्धर्ममभिष्टुहीति । तद्ब्रह्मा प्रसौति देव सवितरेतत्ते प्राह तत्प्र च सुव प्र च यज बृहस्पतिर्ब्रह्मा स यज्ञं पाहि स यज्ञपतिं पाहि स मां पाह्यों प्रचरतेति

---

1 गृह्णाति हिरण्यमवधाय om. U.

2 ॰थैनं M.

3 यच चान्यद॰ M.

Digitized by Google

प्रतिष्ठेतीह[1] हविर्यज्ञेषु भवति । अथाह ब्रह्मन्स्तोष्यामः प्रशा-
स्तरिति तद्ब्रह्मा प्रसौति देव सवितरेतत्ते प्राह तत्प्र च सुव
प्र च यज बृहस्पतिर्ब्रह्मायुष्मत्या ऋचो मा गात तनूपात्साम्नः
सत्या व आशिषः सन्तु सत्या आकूतय ऋतं च सत्यं च वदत
स्तुत देवस्य सवितुः प्रसवे भूरिन्द्रवन्त स्तुतेति प्रातःसवने ।
भुव इन्द्रवन्त स्तुतेति माध्यंदिने । सुवरिन्द्रवन्त स्तुतेति
तृतीयसवने । स्तुते स्तुतस्य दोहं वाचयति स्तुतस्य स्तुतमस्यूर्जं
मह्यꣳ स्तुतं दुहामा मा स्तुतस्य स्तुतं गम्यादिति । शस्ते शस्त्रस्य
दोहं वाचयति शस्त्रस्य शस्त्रमस्यूर्जं मह्यꣳ शस्त्रं दुहामा मा
शस्त्रस्य शस्त्रं गम्यादिति । तयोरुभयोरभ्यासं[2] वाचयतीन्द्रिया-
वन्तो वनामहे धुक्षीमहि प्रजामिषꣳ सा मे सत्याशीर्देवेषु
भूयाद्ब्रह्मवर्चसं मागम्यादित्यथ यज्ञस्य पुनरालम्भं जपति यज्ञो
बभूव स आ बभूव स प्रजज्ञे स वावृधे । स देवानामधि-
पतिर्बभूव सो अस्माꣳ अधिपतीन्करोतु वयꣳ स्याम पतयो
रयीणामित्यथ वै भवति यज्ञो वा वै यज्ञपतिं दुहे यज्ञपतिर्वा
यज्ञं दुहे । स य स्तुतशस्त्रयोर्दोहमविद्वान्यजते तं यज्ञो दुहे ।
स इष्ट्वा पापीयान्भवति । य एनयोर्दोहं विद्वान्यजते स यज्ञं
दुहे । स इष्ट्वा वसीयान्भवति । स्तुतस्य स्तुतमस्यूर्जं मह्यꣳ स्तुतं
दुहामा मा स्तुतस्य स्तुतं गम्याच्छस्त्रस्य शस्त्रमस्यूर्जं मह्यꣳ
शस्त्रं दुहामा मा शस्त्रस्य शस्त्रं गम्यादित्याहैष वै स्तुतशस्त्र-

---

१ B om. इह ; Bhav. comments upon it.

२ Thus M ; °भ्यासं BG ; °भ्याभ्यासं Be U.

Digitized by Google

योर्दीघत्वं य एवं विद्वान्यजते द्रुह एव यज्ञमिद्धा वसीयान्भवतीति ब्राह्मणमुक्तꣳ होमकालाꣳ संतर्पणमुक्तानि[1] वैश्वकर्माण्युक्तमाग्निरे ऽवभृथमुक्ता भुवस्य पर्याय वै भवति ॥ ९ ॥

यद्वै होताध्वर्युमभ्याह्वयते वज्रमेनमभि प्रवर्तयत्युक्थशा इत्याह प्रातःसवनं प्रतिगीर्येति स उक्थमुक्थं वैव प्रतिगीर्योक्थशा इत्याह सवनꣳसवनं[2] वोक्थं[2] वाचीत्याह माध्यंदिनꣳ सवनं प्रतिगीर्योक्थं वाचीन्द्रायेत्याह तृतीयसवनं प्रतिगीर्य सप्तैतान्यक्षराणि सप्तपदा शक्वरी शाक्वरो वज्रो वज्रेणैव तृतीयसवने वज्रमन्तर्धत्त इति ब्राह्मणमथ वै भवति ब्रह्मवादिनो वदन्ति स त्वा अध्वर्युः स्याद्यो यथासवनं प्रतिगरे छन्दाꣳसि संपादयेत्तेजः प्रातःसवन आत्मन्दधीतेन्द्रियं माध्यंदिने सवने पशूꣳस्तृतीयसवन इत्युक्थशा इत्याह प्रातःसवनं प्रतिगीर्योक्थं वाचीत्याह माध्यंदिनꣳ सवनं प्रतिगीर्योक्थं वाचीन्द्रायेत्याह तृतीयसवनं प्रतिगीर्य सप्तैतान्यक्षराणि सप्तपदा शक्वरी शाक्वराः पशवो जागतं तृतीयसवनं तृतीयसवन एव प्रतिगरे छन्दाꣳसि संपादयत्यथो पशवो वै जगती पशवस्तृतीयसवनं पशूनेव तृतीयसवन आत्मन्धत्त इति

---

१ Thus M Be G (pr. m.); सर्पण° the other MSS.

२ Thus, without any various reading all the Dvaidha MSS.; प्रातःसवनं सवनं वोक्थं M pr. m., but प्रातः is expunged and the second सवनं is changed into प्रतिगीर्य; प्रतिसवनं वोक्थं B Be; प्रातःसवनं वो° UG.

ब्राह्मणमेव वै भवति यद्वै होताध्वर्युमभ्याह्वयत आव्यमस्मि-न्दधाति। तद्यन्नापहनीत पुरास्य संवत्सराद्गृह आवेवीरञ्छोंसा मोद इवेति प्रत्याह्वयत इति। सो ऽध्वाह्वतः शोंसा मोद इवेति प्रत्याह्वयते। तेनैव तदपहत इति ब्राह्मणमेव वै भवति यथा वा आयतां प्रतीक्षत एवमध्वर्युः प्रतिगरं प्रतीक्षते। यदभिप्रतिगृणीयाद्यथायतया समृच्छते तादृगेव तद्यदर्धर्चाल्लुप्येत यथा धावद्भ्यो हीयते तादृगेव तत्तदाहुर्नाप्रतिगरौ स्यादा-ऽप्रतिगरौ ह वा अभि[1] वा प्रतिगृणात्यर्धर्चाद्वा लुप्यते। प्रणौतीत्येव[2] प्रणौयादपानितीत्येवापान्याद[3] एवं विद्वान्प्रति-गृणात्यन्नाद एव भवत्यास्य प्रजायां वाजी जायत इति ब्राह्मणमेव वै भवतीयं वै होतासावध्वर्युर्यदासीनः शंसत्यस्या एव तद्धोता नैत्यास्त इव हीयमथो इमामेव तेन यजमानो दुहे। यत्तिष्ठन्प्रतिगृणात्यमुष्या एव तदध्वर्युर्नैति। तिष्ठतीव ह्यसावथो[4] अमुमेव[4] तेन यजमानो दुहे। यदासीनः शंसति तस्मादितःप्रदानं देवा उपजीवन्ति। यत्तिष्ठन्प्रतिगृणाति तस्मादमुतःप्रदानं मनुष्या उपजीवन्ति। यत्प्राङासीनः शंसति

१ अपि all, but cp. TS. III. 2. 9. 5.

२ Thus M only; प्रणोतामेव the other MSS.

३ एव after अपानितीति only found in M. The sense of these words is "only if he perceives that the hotar makes the praṇava, he should make the praṇava; only if he perceives that the hotar draws breath, he should draw breath," cp. Śat. Br. IV. 3. 2. 6.

४ ०थोमुमेव M.

Digitized by Google

स्कन्द् निष्कृतिमृच्छाति तस्मात्प्राचीनꣳ रेतो धीयते प्रतीचीः प्रजा जायन्त इति ब्राह्मणमेव वै भवति यद्वै होताध्वर्युमभ्याह्वयते वज्रमेनमभि प्रवर्तयति । पराङावर्तत इति । यो ऽभ्याहृतः पराङावर्तते । वज्रमेव तन्निकरोतीति ब्राह्मणमुक्तं प्रतिनिर्ग्राह्याणां यत्पूर्वमुक्तꣳ[१] सꣳस्थावस्थापिधानमुक्तमुपाꣳश्वन्तर्यामयोरन्तरमुक्ता विदेवनानां चर्या[२] । ॥ १० ॥

चतुर्थः ॥

अथातो ऽग्निपात्राणामेव चर्याꣳ । स यद्येको यदि वा बहव आग्रयणमेवेन्द्राग्नीता गृह्णाति । आदित्यस्यैव होममनु जुहोति । स आग्नेयं गृहीत्वा आयूꣳषि पवस इत्यनुद्रुत्योपयामगृहीतो ऽस्यग्नये त्वा तेजस्वते जुष्टं गृह्णामीति । परिमृज्य सादयत्येष ते योनिरग्नये त्वा तेजस्वत इत्यथैनꣳ होष्यन्नवेक्षते अग्ने तेजस्विन्तेजस्वी त्वं देवेषु भूयास्तेजस्वन्तं मामायुष्मन्तं वर्चस्वन्तं मनुष्येषु कुर्विति । जुहोति दीक्षायै च त्वा तपसश्च तेजसे जुहोमीति । हुत्वा वाचयति तेजोविदसि तेजो मा मा हासीन्माहं तेजो हासिषं मा मां तेजो हासीदिति । भक्षयति मयि मेधां मयि प्रजां मय्यग्निस्तेजो दधात्वित्यथैन्द्रं गृहीत्वा ओजिष्ठोऽसि यच्छेत्यनुद्रुत्योपयामगृहीतो ऽसीन्द्राय त्वौजस्वते जुष्टं गृह्णामीति । परिमृज्य सादयत्येष ते योनिरिन्द्राय

१ These two words are left out in all the MSS. exc. M.

२ चर्या Be.

३ Thus (and cp. Āp. XIII. 8. 7) MU ; क्रयते Be ; क्रयंते BG.

त्वौजस्वत इत्यथैनꣳ होष्यन्नवेक्षत इन्द्रौजस्विन्नोजस्वी त्वं देवेषु भूया ओजस्वन्तं मामायुष्मन्तं वर्चस्वन्तं मनुष्येषु कुर्विति । जुहोति ब्रह्मणस्त्वा क्षत्रस्य चौजसे जुहोमीति । हुत्वा वाचयत्योजोविदस्योजो मा मा हासीन्माहमोजो हासिषं मा मामोजो हासीदिति । भक्षयति मयि मेधां मयि प्रजां मयीन्द्र इन्द्रियं दधात्वित्यथ सौर्यपा[1] सौर्यं गृह्णाति तरणि-र्विश्वदर्शत इत्यनुद्रुत्योपयामगृहीतोऽसि सूर्याय त्वा भ्राजस्वते जुष्टं गृह्णामीति । परिमृज्य सादयत्येष ते योनिः सूर्याय त्वा भ्राजस्वत इत्यथैनꣳ होष्यन्नवेक्षते सूर्य भ्राजस्विन्भ्राजस्वी त्वं देवेषु भूया भ्राजस्वन्तं मामायुष्मन्तं वर्चस्वन्तं मनुष्येषु कुर्विति । जुहोति वायोस्त्वापां च भ्राजसे जुहोमीति । हुत्वा वाचयति सुवर्विदसि सुवर्मा मा हासीन्माहꣳ सुवर्हासिषं मा माꣳ सुवर्हासीदिति । भक्षयति मयि मेधां मयि प्रजां मयि सूर्यो भ्राजो दधात्विति । ते वा एते पृष्ठ्यस्य षडह-स्योत्तरेष्वहःसु गृह्यन्त एकविꣳशे त्रिणवे त्रयस्त्रिꣳशे । विश्वजिति सर्वपृष्ठे ग्रहीतव्या यज्ञस्य सवीर्यत्वायाप्यग्निष्टोमे ग्रहीतव्या यज्ञस्य सतनुत्वायेति ब्राह्मणमथोपाकरणं[2] जपति वायुर्हिंकर्तेत्यार्त्विज्यं वा[3] करिष्यन्कर्म वा प्रतिगरिष्यन्नेतद-

---

१ Found in M only.

२ The brāhmaṇa cited here is found T.S. VI. 6. 8. 2.

३ om. M Be.

Digitized by Google

युर्जपतीडा देवछरिति । प्रियो हैवाग्नीध्रस्य भवति । अग्रꣳ संख्याख्यायत एतद्यजुर्जपन्नभां प्रपद्यते । ऽभि हैव[1] तं[1] अग्रं नयति । ॥ ११ ॥

अथातो ऽꣳश्वदाभ्ययोरेव ग्रहणमꣳश्वदाभ्यौ यद्दीक्ष्यन्नुपकल्पयते द्वे औदुम्बरे नवे पात्रे तयोश्चतुःस्रक्त्यꣳशुपात्रं भवति वृत्तमदाभ्यपात्रं ते सुवर्णरजताभ्याꣳ रुक्माभ्यां पर्यस्ते भवतः शतमानं च हिरण्यमंशोपनद्धस्य राजस्तोनꣳशुमवहन्ति वसवस्त्वा प्रवृहन्तु गायत्रेण छन्दसाग्नेः प्रियं पाथ उपेहि रुद्रास्त्वा प्रवृहन्तु त्रैष्टुभेन छन्दसेन्द्रस्य प्रियं पाथ उपेह्यादित्यास्त्वा प्रवृहन्तु जागतेन छन्दसा विश्वेषां देवानां प्रियं पाथ उपेहीत्यथ होतृचमसे वसतीवरीभ्यो ऽध्यपो निःषिच्य दशभिराधावैराधूनोति मान्दासु ते शुक्र शुक्रमाधूनोमीति प्रतिपद्य शुक्रासु ते शुक्र शुक्रमाधूनोमीत्यातो । ऽथैतस्मिन्नदाभ्यपात्रे ऽꣳशूनुपसंसृज्य गृह्णाति शुक्रं ते शुक्रेण गृह्णाम्यह्नो रूपेण सूर्यस्य रश्मिभिः । आस्मिन्नुग्रा अचुच्यवुर्दिवो धारा असश्चतेत्यथैनमादायोपोत्तिष्ठति ककुहꣳ रूपं वृषभस्य रोचते बृहदित्यैति सोमः सोमस्य पुरोगाः शुक्रः शुक्रस्य पुरोगा इत्यैत्याहवनीये जुहोत्यन्वारब्धे यजमाने यत्ते सोमादाभ्यं नाम जागृवि तस्मै ते सोम सोमाय स्वाहेत्यथ प्रदक्षिणमावृत्य राजन्येवाꣳशूनपिसृजत्युशिक् त्वं

---

१ Thus MUG; हैवत Be; हैवैतं B.

Digitized by Google

देव सोम गायत्रेण छन्दसाग्नेः प्रियं पाथो अपीहि वशी त्वं देव सोम त्रैष्टुभेन छन्दसेन्द्रस्य प्रियं पाथो अपीह्यस्मत्सखा त्वं देव सोम जागतेन छन्दसा विश्वेषां देवानां प्रियं पाथो अपीहीत्यथैनमाह प्रतिप्रस्थातर्दर्भपुञ्जीलेन वा[१] मौद्गपर्णेन[१] वा अग्नेनावनीयं प्रत्युपस्थापयेति । स तथा करोत्यथैन-हिरण्यमद्भिः प्रयाज्य मध्यमायामङ्गुल्यौ बध्नीते नामिकायां वा अथ प्रपद्यात्यथ यदद्भिषुतस्य राज्ञो ऽंशुं स्कन्दाति ग्रामहर्म्यमिति साम मनसा गायमानो ऽवानं प्रजापतये[२] स्वेति[२] स्वाहाति[२] प्रजापतये स्वेति जुहोत्यथ हिरण्यमभिव्यनित्वा[३] नः प्राण एतु परावत आन्तरिक्षाद्दिवस्परि । आयुः पृथिव्या अध्यक्षतमसि प्राणाय त्वेत्यथान्तर्वेद्यद्भिर्मार्जयत इन्द्राग्नी मे वर्चः कृणुतां वर्चः सोमो बृहस्पतिः । वर्चो मे विश्वे देवा वर्चो मे धत्तमश्विना ॥ दधन्वे वा यदीमनु वोचद्ब्रह्माणि वेर तत् । परि विश्वानि काव्या नेमिश्चक्रमिवाभवदित्यध्वर्योरेतद्धिरण्यं भवति[४] । ब्राह्मणमुत्तरम् । ॥ १२ ॥ पञ्चमः ॥

अथातः इष्टीनामेव पदपद । संस्थाप्य राजानं दृषदा न्यूप्याभिमृशति वायुरसि प्राणो नामेति दृषभिर्दंश । ते वा

---

१ Thus M; मौद्गपर्ण° all the other MSS., omitting वा ।

२ om. Be.

३ Thus MUG; °व्यानित्वा B Be; cp. T.S. III. 3. 4. 3.

४ All the MSS. exc. M ins. इति ।

Digitized by Google

एते संवत्सरस्यानीकेष्वहःसु¹ स्तुवन्ते । यच्च ह वैवैनाम्नस्तृती-यादित्येतद्परस्मात्² परःसाम्नामेव यज्ञं । ते वा एते परःसामानः पुरस्ताद्वैषुवतादवरमन्यद्वजितः पराञ्चो स्तुवन्ते । ऽथ वैषुवते³ ऽह्नि पराञ्चस्त्वार्वाञ्चश्च स्तुवन्ते । ऽथोर्ध्वं वैषुवतादवरमन्यदमाहृत्तानेव स्तुवाति । प्रजापतिर्देवासुरान-सृजतेति ब्राह्मणमेवाय⁴ वै भवत्याहृत्स्वाते वा एतद्यजमानो ऽग्निभ्यां यद्देनयोः घृतं कृत्यायाम्वयावश्वयमवैत्यायुर्दा अग्ने हविषो जुषाण घृतवत्क्षयमवैत्यजुह्यादिति । यो ह्यवश्यमवैत्यायुर्दा इत्यग्नौ जुहोत्यायुर्दा अग्ने हविषो जुषाणो घृतप्रतीको घृतयोनिरेधि । घृतं पीत्वा मधु चारु गव्यं पितेव पुत्रमभि-रक्षतादिमं स्वाहेत्याज्यत्यैवैनौ प्रमयति नार्तिमार्च्छति यजमान इति ब्राह्मणमुक्तं बर्हिषः पर्युपोषणमुक्तं⁵ सक्तुहोमश्चाय वै भवति यदि मिथमिव चरेदञ्जलिना सक्तून्प्रदाव्ये जुहुया-दिति । यातकः पुपूयमाणो ऽरण्ये प्रदाव्यं ⁶दृष्ट्वानुपाधि-मध्यावसितोपक्षौर्याभिचारितान्सक्तून्प्रदाव्ये जुहोति विश्वयोप

---

¹ Thus M; •स्यानीकेषु• all the other MSS.; probably we have here a heteroclitic loc. from यानीयम् (यानम् of the other ritual texts), cp. infra XVI. 16 init.

² एव before एतान् om. M.

³ वैषुवतीये M and Bhav.

⁴ ब्राह्मणमेवोप M.

⁵ पर्युपोषण• M, उपोषण• all the other MSS.

⁶ Thus M; दृष्ट्वानुपा• UBG; द्रष्टृत्वानुपा• Be.

विश्वदावस्य त्वासञ्जुहोमि स्वाहेति । द्वौ प्रध्वंसयते
ऽघादेको ऽकृतादेकः समनादेकः । ते नः सन्तु भेषजᳫं
सदः सहो वरेण्यमित्यथैनं त्रिभिर्दर्भपुञ्जीलैः पवयति पवमानः
सुवर्जन इत्येतेनानुवाकेन । शुद्धो हैव शुचिः पूतो मेध्यो भवत्यथ
वै भवत्यक्तां विधान्यामेकाष्टकायामपूपं चतुःशरावं पक्त्वा १३
प्रातरेतेन कक्षमुपोषेदिति[1] । यमां[2] विजिज्ञासमानो महाराज
उत्यायाक्तां विधान्यामेकाष्टकायामपूपं चतुःशरावं पक्त्वा
प्रातरुदित आदित्ये विप्रुषित[3] आदद्त एतमपूपमुपस्तीर्या-
भिघारितं पर्णसेवाभ्यां परिस्तीर्य । तस्य ह पूतितृणानि
[4]भवन्त्यन्तमागारादेकोल्मुकमुद्पाचमित्येतत्समादाय तां दिशं १४
यन्ति यत्रास्य कक्षः स्पष्टो भवति । तदेतदेकोल्मुकमुपसमाधा-
यापूपमादीपयति पर्णसेवाभ्यां परिस्तीर्य । तस्य ह पूतितृणानि[4]
भवन्ति । तेन कक्षमुपोषत्यथैनमुद्गृह्णात्यथ[5] विज्ञानमुपैति ।
यदि दहति पुण्यसमं भवति यदि न दहति पापसममेतेन ह
स्म वा ऋषयः पुरा विज्ञानेन दीर्घसत्रमुपयन्तीति ब्राह्मण- १५
मथैतमपूपं प्राश्नाप[6] उपस्पृश्य ग्रहानेत्यृषभो गोषु जीर्यति

१ •मुपोषेदिति MU.

२ Thus only M; यक्तां all the other MSS.

३ Thus M; विप्रभुषित BG; विप्रदूषित Be U; Bhav. comments: उदिते प्रकाशे ।

४—४ This passage is left out in all etc. M.

५ •मुपोषत्य• M.

६ प्राश्नाप M, perhaps rightly.

तेन यजमानो भवति। तस्य तदुपाकृतं भवति यत्पशुना यजमानस्यार्धं[1] वपुर्मृत्युर्भवति[1] तस्य निहत्य[2] दक्षिणं कर्णमाजपति त्रिवत्सः पिशङ्गरूप इति ताभ्यामेवैनं गोभ्योऽपिसृजते ॥ १३ ॥

एतं युवानं परि वो ददामीत्यपियन्तमनुमन्त्रयते तां मातो अनुयत राज्याय तापू इवन्त मरुतः स्वर्काः। यस्मिन्नयस्य ककुभि त्रिश्रियाणस्ततो न उग्रो विभज वसूनीत्यथेतरं ताज्ञं वैन्द्रं वा प्राजापत्यं वा पशुमालभत[3]। एता हि यान्वस्य देवतास्तयोपाकरणीययोरनुवर्तयति नमो महिम्न उत चक्षुषे त इत्यथास्य वपां जुहोति देवानामेव ज्यपनाह यावौदित्यायास्य हविर्जुहोति पिता वत्सानां पतिरघ्न्यानामिति। समानमुत्तरं पशुकर्म। वशया यजमानस्याह गर्भमीक्ष्यमिति। ते चेद्गर्भं पश्यन्ति संप्रच्छाद्य वशां वपयाऽऽद्रवन्त्यथास्यै वपां जुहोति सूर्यो देवो दिविषद्भ्यो धाता क्षत्राय वायुः प्रजाभ्यः। बृहस्पतिस्त्वा प्रजापतये ज्योतिष्मतीं जुहोतु स्वाहेति। वशामनुमन्त्रयते यस्यास्ते हरितो गर्भोऽथो योनिर्हिरण्ययी। अङ्गान्यह्रुता यस्यै तां देवैः समजीगममित्यथ याचत्यष्टाप्रुड्ढिरण्यं क्षौमं चान्तरक्षौमं च वाससोष्णीषं

१ ॰मानस्यायैनमुत्पन्न॰ M.

२ Thus MGB; नित्य U; नित्यं Be.

३ पशुल॰ M; पशुम॰ all the other MSS.

Digitized by Google

चायेताद्भिरुष्णमद्भिः[1] प्रक्षाल्य वाससोपनह्योष्णीषेण विग्रथ्य दृढे कोष्ठे ऽवधाय भवति कोष्ठे ऽवदधाति । स आह प्रत्यञ्चं गर्भमन्तरेण सक्थिनी प्रतिनिवर्तयतेति । तं निवर्त्यमानमनुमन्त्रयत आ वर्तन वर्तय नि निवर्तन वर्तयेन्द्र नर्दबुद । भूम्याश्चतस्रः प्रदिशस्ताभिरावर्तया पुनरित्यु । स्याद्गर्भं विशस्यमानमनुमन्त्रयते वि ते भिनद्मि तकरीं वि योनिं वि गवीन्यौ । वि मातरं च पुत्रं च वि गर्भं च जरायु च । बहिस्ते अस्तु बालितीत्यथैतं[2] गर्भं संदंशेन परिमृज्याद्भिरभ्युक्ष्य शामित्रे प्रतितपति । तस्याभ्यर्धाद्वपाहोमं[3] प्रद्योतयत्यथैतं गर्भमन्तरेण चात्वालोत्करावन्तरेण यूपं चाहवनीयं चोपातिहृत्य[4] तं दक्षिणतः प्राञ्चमायातयन्पञ्चहोता[5] सादयत्यथ[5] वषायै हविषा चरत्यथ पुरस्तात्स्विष्टकृतो गर्भस्यावदत्याह विष्णवे शिपिविष्टायानुब्रूहीत्यथ वै भवति पुरस्तान्नाभ्या अन्यदवद्येदुपरिष्टादन्यदिति । स पुरस्तान्नाभ्या अन्यदवद्यत्युपरिष्टादन्यद्द्विरभिघारयत्यथाश्राव्याह विष्णुं शिपिविष्टं यजेति । वषट्कृते जुहोत्युरुद्रप्सो विश्वरूप इन्दुः पवमानो धीर आनञ्ज गर्भम् । एकपदी द्विपदी त्रिपदी चतुष्पदी पञ्चपदी षट्पदी

---

१ Thus M; चायेन॰ all the other MSS.

२ Thus M; ॰थैनं the other MSS.

३ Thus M; तस्यार्धे BG; तस्याभ्यर्धेडया॰ Be U.

४ Thus M; चोपानीय the other MSS.

५ प्राञ्चमावादयताय (sec. m. ॰मायातयताय), omitting the partic. and पञ्चहोता M.

सप्तपद्यष्टापदी भुवनानु प्रथताꣳ स्वाहेत्येव स्विष्टकृता चरत्येतं गर्भं यथाहृतं प्रतिपर्याहृत्योत्तरार्धे[1] आहवनीयस्य प्रत्यञ्चमासाद्य भस्मनाभिसमूहति मही द्यौः पृथिवी च न इमं यज्ञं मिमिक्षतां पिपृतां नो भरीमभिरित्यध्वर्युरेतत्कोशमिश्रं भवति । ब्राह्मणमुत्तरम् । ॥ १४ ॥ षष्ठः ॥

अथवशया यक्ष्यमाणो भवति । स यान्यहान्यमेधसंपन्नानि मन्यते तेष्वाग्नेयमष्टाकपालं निर्वपति । या[2] एता[2] ब्राह्मणाभिविहिता देवतास्तासामेनामेकस्यै देवताया आलभते । तस्या [3]उपाकरणीययोरनुवर्तयत्या वायो भूष शुचिपा इति । नियोजने ऽनुवर्तयत्याकूत्यै त्वा कामाय त्वा[4] समृधे[4] त्वेति । पर्यग्नौ क्रियमाणे पञ्च[4] किक्किटाकारं जुहोति किक्किटा ते मनः प्रजापतये स्वाहा किक्किटा ते प्राणं वायवे स्वाहा किक्किटा ते चक्षुः सूर्याय स्वाहा किक्किटा ते श्रोत्रं द्यावापृथिवीभ्याꣳ स्वाहा किक्किटा ते वाचꣳ सरस्वत्यै स्वाहेत्यथैनामन्तरेण चात्वालोत्करावुदीचीं नीयमानामनुमन्त्रयते त्वं तुरीया वशिनी वशासि सकृद्यत्त्वा मनसा गर्भ आशयत् । वशा त्वं वशिनी गच्छ देवान्सत्याः सन्तु यजमानस्य कामा इत्युपासने ऽनुवर्तयत्यजासि रयिष्ठा पृथिव्याꣳ सीदोर्ध्वान्त-

---

१ प्रतिपरिहृत्य॰ M.

२ Thus M; तायो एत्व GU; ताया एत्व Be; तायोशा B.

३ तस्योपा॰ M.

४ om. M.

रिषमुपतिष्ठस्व दिवि ते बृहद्भा इत्यथास्यै वपां जुहोति तन्तुं तन्वन्रजसो भानुमन्विहीत्यथास्यै हविर्जुहोति मनसो हविरसि प्रजापतेर्वर्ण इत्यथास्या अवदानानां[1] प्राश्नाति गायत्र्यां वै गायत्रभाजो भूयास्मेत्येष वै भवति तस्यै वा एतस्या एकमेवा-देवयजनं यदाखस्थायामश्वो भवति यदाखस्थायामश्वः स्यादप्सु वा प्रवेशयेत्सर्वं वा प्राश्नीयादित्युक्तमेतस्या अप्सु प्रवेशनमेते-नैवास्यै मन्त्रेणावदानानां प्राश्नायेतरदग्नावनुप्रहरेदिति बौधा-यनो[2] ऽनुनिधायमेनामद्यादित्याश्मौगविरित्येष[3] वै भवति सा वा एषा जयानामेवावरुद्धा संवत्सरसदः सहस्रयाजिनो गृहमेधिनस्त एवैतया यजेरन्तेषामेवैषाप्तेति तेषान्तु दैवे-नवैका[4] यजते ॥ १५ ॥

अथातो जयानामेव होमो जयान्होष्यन्नुपकल्पयते बाधकं स्रुवं च स्रुचं च बाधकान्परिधीञ्छरमयं बर्हिर्वैभीदकमिध्म-मित्यथ[5] हृत्वाग्निमुपसमाधाय शरमयं बर्हिः स्तीर्त्वा बाधका-न्परिधीन्परिधाय वैभीदकमिध्ममभ्यज्य[5] स्वाहाकारेणाभ्याधाय बाधकेन स्रुवेणोपघातं जुहोति चित्तं च स्वाहा चित्तिश्च स्वाहेति यथोदितं स्रुवाहुतीरपि वा बाधकेन स्रुवेण बाधकात्

१ अवदानानि M but cp. infra l. 7.
२ Thus MU; बौधायनो Be BG.
३ खादेद् i.s.o. अद्याद् M.
४ Thus MBG; तेषान्तु दैवनयैको Be U.
५ Thus M; °वैभीतक° the other MSS.

स्रुचि चतुर्गृहीतं गृहीत्वा सर्वान्मन्त्रान्समनुद्रुत्य जुहोति चित्तं च चित्तिश्चाकूतं चाकूतिश्च विज्ञातं च विज्ञानं च मनश्च शक्वरीश्च दर्शश्च पूर्णमासश्च बृहच्च रथंतरं च प्रजापतिर्जयानिन्द्राय वृष्णे प्रायच्छदुग्रः पृतनाज्येषु तस्मै विशः समनमन्त सर्वाः स उग्रः स हि हव्यो बभूव स्वाहेत्येष वै भवति देवासुराः संयत्ता आसंस्त इन्द्रः प्रजापतिमुपाधावत्तस्मा एताञ्जयान्प्रायच्छत्तानजुहोत्ततो वै देवा असुरानजयन्यदजयंस्तज्जयानां जयत्वं। स्पर्धमानेनैते होतव्या। जयत्येव तां पृतनामिति ब्राह्मणमेव वै भवति येन कर्मणेर्त्सेत्तत्र होतव्या इति। स यत्कर्मण्यर्धिदिदं[1] मे समृध्येतेति तस्मिञ्जयाभ्यातानाञ्जुहुयादित्यभ्यातानान्होष्यन्नुपकल्पयते पर्णमयौ स्रुवं च स्रुचं च पर्णमयांश्च परिधीन्कुशमयं बर्हिः पर्णमयमिध्ममित्यथ यथाग्निमुपसमाधाय कुशमयं बर्हि स्तीर्त्वा पर्णमयान्परिधीन्परिधाय पर्णमयमिध्ममभ्यज्य स्वाहाकारेणाभ्याधाय पर्णमयेन स्रुवेणोपघातं जुहोत्यग्निर्भूतानामधिपतिः स मावत्विति समुद्रं स्रुवाहुती हुत्वा वाचयति पितरः पितामहा इत्यपि वा पर्णमयेन स्रुवेण पर्णमय्यां स्रुचि चतुर्गृहीतं गृहीत्वा सर्वान्मन्त्रान्समनुद्रुत्य हुत्वान्ततो वाचयति पितरः पितामहा इत्येष समस्तानामेव होमो। ऽभ्यातानानेवाग्रे जुहुयादथ जयानथ राष्ट्रभृतो। ब्राह्मणमुत्तरम्। ॥ २६ ॥ सप्तमः ॥

---

१ Thus M; यत्कर्मणेर्त्से॰ the other MSS.

Digitized by Google

अथ वै भवति राष्ट्रकामाय होतव्या इति। राष्ट्रकामाय
होष्यन्नुपकल्पयते अश्वापरिधीनित्यथ[1] वृथाग्निमुपसमाधाय अ-
श्वापरिधीन्परिधाय निग्राभ्यास्वश्वापरिधौ द्विः स्वाहाकारꣳ
राष्ट्रभृतो जुहोत्यृताषाडृतधामेति। राष्ट्रं वै राष्ट्रभृतो। राष्ट्रे-
णैवास्मै राष्ट्रमवरुन्द्धे। राष्ट्रमेव भवतीति ब्राह्मणमथ वै भव- ९
त्यात्मने होतव्या इत्यात्मने होष्यन्वृथाग्निमुपसमाधाय निग्राभ्यास्व
श्वापरिधौ द्विः स्वाहाकारꣳ राष्ट्रभृतो जुहोति। राष्ट्रं वै
राष्ट्रभृतो। राष्ट्रं प्रजा। राष्ट्रं पशवो। राष्ट्रं यच्छ्रेष्ठो भवति
राष्ट्रेणैव राष्ट्रमवरुन्द्धे। वसिष्ठः समानानां भवतीति ब्राह्मण-
मथ वै भवति ग्रामकामाय होतव्या इति। ग्रामकामाय १०
होष्यन्नधिदेवने वृथाग्निमुपसमाधाय निग्राभ्यास्वश्वापरिधौ
द्विः स्वाहाकारꣳ राष्ट्रभृतो जुहोति। राष्ट्रं वै राष्ट्रभृतो।
राष्ट्रꣳ सजाता। राष्ट्रेणैवास्मै राष्ट्रꣳ सजातानवरुन्द्धे। ग्राम्येव
भवतीति ब्राह्मणमथ वै भवत्यधिदेवने जुहोत्यधिदेवन एवास्मै
सजातानवरुन्द्धे। त एनमवरुद्धा उपतिष्ठन्त इति ब्राह्मणमथ ११
वै भवति रथमुख ओजस्कामस्य होतव्या इत्योजस्कामस्य[2]
होष्यन्नुपर्यग्नौ रथमुखं प्रत्यस्य[3] निग्राभ्यास्वश्वापरिधौ द्विः
स्वाहाकारꣳ राष्ट्रभृतो जुहोत्योजो वै राष्ट्रभृत। ओजो रथ।
ओजसैवास्मा ओजो ऽवरुन्द्धे। ओजस्व्येव भवतीति ब्राह्मणमथ

---

१ Thus MGB; अश्वाःपरि॰ U Be.

२ ॰कामाय MSS. exc. M.

३ परिमस्य MSS. exc. M.

वै भवति यो राष्ट्रादपभूतः स्यात्तस्मै होतव्या । यावन्तो ऽस्य रथाः स्युस्तान्ब्रूयाद्युङ्ध्वमिति । राष्ट्रमेवास्मै युनक्तीति ब्राह्मणमथ वै भवत्याकूतयो वा एतस्याकृत्ता यस्य राष्ट्रं न कल्पते । स्वरथस्य दक्षिणं चक्रं प्रवृह्य नाडीमभिजुहुयादिति [1]स[1] स्वरथस्यैव दक्षिणं चक्रं प्रवृह्योपर्यग्नौ रथनाडीं प्रष्टय[2] निधायाहं मध्यापरिधौ द्विः स्वाहाकारं राष्ट्रभृतो जुहोत्याकूतीरेवास्य कल्पयति । ता अस्य कल्पमाना राष्ट्रमनुकल्पन्त इति ब्राह्मणम् । ॥ १७ ॥

अथ वै भवति संग्रामे संयत्ते होतव्या इति । संग्रामे संयत्ते होष्यमुपकल्पयते मान्धुकमिध्ममित्यथ प्रत्यमित्रमग्निमुपसमाधाय मान्धुकमिध्ममभ्यज्य स्वाहाकारेणाभ्याधाय निधायाहं मध्यापरिधौ द्विः स्वाहाकारं राष्ट्रभृतो जुहोत्यप्सरा एव प्रतिवेष्टमाना अमित्राणामस्य सेनां प्रतिवेष्टयन्तीति ब्राह्मणमथ वै भवति य उन्माद्येत्तस्मै होतव्या इत्युन्मत्ताय होष्यमुपकल्पयते नैयग्रोधमौदुम्बरमाश्वत्थं प्लाक्षमिध्ममित्यथ वृषाग्निमुपसमाधायैतमिध्ममभ्यज्य स्वाहाकारेणाभ्याधाय निधायाहं मध्यापरिधौ द्विः स्वाहाकारं राष्ट्रभृतो [3]जुहोत्येते वै गन्धर्वाप्सरसां प्रष्टाः । स एवैनानायतने प्रमयतीति ब्राह्मणमथ वै भवत्यभिचरता प्रतिलोमं होतव्या इत्यभिचरन्होष्यन्नुपकल्प[4]

---

१ only given by M.

२ प्रष्टय M Be ; प्रष्टय the other MSS.

३ ... ३ (p. 184, 2) left out in M.

४ probably read : इति योऽभिचरन्हो° ।

Digitized by Google

इरिणे प्रदरे वाग्नुतो ऽर्वाञ्चो ऽग्निमुपसमाधाय निशायाꣳ मध्यापरिधौ त्रिः स्वाहाकारꣳ[1] राष्ट्रभृतो[2] जुहोति । यद्वाव क्रूरं तेन वषट्करोति । वाच एवैनं क्रूरेण प्रवृश्चति । तामार्तिमार्च्छतीति ब्राह्मणमेव वै भवति यस्य कामयेतान्नाद्यमाददीयेति तस्य सभायामुत्तानो निपद्य भुवनस्य पत इति तृणानि संगृह्णीयादिति । स यस्य कामयेतान्नाद्यमाददीयेति तस्य सभायामुत्तानो निपद्य भुवनस्य पत इति तृणानि संगृह्येमान्यादाय हरतीदममुष्यामुष्यायणस्यान्नाद्यꣳ हरामीत्यन्नाद्यमेवास्य हरति । षड्भिर्हरतीति ब्राह्मणमथैनानि स्वस्यां वा सभायाꣳ स्वेषु वामात्येष्वपिसृजति । प्रजापतिनैवान्नाद्यमादायर्तवो ऽस्मा अनुप्रयच्छन्तीति ब्राह्मणमेव वै भवति यो ज्येष्ठबन्धुरपभूतः स्यात्तꣳ स्थले ऽवसाय्य ब्रह्मौदनं चतुःशरावं पक्त्वा तस्मै होतव्या इति । स यो ज्येष्ठबन्धुरपभूतः स्यात्तꣳ स्थले ऽवसाय्य ब्रह्मौदनं चतुःशरावं पक्त्वा निशायाꣳ मध्यापरिधौ त्रिः स्वाहाकारꣳ राष्ट्रभृतो जुहोति । वर्ष्म वै राष्ट्रभृतो । वर्ष्म स्थलं । वर्ष्मणैवैनं वर्ष्म समानानां गमयतीति ब्राह्मणमेव वै भवति चतुःशरावो भवति । दिक्ष्वेव प्रतितिष्ठति । क्षीरे भवति । रुचमेवास्मिन्दधात्युद्धरति शृतत्वाय । सर्पिष्वान्भवति मेध्यत्वाय । चत्वार आर्षेयाः प्राश्नन्ति । दिशामेव ज्योतिषि जुहोतीति ब्राह्मणम् । ॥ १८ ॥

---

१ ॰कारेण the MSS.

२ (p. 183,17) २...२ left out in M.

Digitized by Google

अथ वै भवति दैविका निर्वपेत्प्रजाकाम इति । प्रथमं धातारं प्रजाकामस्य करोति । प्रथमं पशुकामस्य । मध्यतो ग्रामकामस्य । मध्यतो ज्योगामयाविनः । प्रथमं यक्ष्यमाणस्योत्तममीजानस्य । प्रथमं मेधाकामस्य । मध्यतो रुक्कामस्य । ता वा एताः क्षीरे शृता भवन्ति । ता यत्सह सर्वा निर्वपेदीश्वरा एनं प्रदहो । द्वे प्रथमे निरुप्य धातुस्तृतीयं निर्वपेत्तथो एवोत्तरे निर्वपेत्तथैनं न प्रदहन्त्यथो यस्मै कामाय निरुप्यते तमेवाभिसंपाप्नोतीति ब्राह्मणमथ वै भवति यत्सायंप्रातरग्निहोत्रं जुहोत्याहुतीष्टका एव ता उपधत्ते यजमानो ऽहोरात्राणि वा एतस्येष्टका य आहिताग्निर्यत्सायंप्रातर्जुहोत्यहोरात्राण्येवाप्तेष्टकाः कृत्वोपधत्ते । दश समानत्र जुहोति । दशाक्षरा विराड्विराजमेवाप्तेष्टकां कृत्वोपधत्ते । ऽथो विराज्येव यज्ञमाप्नोति । चित्यश्चित्यो ऽस्य भवति । तस्मादाहुर् दशोषित्वा प्रयाति तद्यज्ञवास्त्वं वास्त्वेव तद्यत्ततो ऽर्वाचीनमिति । स यत्र दशोषित्वा प्रयास्यन्भवति तदग्निष्ठे ऽनसि समवश्रमयन्ते[१] यद्यु[१] समवश्रमयितव्यं[१] भवत्यवास्त्वेव तद्यत्ततो ऽर्वाचीनꣳ । रुद्रः खलु वै वास्तोष्पतिर्यदहुत्वा वास्तोष्पतीयं प्रयायाद्रुद्र एनं भूत्वाग्निरनूत्थाय हन्याद्वास्तोष्पतीयं जुहोति । भागधेयेनैवैनꣳ शमयति । नार्तिमार्च्छति यजमान इति ब्राह्मणमथ वै भवति युक्ते जुहुयाद्यथा प्रयाते वास्तावाहुतिं जुहोति तादृगेव तद्युक्ते

---

१ Thus M only; all the other MSS. are here wholly corrupted.

Digitized by Google

जुहुयाद्यथा क्षेम आहुतिं जुहोति तादृगेव तद्धुतमस्य वास्तोष्पतीयꣳ स्याद्दक्षिणो युक्तो भवति सव्यो ऽयुक्तो ऽथ वास्तोष्पतीयं जुहोतीति । स यत्र दक्षिणो युक्तो भवति सव्यो ऽयुक्तस्तत्प्रत्याक्रेयां[१] पर्णमय्याꣳ स्रुचि चतुर्गृहीतं गृहीत्वाहवनीये वास्तोष्पतीयं जुहोति । वास्तोष्पते प्रतिजानीह्यस्मानित्यनुद्रुत्य वास्तोष्पते शग्मया सꣳसदा त इति जुहोत्यथैताꣳ स्रुचमुपनिधाय सव्यं युक्त्वा प्रयात्युभयमेवाकरपरिवर्गमेवैनꣳ शमयतीति ब्राह्मणमथ वै भवति यदेकया जुहुयाद्दर्विहोमं कुर्यात्पुरोनुवाक्यामनूच्य याज्यया जुहोति सदेवत्वायेति ब्राह्मणमथ वै भवति यद्धुत आदध्याद्रुद्रं गृहानन्वारोहयेदथ- यथायथान्यसंप्रयाप्य प्रयायाद्यथा यज्ञवेशसं वादहनं वा तादृगेव तदयं ते योनिर्ऋत्विय इत्यरण्योः समारोहयत्येष वा अग्नेर्योनिः । स एवैनं योनौ समारोहयत्यथो खल्वाहुर्यदरण्योः समारूढो नश्येदुदस्याग्निः सीदेत्पुनराधेयः स्यादिति । या ते अग्ने यज्ञिया तनूस्तयेह्यारोहेत्यात्मन्समारोहयत इति । स आत्मन्समारोहयते या ते अग्ने यज्ञिया तनूस्तयेह्यारोहात्मात्मानमच्छा वसूनि कृण्वन्नस्मे नर्या पुरूणि । यज्ञो भूत्वा यज्ञमासीद स्वां योनिं जातवेदो भुव आजायमानः सक्षय एहीत्यथैनमुपावरोहयत उपावरोह जातवेदः पुनस्त्वं देवेभ्यो हव्यं वह नः प्रजानन् । आयुः प्रजाꣳ रयिमस्मासु धेह्यजस्रो

१ Thus MGUB Bhav.; प्रत्याहेयां Be. This word occurs also in the Baudh. pitṛmedhasūtra (p. 13, 1).

दीदिहि नो दुरोण इति । यजमानो वा अग्नेर्योनिः । स्वायामेवैनं योन्याꣳ समारोहयत इति ब्राह्मणम् । ॥ १९ ॥ अष्टमः ॥

उक्तो ऽन्वारम्भो । ऽथ वै भवत्यृषयो वा इन्द्रं प्रत्यक्षं नापश्यंस्तं वसिष्ठः प्रत्यक्षमपश्यत्सो ऽब्रवीद्ब्राह्मणं ते वक्ष्यामि यथा त्वत्पुरोहिताः प्रजाः प्रजनिष्यन्ते ऽथ मेतरेभ्य ऋषिभ्यो मा प्रवोच इति । तस्मा एतान्स्तोमभागानब्रवीत्ततो वसिष्ठपुरोहिताः प्रजाः प्राजायन्तेति । तस्माद्वासिष्ठं ब्रह्मत्वमिति । स उपाह ब्रह्मन्स्तोष्यामः प्रशास्तरिति तद्ब्रूया[1] प्रसौति देव सवितरित्येतां प्रतिपदं कृत्वा रश्मिरसि क्षयाय त्वा क्षयं जिन्वेत्येतस्यानुवाकस्यैकैकमुपादाय प्रसौति । स एवमेव प्रसुवन्द्वादशभिरग्निष्टोमं प्रसौति चतुर्दशभिरत्यग्निष्टोमं पञ्चदशभिरुक्थ्यꣳ षोडशभिः षोडशिनꣳ सप्तदशभिर्वाजपेयमेकान्नविंशत्यातिरात्रꣳ सर्वैरप्तोर्यामꣳ । स यत्र राथंतराय सन्धये प्रसर्पन्ति तदाह वसुको ऽसि वेषश्रिरसि वस्यष्टिरसीति । स एवमेव प्रसौत्याप्तोर्यामाद्यातो[2] ऽतिक्रमाणामेवाभिचरन्भ्रातृव्यवान्स्पर्धमानो ऽभिचरणीयग्निष्वान्वायात्य संवत्सरमेतैः क्रमैः क्रमेताग्निना देवेन पृतना जयामि गायत्रेण छन्दसा त्रिवृता स्तोमेन रथंतरेण साम्ना वषट्कारेण वज्रेण पूर्वजान्भ्रातृव्यानधरान्पादयाम्यवैनान्बाधे प्रत्येनान्नुदे ऽस्मिन्क्षये ऽस्मिन्भूमिलोके यो ऽस्मान्द्वेष्टि यं च वयं द्विष्मो विष्णोः क्रमेणात्येनान्क्रामामीन्द्रेण देवेन पृतना जयामि

---

१ तद् is left out in all MSS. exc. M.

२ प्रसौत्याप्तोर्या॰ M.

Digitized by Google

त्रैष्टुभेन छन्दसा [1]पञ्चदशेन स्तोमेन बृहता साम्ना वषट्कारेण वज्रेण सहजान्भ्रातृव्यानधरान्पादयाम्यवैनान्बाधे प्रत्येनान्नुदे ऽस्मिन्क्षये ऽस्मिन्भूमिलोके यो ऽस्मान्द्वेष्टि यं च वयं द्विष्मो विष्णोः क्रमेणात्येनान्क्रामामि[1] विश्वेभिर्देवेभिः पृतना जयामि जागतेन [2]छन्दसा सप्तदशेन स्तोमेन वामदेव्येन साम्ना वषट्कारेण वज्रेणापरजान्भ्रातृव्यानधरान्पादयाम्यवैनान्बाधे प्रत्येनान्नुदे ऽस्मिन्क्षये ऽस्मिन्भूमिलोके यो ऽस्मान्द्वेष्टि यं च वयं द्विष्मो विष्णोः क्रमेणात्येना[2]न्क्रामामीत्यपि वाभिचरणीयास्विष्टिष्वनुवर्त्तेतापि वापोद्धृत्येतरान्क्रमान्संवत्सरमेतैः क्रमैः क्रमेताक्ष्ं शुक्रामन्थिनो-रधिद्रवणमथातो ऽतौमोचाणामेव[3] । वैश्वकर्मणानि हुत्वा गार्हपत्य आज्यं विलाप्योत्पूय स्रुचि चतुर्गृहीतं गृहीत्वा गार्हपत्ये जुहोत्यन्वारब्धे यजमाने ॥ २० ॥

ये देवा यज्ञहनो पृथिव्यामध्यासते । अग्निर्मा तेभ्यो रक्षतु गच्छेम सुकृतो वयक्ष्ं स्वाहेत्यपरं चतुर्गृहीतं गृहीत्वा गार्हपत्य एव जुहोति ये देवा यज्ञमुषः पृथिव्यामध्यासते । अग्निर्मा तेभ्यो रक्षतु गच्छेम सुकृतो वयक्ष्ं स्वाहेत्यथाग्नीध्रमभिप्रेत्यागन्म मित्रावरुणा वरेण्या रात्रीणां भागो युवयोर्यो अस्ति । नाकं गृह्णानाः सुकृतस्य लोके तृतीये पृष्ठे अधि रोचने दिव इत्यथाग्नीध्रं हुत्वा स्रुचि चतुर्गृहीतं गृहीत्वाग्नीध्रे जुहोत्यन्वारब्धे

१, १ The two passages marked at the beginning and the close by १ and १ are left out by all the MSS. exc. M.

२ •तौमो• MBG (sec. m.) ; •तिमो• Be UG (pr. m.).

यजमाने ये देवा यज्ञहनो ऽन्तरिक्षे ऽध्यासते। वायुर्मा तेभ्यो रक्षतु गच्छेम सुकृतो वयꣳ स्वाहेत्यपरं चतुर्गृहीतं गृहीत्वाग्नीध्र एव जुहोति ये देवा यज्ञमुषो ऽन्तरिक्षे ऽध्यासते। वायुर्मा तेभ्यो रक्षतु गच्छेम सुकृतो वयꣳ स्वाहेत्यथाहवनीयमभिप्रैति यास्ते राकीः सवितर्देवयानीरन्तरा द्यावापृथिवी वियन्ति। गृहैश्च सर्वैः प्रजया न्वग्रे सुवो रुहाणास्तरता रजाꣳसीत्यथाहवनीयं हुत्वा स्रुचि चतुर्गृहीतं गृहीत्वाहवनीये जुहोत्यन्वारब्धे यजमाने ये देवा यज्ञहनो दिव्यध्यासते। सूर्यो मा तेभ्यो रक्षतु गच्छेम सुकृतो वयꣳ स्वाहेत्यपरं चतुर्गृहीतं गृहीत्वाहवनीय एव जुहोति ये देवा यज्ञमुषो दिव्यध्यासते। सूर्यो मा तेभ्यो रक्षतु गच्छेम सुकृतो वयꣳ स्वाहेत्यथाहवनीयमुपतिष्ठते येनेन्द्राय समभरः पयाꣳस्युत्तमेन हविषा जातवेदः। तेनाग्ने त्वमुत वर्धयेमꣳ सजातानꣳ श्रैष्ठ्य आधेह्येनमिति। यज्ञहनो वै देवा यज्ञमुषः सन्ति। त एषु लोकेष्वासत आददाना विमथ्नाना यो ददाति यो यजते तस्य। ये देवा यज्ञहनः पृथिव्यामध्यासते ये अन्तरिक्षे ये दिवीत्याहेमानेव लोकाꣳस्तीर्त्वा सगृहः सपशुः सुवर्गं लोकमेतीति ब्राह्मणमपि वा तिस्र एव गार्हपत्ये जुहोति तिस्र आग्नीध्रे तिस्र आहवनीये। ऽपि वा गार्हपत्याज्जपन्ननुद्रवेदाहवनीयादुक्तोदवसानीयेष्टिरेतां[1] तृतीयां प्रकृताहुतिं जुहोति सूर्यो मा देवो देवेभ्यः पातु वायुरन्तरिक्षाद्यजमानो ऽग्निर्मा पातु चक्षुषः

---

१ ०जपन्ननुद्रवेद० M Bo; ०जपन्नुद्रवेद० BUG.

स्वाहेत्यथाभिचरन्नभ्युदे बभ्रुवत्यार्थे कार्ष्मर्यमयेन पात्रेण पयो जुहोति यच्च यूप यवितविश्वपर्वण एतेभिः सोम नामभिर्विधेम ते तेभिः सोम नामभिर्विधेम ते स्वाहेति । साचादस्य हृदयं भित्त्वान्त्राणि परिकाशयाते[1] । वृणुते हैव[2] तं[2] भ्रातृव्यमथ येनास्यर्त्विजाः स्पर्धा स्यात्तमाह मास्य चमसमनुप्रसृप्तादभिमर्शनं[3] करिष्यामीति । तस्यैतेनैव मन्त्रेण चमसं जुहुयात्तंमूर्ध्नो ऽवाङ्का[4] राजातिपवत । उक्तं पात्नीवतस्य [5]अयचमुक्तमादित्यपात्रस्योन्नयनमुक्ता[6] प्रायणीयस्य सुवाहुतिरुक्तोदयनीयस्योक्तं यूपस्योपस्थानम् ॥ २१ ॥ नवमः ॥

उक्तानि पात्नीवतजूंष्येवमेवैताः स्रुचो यथैतद्ब्राह्मणमुक्तो दधिघर्मो । ऽथ वै भवत्याज्यपदं गृह्णीयात्तेजस्कामस्येति । बर्हिषो ऽन्तर्धायाज्यपदं गृह्णाति । सोमपदं गृह्णीयाद्ब्रह्मवर्चसकामस्येत्यंशूनुपसंगृह्य सोमपदं गृह्णात्यथैतं महाव्रतीये ऽग्निं प्राजापत्यमतियाज्यं गृह्णाति ते क्रतुमपिदृष्ट्वन्ति विश्व इत्यनु-

---

१ Thus M; •काशयातेव Be; •क्राशयातोह B; •काशयान्त्रेच U; •काश• यातेह G (pr. m.), •क्राशयातेह G (sec. m.). परिकाशयातेर्विष्क्रामति (var. विष्क्रामयति) Bhav.

२ Thus M Bhav.; स्वैतं The other MSS.

३ Thus M; •नुप्रसृप्याद• BUG; •नुपसृत्याद• Be.

४ Thus M; i.s.o. ऽवाङ्का राजाति• Be U: वाराङ्काङ्काति•; G: वारा• ङ्काङ्काति; B: वारोङ्काङ्काति• ।

५ Thus (अयच•) M Be (cp. viii. 14 औयाति); अपच• BU; अमच• G.

६ Corrected (उन्नयन•) according to viii. 9 s.f. (उद्यन्ति); उद्यानयन• MUGB; Be wholly corr.

Digitized by Google

हृत्योपयामगृहीतोऽसि प्रजापतये त्वा जुष्टं गृह्णामीति । परिमृज्य सादयत्येष ते योनिः प्रजापतये त्वेत्यथातः प्राणग्रहाणामेव ग्रहणꣳ । संहतꣳ राजानं पुञ्जीकृत्वा[१] नवांशून्प्राच आयातयत्ययं पुरो भुवस्तस्य प्राणो भौवायनो वसन्तः प्राणायनो गायत्री वासन्ती गायत्र्यै गायत्रं गायत्रादुपांशुरुपांशोस्त्रिवृत्त्रिवृतो रथंतरꣳ रथंतराद्वसिष्ठ ऋषिः प्रजापतिगृहीतया त्वया प्राणं गृह्णामि प्रजाभ्य इत्ययं दक्षिणा विश्वकर्मेति नव दक्षिणायातयत्ययं[२] पश्चाद्विश्वव्यचा इति नव प्रतीच आयातयत्यथोदगुत्तरात्स्वरिति नवोदीच आयातयत्यथोपरि मतिरिति नवोपरिष्टात्प्रदक्षिणं पर्यायातयति । तानपानभृद्भिः प्रत्यूहति प्राची दिशां वसन्त ऋतूनामग्निर्देवता ब्रह्म द्रविणं त्रिवृत्स्तोमः स उ पञ्चदशवर्तनिस्त्र्यविर्वयः कृतमयानां पुरोवातो वातः सानग ऋषिरिति । वाचयति पितरः पितामहाः परेऽवर इति ये पुरस्ताद्भवन्ति । दक्षिणा दिशामिति ये दक्षिणतो भवन्ति । प्रतीची दिशामिति ये पश्चाद्भवन्त्युदीची दिशामिति य उत्तरतो भवन्त्यूर्ध्वा दिशामिति य उपरिष्टात्प्रदक्षिणं पर्यायातिता[३] भवन्ति । ते वा एते प्रायणीयोदयनीययोरेव

१ Thus (पुञ्जी°) M; पुंजं BG; पुजं Be U.

२ Thus M; दक्षिणाआयातयत्य° Be GU; B defect.

३ Conjecturally; पर्याप्यातिता BG; पर्यापातिता M; पर्यातिप्यातिता U; पर्येतिप्यातिता Be.

Digitized by Google

नियुक्ता दशमे ऽहꣳसंतदु[1] रात्रिसत्त्रेष्वप्यग्निष्टोम[1] आमयाविन उपसृतो वा गृह्णीयादगदो हैव भवति ' ॥ २२ ॥ दशमः ॥

अथ वै भवत्युभये वा एते प्रजापतेरध्यसृज्यन्तेति ब्राह्मणमेव ' युवꣳ सुराममश्विनेति सौत्रामण्यामेव[2] भवत्यथ वै भवतीयं वा अग्निहोत्रीयं वा एतस्य निषीदति यस्याग्निहोत्री निषीदति ' तामुत्थापयेदिति ' स यस्याग्निहोत्री निषीदति तामुत्थापयत्युदस्थाद्देव्यदितिर्विश्वरूप्यायुर्यज्ञपतावधात् । इन्द्राय कृण्वती भागं मित्राय वरुणाय चेत्यथ वै भवत्यवर्तिं वा एषैतस्य पाप्मानं प्रतिख्याय निषीदति यस्याग्निहोत्र्युपसृष्टा निषीदति ' तां दुग्ध्वा ब्राह्मणाय दद्याद्यस्यान्नं नाद्यादिति ' स यस्याग्निहोत्र्युपसृष्टा निषीदति तामेतदेव दुग्ध्वा ब्राह्मणाय ददाति ' न चास्यात ऊर्ध्वमन्नमत्त्यथ वै भवति पृथिवीं वा एतस्य पयः प्रविशति यस्याग्निहोत्रं दुह्यमानꣳ स्कन्दति ' तदभिमन्त्रयेतेति ' स यस्याग्निहोत्रं दुह्यमानꣳ स्कन्दति तदभिमन्त्रयते ' यदद्य दुग्धं पृथिवीमसृप्त यदोषधीरत्यसरद्यदापः । पयो गृहेषु पयो अघ्नियासु पयो वत्सेषु पयो अस्तु तन्मयीत्याह ' पय एवात्मन्गृहेषु पशुषु धत्ते ' ऽप उपसृजत्यद्भिरेवैनदाप्नोतीति ब्राह्मणमथ वै भवति यो वै यज्ञस्यार्तेनानार्तꣳ सꣳसृजत्युभे वै ते तर्ह्यार्च्छत ' आर्च्छति खलु वा

---

१ Thus M; B and G (sec. m.) om. अपि; तदुरात्रिसत्त्रेष्वष्टोम U तदतिरात्रे सत्रे ष्टष्टोम Be; तदुरात्रिसत्त्रेष्टष्टोम G (pr. m.).

२ एष i.s.o. एव M.

Digitized by Google

*Mārkaṇḍeya Purāṇa, Fasc. 5-7 @ /10/ each	Rs. 1	14
*Mimāṁsā Darçana, Fasc. 6-19 @ /10/ each	8	12
Nyāyavārtika, Fasc. 1-6 @ /10/ each	3	12
*Nirukta, Vol. IV, Fasc. 1-8 @ /10/ each	5	0
*Nitisāra, Fasc. 2-5 @ /10/ each	2	8
Nityācārapaddhati, Fasc. 1-7 @ /10/ each	4	6
Nityācārapradīpa, Fasc. 1-8 @ /10/ each	5	0
Nyāyabinduṭīkā, Fasc. 1 @ /10/ each	0	10
*Nyāya Kusumāñjali Prakaraṇa, Vol. I, Fasc. 2-6; Vol. II, Fasc. 1-3 @ /10/ each	5	0
Padumāwati, Fasc. 1-5 @ 2/-	10	0
*Pariçiṣṭa Parvan, Fasc. 3-5 @ /10/ each	1	14
Prākrita-Paingalam, Fasc. 1-7 @ /10/ each	4	6
Prithviraj Rāsa, Part II, Fasc. 1-5 @ /10/ each	3	2
Ditto (English) Part II, Fasc. 1 @ 1/- each	1	0
Prākṛta Lakṣaṇam, Fasc. 1 @ /1/8 each	1	8
Parāçara Smṛti, Vol. I, Fasc. 1-8, Vol. II, Fasc. 1-6; Vol. III, Fasc. 1-6 @ /10/ each	12	8
Parāçara, Institutes of (English) @ 1/- each	1	0
Prabandhacintāmaṇi (English) Fasc. 1-3 @ 1/4/ each	3	12
Saddarśana-Samuccaya, Fasc. 1-2 @ /10/ each	1	4
*Sāma Vēda Saṁhitā, Vols. I, Fasc. 7-10; II, 1-6; III, 1-7; IV, 1-6; V, 1-8 @ /10/ each	19	6
Samaraieca Kaha Fasc. 1, @ /10/	0	10
Sāṅkhya Sūtra Vṛtti, Fasc. 1-4 @ /10/ each	2	8
Ditto (English) Fasc 1-3 @ 1/- each	3	0
*Saṅkara Vijaya, Fasc. 2-3 @ /10/ each	1	4
Sraddha Kriyā Kaumudī, Fasc. 1-6 @ /10/ each	3	12
Srauta Sutra Latyayan, Fasc. 1-9 @ /10/ each	5	10
*Ditto Asbulayana, Fasc. 4-11 @ /10/ each	5	0
Suçruta Saṁhitā, (Eng.) Fasc. 1 @ 1/- each	1	0
Suddhi Kaumudī, Fasc. 1-4 @ /10/ each	2	8
*Taittreya Brahmana, Fasc. 6-25 @ /10/ each	12	8
Ditto Pratisakhya, Fasc. 1-3 @ /10/ each	1	14
*Taittiriya Saṁhitā, Fasc. 27-45 @ /10/ each	11	14
*Tāṇḍya Brāhmaṇa, Fasc. 7-19 @ /10/ each	8	2
Tantra Vārtika (English) Fasc. 1-6 @ /1/4	7	8
*Tattva Cintāmaṇi. Vol. I, Fasc. 1-9; Vol II, Fasc. 2-10; Vol. III, Fasc. 1-2; Vol IV, Fasc. 1; Vol. V, Fasc. 1-5; Part IV, Vol. II, Fasc. 1-12 @ /10/ each	23	12
Tattvārthādhigama Sutram, Fasc. 1-3 @ /10/	1	14
Trikāṇda-Maṇḍanam, Fasc. 1-3 @ /10/	1	14
Tul'si Satsai, Fasc. 1-5 @ /10/	3	2
Upamita-bhava-prapañca-kathā, Fasc. 1-11 @ /10/ each	6	14
Uvāsagadasāo, (Text and English) Fasc. 1-6 @ 1/-	6	0
Vallāla Carita, Fasc. 1 @ /10/	0	10
Varṣa Kriyā Kaumudī, Fasc 1-6 @ /10/	3	12
*Vāyu Purāṇa. Vol. I, Fasc. 3-6; Vol. II, Fasc. 1-7; @ /10/ each	6	14
Vidhāna Pārijāta, Fasc. 1-8; Vol. II, Fasc. 1 @ /10/	5	10
Ditto Vol. II, Fasc. 2, @ 1/4	1	4
Vivādaratnākara, Fasc. 1-7 @ /10/ each	4	6
Vṛhat Svayambhū Purāṇa, Fasc. 1-6 @ /10/	3	12
*Yoga Aphorisms of Patanjali, Fasc. 3-5 @ /10/ each	1	14
Yogaśāstra, Fasc. I	1	4

Tibetan Series.

Pag-Sam S'hi Tin, Fasc. 1-4 @ 1/- each	4	0
Sher-Phyin, Vol. I, Fasc. 1-5; Vol. II, Fasc. 1-3; Vol. III, Fasc. 1-6 @ 1/ each	14	0
Rtogs brjod dpag hkhri S'iñ (Tib. & Sans. Avadāña Kalpalatā) Vol. I, Fasc. 1-6; Vol. II, Fasc. 1-5 @ 1/- each	11	0

Arabic and Persian Series.

'Ālamgīrnāmah, with Index, (Text) Fasc. 1-13 @ /10/ each	8	2
Al-Muqaddasi (English) Vol. I, Fasc. 1-3 @ 1/-	3	0
Āin-i-Akbarī, Fasc, 1-22 @ 1/8/ each	33	0
Ditto (English) Vol. I, Fasc. 1-7, Vol. II, Fasc. 1-5, Vol. III, Fasc. 1-5, @ 2/- each	34	0
Akbarnāmah, with Index, Fasc. 1-37 @ 1/8/ each	55	8
Ditto English Vol. I, Fasc. 1-8; Vol. II, Fasc. 1-4 @ 1/4/ each	15	0
Arabic Bibliography, by Dr. A Sprenger @ /10/	0	10
*Bādshāhnāmah, with Index, Fasc 1-19 @ /10/ each	11	14
Conquest of Syria, Fasc. 1-9 @ /10/ each	5	10
Catalogue of Arabic Books and Manuscripts 1-2 @ 1/- each	2	0

* The other Fasciculi of these works are out of stock, and complete copies cannot be supplied.

Digitized by Google

Asiatic Society of Bengal, Fasc. 1-3 @ 1/- each ... ...
Dictionary of Arabic Technical Terms, and Appendix Fasc. 1-21 @ 1/8/ each 31
Farnang-i-Rashidi, Fasc. 1-14 @ 1/8/ each 21
Fihrist-i-Tusi, or Ṭūsy's list of Shy'ah Books, Fasc. 1-4 @ 1/- each 4
Futūn-ush-Shām of Wāqidī, Fasc. 1-9 @ /10/ each 5
Ditto of Āzādī, Fasc. 1-4 @ /10/ each 2
Haft Āsmān, History of the Persian Masnawi, Fasc. 1 @ /12/ each Rs. 0
History of the Caliphs, (English) Fasc. 1-6 @ 1/4/ each 7
Iqālnamah-i-Jahāngīrī, Fasc. 1-3 @ /10/ each 1
Iṣābah, with Supplement, 51 Fasc. @ 1/- each 51
Ma'āṣir-i-'Ālamgīrī, Fasc. 1-6 @ /10/ each 3
Maāṣir-ul-Umarā, Vol. I, Fasc. 1-9; Vol. II, Fasc. 1-9; Vol. III, 1-10; Index to Vol. I, Fasc. 10-11; Index to Vol. II, Fasc. 10-12; Index to Vol. III, Fasc. 11-12 @ /1/ each 35
Maghāzi of Wāqidī, Fasc. 1-5 @ /10/ each 3
Muntakhabu-t-Tawarikh, Fasc. 1-15 @ 10/ each 9
Ditto (English) Vol. I, Fasc. 1-7; Vol. II, Fasc. 1-5 and 3 Indexes; Vol. III, Fasc. 1 @ 1/- each 16
Muntakhabu-l-Lubāb, Fasc. 1-19 @ /10/ each... 11
Nukhbatu-l-Fikr, Fasc. 1 @ /10/ 0
Nizāmī's Khiradnāmah-i-Iskandari, Fasc. 1-2 @ /12/ each ... 1
Qawaninu 's-Sayyad of Khuda Yar Khan 'Abbasi, edited in the original Persian with English notes by Lieut.-Col. D. C. Phillott ... 5
Riyāzu-s-Salātīn, Fasc. 1-5 @ /10/ each 3
Ditto (English) Fasc. 1-5 @ 1/- 5
Tabaquat-i-Nasiri, Fasc. 1-5 @ /10/ each 3
Ditto (English) Fasc. 1-14 @ 1/- each 14
Ditto Index 1
Tarikh-i-Fīrūz Shāhi of Ẓiyāu-d-dīn Barni, Fasc. 1-7 @ /10/ each ... 4
Tārīkh-i-Fīrūzshāhi, of Shams-i-Sirāj Aif, Fasc. 1-6 @ /10/ each ... 3
Ten Ancient Arabic Poems, Fasc. 1-2 @ 1/8/ each 3
Tuzuk-i-Jahāngīrī (Eng.) Fasc. 1 @ 1/- 1
Wis o Rāmīn, Fasc. 1-5 @ /10/ each 3
Zafarnāmah, Vol. I, Fasc. 1-9, Vol. II, Fasc. 1-8 @ /10/ each ... 10

ASIATIC SOCIETY'S PUBLICATIONS.

1. Asiatic Researches. Vols. XIX and XX @ 10/- each 20
2. Proceedings of the Asiatic Society from 1870 to 1904 @ /8/ per No.
3. Journal of the Asiatic Society for 1870 (8), 18[illegible] (7), 1872 (8), 1873 (8), 1874 (8), 1875 (7), 1876 (7), 1877 (8), 1878 [illegible], 1879 (7), 1880 (8), 1881 (7), 1882 (6), 1883 (5), 1884 (6), 1885 (6), 1886 (8), 1887 (7), 1888 (7), 1889 (10), 1890 (11), 1891 (7), 1892 (8), 1893 (11), 1894 (8), 1895 (7), 1896 (8), 1897 (8), 1898 (8), 1899 (8), 1900 (7), 1901 (7), 1902 (9), 1903 (8), 1904 (16) @ 1/8 per No. to Members and @ 2/- per No. to Non-Members.

N.B.—The figures enclosed in brackets give the number of Nos. in each Volume.

4. Journal and Proceedings, N.S., 1905, to date (Nos. 1–4 of 1905 are out of stock), @ 1-8 per No. to Members and Rs. 2 per No. to Non-Members.
5. Memoirs, 1905, to date. Price varies from number to number. Discount of 25°/₀ to Members.
6. Centenary Review of the Researches of the Society from 1784-1883 3
7. Catalogue of the Library of the Asiatic Society, Bengal, 1884 ... 3
8. Moore and Hewitson's Descriptions of New Indian Lepidoptera, Parts I-III, with 8 coloured Plates, 4to, @ 6/- each 18
9. Kaçmiraçabdāmṛta, Parts I and II @ 1/8/ 3
10. Persian Translation of Haji Baba of Ispahan, by Haji Shaikh Ahmad-i-Kirmani, and edited with notes by Major D. C. Phillott. ... 10

Notice of Sanskrit Manuscripts, Fasc. 1-34 @ 1/- each 34
Nepalese Buddhist Sanskrit Literature, by Dr. R. L. Mitra ... 5

N.B.—All Cheques, Money Orders, &c., must be made payable to the "Treas[urer] Asiatic Society," only.

15-10-08

Books are supplied by V.P.P.

Digitized by Google

BIBLIOTHECA INDICA:
A
COLLECTION OF ORIENTAL WORKS
PUBLISHED BY THE
ASIATIC SOCIETY OF BENGAL.
NEW SERIES, No. 1282.

बौधायन श्रौतसूत्रम् ।

BAUDHĀYANA ŚRAUTA SŪTRAM.

LIBRARY
22 1979
OF CALIFORNIA

EDITED BY
DR. W. CALAND OF UTRECHT.

VOL. II, FASCICULUS IV.

CALCUTTA:
PRINTED AT THE BAPTIST MISSION PRESS,
AND PUBLISHED BY THE
ASIATIC SOCIETY, 1, PARK STREET.
1911.

Digitized by Google

LIST OF BOOKS FOR SALE

AT THE LIBRARY OF THE

ASIATIC SOCIETY OF BENGAL,

No. 1, PARK STREET, CALCUTTA,

AND OBTAINABLE FROM

The Society's Agents—

MR. BERNARD QUARITCH, 11, *Grafton Street, New Bond Street, London*,

AND MR. OTTO HARRASSOWITZ, BOOKSELLER, *Leipzig, Germany*.

---

*Complete copies of those works marked with an asterisk * cannot be supplied—some of the Fasciculi being out of stock.*

BIBLIOTHECA INDICA.

Sanskrit Series.

Advaitachintâ Kaustubha, Fasc. 1–3 @ /10/ each ... Rs. 1
Aitarêya Brâhmaṇa, Vol. I, Fasc. 1-5; Vol. II, Fasc. 1-5; Vol. III, Fasc. 1-5, Vol. IV, Fasc. 1–8 @ /10/ each 14
Aitareyalocana 2
*Anu Bhâshya, Fasc. 2-5 @ /10/ each 2
Aṣṭasâhasrikâ Prajñâpâramitâ, Fasc. 1-6 @ /10/ each ... 3
Âtmatattvaviveka, Fasc. I 0
Açvavaidyaka, Fasc. 1-5 @ /10/ each 3
Avadâna Kalpalatâ, (Sans. and Tibetan) Vol. I, Fasc. 1–8. Vol. II, Fasc. 1–8 @ 1/ each 16
Bâlam Bhaṭṭî, Vol. I, Fasc. 1-2, Vol. II, Fasc. 1, @ /10/ each ... 1
Baudhâyana Srauta Sûtra, Fasc. 1-3; Vol. II, Fasc. 1-3 @ /10/ each 3
Bhâṭṭa Dîpikâ, Vol. I, Fasc. 1-6; Vol. II, Fasc. 1, @ /10/ each ... 4
Bauddhastotrasangraha 2
Bṛhaddevatâ, Fasc. 1-4 @ /10/ each 2
Bṛhaddharma Purâṇa, Fasc. 1-6 @ /10/ each 3
Bodhicaryâvatâra of Çântideva, Fasc. 1-5 @ /10/ each ... 3
Çri Cantinatha Charita, Fasc. 1-3 1
Çatadûṣaṇî, Fasc. 1-2 @ /10/ each 1
Catalogue of Sanskrit Books and MSS., Fasc. 1-4 @ 2/ each ... 8
Çatapatha Brâhmaṇa, Vol. I, Fasc. 1-7; Vol. II, Fasc. 1-5 Vol. III, Fasc. 1-7; Vol. V, Fasc. 1–4 @ /10/ each ... 14
Ditto Vol. VI, Fasc. 1-3 @ 1/4/ each 3
Ditto Vol. VII, Fasc. 1-5 @ /10/ 3
Çatasâhasrikâ-prajñâpâramitâ, Part I, Fasc. 1-14 @ /10/ each ... 8
*Caturvarga Chintâmaṇi, Vol. II, Fasc. 1-25; Vol. III, Part I, Fasc. 1-18, Part II, Fasc. 1–10; Vol. IV, Fasc. 1–6 @ /10/ each ... 36
Ditto Vol. IV, Fasc. 7-8, @ 1/4/ each ... 2
Ditto Vol. IV, Fasc. 8-9 @ /10/ ... ...
Çlokavartika, (English), Fasc. 1–7 @ 1/4/ each 8
*Çrauta Sûtra of Çânkhâyana, Vol I, Fasc. 1-7; Vol. II, Fasc. 1–4; Vol. III, Fasc. 1–4; Vol. 4, Fasc. 1 @ /10/ each ... 10
Çrî Bhâshyam, Fasc. 1–3 @ /10/ each 1
Dâna Kriyâ Kaumudî, Fasc. 1–2 @ /10/ each 1
Gadadhara Paddhati Kâlasâra, Vol. 1, Fasc. 1-7 @ /10/ each ... 4
Ditto Âcârasâra, Vol. II, Fasc. 1-4 3
Gobhilîya Gṛhya Sûtra, Vol. I, @ /10/ each 3
Ditto Vol. II, Fasc. 1-2 @ 1/4 /each ... 2
Ditto (Appendix) Gobhila Parisista 2
Ditto Grihya Sangraha 0
Haralata 1
Karmapradiph, Fasc. 1 1
Kâla Viveka, Fasc. 1-7 @ /10/ each 4
Kâtantra, Fasc. 1-6 @ /12/ each 4
Kathâ Sarit Sâgara, (English) Fasc. 1-14 @ 1/4/ each ... 17
Madana Pârijâta, Fasc. 1-11 @ /10/ each 6
Mahâ-bhâsya-pradîpodyota, Vol. I, Fasc. 1-9; Vol. II, Fasc. 1-12; Vol. III, Fasc. 1–10 @ /10/ each 19
Ditto Vol. IV, Fasc. 1 @ 1/4 1
Manuṭîkâ Saṅgraha, Fasc. 1-3 @ /10/ each 1
Mârkaṇḍeya Purâṇa, (English) Fasc. 1-9 @ 1/- each 9
*Mîmâṁsâ Darçana, Fasc. 10-19 @ /10/ each 6
Nyâyavârtika, Fasc. 2-6 @ /10/ each 3

Digitized by Google

त्पराङावर्तते प्रतिप्रस्थाताभ्येनमाह्वयते ब्राह्मणाच्छंसी। प्रत्याह्वयते प्रतिप्रस्थाता। शंसति। प्रतिगृणाति। प्रसिद्धमुक्थं प्रतिगीर्य प्राङेत्योपच्छत एतं ब्राह्मणाच्छंसिचमसमनूपयन्ते चमसानध्वर्युराश्रावयत्यो श्रावयास्तु श्रौषडुक्थशा यज सोमानामिति। वषट्कृतानुवषट्कृते द्विर्जुहोति। तथैव द्विर्द्विः सर्वांश्चमसाञ्जुहत्यथ भक्षैः प्रत्यञ्च आद्रवन्त्यनुसवनभक्ष इन्द्रेण पीतस्येति। ब्राह्मणाच्छंसिचमसमेवैते भक्षः समुपहूय भक्षयन्ति। यथाचमसं चमसान्हिन्व म इत्यात्मानं प्रत्यभिमृशन्ते। आप्याययन्ति चमसांस्त्वंभक्षा मार्जयन्ते। ऽथ प्राङायन्नाह ॥ ८ ॥

अच्छावाकस्य चमसमनून्नयध्वमुपेतः सोमं प्रभावयेत्यच्छावाकचमसमेव प्रथममुन्नयन्ति। यथोपपादमितरान्संस्तुत्यो-त्तरवेद्यां सर्वाद्यन्त्यधाय उपसृज्य बर्हिषी आदाय वाचंयमः प्रत्यङ् हुत्वा स्तोत्रमुपाकरोति। स्तुवते। ऽच्छावाकायैपोत्तमेति प्राङ्ङच्छावाकस्य काकात्पराङावर्तते प्रतिप्रस्थाताभ्येनमाह्वयते ऽच्छावाकः। प्रत्याह्वयते प्रतिप्रस्थाता। शंसति। प्रतिगृणाति। प्रसिद्धमुक्थं प्रतिगीर्य प्राङेत्योपच्छत एतमच्छावाकचमसमनूपयन्ते चमसानध्वर्युराश्रावयत्यो श्रावयास्तु श्रौषडुक्थशा यज सोमानामिति। वषट्कृतानुवषट्कृते द्विर्जुहोति। तथैव द्विर्द्विः सर्वांश्चमसाञ्जुहत्यथ भक्षैः प्रत्यञ्च आद्रवन्त्यनुसवनभक्ष इन्द्रेण पीतस्येत्यच्छावाकचमसमेवैते भक्षः समुपहूय भक्षयन्ति। यथाचमसं चमसान्हिन्व म

इत्यात्मानं प्रत्यभिमृशन्ते । नाप्याययन्ति चमसान्सर्वभक्षा भक्षयन्ते । होत्रे प्रथमꣳ स्तुवते ऽथ मैत्रावरुणायाथ ब्राह्मणाच्छꣳसिने ऽथाच्छावाकायाध्वर्युः पूर्वाभ्यां चमसगणाभ्यां प्रचरति प्रतिप्रस्थातोत्तराभ्याꣳ । सर्वं ऐन्द्रा[1] पञ्चदशचमसगणा[1] भवन्तीति[2] न्या[2] चयं[2] प्रथमश्चतुःपर्यायः[3] संतिष्ठत । एवमेव द्वितीयः संतिष्ठत । एवं तृतीयो । मध्यमेन पर्यायेण शिल्पवन्त इव चरन्त्येव विनिःसृप्य राथंतराय संधये प्रसर्पन्ति । ॥ ९ ॥

संप्रसृप्तान्विदित्वाध्वर्युः प्राज्ञायनाह होतृचमसमनून्नयध्वमुखेतः सर्वत्र एव राजानमुन्नय मातिरीरिच इति । होतृचमसमेव प्रथममुन्नयन्ति । यथोपपादमितरान्सर्वत्र एव राजानꣳ समुन्नीयोत्तरवेद्याꣳ सꣳसादयन्ति । [4]तदेतमाश्विनमुपस्तीर्णाभिघारितꣳ सह सꣳसादयन्त्यथाप[5] उपस्पृश्य बर्हिषी आदाय वाचंयमः प्रत्यङ् द्रुत्वा स्तोत्रमुपाकरोति । स्तुवते । होम एषोत्तमेति प्राङ्होतुः कालात्पराङावर्तते ऽध्वर्युरभ्येनमाह्वयते होता । प्रत्याह्वयते ऽध्वर्युः । शꣳसति । प्रतिगरणात्या

१ Thus Be 12, M (the last however चमसा॰); HTr DU om चमसा ; Be B चमसगणाभ्यां प्रचरति i. s. o. सर्वं ... भवन्तीति न्या ।

२ भवंतीतीन्या चयं M ; भवंतीतीन्यायं U ; the other MSS. om. इति न्या or न्या alone.

३ चतुष्पर्यायः M.

४ Thus Tr ; तदेतदाश्वि॰ all the other MSS. ; after आश्विनम् some of the MSS. have पुरोडाशम् here and *infra* (p. 291, 4 and 6).

५ Thus MTr Be DHU ; सꣳ om. Be 12 B.

Digitized by Google

महांहनाच्छ्यते[१] । परःसहस्रमाश्विनं भवतीति ब्राह्मणं । अधिद्रुत्य प्रतिगीर्य प्राञ्जयाथाश्विभ्यां तिरोअह्नियानाꣳ सोमानामनुब्रूहीति । प्राङ्ख्योदच्छत एतꣳ होतृचमसमनूच्छन्त आश्विनमुपोदच्छन्ते चमसानथाश्रावयत्यो श्रावयास्तु श्रौषडश्विभ्यां तिरोअह्नियान्सोमान्प्रस्थितान्प्रेष्येति । वषट्कृते जुहोति । [२]तदेतमाश्विनमुपस्तीर्णाभिघारितꣳ सह जुह्वति । वषट्कृतानुवषट्कृते द्विर्जुहोति । तथैव द्विर्द्विः सर्वाꣳश्चमसाञ्जुह्वत्यथ भक्षैः प्रत्यञ्च आद्रवन्त्यनुसवनभक्षो ऽश्विभ्यां पीतस्येति । तस्य भक्षः सर्वगणस्य ते सर्वगणाश्विभ्यां पीतस्य तिरोअह्नियस्य सोमस्य सुषुतस्य मधुमत उपहूतस्योपहूतो भक्षयामीति । होतृचमसमेवैते त्रयः समुपहूय भक्षयन्ति । यथाचमसं चमसान्भिन्व म इत्यात्मानं प्रत्यभिमृशन्ते । नाप्याययन्ति चमसान्सर्वभक्षा मार्जयन्ते । ऽथ संप्रैषमाहाग्नीदौपयजानङ्गारानाहरोपयष्टरुपसीद ब्रह्मन्प्रस्थास्यामः समिधमाधायाग्नीदग्नीन्सकृत्सकृत्संमृड्ढीत्याहरन्त्येतानाग्नीध्र आद्दौपयजानङ्गाराꣳस्तान्दक्षिणेन होतारं निवपत्युपसीदत्युपयष्टा गुदतृतीयैश्चैतानि गुदतृतीयान्येकादशधा कृत्वोपयष्टोपयजति । समानमत ऊर्ध्वꣳ संतिष्ठते ऽतिरात्रः । ॥ १० ॥ प्रथमः ॥

---

१ Thus HD; महोहना० Tr; महामहा० M; महानाम्ना० Be 12 B; महानाम्ना० U; महानाम्नात् Be; my copy of the vivaraṇa (Burnell MSS.) reads: चाद्यचाहनात्, the words are explained thus: यावदिह चातपो भवति तावत्।

२ तदेतदा० all the MSS. exc. Tr.

व्यतिषजेदितरामिति व्यतिषजति ' स एवमेव[1] दक्षिणमुत्तरमित्यष्टौ यूपान्व्यतिषजति ' ॥ १२ ॥

अथ वै भवति यं कामयेत प्रमायुकः स्यादिति गर्तमितं तस्य मिनुयादुत्तरार्ध्यं वर्षिष्ठमथ ह्रसीयाꣳसमित्युत्तरार्ध्यमथ वर्षिष्ठं मिनोति दक्षिणार्ध्यꣳ ह्रसीयाꣳसमेषा वै गर्तमितस्यैवं मिनोति ताजक्प्रमीयत इति ब्राह्मणं ' दक्षिणार्ध्यं वर्षिष्ठं मिनुयात्सुवर्गकामस्याथ ह्रसीयाꣳसमिति दक्षिणार्ध्यमथ वर्षिष्ठं मिनोत्युत्तरार्ध्यꣳ ह्रसीयाꣳसमाक्रमणमेव तत्सेतुं यजमानः कुरुते सुवर्गस्य लोकस्य समष्ट्या इति ब्राह्मणमथ वै भवति यदेकस्मिन्यूपे द्वे रशने परिव्ययति तस्मादेको द्वे जाये विन्दते ' यन्नैकाꣳ रशनां द्वयोर्यूपयोः परिव्ययति तस्मान्नैका द्वौ पती विन्दत इति ब्राह्मणमथ वै भवति यं कामयेत स्त्र्यस्य जायेतेत्युपान्ते तस्य व्यतिषजेदित्युपान्ते तस्य व्यतिषजति ' स्त्र्येवास्य जायत इति ब्राह्मणमथ वै भवति यं कामयेत पुमानस्य जायेतेत्यान्तं तस्य प्रवेष्टयेदित्यान्तं तस्य प्रवेष्टयति ' पुमानेवास्य जायत इति ब्राह्मणमथैतमुपशयं दक्षिणतो न्यस्यति तूष्णीꣳ ' सर्वांस्तान्यूपाननुमृश्याग्नेयमेवाग्निष्ठ उपाकरोति ॥ १३ ॥

सारस्वतीमुत्तरे सौम्यं दक्षिणे पौष्णमुत्तरे बार्हस्पत्यं दक्षिणे वैश्वदेवमुत्तर ऐन्द्रं दक्षिणे मारुतमुत्तर ऐन्द्राग्नं दक्षिणे सावित्रमुत्तरे वारुणं दक्षिणे ' ऽथ वै भवति यदि

---

१ एव om. M ; एवम् om Ms.

कामयेत यो ऽवगतः सो ऽपरुध्यतां यो ऽपरुद्धः सो ऽवगच्छत्वित्यैन्द्रस्य लोके वारुणमालभेत वारुणस्य लोक ऐन्द्रं। स एवावगतः सो ऽपरुध्यते यो ऽपरुद्धः सो ऽवगच्छतीति ब्राह्मणमथ[1] वै[1] भवति[1] यदि कामयेत प्रजा मुह्येयुरिति पशून्व्यतिषजेदिति। पशूनेवास्य[2] व्यतिषजति। प्रजा एव मोहयतीति ब्राह्मणमथ वै भवति यदभिवाहतो ऽपां वारुणमालभेत प्रजा वरुणो गृह्णीयादिति दक्षिणत उदञ्चमालभते ऽपवाहतो ऽपां प्रजानामवरुणग्राहायेति ब्राह्मणमथैतस्मिन्नुपाश्ये मनसैव यं द्वेष्टि तमुपाकरोति। यदु वै न द्वेष्यास्ते पशुरित्यनुदिशति। समानं कर्मा पर्यग्निकरणात्पर्यग्निकृतानामेतेषां पशूनां पञ्च दक्षिणार्धान्पशूनुपाकृत्यैव स्थापयित्वा द्वावुपातिनीयायेतरैर्व्यतिषजत्यथ पर्यग्निकृतैः पशुभिरुदञ्चः प्रतिपद्यन्ते। तेषां वारुण उत्तरार्ध्यो भवत्याग्नेय उपचारत। आग्नेयमेवाध्वर्युर्वपाश्रपणीभ्यामन्वारभते पृथगितरान्परिकर्मिण उदञ्चो नयन्त्यनुपूर्वमव्यतिषजन्तस्तेषां प्रसिद्धं वपाभिश्चरित्वा प्रसर्पन्ति प्रातःसवनाय। तद्वृथा संतिष्ठते। ॥ १४ ॥ द्वितीयः ॥

अथ वै भवतीष्टं वपया भवत्यनिष्टं वशयाथ पात्नीवतेन प्रचरतीति। स यथैकादशिन्या पशुबन्ध्यस्येष्टं[3] वपया भवत्यनिष्टं वशया तन्न्यायेन गार्हपत्यमौपसदायां वेद्यां

१ अथ वै भ॰ om. Be BU.

२ एव om MH Ms.

३ ॰बंधस्ये॰ MH.

Digitized by Google

साम्नयजुर्हरतीदमेव प्रसिद्धं पौरोडाशिकं। त्रिर्यजुषा तूष्णीं चतुर्थं। पूर्वं परिग्राहं परिगृह्णाति। करणं जपत्युद्धत्युद्धतादाग्नीध्रस्त्रिर्हरति। यदाग्नीध्रस्त्रिर्हरत्यथापरेण[1] गार्हपत्यं पात्नीवतस्य यूपावटं परिलिखति। समानं कर्मा स्रुचाꣳ सादनात्सादयित्वा स्रुचो ऽग्रेण गार्हपत्यं पात्नीवतमुच्छ्रित्य तस्मिꣳस्त्वाष्ट्रꣳ साण्डमजं पशुमुपाकरोति[2]। तं पर्यग्निकृतमुत्सृज्याज्येन सꣳस्थां करोत्यथ चतुर आज्यस्य गृह्णान आह त्वष्ट्र इत्युपाꣳश्वनुब्रूहीत्युच्चैरत्याक्रम्याश्राव्याह त्वष्टारमित्युपाꣳशु यजेत्युच्चैर्वषट्कृते जुहोतीति नु वपायाः प्रतिचरति। चतुर एवाज्यस्य गृह्णान आह त्वष्ट्र इत्युपाꣳश्वनुब्रूहीत्युच्चैः। ॥ १५ ॥

अत्याक्रम्याश्राव्याह त्वष्टारमित्युपाꣳशु यजेत्युच्चैर्वषट्कृते जुहोतीति नु पशुपुरोडाशस्य प्रतिचरति। चतुर एवाज्यस्य गृह्णान आहाग्नय इत्युपाꣳश्वनुब्रूहीत्युच्चैरत्याक्रम्याश्राव्याहाग्निमित्युपाꣳशु यजेत्युच्चैर्वषट्कृत उत्तरार्धपूर्वार्धे ऽतिहाय पूर्वा आहुतीर्जुहोतीति नु पशुपुरोडाशस्य स्विष्टकृतः प्रतिचरति। चतुर एवाज्यस्य गृह्णान आह त्वष्ट्र इत्युपाꣳश्वनुब्रूहीत्युच्चैरत्याक्रम्याश्राव्याह त्वष्टारमित्युपाꣳशु यजेत्युच्चैर्वषट्कृते जुहोतीति नु हविषः प्रतिचरत्याज्येन दिग्मो जुहोति। पृषदाज्येन वनस्पतिमाज्यस्य स्विष्टकृतमाज्यस्येडामवद्यति। पृषदाज्येनानू-

१ यदाग्निध्रस्त्रिर्हरति found in MUH only.

२ पशुम् om. Ms.

वाचाभ्यजति। सो ऽथैव पत्नीः संयाज्याभ्यैव समिष्टयजूंषि[1] जुहोति। संतिष्ठते पात्नीवतः। ॥ १६ ॥ तृतीयः ॥

अथ वै भवति यो ऽग्न्याधेयेन नर्ध्नोति स पुनराधेयमाधत्ते यो ऽग्निं चित्वा नर्ध्नोति स पुनश्चितिं चिनुत इत्यग्निं चित्वा व्यानशो द्वादशेष्टका उपकल्पयते ऽष्टौ चानुचीनतस्रो लोकंपृणाः। स एष[2] होत्तरवेदिर्धिष्ण्यावारितोपह्युत्तसंभारा[2] भवति तद्वाभ्यामात्मन्यग्निं[3] गृह्णीते मयि गृह्णाम्यग्रे अग्निं यो नो अग्निरिति। स्वयंचितिं जपति यास्ते अग्ने समिधो यानि धामेति। एतमध्वमभिमृश्याष्टौ चानुचीरुपदधाति येनर्षय-स्तपसा सत्रमासतेति। चतस्रो लोकंपृणा लोकं पृण छिद्रं पृणेत्येव चितिक्लृप्ताभिमृशति चित्तिमचित्तिं चिनवद्वि विद्वा-न्चित्वाग्नेभ्या गायत्रैवां चितिमभिमृश्य द्वाभ्यामवद्रवति वाजम् आवत्याचक्षा इति। तायते पशुबन्धो वाग्निष्टोमो वा। स प्रयातः संतिष्ठते। ॥ १७ ॥ चतुर्थः ॥

[4]उर्वरो गृहपतिर्धृतराष्ट्र ऐरावतो ब्रह्मा दत्तस्तापसो होता पृथुश्रवा दूरेश्रवा[5] उद्गाता ग्लावजानमावस्य[6] प्रस्तोतृप्रति-

---

१ ॰इषकुर् MH.

२ Thus M; तपेत्तोत्त॰ D; वचारोत्त॰ the other MSS.

३ Thus M Be B U; ॰ांचवग्निं or ॰ाज्ञग्निं Be 7 D.

४ On the following cp. Baudh. gṛhs. III, adhy. 10 and Pañc br. XXV, 15.

५ Found in M only.

६ Thus M; भाव॰ or जाव॰ the other MSS.

हर्तारौ शितिपृष्ठो मैत्रावरुणस्तक्षको वैशालेयो ब्राह्मणाच्छꣳ-
स्युपरीतिस्तार्क्ष्यः[1] सदस्यः शिखातिशिखौ नेष्टापोतारावरुणो[2]
ऽग्नो[2] ऽच्छावाकश्चक्रपिशङ्गावाग्नीध्रावजिरो[3] माहेयः सुब्रह्मण्यो
ऽर्बुदो ग्रावस्तुदाशश्च उन्नेता पशुको[4] ध्रुवगोपः कौतुस्तावध्वर्यू[5]
धरिमेजयश्च जनमेजयश्चैते वै सर्पाणाꣳ राजानश्च राज-
पुत्राश्च खाण्डवे प्रस्थे सत्त्रमासत पुरुषरूपेण विषकामास्तेषां
दृग्लोमान्यन्यान्यशान्यासन्दादृग्लोमान्यन्यान्याजीयन्त[6] य
स यद्ददशेति तस्मात्सर्पा दꣳदशूका दꣳदशूवीर्याश्चैत-
हौक्य[7] पौचीयं पञ्चव्यꣳ सत्त्रं य एतदुपयन्ति नैनान्सर्पा
हिꣳसन्ति ॥ १८ ॥ पञ्चमः ॥

तपो गृहपतिरिरा पत्नी ब्रह्मैव ब्रह्मा सत्यꣳ होतामृत-
मुद्गाता भूतं भविष्यच्च प्रस्तोतृप्रतिहर्तारावृतं मैत्रावरुण ऋतवः
सदस्या आर्तवा उपगातारस्तेजो ब्राह्मणाच्छꣳसी यज्ञो ऽच्छा-

---

१ Thus (उपरीतिस्) M; चपरिमिस् Be; चपरिवोस् U; चपच[...] Be 7 D; चपरिवोयंस् B.

२ Uncertain; °वरुणोऽग्ना M; °वरुणाग्नो Be Be 7; वरुणाग्नो BUD; the Pañc. br. has वरुण चाक्षुः।

३ Thus M; °चक्रपिशं° Be 7 D; °चक्रपिशंग ग्राग्नीध्रोऽजिरो B Be U.

४ Thus M; उन्नेतापशुको Be (thus also the MSS. of the Gṛhya) [...] °पशुकोपो Be 7 BUD.

५ Thus M; कौतस्ताव° BU; कौत्साव° Be; क्रौंचस्ताव° Be 7 D.

६ °शान्यासन्दा ... न्यन्यान्य° om. M.

७ Thus M; हंसबौधा° Be; हंसबौधा° U; रंसबौधा° B; in Be 7 the whole passage is left out.

वाक्चित्तिश्चापचितिश्च नेष्टापोतारावग्निरेवाग्नीध्रो वायु-ग्रह्यो भगो ग्रावस्तुदुर्गुन्नेता वसं[1] भुवगोपो[1] मनो ऽध्वर्यु-र्युः प्रतिप्रस्थाता वेदिस्त्राग्रणया[2] चेष्टवाशौ दिष्टिर्विशास्ता[2] मृत्युः शमिता । ते वै विश्वसृजः प्रथमाः सत्रमासां चक्रिरे । तेषाᳲ शतᳲ समा दीक्षा आसन्नृतमुपसदः सत्यं प्रसुता-वदेषाभिवदति विश्वसृजः प्रथमाः सत्रमासत सहस्रसमं प्रसुतेन यन्तः । ततो मिषदमिषत्संबभूव ततो ह जज्ञे भुवनस्य गोपा इत्यग्निष्टोमैर्वाव[4] ते[4] तदीयुस्तदेतद्धुमयनं[4] प्रजनं[5] यदग्निष्टोमाः । ॥ १९ ॥ षष्ठः ॥

कुण्डपायिनामयनेनैष्यन्तो दीक्षन्ते । पञ्च सर्वतो धुरा-वेणामिषन्नेव प्रस्राता संवत्सरदीक्षा । समानं कर्मारम्भणीया-दारम्भणीयेनेष्टेन्द्रं पयो दोहयति सांनाय्यस्य वाहता तूष्णीं चाय वसतीवरीः परिहृत्याविशिष्य[6] पयांस्युपवसन्त्यथ[6] श्वो भूत आमावास्येन हविषा यजन्ते । तेन यन्त्यष्टाविंशति-

---

१ Thus M; वसंभु° U; वसभु° Be B; वसद्भु° Be 7 D.

२ Thus MUDBe 7; वेदीवाग्रनया Be; वेदिस्त्राग्रनयो B.

३ विविद् i.s.o. दिहिद् M, but cp. Pañc. br. XXV. 18. 4.

४ Thus M (reading only तदिषु° i.s.o. तदीयु°); °मैवांवचेतविदिरुदे° Be; °मैवांवचेतविदिरुदे° BU. °मैवांवस्तेभिरियुरुदे° D; °मैवांवत्वेभियुरुदे° Be 7.

५ Uncertain; प्रजन M; प्रजनि all the other MSS.

६ Thus corrected with some hesitation; cp. Karmānta-Sūtra III. 25; पयांहृत्य पयांसि विशिष्य M, but all the other MSS. पयांहृत्य-विशिष्य पयांस्यु° ।

रहानि । प्रायणीयारम्भणीयौ । स मासः[1] । पौर्णमासहविर्भिर्यन्ति मासं । वैश्वदेवहविर्भिर्यन्ति[2] मासं । वरुणप्रघासहविर्भिर्यन्ति मासꣳ । साकमेधहविर्भिर्यन्ति मासꣳ । शुनासीरीयहविर्भिर्यन्ति पञ्चविꣳशतिरहान्यभित्त्रयः[3] परः-सामानः । स मासो । वैषुवतं । त्रयो ऽर्वाक्सामानो । ऽथ विश्वजित्त्रयस्त्रिꣳशेन[4] यन्ति मासं । त्रिणवेन यन्ति मासमेकविꣳशेन यन्ति मासꣳ । सप्तदशेन यन्ति मासं । पञ्चदशेन यन्ति मासं । त्रिवृता यन्ति द्वादशाहानि । गोआयुषी । तानि चतुर्दश । एतावूर्ध्वं वैषुवतात्तान्यष्टादश । दशरात्रो महाव्रतं चातिरात्रश्च । स मासः । ॥ २० ॥

अथैषां कुण्डानि । ते सर्व एव त्रिवेद्यो[5] भवन्ति तदेषां कुण्डमथ यदन्योऽन्यमनुपरिसर्पं[6] याजयन्ति तदेषां कुण्डमथ यदस्वकैश्चमसैर्भक्षयन्ति[7] तदेषां कुण्डं । तेषां य एव ब्रह्मा स एव[8] ब्राह्मणाच्छꣳसी स पोताथ यो होता स एव मैत्रावरुणः यो ऽच्छावाको । ऽथ य उद्गाता स एव

---

१ Thus MB Be; Be 7 D present here a lacuna of two akṣaras.

२ UBD here and *infra* each time यांति i.s.o. यन्ति ।

३ षड्विꣳशति• i.s.o. पञ्चविꣳशति• M.

४ After विश्वजित् Be ins. मासं ।

५ Thus M; •वेदसो the other MSS.

६ Thus M; परि om. all the other MSS.

७ स्वस्वकै• M.

८ एव om. all exc. M.

Digitized by Google

प्रस्तोता स प्रतिहर्ता च यो ऽध्वर्युः स एव प्रतिप्रस्थाता स नेष्टा च स आग्नीध्रः स एव ग्रावस्तुत्[1] सुब्रह्मण्यः स उन्नेता चोपनिषद्वो[2] ऽग्निश्चतुर्होता[3] वायुः पञ्चहोता चन्द्रमाः षड्ढोता प्रजापतिः सप्तहोतादित्यो नवहोतैता वै देवता एतेनायनेनायꣳस्ता वै ता आर्ध्नुवन्त्सुवर्गं[3] लोकमायन्य एवं विद्वाꣳस एतेनायनेन यन्त्यृध्नुवन्त्येव सुवर्गं[4] लोकं यन्ति । ॥ २१ ॥ सप्तमः ॥

उत्सर्गिणामयनेनैष्यन्तो दीक्षन्ते । तेषामियमेव प्रज्ञाता संवत्सरदीक्षा । समानं कर्म पृष्ठ्यात्षडहात्पृष्ठ्येन षडहेनेहैन्द्रं पयो दोक्ष्यति सांनाय्यस्य वात्सता तूष्णीं वा च वसतीवरीः परिहृत्याविप्रिय[5] पशूनुपवसथ्ये प्रातरहरहरुत्थाय[6] ज्योतिष आयतने प्राजापत्यं पशुमालभन्ते । तस्य पशुपुरोडाशमनुवर्तते ऽग्नये वसुमते पुरोडाशो ऽष्टाकपालो । माध्यंदिन इन्द्राय मरुत्वते पुरोडाशमेकादशकपालं निर्वपन्त्यैन्द्रꣳ सांनाय्यꣳ । सा दिवाविरिष्टिः संतिष्ठते । ऽथैतदैन्द्रꣳ सांनाय्यꣳ समुपहूय भक्षयन्त्यथापराह्णे वैश्वदेवं द्वादशकपालं निर्वपन्ति वैश्वदेवं चरुं । ताभ्यां चरन्ति देवताप्रकृतीभ्यामिडान्ताभ्या-

---

१ All MSS. exc. M ins. एव ।

२ Thus M Be 7; •निषद्ग्नि• Be B U; •निषद्योग्नि• D.

३ स्वर्गं all.

४ सुवर्गं M; स्वर्गं the other MSS.

५ परिहृत्यवि• MSS., cp. *supra* p. 299, n. 6.

६ अहरहर् om. Be 7 D.

Digitized by Google

मेध[1] पशुना चरति मनोताप्रभृतिनेडान्तेनाथानूयाजैश्चरित्वा
प्रदक्षिणमावृत्य प्रत्यङ्ङाद्रुत्य पत्नीः संयाज्य प्राङेत्य ध्रुवा-
माप्याय्य वसतीवरीः परिहृत्य यथाऽस्थि विभिद्योपवसन्त्यथ
श्वो भूते गवा प्रतिपद्यन्ते । त एवमेवैतेन[2] यन्तो[2] मासिमास्यु-
त्सृजन्तः पञ्च ज्योतींष्युत्सृजन्त्यथायुत आष्टम्याश्चतुरश्च[3] पञ्च- ९
विंशस्तोमानुत्सृजन्त्येकं[4] च ज्योतिरथ श्वो भूत आयुषैव
प्रतिपद्यन्ते । ॥ २२ ॥ अष्टमः ॥

तपश्चितामयनेनैष्यन्तो[5] दीक्षन्ते । तेषामियमेव प्रज्ञाता-
ग्निदीक्षा । समानं कर्म संनिवापात्प्रसिद्धः संनिवापो ऽथ
प्रायणीयेन चरति । प्रायणीयेन चरित्वा पदेन चरति । पदेन १०
चरित्वा राजानं क्रीत्वोपातिथ्यं निर्वपत्यातिथ्येन प्रचर्याथैतां
पञ्चहविषमिष्टिं निर्वपत्याग्नेयमष्टाकपालमैन्द्रमेकादशकपालं
वैश्वदेवं द्वादशकपालं बार्हस्पत्यं चरुं वैष्णवं त्रिकपालमिति ।
तया षडहदेवेद्धा माद्रियेरन्नित्येक आहुरेतयैवाहरहः संवत्सरं
यजेरन्नित्येके । प्रथमे ऽहन्सर्वैरन्वहमेकैकया[6] षष्ठे ऽहन्सर्वैर- ११
न्वहमेकैकया । प्रथमे द्वादशाहे ऽग्निं चिन्वीतेत्येक आहुस्तु

१ ॰प्रभृतीभ्या॰ MD Be 7; ॰प्रभृतिभ्या॰ Be BU.

२ Thus M; एवमेवोद्यन्तो Be BU; एवतोद्यन्तो Be 7 D.

३ च om. M.

४ Thus M; पञ्चविंशत्याऽऽद्यो॰ the other MSS.

५ ताप॰ all exc. M.

६ सन्नायवैं॰ M.

वा आह[1] रुद्रो वा एष यदग्निः। स एतर्हि जातो यर्हि सर्वश्चितः। स यथा वत्सो जात स्तनं प्रेप्सत्येवं वा एष एतर्हि भागधेयं प्रेप्सति। संवत्सर एवैवास्यातो भागधेयं। नैतस्याग्नां यनेयादित्युत्तमे[2] द्वादशाहे ऽग्निं चिन्वीतेत्येतदपरम्। ॥ २३ ॥

अथातो ऽहरहश्चयनस्यैव मीमांसा। सर्वचितिं निखिदल्यथ लोकंपृणा इष्टका उपदधत्यासमेति। मासि तथाद्वैतं कुरुते। द्वितीये मासे पुरीषचितिः। सर्वचितिं निखिदल्यथ सुषिरो ऽनु प्रकारं[3] मासमेति। मासि तथाद्वैतं कुरुते। तृतीये मासे वपुच्छचितिश्चतुर्थे[4] मासे पुरीषचितिः। पञ्चमे मासे मध्यमा चितिः। षष्ठे मासे पुरीषचितिः। सप्तमे मासे वपुच्छचितिरष्टमे[5] मासे पुरीषचितिर्नवमे मासे सप्त स्तम्भ्या उपदधात्या नवभेष्टकाभ्यो। दशमे मासे[6] पुरीषचितिरेकादशे मासे[6] संयच्च प्रचेताश्चेत्येता उपदधात्या विकर्णीद्वादशस्य[7]

---

१ आह all exc. M.

२ My conjecture; between ०ग्नां and नेया० M has a blank of one akṣara; all the other MSS. ०ग्नांजनेया०।

३ Thus Be BU; सुषिरामुप्र० M Be 7 D.

४ Thus M; (मासे)ऽपुच्छंचितिः Be; व्यपुंछचितिः the other MSS. I am not sure about the meaning of वपुच्छ; it occurs repeatedly *infra* and once in the Karmānta. Perhaps वपुच्छ "without the tail (of the Agni)."

५ Thus M; वंष्ट० the other MSS.

६ मासि all exc. M.

७ Thus M D U; विकर्णेंद्वा० B Be 7; विकर्णींद्वा० Be.

Digitized by Google

मासस्याष्टाविंशतिरहानि पुरीषमेकान्नविंशे प्रतद्धीयत । यो भूते वसोर्धारा । ॥ २४ ॥

अथोपरिष्टान्मासमित्याचक्षते । मासस्य प्रथमेऽहन्यग्निचितिं निदधन्ति यतथादेवतं[1] यजूदोहसं । [2]मासं प्रवर्ग्योपसदौ यन्ति । द्वितीयस्य मासस्य प्रथमेऽहन्पुरीषचितिः । अग्निचितिं निदधन्ति यतथादेवतं यजूदोहसं । द्वितीयं[3] मासं प्रवर्ग्योपसदौ यन्ति । तृतीयस्य मासस्य प्रथमे [4]ऽहन्यग्निचितिश्चतुर्थस्य मासस्य प्रथमेऽहन्पुरीषचितिः । पञ्चमस्य मासस्य प्रथमेऽहन्मध्यमा चितिः । षष्ठस्य मासस्य प्रथमेऽहन्पुरीषचितिः । सप्तमस्य मासस्य प्रथमेऽहन्यग्निचितिरष्टमस्य मासस्य प्रथमेऽहन्पुरीषचितिर्नवमस्य मासस्य प्रथमेऽहन्यग्न स्वयमातृण्या उपदधात्या नवमेष्टकाभ्यो । दशमस्य मासस्य प्रथमेऽहन्पुरीषचितिरेकादशस्य मासस्य प्रथमेऽहन्संयच्च प्रचेतावेतेता उपदधात्या विकर्णीं द्वादशस्य मासस्य प्रथमेऽहन्पुरीषचितिरेकान्नविंशे प्रतद्धीयत । यो भूते वसोर्धारा । ॥ २५ ॥

अथ पुरस्तान्मासमित्याचक्षते । मासं प्रवर्ग्योपसदौ यन्ति ।

---

1 Thus all, not °देवताम् ; also *infra*.

2 Be 7 BU ins. द्वितीयं ।

3 om. B.

4 The whole passage from ह्न्यग्° up to मासमोजन्ते (p. 305, 4) left out by all exc. M.

Digitized by Google

मासस्योत्तमे ऽहन्प्रथमचितिं निस्तिष्ठन्ति सतथादेवतꣳ ससूददोहसं। द्वितीयं मासं प्रवर्ग्योपसद्भ्यां यन्ति। द्वितीयस्य मासस्योत्तमे ऽहन्पुरीषचितिः। सद्यश्चितिं निस्तिष्ठन्ति सतथादेवतꣳ ससूददोहसं। तृतीयस्य मासस्योत्तमे ऽहन्पक्षचितिं चतुर्थस्य[1] मासस्योत्तमे ऽहन्पुरीषचितिः। पञ्चमस्य मासस्योत्तमे ऽहन्मध्यमा चितिः। षष्ठस्य मासस्योत्तमे ऽहन्पुरीषचितिः। सप्तमस्य मासस्योत्तमे ऽहन्पक्षचितिरष्टमस्य[2] मासस्योत्तमे ऽहन्पुरीषचितिर्नवमस्य मासस्योत्तमे ऽहन्सप्त स्कन्ध्या उपदधात्या नक्षत्रेष्टकाभ्यो। दशमस्य मासस्योत्तमे ऽहन्पुरीषचितिरेकादशस्य मासस्योत्तमे ऽहन्संयच्च प्रचेताश्चैता उपदधात्या विकर्णीद्वादशस्य[3] मासस्याष्टाविꣳशे ऽहन्पुरीषमेकान्नत्रिꣳशे[4] शतरुद्रीयꣳ। श्वो भूते वसोर्धारा। ॥ २६ ॥

अथात उत्थानानामेव सौमाꣳ साभिजितेष्टोत्तिष्ठेयुरित्येतद्ब्राह्मणसंपन्नमपि वाभिजितेष्ट्वायैताꣳ[5] सवनेष्टिं [6]निर्वपन्त्याग्नेयमष्टाकपालमैन्द्रमेकादशकपालं वैश्वदेवं द्वादशकपाल-

---

1 Thus M Be 7; चम्बंद० B; चम्बंद० Be.

2 Thus M Be 7; चम्बंदचि० B; चम्बंदचि० Be.

3 Thus M; the other MSS. as *supra* (p. 303, 13).

4 ०विꣳशे Be 7 D.

5 Thus MU; ०ष्ट्वायैताꣳ B Be; ०ष्टायैतां D; ०ष्ट्वैतां Be 7.

6 Thus M Be BU; निर्वपत्या० Be 7 D

मिति । तथा समस्तया वा विहृतया वा प्रतिपद्यन्ते । वसती-
वरीषु मृत्पिण्डमन्ववधायाहरहर्वसतीवरीः[१] परिहरमाणा
यन्त्येव संवत्सरंपर्णं ग्रहाणो[२]ऽयनमित्याचक्षते[२] । चतुरो मासो
दीक्षाभिर्यन्ति चतुर उपसद्भिश्चतुरो मासः प्रसुताः संस्थाङ्कः क
एतावन्तपस्तप्त्वान्यसाधारणं कुर्वीतान्तेवासिषु वोपहवमिच्छेत[३]
दक्षिणावता वैनं याजयेयुरिति । सो ऽन्तेवासिषु[४] वैवोपहव-
मिच्छते[४] दक्षिणावता वैनं याजयन्ति । ॥ २७ ॥ नवमः ॥

अथ वै भवति छन्दश्चितं चिन्वीत पशुकाम इति । स
छन्दश्चिदेव स पाङ्क्तिरागच्छति[५] जुहोत्येव तत्राथ[६] यदन्य-
दाहुतिभ्यः शरीरवद्यजुरेव तत्र जपति यजुरेव रश्मनयोर्यजु-
रश्वगर्दभयोर्यजुरन्वाये प्रहरणे[७] । यजते[७] वायव्येन पशुना ।
दीयते । विमायाग्निं परिश्रायापस्थायतने यजुरेव[८] तत्र[८]
जपति यजुः सर्वासामिष्टकानामुपधाने । जुहोति शतरुद्रीयं ।
कुरुते वसोर्धाराः । श्येनचितं चिन्वीत सुवर्गकाम इत्ययमे-

---

१ ॰मन्ववधाय॰ MB Be U; ॰मन्वाधाय॰ Be 7 D.

२ Thus M; ग्राहायण॰ the other MSS.

३ वा om. Be BU.— इच्छेते i. s. o. इच्छेत Be 7 D.

४ Thus M Be; ॰पुवोपहव॰ Be 7 D; ॰पूपहव॰ BU.— इच्छेते i. s. o.
इच्छते all exc. M.

५ पाङ्क्तीरागच्छति M.

६ Thus M Be BU; तद्ध Be 7 D.

७ प्रहंजनेयजते M; प्रहंजनेयजते B Be; प्रहंजनेव DU.

८ ॰रैवम B Be U.

वैष[1] श्येनचित्कङ्कचितं[1] चिन्वीत यः कामयेत शीर्षण्वानमुष्मिँल्लोके स्यामित्येतस्यैव सतो ऽरत्निमात्रेण प्राक् शिर इव निरूहति । स तथा विमितो भवति यथा न बहिर्वेदि यूपः स्यादलजचितं चिन्वीत चतुःसीतं प्रतिष्ठाकाम इत्येतस्यैव सतो ऽरत्निमात्रेण पक्षाग्रावणीयाꣳसौ भवतस्तावन्मात्रेणापिपक्षौ वरीयाꣳसौ । तौ मनागपनतौ परो ऽणीयाꣳसौ[2] भवत । एकैकाम्नुया[3] सीतां कृषति । प्रउगचितं चिन्वीत भ्रातृव्यवानित्येतस्यैव सतः समुद्गृह्याꣳसौ[4] प्रागायातयति । स तथा विमितो भवति यथा न बहिर्वेदि यूपः स्यादुभयतःप्रउगं चिन्वीत यः कामयेत प्रजातान्भ्रातृव्यान्नुदेय प्रतिजनिष्यमाणानित्येतस्यैव सतः समुद्गृह्यैव श्रोणी प्रत्यगायातयति । स तथा विमितो भवति यथा न बहिर्वेदि यूपः स्यात् ॥ २८ ॥

रथचक्रचितं चिन्वीत भ्रातृव्यवानिति विज्ञायते । आकृतिविकारः शब्दसंयोगाद्यावानग्निः[5] सारत्निप्रादेशस्तावतीं भूमिं परिमण्डलां कृत्वानुशर्करमन्तःशर्करमिष्टकाः परिचिनोत्यथान्ततो[6] ऽयान्तरत । एवमेवा[7] स्वयमातृण्णाया । अथा-

---

१ Thus M only; इत्युपमावैष (or इत्यथायमेवैष) श्येनचितिः the other MSS.

२ परो om. all exc. M.

३ एकैकामय M; म्नुया om. Be.

४ Thus M Be BU; समुद्गृह्यैव श्रोणी Be 7 D.

५ Thus MBU; शुभसंयो॰ Be; याथाः संयो Be 7 D.

६ Thus MD Be 7; ॰यांतरतो Be U; B. om.

७ Thus M; एवमेव the other MSS.

भितः स्वयमातृण्णां मध्ये नाभिमिव करोति तस्या [1]अनुदिश्यमवान्तरदिश्यमराणिव[2] नेमिमिवेष्टका[2] आयातयति स एष रथचक्रचिद्भ्रातृव्यवतः परिचय्यो द्रोणचितं चिन्वीतान्नकाम इत्येतस्यैव सतो ऽरत्निमात्रेण प्रागोष्ठमिव निरूहत्यर्थ[3] मध्ये निम्नमिव[4] करोति स एष द्रोणचिदन्नकामस्य परिचय्यः समूह्यं चिन्वीत पशुकाम इति विज्ञायते पुष्करपर्णꣳ रुक्मꣳ हिरण्मयं पुरुषꣳ स्रुचावित्येतस्यचयनमित्याचक्षते[5] कुरुत एव तदथो पुरीषस्यैवेष्टका[6] आयातयति स एष समूह्यः पशुकामस्य परिचय्यः परिचाय्यं चिन्वीत ग्रामकाम इत्यनुशर्करमन्तःशर्करमिष्टकाः परिचिनोत्यथान्ततो[7] ऽथान्तरत[7] एवमेवा[8] स्वयमातृण्णाया अथाभितः स्वयमातृण्णामिष्टकाः परिचिनोति स एष परिचाय्यो ग्रामकामस्य परिचय्यः ॥ २९ ॥

---

१ ॰मवांतरदिश॰ M Be; ॰मवांतरदेश॰ B Be 7 UD.

२ ॰मराश्रनेमिमितिवेष्टका MSS. exc. M, which has ॰मराणिवनेमिवेष्टका; perhaps an allusion to R.V. I. 32. 15, TBr. II. 8. 4. 3.

३ अर्थं i. s. o. अथ all exc. M.

४ Thus M Be; निम्निव the other MSS.

५ ॰तस्यचय॰ M.

६ पुरुष॰ M.

७ Thus M; ॰थांततोथांतत B Be; ॰थोतथोथांतर Be 7 D; ॰थांतनोथोतथांतत U.

८ Thus M; एवमेव the other MSS.

Digitized by Google

श्मशानचितं चिन्वीत यः कामयेत पितृलोक ऋध्नुयामिति । षट् प्राञ्चः पुरुषास्त्रयः पुरस्तात्तिर्यञ्चौ[1] द्वौ पश्चात्तिर्यञ्चौ स आत्मा । तस्य मात्रा । यदि पीवदघ्नं पुरस्तान्नाभिदघ्नं पश्चाद् । यदि नाभिदघ्नं पुरस्ताज्जानुदघ्नं पश्चाद् । यदि जानुदघ्नं पुरस्ताद्गुल्फदघ्नं पश्चाद् । यदि गुल्फदघ्नं पुरस्तात्समं भूमेः पश्चात् । स एष श्मशानचित्पितृलोककामस्य । अथ हैष कूर्मचिद्ब्राह्मणो । मध्य उत्पृष्ठः[2] परिहृत्य । एतस्यैव सतो ऽरत्निमात्रेण प्राक् शिर इव निरूहति । तस्यावान्तरदिशं पादान्निवेष्टका आयातयति । स एष कूर्मचिद्ब्राह्मणो मध्य उत्पृष्ठः परिहृत्यः । ॥ ३० ॥ दशमः ॥

सौत्रामण्या यक्ष्यमाणो भवति । स उपकल्पयते रोहितं चर्मानडुहꣳ सीसं च क्लीबं च शष्पाणि च तोक्माणि[3] च व्रीहीनग्नहुं[4] चूर्णीकृतं[5] त्रीणि नानारूप्याणि पात्राणि यथास्वकूꣳस्नयाणि लोमानि यूपं च श्येनपत्त्रं च गर्भिणीं वडवामासन्दीमिषद्धं कुम्भं कारोतरं विशाखौ दीर्घवꣳशꣳ शिक्यꣳ शतातृण्णाꣳ शतमानꣳ हिरण्यꣳ शतं च वासं च ब्राह्मणमाहुत्या उच्छेषणस्य पातारं यदि ब्राह्मणं न विन्दति

---

१ °तिर्यञ्चो all, but cp. J. As. Soc. of Bengal, 1875, p. 265.

२ Thus M Be BU; उत्कृष्टः Be 7; उत्पन्नः D.

३ तोक्माणि M and thus also all the MSS. of the gṛhyasūtra I. 8; तोक्मानि the other MSS.

४ नग्नहू° M.

५ °कृतं all exc. MT.

यावर्हिषपसाद्य स्रुवꣳ स्वधितिꣳ स्रुचश्च संमृज्य तूष्णीं पृषदाज्यग्रहणीं पत्नीꣳ संनह्याज्येन च दध्ना चोदेहि प्रतिप्रस्थातः सुरासोमस्य विद्धीत्यध्वर्युरेव प्रचिष्टं पाशुबन्धिकं कर्म चेष्टत्यथ प्रतिप्रस्थाता सुराꣳ[1] संपवय्य[1] सग्रहामादाय पूर्वया द्वारोपनिर्हृत्यान्तर्वेद्यासादयति ॥ ३३ ॥

यावदेवाचाध्वर्युश्चेष्टति तावदेष प्रतिप्रस्थाता सत उदीचीनदशेन वाससेन सुरां पुनाति पुनातु ते परिस्रुतꣳ सोमꣳ सूर्यस्य दुहिता। वारेण शश्वता तनेति वायुः पूतः पवित्रेणेति यदि सोमातिपवितो भवत्यथादत्ते पर्णमयं पात्रं तेन गृह्णाति कुविदङ्ग यवमन्त इत्यनुद्रुत्योपयामगृहीतोऽस्यश्विभ्यां त्वा जुष्टं गृह्णामीति बर्हिषी अन्तर्धाय कवलसक्तुभिश्च[2] सिꣳहलोमभिश्च श्रीणात्यपोद्धृत्य बर्हिषी श्येनपत्त्रेण परिमृज्य सादयत्येष ते योनिरश्विभ्यां त्वेत्यथादत्ते नैयग्रोधं पात्रं तेन गृह्णाति कुविदङ्ग यवमन्त इत्यनुद्रुत्योपयामगृहीतोऽसि सरस्वत्यै त्वा जुष्टं गृह्णामीति बर्हिषी अन्तर्धाय बदरसक्तुभिश्च व्याघ्रलोमभिश्च श्रीणात्यपोद्धृत्य बर्हिषी श्येनपत्त्रेण परिमृज्य सादयत्येष ते योनिः सरस्वत्यै त्वेत्यथादत्त आश्वत्थं पात्रं तेन गृह्णाति कुविदङ्ग यवमन्त इत्यनुद्रुत्योपयामगृहीतोऽसीन्द्राय त्वा सुत्राम्णे जुष्टं गृह्णामीति

---

१ सुरासोमस्यपवय्य M.

२ च om. here and every time *infra* B Be H.

बर्हिषी अन्तर्धाय कर्कन्धुसक्तुभिश्च वृकलोमभिश्च श्रीणात्यपोद्धृत्य बर्हिषी श्येनपत्त्रेण परिमृज्य सादयत्येष ते योनिरिन्द्राय त्वा सुत्राम्ण इति ॥ ३४ ॥

ताञ्चषनेन शुद्धण्डान्प्राचो वोदीचो वा यातयत्यथैताꣳ सुराꣳ सम्परेकामादाय दक्षिणमग्निमुपसꣳसर्पति[1] तमभितो[2] गर्तौ खानयति तदुपसादयति विग्राह्यौ[3] दीर्घवꣳशꣳ शिक्यꣳ शतातृण्णाꣳ शतमानꣳ हिरण्यꣳ सतं च वालं चाथ दक्षिणमग्निमग्रेण पुराणभस्मनः[4] खरं करोति तदुपसादयति ब्राह्मणमाहृत्या उच्छेषणस्य पातारं यदि ब्राह्मणं न विन्दति वल्मीकवपामवधाय उपस्पृश्य यूपस्यावृता यूपमुच्छ्रयति स्वर्वन्तं यूपमुत्सृज्याथैतान्पशूनुपाकरोत्याश्विनं धूम्रꣳ सारस्वतं मेषमैन्द्रमृषभं बार्हस्पत्यं पशुं चतुर्थं यदि सोमातिपवितो भवति तेषां प्रसिद्धं वपाभिश्चरित्वाश्विनसारस्वतावध्वर्युरादत्त ऐन्द्रं प्रतिप्रस्थाता ग्रहावादायोपोत्तिष्ठन्नाहाश्विभ्याꣳ[5] सरस्वत्या इन्द्राय सुत्राम्णे सुराम्णाꣳ[6] सोमानामनुब्रूहीति युवꣳ सुराममश्विनेत्येतामन्वाहात्याक्रम्याश्रा-

---

१ Thus M Tr TBH: सर्पति Be U.

२ Thus (with त) B Be (pr. m.) H; °॰भितः क॰ MT Tr; ॰भितो क॰ Be (sec. m.).

३ विग्राह्ये M.

४ Thus MT Tr; भस्मना B Be UH.

५ Thus M Tr.; उपतिष्ठन् i.s.o. उपोत्तिष्ठन् the other MSS.

६ Thus (cp. Āp. XIX. 2. 18) M Tr; सुराम्ण BH Be U; T def.

Digitized by Google

व्याहाश्विभ्याꣳ सरस्वत्या इन्द्राय सुत्राम्णे सुराम्णः सोमान्प्र-
स्थिताम्प्रेष्येति । मैत्रावरुणो होता यक्षदश्विना सरस्वतीमिन्द्रꣳ
सुत्रामाणमिति । पुत्रमिव पितरावश्विनोभेति यजत्यहाव्यग्ने
हविरास्ये त इति वषट्कृते जुहोति । ॥ ३५ ॥

यस्मिन्नश्वास ऋषभास उक्षण इत्यनुवषट्कृते हुत्वाश्विनस्य 9
सꣳस्रावꣳ सारस्वते ऽवनयति । सारस्वतस्य सꣳस्रावमैन्द्रे ।
तं ब्राह्मणो भक्षयति नाना हि वां देवहितं सदस्येति द्वाभ्यां ।
[1]यदि ब्राह्मणं न विन्दति वल्मीकवपायामवनयत्येतेनैव मन्त्रे-
णाथैतानि पात्राणि बस्कमस्य[2] पूरयित्वा पर्णमये श्येनपत्र-
मवगूहति । तद्विशाखावुच्छ्रित्य दक्षिणाग्रं वꣳशं प्रोहति 10
वꣳशे शिक्यꣳ सजति[3] शिक्ये शतातृण्णाꣳ शतातृण्णायां वालं
वाले शतमानꣳ हिरण्मयमथैताꣳ सुराꣳ सप्रैकामादाय
शतातृण्णायाꣳ समवनयति सोमप्रतीकाः पितरस्तृप्णुतेति ।
क्षरति[4] शतातृण्णेत्युपतिष्ठन्ते[5] पवमानः सुवर्जन इत्येतेनाष्टर्चे-
नाथ यदि सोमातिपवितो भवति पितॄणां याज्यानुवाक्या- 11
भिरुपतिष्ठन्त उदीरतामवर उत्परास आहं पितॄन्त्सुविद-

---

१ अथ ins. MT Tr.

२ Thus H ; बस्कमस्य MTB Be U ; विस्कमस्य Tr.

३ Thus M Tr ; सजयति T ; सचति B Be U ; सचयति H.

४ Thus Tr Be HU (sec. m.) ; चरि (sic) B ; चरंति U (pr. m.) ; चरति MT.

५ Plural T Tr U (pr. m.) ; sing. the other MSS.

Digitized by Google

चाꣳ स्यविक्षीदं पितृभ्यो नमो अस्त्वित्यध्वर्युर्होता ब्रह्मा त उपतिष्ठन्ते । यथैव शतातृण्णां धारयति तथेदधाति प्रतिष्ठित्या इति ब्राह्मणं । तदेवैनां निधाय दक्षिणतो निदधात्यथैतानि पात्राणि पुराणभस्मनः खरे सादयति ॥ ३६ ॥

पितृभ्यः स्वधाविभ्यः स्वधा नमः पितामहेभ्यः स्वधाविभ्यः स्वधा नमः प्रपितामहेभ्यः स्वधाविभ्यः स्वधा नम इत्यथ गर्भिणीं वडवां ददात्यथाप उपस्पृश्य बार्हस्पत्यस्य पशुपुरोडाशं याचति । तेन प्रचरति[1] देवताप्रभृतिनेडान्तेनाथ पशुभिश्चरति मनोताप्रभृतिभिरिडान्तैरथैतान्पुरोडाशान्याचत्यैन्द्रमेकादशकपालꣳ सावित्रं द्वादशकपालं वारुणं दशकपालमिति । तैश्चरति देवताप्रभृतिभिरिडान्तैरनूयाजैश्चरित्वा प्रदक्षिणमावृत्य प्रत्यङ्ङाद्रुत्य पत्नीः संयाज्य प्राङेत्य ध्रुवामाप्याय्य त्रीणि पाशुबन्धिकानि समिष्टयजूꣳषि जुहोति यज्ञ यज्ञं गच्छेथ ते यज्ञो यज्ञपते देवा गातुविद इत्यथैतमवभृथꣳ सꣳसादयन्ति[2] यत्किंचित्पुरालिप्तं भवति तत्सर्व हृदयशूलानि भवन्त्यथैतत्समादायान्तरेण[3] चात्वालोत्करावुदङुपनिष्क्रामन्ति ॥ ३७ ॥

द्वे सृती अशृणवं पितृणामहं देवानामुत मर्त्यानाम् ।
ताभ्यामिदं विश्वं भुवनꣳ समेत्यन्तरा पूर्वमपरं च केतुमिति ।

---

१ चरति M Tr.

२ Thus M Tr Be; °सादयति HBU; संप्रकिरंति T.

३ भवंत्ये° HU; भवंतीत्ये° M; भवन्तीत्ये° T; भवत्ये° B Be.

Digitized by Google

अपिबद्ध्ँ सदयशूपैश्चरित्वाथैतानि पात्राण्युदकान्ते पराञ्चि सादयति यस्ते देव वरुण गायत्रच्छन्दाः पाशो ब्रह्मन्प्रतिष्ठितः । तं त एतेनावयज इति पर्णमयं ' यस्ते देव वरुण त्रिष्टुप्छन्दाः पाशः क्षत्रे प्रतिष्ठितः । तं त एतेनावयज इति नैयग्रोधं ' यस्ते देव वरुण जगतीछन्दाः पाशो विक्षु प्रतिष्ठितः । तं त एतेनावयज इत्याश्वत्थं ' यस्ते देव वरुणानुष्टुप्छन्दाः पाशः पशुषु प्रतिष्ठितः । तं त एतेनावयज इति शतातृण्णां ' कुम्भीँ सतं वालं च ' प्रसिद्धो ऽवभृथः ' साम चैव गाय देवीराप एष वो गर्भ इति यथाप्रतीक्षमायन्ति वरुणस्यान्तर्हित्यै ' प्रपद्ये समिधः कुर्वत एधो ऽस्येधिषीमहीत्येत्याहवनीये ऽभ्यादधाति समिदसि तेजो ऽसि तेजो मयि धेहीत्यथाहवनीयमुपतिष्ठन्ते ऽपो अन्वचारिषँ रसेन समसृक्ष्महि । पयस्वाँ अग्न आगमं तं मा सँसृज वर्चसेत्यथ कुसीदेन सकृद्धोमेन चरत्यथ देवता उपस्थाय यूपमुपतिष्ठते । संतिष्ठते सौत्रामणी[1] ' ॥ ३८ ॥ एकादशः ॥

[2]वेदमधीत्य स्नास्यन्नुपकल्पयत एरकां चोपबर्हणं च

---

१ सौत्रामणि: all exc. M; at the close of this adhyāya T adds इति चरकसूत्रम् ।

२ The text of adhyāya 12 is based on M(ackenzie), cp. Preface, p. II, and on the following MSS. of the Gṛhyasûtra: Ma(dras), on the whole a very good copy in grantha; E(gmore), nāgarī copy of grantha original; T(anjore), grantha, breaking of after the words चपालो ऽसौत्युक्त्वाश्रुण in kh. 41; H(aug), B(enares), these two closely related and on the whole rather bad. I made

नापितं च क्षुरं च दारुणि चोपस्तरणं च तृकलाꣳश्च दन्तधावनमुष्णाश्चापः शीताश्च सर्वसुरभिपिष्टं[1] चाञ्जनं च स्रजं चादर्शं चाहतं च[2] वासः प्रावरणं[3] च वसनान्तरं बादरं मणिꣳ सुवर्णोपधानꣳ सूत्रं च[4] प्रवर्तौ च दण्डं चोपानहौ च[5] छत्रमानडुहं चर्म सर्वरोहितमित्येते ऽस्य संभारा उपकॢप्ता भवन्ति। स्नानस्य मीमाꣳसा। रोहिण्याꣳ स्नायादित्येकं। प्राजापत्यं वा एतन्नक्षत्रं। तदस्य प्राजापत्य एव नक्षत्रे स्नातं भवत्यथो सर्वान्रोहान्रोहाणीति[6]। तिष्ये स्नायादित्येकं। बार्हस्पत्यं वा एतन्नक्षत्रं। तदस्य बार्हस्पत्य एव नक्षत्रे स्नातं भवत्यथो बृहस्पतिप्रसूतो ऽसानीत्युत्तरयोः फल्गुन्योः स्नायादित्येकं। भाग्यं वा एतन्नक्षत्रं। तदस्य भाग्य[7] एव

---

also use of G (gṛhyaprayoga MS. Burnell cvii, which cites often literally passages of the Gṛhya), Prm. (Prayogamālā printed at Bombay), Pś (Prayogaśikhāmaṇi, No. 3108 of the Leiden collection), Ks (Kanakasabhāpati's kārikā, Burnell cix) and Pc (Prayogacūḍāmaṇi, Telugu MS., collection Mackenzie No. 21). Adhyāya 13 is contained only in M and E. The two adhyāyas 12 and 13 are now also printed in the Grantha Edition of the Baudhāyana smārtasūtra, designed by me as "Ed."

१ सार्व॰ EG.

२ only in Ed. TE.

३ Thus EHG; प्रावारं MT, प्रपारं Ma. प्रवारणं Ed.

४ om. HBM (sec. m.).

५ om. THB Ma.

६ Thus B; रोहन्तीति i.s.o. रोहाणीति the other MSS. and Ed.

७ भग्य TM Ma.

Digitized by Google

नक्षत्रे जातं भवत्यथो भाग्यो ऽस्यानीति । हस्ते स्यादादित्येकꣳ । सावित्रं वा एतन्नक्षत्रं । तदस्य सावित्र एव नक्षत्रे जातं भवत्यथो सवितृप्रसूतो ऽस्यानीति । चित्रायाꣳ स्यादादित्येकमैन्द्रं वा एतन्नक्षत्रं । तदस्यैन्द्र एव नक्षत्रे जातं भवत्यथो चित्रो ऽस्यानीति । विशाखयोः स्यादादित्येकमै- ९
न्द्राग्नं वा एतन्नक्षत्रं । तदस्यैन्द्राग्न एव नक्षत्रे जातं भवत्यथो विशाखो ऽस्यानि[1] प्रजया पशुभिरित्येतेषामेकस्मिन्नापूर्यमाणपक्षे[2] पुरादित्यस्योदयाद्व्रजमभि प्रपद्यते । नैनमेतदहरादित्यो ऽभितपेत्तदह[3] स्वातानामु[3] ह[4] वा[4] एष एतत्तेजसा यशसा तपत्यन्तर्लोम्ना चर्मणा व्रजमभिविघ्नन्ति[5] । पूर्वार्धमध्ये व्रजस्या- १०
ग्निमुपसमाधाय संपरिस्तीर्याहरन्त्येतान्संभारान्सकृदेव सर्वान्त्संहर[6] सर्वाणि मानुषाणीत्येतस्माद्ब्राह्मणाद्दक्षिणतो[7] ब्राह्मण[8] उपविशत्युत्तरत[8] उदपात्रं पात्राग्नौ च समिधं निदधात्य-

---

१ Thus HB; स्यानीति the other MSS. and Ed.

२ Thus MB; °त्येषामेकस्मिन्न° H; °त्येकेषामेतस्मिन्न° Ma TE. and Ed.

३ Thus all exc. Ma and Ed., which have तदहस्स i.s.o. तदह and E: °तपेन्मध्यंदिनतदहस्स स्वाता°; Bhāradvāja also has the reading accepted by me on the authority of the best MSS. (=तदहः-स्वातानाम् as a compositum ?).

४ °मु ह वा only MT; °मुषा वा Ma; °मुषं the other MSS.; मुषं वा Ed.

५ °भिनिघ्नंति MSS. (and Ed.) exc. E, which om. the second præpos.; cp. *supra* XI. 10 (p. 79, 4), XVI. 20 (p. 267, 1), XVIII. 18.

६ Thus MT; सर्वाणि i.s.o. सर्वान HB; संभरति i.s.o. सर्वान् E Ma., Ed.

७ Before दक्षिणतो Ma ET and Ed. ins. ह्र्मेषु।

८ Thus M Ma HB; ब्राह्मणमुपवेशयत्यु° E; ब्राह्मणमुपविशत्यु° T.

Digitized by Google

परेणाग्निमुदीचीनप्रतिषेवणामेरकाꣳ साधीवासामास्तीर्य[१] तस्यां प्राङ्मुख उपविशत्युत्तरतो नापित । उत्तरत उपबर्हणमामध्यंदिनं भिक्षां दद्याद्पीठ[२] गां पचेदश्रा चेदस्य[३] स्याद्चैतां[३] पात्राग्नीꣳ समिधमाध्येनाक्त्वा मध्यंदिने ऽभ्यादधाति ॥ ३९ ॥

इमꣳ स्तोममर्हते जातवेदसे रथमिव संमहेमा मनीषया । भद्रा हि नः प्रमतिरस्य सꣳसद्यग्ने सख्ये मा रिषामा वयं तवेत्याहैत्यंथैरकायामुदीचीनशिरा निपद्यते त्र्यायुषं[४] जमदग्नेः कश्यपस्य त्र्यायुषमगस्त्यस्य[४] त्र्यायुषमृषीणां[४] त्र्यायुषं[४] यद्देवानां त्र्यायुषं[४] तन्मे अस्तु त्र्यायुषमित्युप्यमानमनुमन्त्रयते[४] शिवा मे भवथ सꣳस्पृश इति । क्षुरमभिमन्त्रयते क्षुरो नामासि स्वधितिस्ते पिता नमस्ते अस्तु मा मा हिꣳसीरित्युप्यमानमनुमन्त्रयते यत्क्षुरेण वर्धयसि[५] वप्ता वपसि केशश्मश्रु वर्धय मे मुखं मा म आयुः प्रमोषीरिति । श्मश्रूण्येवाग्रे वपते ऽथोपपक्षावथ केशान्यथोपपादमितराण्यङ्गान्यंतस्माल्लोमा[६] जरसा[६] पूर्वे आयुषि प्रयान्ति पूर्वे आयुष्यजादा भवन्ति

---

१ Thus Ma TE, Ed.; •मुपस्तृणीते M; HB om. this passage.

२ •दधि च Ed.

३ Thus E Ma; चेतस्य स्याद्• TH; चेतस्य स्याद्• B; चेस्याद्• M; चेदस्य स्याद्• Ed.

४ Thus EM Ma G, Ed.; त्रियायुष• THB Prm.

५ Thus all exc. E: वर्धयसि and T: वर्धसि ।

६ Or should we write •चाजरसा? What may be the sense of these words?

य एवं विद्वाꣳसो लोमानि वापयन्ते । स यदि लोमानि वापयिष्यमाणः स्यात्केशश्मश्रु वापयित्वा लोमानि सꣳहृत्य नखानि निकृन्तयीताथैतानि समुच्चित्य ब्रह्मचारिणे प्रयच्छन्नाहेमानि हृत्वा दर्भस्तम्बे वोदुम्बरमूले वा निधत्तादिति । तानि स तत्र निदधात्यपरेणाग्निं प्राङ्मुख उपविश्य मेखलां विस्रꣳसयत इमां विष्यामि वरुणपाशमिति । यो ऽस्य तत्र[1] रातेः[1] पुत्रो वान्तेवासी वा भवति तस्मै प्रयच्छन्नाहेमाꣳ हृत्वा न्यग्रोधे वोदुम्बरमूले वा निधत्तादिति । तासु[2] स तत्र निदधातीदमहममुष्यामुष्यायणस्य क्षुधा पाप्मानमवगूहाम्युत्तरस्य[3] द्विषन्त इति । वृकलैः प्रधाव्य दन्तान्धावयते[4] ऽन्नाद्याय व्यपोहध्वं भगो राजायमागमत् । स मे मुखं प्रसर्पतु वर्चसे च भगाय चेत्युभयीरपः संनिषिञ्चत्युष्णाश्च शीता आनयति दैवमानुषस्य[5] व्यावृत्त्या इति । तामामञ्जलिनोपहृत्याभिषिञ्चत्यापो हि ष्ठा मयोभुव इति तिसृभिर्हिरण्यवर्णाः शुचयः पावका इति तिसृभिः । षोडशविहितो वै पुरुष इत्येतस्माद्ब्राह्मणाद्यैतस्य[6] सर्वसुरभिपिष्टꣳ समुदायुत्य शिरः प्रसिञ्चति ॥ ४० ॥

---

१ तत्रारातेः T Ma.

२ Thus TM Ma; तासु EHB, Ed.

३ Thus (अवगूहामि) MHB Prm Pśm; अपगू॰ T Ma EG Pc. Ed.

४ Thus M Prm; ॰धापयते all the other MSS. and G, Ed.

५ दैव॰ ET and Bhāradvāja; देव॰ the other MSS., Ed. and the Prayogas.

६ ॰चैतस्य Ma E, Ed.; ॰दैवस्य MHB; T indistinct.

नमः ग्राहकजम्भाभ्यां नमस्ताभ्यो देवताभ्यो या अभिग्राहिणीरित्यनुलिम्पते[1] ऽप्सरासु[1] च[2] यो गन्धो गन्धर्वेषु च यशः । दिव्यो यो मानुषो गन्धः स मामाविशतादित्यथाहतं परिधत्ते स्वा मा तनूराविश शिवा मा तनूराविशेत्येवमेवोत्तरासङ्गमेवमेवात[3] ऊर्ध्वमथैतं बादरं मणिꣳ सुवर्णोपधानꣳ सूत्रे प्रोत्य दर्भामाधाय दर्विदण्डे[4] सूत्रेण पर्यस्य जुहोतीयमोषधे त्रायमाणा सहमाना सरस्वती । सा मा करोतु सोमवर्चसꣳ सूर्यवर्चसं ब्रह्मवर्चसिनमप्रमाद[5] करोतु स्वाहेत्यथैनमुदपात्रे[6] ऽनुपरिप्लावयति[6] विश्वा उत त्वया वयं धारा उदन्या इव । अतिगाहेमहि द्विष इत्यपाप्मो ऽसीत्युत्क्रान्तया परिहरति वध्यꣳ हि प्रत्यञ्चं प्रतिमुञ्चन्ति व्याहृत्या इत्येतस्माद्ब्राह्मणादथैतौ प्रवर्तौ सूत्रे प्रोत्य दर्भामाधाय दर्विदण्डे[7] सूत्रेण पर्यस्य जुहोत्यायुष्यं वर्चस्यꣳ सुवीर्यꣳ रायस्पोषमौद्भिद्यम्[8] । इदꣳ हिरण्यं वर्चसे [9]जैत्रायाविशतादिमꣳ[10]

---

१ Thus Ma, Ed.; •नुलिंपेत्यप्स• E ; •नुलिंपंतेप्स• T ; •नुलिंपेदप्स• M ; •नुलिंपेत्प्स• HB.

२ MTE and Ed. om.

३ Thus (उत्तरासंग्यम्) ET, Ed.; •मेवासंग्यमे• M Ma; HB corr.

४ Thus M Ma; दर्भौ • ET Prm., and Ed.; HB om.

५ •सिनम• HM Ma B; •सिनस• T, Ed.; E indistinct.

६ Thus M; •पात्रेष परि• T Ma E Prm, Ed.; पात्रेषानुपरि• HB Pś.

७ Thus M Ma HB; दर्भौ• EG and Ed.

८ •मौद्भयम् M Ma G and Ed.; •मौद्भिदम् EHB Prm Pś.

९ Thus MG, Ed.; जैत्राया• the other MSS. and Prm Pś.

१० इमꣳ M Ma EG and Ed.; इमाꣳ H; इमा B.

रयिꣳ स्वाहेति । द्वितीयां जुहोति शुनिमिवाहꣳ[१] हिरण्यस्य पितुरिव नामाग्रभैषम्[२] । तस्मा करोतु सोमवर्चसꣳ सूर्यवर्चसं ब्रह्मवर्चसिनमन्नादं[३] करोतु स्वाहेति । तृतीयां जुहोत्युच्चैर्वाजि[४] पृतनाषाहꣳ[५] सभासाहं धनंजयम् । सर्वाः समृद्धीर्ऋधयो हिरण्ये याः समाहिताः स्वाहेति । चतुर्थीं जुहोति विराजं च स्वराजं चाभिष्टिर्या[६] च नो गृहे । लक्ष्मी राष्ट्रस्य या मुखे तया मा सꣳसृजामसि स्वाहेति । पञ्चमीं जुहोति यशो मा कुरु ब्राह्मणेषु यशो राजसु मा कुरु । यशो विश्येषु शूद्रेष्वहमस्मि यशस्तव[७] स्वाहेत्यथैनावुदपात्रे[८]
ऽनुपरिप्लावयति[८] विश्वा उत त्वया वयमित्येतया । तयोरन्त- १४
रमादाय दक्षिणे कर्णे आबध्नीत[९] आयुष्यं वर्चस्यमित्येताभिः

---

१ Thus (शुनिम्) M Ma Prm Pś and Ed.; शुनीम् EG; शुनि[illegible] HB; शुनम् only Ks.

२ Thus Pś; नामाग्रभैजर्षं Prm; नामाग्रहीषमधारं E; नामग्रहं [illegible] Ma BHG; नामाग्रहं, Ed.

३ ०सिनम० M Ma HB; ०सिनम० EG and Ed.

४ ०र्वाजि all exc. G, which has rightly ०र्वाद्दि ।

५ Thus the MSS.; पृतनाजि the Prayogas.

६ Thus Prm; चाभिश्रीया G; चाभिश्रीया Pś; चाभिपीर्या Pc; चाभि[illegible]श्रीर्या M Ma and Ed.; चाभिश्रीर्या E; चाभिश्रार्या BH.

७ Thus M Prm Pc G; यशस्तप Ma E, Ed.; यशस्तप Pś; यशत H[illegible]

८ Thus M; ०पात्रेपरि० Ma E Prm, Ed.; ०पात्रेवानुपरि० [illegible] ०पात्रेवनुपरि० H.

९ Thus HB; आबध्नाति M Ma E Prayogas.

Digitized by Google

पञ्चभिरथैनमनुपरिवर्तयति[1] चतुर्भिरार्तवैः संवत्सरश्च धायसा[2] तेनैवा यद्यानुकरोमीत्येवमेवोत्तरं प्रवर्तमानश्चौते ऽथ स्रजं प्रतिमुञ्चते[3] ॥ ४१ ॥

शुभिके शिर आरोह शोभयन्ती मुखं मम । मुखꣳ हि मम शोभय भूयाꣳसं च भगं कुरु ॥ यां त्वा ऽहार जमदग्निः श्रद्धायै कामायान्द्यै[4] । तां त्वेमां प्रतिमुञ्चे[5] ऽहं वर्चसे च भगाय चेति वैककुदेनाञ्जनेनाङ्क्ते यदाञ्जनं त्रैककुदं जातꣳ हिमवत उपरि । तेन वामाञ्जे मयि पर्वतवर्चसमस्त्वित्यादर्शे परिपश्यते यन्मे मनः परागतमादर्शे परिपश्यतः । इदं तन्मयि पश्याम्यायुष्यं वर्चस्यं मे अस्त्वित्यथोपानहावुपमुञ्चते द्यौरसीति दक्षिणे पादे पृथिव्यसीत्युत्तरे ऽथ दण्डमादत्ते सखा मा गोपायेति छत्रमादत्ते दिवो ऽसि सुपर्णो ऽन्तरिक्षात्मा पाहीति सो ऽथैवास्त आ नक्षत्राणामुदयादथोदितेषु नक्षत्रेषूपनिष्क्रम्य दिश उपतिष्ठते देवीः षडुर्वीरुरु नः कृणोत विश्वे देवास इह वीरयध्वमिति मा हास्महि प्रजया मा तनूभिरिति नक्षत्राणि मा राधाम द्विषते सोम राजन्निति चन्द्रमसꣳ

---

१ Thus M; °वर्तयति Ma, Ed.; °वर्तंति H.

२ धायसा MBH, Ed.; धायया Ma; बायसा E (from grantha original!).

३ Thus M Ma E; °मुचये B; °मुञ्चते H; °मुञ्चति Ed.

४ Thus M Prm Ks Pś; कामायान्द्यै Ma, Ed.; राकायान्द्यै HB.

५ Thus Prm G; °मुंचतु Ma E; °मुंच M; °मुञ्चामि Ed.

Digitized by Google

समुपस्थाय[1] यथयथ[2] कामयते तदेतीत्येतत्समावर्तनम्। ४२ ॥ द्वादशः ॥

अथेतरत्तूष्णीमेव[3] तीर्थं स्नात्वोदेत्यथ यदि रथं लभते रथंतरमसीति दक्षिणं चक्रमभिमृशति बृहदसीत्युत्तरं वामदेव्यमसीति मध्यमथ रथं प्रवर्तमानमनुमन्त्रयतेऽयं वामश्विना रथो मा दुःखे मा सुखे रिषदित्यथ यदि श्मरथं करिष्यन्भवत्यप उपस्पृश्येमामभिमृशतीह धृतिरिह विधृतिरिह रन्तिरिह रमतिरिह रमतामित्यथास्मा आचार्यः कूर्चमाहारयति। तं प्रदक्षिणं पर्यस्योदगावृत्त उपविशति पुरस्तादेनं प्रत्यञ्चमुपोहते राष्ट्रभृदस्याचार्यासन्दी मा त्वद्योषमित्यथास्मा उदकमाहारयति। तेनास्य पादौ प्रक्षालयत्यवनेक्तुः[4] पाणी संमृशति मयि महो मयि भगो मयि भर्गो मयि यश इत्यप उपस्पृश्य मयीन्द्रियं वीर्यमित्युरः प्रत्यात्मानं प्रत्यभिमृशते। अथास्मा अन्यदाहारयति। तत्प्रतिमृश्यात्या[5] म[5] अमादर्चसा[6] यशसा संसृज पयसा तेजसा च तं मा प्रियं प्रजानां कुर्वधिपतिं पशूनामिति ब्राह्मणः। प्रियं पशूनां कुर्वधिपतिं प्रजानामिति राजन्यस्तदुपस्पृश्य प्राक् सेक्तवा[1] इत्याह।

---

१ Thus E; स उपस्थाय M; Ma HB, Ed. om. the first præpos.

२ Thus Ma E, Ed.; ०स्थायैव यथ MBH.

३ अथेतरत्तूष्णी० E; अथेतरंतूष्णी० M.

४ My conjecture; ०त्यवनेक्तुः M; E omits this passage.

५ ०त्या मा चामान्त्र० or चामन्त्र० MSS.

My conjecture; चन्नसा E Pś, वैतसा M.

Digitized by Google

मधुपर्कं प्रोक्षमभिमन्त्रयते स मावतु स मा पातु स मा जुषतामित्युभाभ्याꣳ हस्ताभ्यां प्रतिष्ठापयति ॥ ४३ ॥

आ[१] मा भगाद्वर्चसा यशसा सꣳसृज पयसा तेजसा च तं मा प्रियं प्रजानां कुर्वधिपतिं पशूनामिति ब्राह्मणः । प्रियं पशूनां कुर्वधिपतिं प्रजानामिति राजन्यस्तस्मिꣳश्चेत्किंचिदापतितꣳ[२] स्यात्तदङ्गुष्ठेन च महानाम्न्या चोपसंगृह्येमां दिशं निरस्यति नेष्टाविद्धं हन्मि या ते घोरा तनूस्तया तमाविश यो ऽस्मान्द्वेष्टि यं च वयं द्विष्म इत्यथाप उपस्पृश्य समुदायुत्य त्रिः प्राश्नाति प्राण[३] इदं[३] ते बलिꣳ हरामि श्रेष्ठं माधिपतिं कुर्विति । सोमो ऽसि सोमपं मा कुर्विति द्वितीयमन्नमस्यन्नादं मा कुर्विति तृतीयं । त्रिः पीत्वोच्छिष्टं ददाति[४] । यस्मात्मनः श्रेयाꣳसमिच्छेत्तस्मै शेषं दद्यादुपनीतां[५] गाममनुमन्त्रयते[५] जहि मे पाप्मानमुपनेतुश्चेति[६] । तां कुर्वन्ति वोत्सृजन्ति वा । स यदि करिष्यन्भवति कुरुतेत्याहाथ यद्युत्स्रक्ष्यन्भवति तामनुमन्त्रयते गौर्धेनुभव्या माता रुद्राणां दुहिता वसूनाꣳ स्वसादित्यानाममृतस्य नाभिः । प्र णु वोचं चिकितुषे जनाय मा गामनागाम-

१ The mantras are abbreviated in the MSS.

२ °तस्मिꣳश्चित्किं° MSS.

३ प्राण MSS; probably read प्राणेदं।

४ om. M.

५ Thus E; °दुपनीतांगाम° M.

६ °मुपनेतुश्चेति MSS.

Digitized by Google

द्विति वधिष्ट ॥ पिबन्नुदकं ब्राह्मणस्तोनुतृप्यतेत्यथास्मा ओदन-
माहारयन्ति । तमश्नाति ब्रह्म त्वाश्नातु ब्रह्म त्वाश्नात्विति ।
तस्यैतुष्टयो ऽश्नौ दधि मधु घृतमाप इति । पञ्चतय इत्येके
दधि पयो मधु घृतमाप इति । ॥ ४४ ॥ त्रयोदशः ॥

ब्राह्मणो ह सोमार्थः शुक्लेन पिङ्गाक्षेण मूर्धभिन्नेन[1]
विस्रवता पथि समाजगाम । तꣳ होवाच कथा[2] विद्वां
भगवन्तमिति । सोमो राजास्मीति हैनं प्रत्युवाच । तं
मा कदध्वर्युरनैष्ठ्यमविदध्वसौपौष्ठ्यचो[3] मा कदध्वर्युरनैष्ठ्यन-
विदभिषुणोतीत्यमह[4] तत्र विस्रवाण्यावसौ ब्राह्मणो नैष्ठ्य-
नानि वेद । तं गमिष्यामि । स मे[5] इमाम्वर्णांस्सꣳरोपयि-
ष्यतीति[6] । ते यथावभृथमवयन्ति[7] तदौदुम्बर्या शाखया
पलाशशाखया वा स्रुवेण वाज्यमिश्रेण दध्ना पयसा वा
मधुमिश्रेण नैष्ठ्यनैष्ठ्यजौषमभिजुहोति । यत्ते ग्राव्णा चिच्छिदुः
सोम राजन्नित्येतेनानुवाकेनाभिर्गाभिर्यद्वतो न जनमित्येतया

१ मूर्धभिंनेन M Be; मूर्धाभिषिक्तेन the other MSS.

२ Thus M; कथं the other MSS.

३ The reading कदध्व॰ is my conjecture. M reads: कष्ठध्व॰, but a horizontal stroke has been put above the ष, cancelling this akṣara. क्रुध्व॰ Be 7; क्रुदध्व॰ the other MSS.—॰ध्वसौपौष्ठ my conjecture; ॰ध्वशौपौष्ठ M, ॰ध्वासोपोष्ठ the other MSS.

४ कठध्व॰ M; हठध्व॰ Be 7; क्रध्वध्व॰ or क्रुदध्व॰ the other MSS.

५ om. M.

६ ब्राह्मणाम् i. s. o. वर्णान् M; ॰रोपयिष्यामीति M.

७ यथवावभृथ॰ M.

य चतुर्दशभिर्ऋजीषमभिजुह्वति । ते यथावक्षयꣳ सꣳस्थिष्येयुस्तान्ब्रूयाद्ये[1] नु राजक्षयं भित्त्वा क्रूरं हन्तीह ग्रावभिः । ॥ ४५ ॥

शमयित्वा नैष्ठ्यनैर्यन्त्येवैवं[2] कृतागसः ॥ ये सोममसꣳस्थाप्यापः सꣳस्थाप्य सोमिनः[3] । सꣳस्थितो न हत्यायन्त्यमुत्रैनापिनष्टि सः ॥ अभिषूयैवत्तुदन्ति यमस्य प्रतिपादने । यो ऽशमयित्वा नैष्ठ्यनैरथ नाकमधिरोहति ॥ वायुर्भूत्वा पवते त्रिदिवं नाकमुत्तमम् । यः शमयित्वा नैष्ठ्यनैरथ नाकमधिरोहति ॥ अध्वर्योर्यजमानस्य प्रतिप्रस्थातुरग्नीधः[4] । ब्रह्मणो होतुरुद्गातु राजैषां लोकमादत्ते न चाहौषुश्चतुर्दश ॥ ये चतुर्दश जुह्वति दभ्र[5] एताः स्रुवाहुतीः । नैषां राजा लोकमादत्ते न प्रजां नोत[6] वाजिनम् ॥ आप्यायन्तो राजानं ग्रावभिः क्रूरमृत्विजः । पयसा शमयन्तो ऽस्य जुह्वतैव चतुर्दशेति । ॥ ४६ ॥ चतुर्दशः ॥

अथ वै भवति ब्रह्मवादिनो वदन्ति स त्वै दर्शपूर्णमासौ यजेत य एनौ सेन्द्रौ यजेतेति । वैमृधः पूर्णमासे ऽनुनिर्वाप्यो

---

१ यो i. s. o. ये M.

२ My conjecture ; °नैयंन्त्वेवैवं M ; °नैस्तान्त्वेवं, जान्त्वेवं, जात्वेवं the other MSS.

३ सोमिकः M.

४ Thus Be 7 ; °स्थातुराग्नीध्रः D Be ; thus also but °ध्रः Be ; स्थावेनेताग्नीधः M.

५ दभ Be 7, दभ्रा the other MSS.

६ नोत M ; नोह the other MSS.

Digitized by Google

भवति। तेन पूर्णमासः सेन्द्र। ऐन्द्रं दध्यमावास्यायां। तेनामावास्या सेन्द्रेति। केनो खिद्नौ आनस्य सेन्द्रौ भवत इत्यैन्द्राग्नेन पुरोडाशेनेत्येव ब्रूयादित्यथ वै भवति देवा वै यज्ञे ऽकुर्वत तदसुरा अकुर्वत। ते देवा एतामिष्टिमपश्यन्नाग्नावैष्णवमेकादशकपालꣳ सरस्वत्यै चरुꣳ सरस्वते चरुं। तां पौर्णमासꣳ सꣳस्थाप्यानुनिरवपन्ततो देवा अभवन्परासुरा। यो भ्रातृव्यवान्स्यात्स पौर्णमासꣳ सꣳस्थाप्यैतामिष्टिमनुनिर्वपेत्पौर्णमासेनैव वज्रं भ्रातृव्याय प्रहृत्याग्नावैष्णवेन देवताश्च यज्ञं च भ्रातृव्यस्य वृङ्क्त इति ब्राह्मणꣳ। स एष भ्रातृव्यवतो यथाकामप्रयोगो[1]। मिथुनात्पशून्सारस्वताभ्यां। यावदेवास्यास्ति तत्सर्वं वृङ्क्त इति ब्राह्मणमथ वै भवति ॥ ४७ ॥

पौर्णमासीमेव यजेत भ्रातृव्यवान्नामावास्यामिति। स[2] पौर्णमासीं पौर्णमासीमेव यजेत भ्रातृव्यवान्नामवास्याꣳ। हत्वा भ्रातृव्यं नाप्याययतीति ब्राह्मणं। तदेतत्स्तरणावगधं वापरोध्यावगधं[3] वेत्यथ वै भवति साकंप्रस्थायीयेन यजेत पशुकाम इत्यैतयेष्ट्वा यक्ष्यमाण उपकल्पयत औदुम्बरं महत्पात्रं प्रभूतमाज्यमित्यथ देवस्य त्वा सवितुः प्रसव इति[4] प्रतिपदं कृत्वाग्नेयमष्टाकपालं निर्वपत्यैन्द्रमेकादशकपालमैन्द्रꣳ

---

१ यथाकामंप्र॰ M.

२ om. M.

३ परोध्यावगधं M, omitting वा; वापरोध्यावगधं all the other MSS.

४ इत्येनमेव M.

Digitized by Google

सांनाय्यं । प्रसिद्धमाग्नेयेन चरित्वाथेतरयोर्हविषोरौदुम्बरे महति पात्रे समवदायाहेन्द्रायानुब्रूहीति महेन्द्रायेति वा यदि महेन्द्रयाजी भवति । महता पूर्णꣳ होतव्यमित्येत्याश्राव्याश्राव्याहेन्द्रं यजेति महेन्द्रमिति वा यदि महेन्द्रयाजी भवति । वषट्कृते सहैव पात्रेण जुहोति । इम एवैनमिन्द्रः प्रजया पशुभिस्तर्पयतीति ब्राह्मणमथ वै भवति दारुपात्रेण जुहोति । न हि मृन्मयमाहुतिमानश । औदुम्बरं भवत्यूर्ग्वा उदुम्बर ऊर्क् पशव । ऊर्जैवास्मा ऊर्जं पशूनवरुन्द्ध इति ब्राह्मणं । तदेतदभ्यावगधं[1] वा निर्वेदावगधं[2] वेत्यथ वै भवति ॥ ४८ ॥

नागतश्रीर्महेन्द्रं यजेत । त्रयो वै गतश्रियः शुश्रुवान्ग्रामणी राजन्यस्तेषां महेन्द्रो देवतेति । स[3] यो[3] ऽन्य[3] एतेभ्यो महेन्द्रमियक्षेत[4] स संवत्सरमिन्द्रमिष्ट्वाग्नये व्रतपतये पुरोडाशमष्टाकपालं निर्वपति । सा प्रसिद्धेष्टिः संतिष्ठते । ऽथ यामावास्यागच्छति तस्यां महेन्द्रं यजते । सो ऽत ऊर्ध्वं महेन्द्रयाज्येव भवत्यथ वै भवति संवत्सरमिन्द्रं यजेत । संवत्सरꣳ हि व्रतं नाति । स्वैवैनं देवतेज्यमाना भूत्या इन्धे वसीयान्भवतीति ब्राह्मणमथ वै भवति संवत्सरस्य परस्तादग्नये व्रतपतये

[1] Thus M; °दभ्यावगतो Be; °दभ्यावगतो Be 7 UD; °दभ्यौवगतो B.

[2] Thus M Be U; °गंधं B Be 7 D.

[3] M समपान्य i. s. o. स यो ऽन्य ।

[4] Thus, °यक्षेत, all.

Digitized by Google

पुरोडाशमष्टाकपालं निर्वपेत्संवत्सरमेवैनं वृत्रं जघ्निवांसमग्निर्व्रतपतिर्व्रतमालम्भयति । ततो ऽधि कामं यजेतेति ब्राह्मणमथ वै भवति ॥ ४९ ॥

नासोमयाजी संनयेदनागतं वा एतस्य पयो यो ऽसोमयाजी । यदसोमयाजी संनयेत्परिमोष एव सो ऽनृतं करोत्यथो परैव सिच्यते । सोमयाज्येव संनयेत्पयो वै सोमः पयः सांनाय्यं । पयसैव पय आत्मन्धत्त इति ब्राह्मणमथ वै भवति वि वा एतं प्रजया पशुभिरर्धयति वर्धयत्यस्य भ्रातृव्यं यस्य हविर्निरुप्तं पुरस्ताच्चन्द्रमा अभ्युदेति । त्रेधा तण्डुलान्विभजेद्ये मध्यमाः स्युस्तानग्नये दात्रे पुरोडाशमष्टाकपालं कुर्याद्ये स्थविष्ठास्तानिन्द्राय प्रदात्रे दधꣳश्चरुं । ये ऽणिष्ठास्तान्विष्णवे शिपिविष्टाय शृते चरुमिति । तस्या एता भवन्त्यग्ने दा दाशुषे रयिं दा नो अग्ने प्रदातारꣳ हवामहे प्रदाता वज्री प्र तत्ते अद्य किमित्ते विष्णो परिचक्ष्यं [1]भूदितीष्वौजानसांयानौजानस्य[2] । व्यापन्नयैव[3] पूर्वया यजते[3] ऽव्यापन्नयोत्तरया[3] । न द्वे यजेत । यत्पूर्वया संप्रति यजेतोत्तरया छम्बट् कुर्याद्यदुत्तरया संप्रति यजेत पूर्वया छम्बट् कुर्यान्नेष्टिर्भवति न यज्ञस्तदनु ह्रीतमुख्यपगल्भो जायत । एकामेव यजेत

---

१ भूदितीष्वौजान° all.

२ Thus MDU Be 7 ; °नस्याव्या° Be.

३ Thus M ; यजेतव्यापन्नयैवोत्तरया BU ; यजेताव्यापन्नयोत्तरया Be, thus also but यजेते D. The avagraha added by me.

Digitized by Google

प्रजननो ऽस्य जायते । ऽनादृत्य तद्दृ एव यजेत । यज्ञमुखमेव पूर्वयालभते । यजत उत्तरया । देवता एव पूर्वयावरुन्द्ध इन्द्रियमुत्तरया । देवलोकमेव पूर्वयाभिजयति मनुष्यलोकमुत्तरया । भूयसो यज्ञक्रतूनुपैतीति ब्राह्मणमथ वै भवत्येषा वै सुमना नामेष्टिर्यमद्येजानं पश्चाच्चन्द्रमा अभ्युदेत्यस्मिन्नेवास्मै लोके ऽर्धुकं भवतीति ब्राह्मणमथ वै भवति ॥ ५० ॥

दाक्षायणयज्ञेन सुवर्गकामो यजेत । पूर्णमासे संनयेन्मैत्रावरुणामिक्षयामावास्यायां यजेतेत्येतयेष्ट्वा यक्ष्यमाण उपकल्पयते ऽहतं वासो । ऽथ पौर्णमास्या उपवसथे ऽग्नये व्रतपतये पुरोडाशमष्टाकपालं निर्वपति । सा प्रसिद्धेष्टिः संतिष्ठते । ऽथास्यैतदहरिन्द्राय वत्सा अपाकृता भवन्त्यैन्द्रं पयो दोहयित्वोपवसति सांनाय्यस्य वावृता तूष्णीं वाथ प्रातराग्नेयमष्टाकपालं निर्वपत्यैन्द्रꣳ सांनाय्यꣳ । सा द्विहविरिष्टिः संतिष्ठते । ऽथैतदैन्द्रꣳ सांनाय्यꣳ समुपहूय भक्षयन्त्यथाहतं वासः परिधायापरपक्षं व्रतं चरति । तस्यैतद्व्रतं नानृतं वदति न माꣳसमश्नाति न स्त्रियमुपैति नास्य पल्पूलनेन वासः पल्पूलयन्त्यथ यामावास्यागच्छति[१] तस्या उपवसथे ऽग्नये व्रतपतये पुरोडाशमष्टाकपालं निर्वपति । सा प्रसिद्धेष्टिः संतिष्ठते । ऽथास्यैतदहर्मित्रावरुणाभ्यां वत्सा अपाकृता भवन्ति । मैत्रावरुणं पयो दोहयित्वोपवसति सांनाय्यस्य वावृता तूष्णीं वाथ प्रातराग्नेय-

१ All the MSS. exc. M om. the relative pronoun.

मष्टाकपालं निर्वपति मैत्रावरुणीमामिक्षाꣳ सा द्विहविरिष्टिः संतिष्ठते। वाजिनस्य काले वाजिनेन चरति। निधत्ते वासो। विसृजते व्रतं। विसृष्टव्रत एतं[1] पूर्वपक्षं भवत्यथ पौर्णमास्या-गच्छत्युत्सीदति व्रतपतिर्यद्देवोर्ध्वं व्रतपतेस्तेन प्रतिपद्यते। तदेतत्संवत्सरावगथꣳ[2] सोमसꣳस्थम्[3]। ॥ ५१ ॥

अथेडादध इत्याचक्षते। समानं वाससश्च व्रतपतेश्च। तथैन्द्रं पयो दोहयित्वोपवसति सांनाय्यस्य वावृता तूष्णीं वाथ प्रातराग्नेयमष्टाकपालं निर्वपत्यग्नीषोमीयमेकादशकपालमैन्द्रꣳ सांनाय्यꣳ सा त्रिहविरिष्टिः संतिष्ठते। ऽथैतदैन्द्रꣳ सांनाय्यꣳ समुपहूय भक्षयन्ति। तथावृतं वासः परिधायापरपक्षं व्रतं चरत्यागच्छत्यमावास्या। [4]तस्या उपवसथे यजते। तथा मैत्रावरुणं पयो दोहयित्वोपवसति सांनाय्यस्य वावृता तूष्णीं वाथ प्रातराग्नेयमष्टाकपालं निर्वपत्यैन्द्रमेकादशकपालं मैत्रा-वरुणीमामिक्षाꣳ सा त्रिहविरिष्टिः संतिष्ठते[4]। वाजिनस्य काले वाजिनेन चरति। निधत्ते वासो। विसृजते व्रतं। विसृष्टव्रत एतं[5] पूर्वपक्षं भवत्यथ पौर्णमास्यागच्छत्युत्सीदति

१ एवं M.

२ Thus M ; ०रावमंथं Be ; ०रावबाध्यं Be 7 BDU.

३ ०सꣳस्था M.

४...४ Thus M only ; the other MSS. are partly defective, partly corrupt.

५ एवं M.

Digitized by Google

व्रतपतिर्यद्देवोर्ध्वं व्रतपतेस्तेन प्रतिपद्यते । तदेतत्संवत्सरावगथꣳ[१] सोमसꣳस्थम्[२] । ॥ ५२ ॥

अथ चतुश्चक्रो ध्याहव्यवतो यज्ञः । समानं वासश्चैव व्रतपतेश्च । तथैवैन्द्रं पयो दोहयित्वोपवसति सांनाय्यस्य वावृता तूष्णीं वाथ प्रातराग्नेयमष्टाकपालं निर्वपति सरस्वत उपाꣳशुयाजमग्नीषोमीयमेकादशकपालमैन्द्रꣳ सांनाय्यꣳ । सा चतुर्हविरिष्टिः संतिष्ठते । ऐन्द्रꣳ सांनाय्यꣳ समुपहूय भक्षयन्ति । तथैवावृतं वासः परिधायापरपक्षं व्रतं चरत्यागच्छत्यमावास्या । तेनैवोपवसथे यजते । तथैव मैत्रावरुणं पयो दोहयित्वोपवसति सांनाय्यस्य वावृता तूष्णीं वाथ प्रातराग्नेयमष्टाकपालं निर्वपति सरस्वत्या उपाꣳशुयाजमैन्द्रमेकादशकपालं मैत्रावरुणीमामिक्षाꣳ । सा चतुर्हविरिष्टिः संतिष्ठते । वाजिनस्य काले वाजिनेन चरति । निधत्ते वासो । विसृजते व्रतं । विसृष्टव्रत एतं[३] पूर्वपक्षं भवत्यथ पौर्णमास्यागच्छत्युसौदति व्रतपतिर्यद्देवोर्ध्वं व्रतपतेस्तेन प्रतिपद्यते । तदेतत्संवत्सरावगथꣳ[१] सोमसꣳस्थम्[२] । ॥ ५३ ॥

स एष चतुश्चक्रो ध्याहव्यवतो यज्ञः । स यथा ह वा इदमनश्चतुश्चक्रं व्यवन्नानमेत्येवꣳ[४] ह वा एष एतेन यज्ञक्रतु-

---

१ Thus M; ॰संवत्सरावमर्थं Be; ॰संवत्सरावराध्यं the other MSS.

२ ॰संꣳस्था M.

३ एवं M.

४ Thns M; व्यवन्नानं एत्ये॰ Be BU; व्यवन्नान एत्ये॰ Be 7 D.

Digitized by Google

नेद्वा पाप्मानं भ्रातृव्यं व्यवधान इति । स एष वसिष्ठयज्ञः केशियज्ञः सार्वसेनियज्ञो । वसिष्ठो ह यत्र सौदासानभिच-चारैवꣳ हैनानभिचचार । केशी ह यत्र खाण्डिकमभिचचा-रैवꣳ हैनमभिचचार । सार्वसेनिर्ह यत्र भ्रातृव्यानभिचचारैवꣳ हैनानभिचचार । ॥ ५४ ॥ पञ्चदशः ॥ १

चातुर्मास्यैः सोमैर्यक्ष्यमाणो भवति । स द्वयान्संभारानुप-कल्पयत आग्निष्टोमिकाꣳश्च वैश्वदेवसंभाराꣳश्च[१] । स[२] पुरस्ता-त्फाल्गुन्यै[२] वा चैत्र्यै वा पौर्णमास्या आमावास्येन हविषेष्ट्वा दीक्षते । तस्यापरिमिता[३] दीक्षास्तिस्र उपसदः । स तथा राजानं क्रीणाति यथा मन्यते पौर्णमास्यै मे यज्ञियेऽ[४]ऽहन्सुत्या संपत्स्यत इति । तस्य तथा संपद्यते । प्रसिद्धेन कर्मणोपवसथा-देत्यथास्यैतदहर्विश्वेभ्यो देवेभ्यो वत्सा अपाकृता भवन्ति । वैश्वदेवं पयो दोहयति सांनाय्यस्य वावृता तूष्णीं वाथ वसतीवरीः परिहृत्य पयाꣳसि विग्रिथ्योपवसन्त्यथ प्रातस्त्रि-वृद्बर्हिस्तदेकवदेव[५] स्तृणात्यथाग्नेयं पशुमुपाकरोति । तस्य ११ वैश्वदेव उपालम्भ्यो भवति । तस्य प्रातःसवनीयाननुवर्तन्ते वैश्वदेवहवीꣳषि । प्रैषवन्तः सवनीया । संनुब्रूहि यजेतीतरे-

१ Thus MD Be 7; वैश्वदेविकसंभा॰ Be BU.

२ Thus M; स om. B Be; पुरस्तात् om. B Be 7 DU.

३ Thus M Be 7; तस्या अपरि॰ Be BUD.

४ Thus MDU; यज्ञीये the other MSS.

५ भवति Be BU ins. after बर्हिस् ।

षाꣳ हविषामनुधा त्रिवृदग्निष्टोमः संतिष्ठते । पुरस्ताद्वाणा-सोमानां वाजिनेन चरति । समानं कर्मावभृथात्प्रसिद्धो ऽवभृथ । उदयनीययेष्ट्वा मैत्रावरुणीं वशामुपाकरोति । तस्यै द्यावापृथिव्योपालम्भ्या भवति । तयोः प्रसिद्धं वपाभ्यां चरित्वा पशुपुरोडाशौ निर्वपति । संतिष्ठते यथा द्विपशुः पशुबन्धस्तथाथ पौर्णमासवैमृधाभ्यामिष्ट्वेत्युक्तमेतदथातश्चतुर्षु मासेषु ॥ ५५ ॥

वरुणप्रघासाभ्याꣳ सोमाभ्यां यक्ष्यमाणो भवति । दीक्षते । तस्यापरिमिता दीक्षा द्वादशोपसदः । स तथा राजानं क्रीणाति यथा मन्यते पौर्णमास्यै मे यज्ञिये[1] ऽहन्द्वितीयमहः संपत्स्यत इति । तस्य तथा संपद्यते । प्रसिद्धेन कर्मणोपवस-थादेत्यथास्यैतदहर्वत्सो वत्सा अपाकृता भवन्ति । मारुतं पयो दोहयति सांनाय्यस्य वावृता तूष्णीं वाथ वसतीवरीः परिहृत्य पयाꣳसि विभज्योपवसत्यथ प्रातराग्नेयं पशुमुपा-करोति । तस्य मारुत उपालम्भ्यो भवति । तस्य प्रातःसवनी-याननुवर्तन्ते सप्त वरुणप्रघासहवीꣳषि । स यत्र प्रातःसवने धिष्ण्यान्विहरति तद्दक्षिणं मार्जालीयं करोति । समासन्नेषु हविःषु गार्हपत्ये करम्भपात्राण्यभिपर्यग्निकृत्वा तैर्मार्जालीये प्रचरति । प्रैषवन्तः सवनीया । अनुब्रूहि यजेतीतरेषाꣳ हविषामनुधा पञ्चदश उक्थ्यः संतिष्ठते । ऽहीनसंततिं करो-

1 Thus MDU; यज्ञीये the other MSS.

त्यथास्यैतद्दर्वहणाय वत्सा अपाकृता भवन्ति । वारुणं पयो दोहयति सांनाय्यस्य वावृता तूष्णीं वाथ वसतीवरीः परिहृत्य पयाङ्क्षि विम्रिच्योपवसन्त्यथ प्रातराग्नेयं पशुमुपाकरोति । तस्य वारुण उपालम्भ्यो भवति । तस्य प्रातःसवनीयाननुवर्तते वारुणी च कायस्य[1] । प्रैषवन्तः सवनीया । ९

अनुब्रूहि यजेतीतरयोर्द्विविधोऽनुधा समृद्ध उक्थ्यः संतिष्ठते । पुरस्ताद्धानासोमानां वाजिनाभ्यां चरति । समानं कर्मावभृथादथैतस्मिन्नवभृथ उपाददते वारुण्यै निष्कासं तुषानिति । वारुणस्य वारुण्यामिक्षाध्यवदानीया भवत्यृजीषेण सह तुषान्सं-

प्रकिरन्ति । प्रसिद्धो ऽवभृथ । उदयनीययेष्ट्वा मैत्रावरुणीं १०

वशामुपाकरोति । तस्यै कायोपालम्भ्या[2] भवति । तयोः प्रसिद्धं वपाभ्यां चरित्वा पशुपुरोडाशौ निर्वपति । संतिष्ठते यथा द्विपशुः पशुबन्धस्तथाथ पौर्णमासवैमृधाभ्यामिष्ट्वोत्तमे-तदेयातयत्सु चतुर्षु मासेषु ॥ ५६ ॥

साकमेधैः सोमैर्यक्ष्यमाणो भवति । दीक्षते । तस्यापरिमिता ११

दीक्षा द्वादशोपसदः । स तथा राजानं क्रीणाति यथा मन्यते पौर्णमास्ये मे यज्ञिये ऽहन्तृतीयसवः संपत्स्यत इति । तस्य तथा संपद्यते । प्रसिद्धेन कर्मणोपवसथादेत्यथ वसतीवरीः परिहृत्य पयाङ्क्षि विम्रिच्योपवसन्त्यथ प्रातराग्नेयं पशुमुपाकरोति ।

---

१ कायाय च M.

२ Thus M Be 7; काय उपालंभ्यो or कायोपालंभ्यो the other MSS.

तस्याग्नीकवत उपालम्भ्यो भवति । तस्य प्रातःसवनीयाननुवर्तेत आग्नीकवतः । प्रैषवन्तः सवनीया । अनुब्रूहि यजेत्याग्नीकवतस्य । माध्यंदिनीयाननुवर्तेते सांतपनः । प्रैषवन्तः सवनीया । अनुब्रूहि यजेति सांतपनस्य । धैकविंशश्च उक्थ्यः संतिष्ठते । ऽहीनसंततिं करोत्यथ वसतीवरीः परिहृत्य पयांसि विश्रिय्योपवसन्त्यथ सायं गृहमेधीयेन चरत्यथापररात्रे पूर्वदर्व्येण[१] चरत्यथ प्रातराग्नेयं पशुमुपाकरोति । तस्य कैडिन उपालम्भ्यो भवति । तस्य प्रातःसवनीयाननुवर्तेते कैडिनः । प्रैषवन्तः सवनीया । अनुब्रूहि यजेति कैडिनस्य । धात्रिणव उक्थ्यः संतिष्ठते । ऽहीनसंततिं करोत्यथ वसतीवरीः परिहृत्य पयांसि विश्रिय्योपवसन्त्यथ प्रातराग्नेयं पशुमुपाकरोति । तस्य प्राजापत्यस्तूपर उपालम्भ्यो भवति । तस्य प्रातःसवनीयाननुवर्तन्ते महाहवींषि । प्रैषवन्तः सवनीया । अनुब्रूहि यजेतीतरेषां हविषां । तृतीयसवनीयाननुवर्तन्ते महापितृयज्ञहवींषि । स यत्र तृतीयसवने धिष्ण्यान्विहरति तदञ्जसं मार्जालीयं करोति । समानजेषु हविःषु गार्हपत्ये महापितृयज्ञहवींषि श्रपयित्वा तैर्मार्जालीये प्रचरति । प्रैषवन्तः सवनीया । अनुब्रूहि यजेतीतरेषां हविषामेवमुधा चयस्त्रिंशश्च उक्थ्यः संतिष्ठते । पुरस्ताद्धानासोमानां त्रैयम्बकैश्चरति । समानं कर्मावभृथात्प्रसिद्धो ऽवभृथ । उदयं-

---

१ Thus Be U ; ०र्व्येण M Be 7 D.

नीयेनेष्ट्वा मैत्रावरुणीं वशामुपाकरोति । तस्यै वैश्वकर्मण्युपालम्भ्या[1] भवति । तयोः प्रसिद्धं वपाभ्यां चरित्वा पशुपुरोडाशौ निर्वपति । तावनुवर्तन्त आदित्यः । प्रैषवन्तौ पशुपुरोडाशावनुब्रूहि यजेत्यादित्यस्य । संतिष्ठते यथा द्विपशुः पशुबन्धस्तथायं पौर्णमासवैमृधाभ्यामिष्ट्वान्वमेतद्यातयामसु मासेषु ॥ ५७ ॥

शुनासीरीयेण सोमेन यक्ष्यमाणो भवति । दीक्षते । तस्यापरिमिता दीक्षास्तिस्र उपसदः । स तथा राजानं क्रीणाति यथा मन्यते पौर्णमास्ये मे वसिये ऽहन्सुत्या संपत्स्यत इति । तस्य तथा संपद्यते । प्रसिद्धेन कर्मणोपवसथादेत्याथ वसतीवरीः परिहृत्य यथाऽऽर्षि विमथ्योपवसथ्यं यावेताऽऽरात्रिं वायवे वत्सा उपाकृता भवन्ति । प्रातर्याव्ये पयो दोहयति सांनाय्यस्य वाऽऽवृता तूष्णीं वाऽऽग्नेयं पशुमुपाकरोति । तस्यैन्द्र ऋषभ उपालम्भ्यो भवति । तस्य प्रातःसवनीयाननुवर्तन्ते शुनासीरीयश्चाऽऽपि । प्रैषवन्तः सवनीया अनुब्रूहि यजेतीतरेषां हविषाम् । तथा ज्योतिरग्निष्टोमः संतिष्ठते । समानं कर्माऽवभृथात्प्रसिद्धो ऽवभृथ । उदयनीयेनेष्ट्वा मैत्रावरुणीं वशामुपाकरोति । तस्यै[2] सौर्युपालम्भ्या[3] भवति । तयोः प्रसिद्धं वपाभ्यां चरित्वा पशुपुरोडाशौ

---

१ Thus Be 7; °कर्मणोपा° Be; °कर्मण उपालंभो M.

२ तस्यै MU Be; तस्याः Be 7 D; B om.

३ Thus Be 7; सौर्योपालंभ्या M; सौर्य उपालंभो Be U.

निर्वपति । संतिष्ठते यथा विषयुः पशुबन्धस्यार्थाय पौर्णमासवेद्याभ्यामित्युक्तमेतत् । ॥ ५८ ॥ षोडशः ॥

अथातो ज्योतिरयनमित्याचक्षते । वैश्वदेवेन सोमेन यक्ष्यमाणो भवतीति समानी प्रतिपदेतावदेव नाना । त्रिवृदग्निष्टोमो । ज्योतिरित्याख्यातश्चतुर्षु मासेषु वरुणप्रघासेन सोमेन यक्ष्यमाणो भवति । दीक्षते । तस्यापरिमिता दीक्षा उपसदः । स तथा राजानं क्रीणाति यथा मन्यते पौर्णमासे मे यज्ञिये ऽभ्युत्था संपद्येत इति । तस्य तथा संपद्यते । प्रथिष्ठेन कर्मणोपक्रमयाद्रित्यथैतद्वर्धया वत्सा अपाकृता भवन्ति मध्यमो वत्सापेति । इयं पयो दोहयति सांनाय्यस्य वासुता तूष्णीं धाय वसतीवरीः परिहृत्य यथाऽग्नि विभिन्नोपवसथ्यं प्रातराग्नेयं पशुमुपाकरोति । तस्य वाहतो वारुण इत्युपाकर्म्यौ भवतस्तस्य प्रातःसवनीयाननुकर्मणे यत्र वरुणप्रघासहवींषि । स एष प्रातःसवने विधिवान्विहरति तद्ज्ञं मार्जालीयं करोति । समासन्नेषु हविःषु गार्हपत्ये करम्भपात्राण्यभिपर्यग्निकृत्वा तैर्मार्जालीये प्रचरति । प्रेष्यन्तः सवनीयाः । अनुब्रूहि यजेतीतरेषां हविषां । माध्यंदिनीयाननुवर्तते[1] वारुणी च कायश्च । प्रेष्यन्तः सवनीयाः । अनुब्रूहि यजेतीतरयोर्हविषोर्ऽनुधा ज्योतिरयनः संतिष्ठते । समानमुत्तरं कर्म यथा द्विरात्रे तथाऽऽख्यातश्चतुर्षु मासेषु ॥ ५९ ॥

---

१ Thus MDU; °वर्तते the other MSS.

साकमेधेन सोमेन यक्ष्यमाणो भवति । दीक्षते । तस्यापरिमिता दीक्षाः षडुपसदः । स तथा राजानं क्रीणाति यथा मन्यते पौर्णमास्ये मे ऽग्निये ऽभिषुत्या संपत्स्यत इति । तस्य तथा संपद्यते । प्रसिद्धेन कर्मणोपवसथादेत्याथ वसतीवरीः परिहृत्य यथाऽऽयुषि विगृह्योपवसत्यथ प्रातराग्नेयं पशुमुपाकरोति । तस्यानीकवतः क्रैडिनः प्राजापत्यस्तूपर इत्युपालम्भ्या भवन्ति । तस्य प्रातःसवनीयाननुवर्तन्त आनीकवतः । प्रैषवन्तः सवनीया । अनुब्रूहि यजेत्यानीकवतस्य । माध्यंदिनीयाननुवर्तते सांतपनः । प्रैषवन्तः सवनीया । अनुब्रूहि यजेति सांतपनस्य । तृतीयसवनीयाननुवर्तन्ते[1] गृहमेधीयप्रभृतीनि महाहवींषि । स यत्र तृतीयसवने धिष्ण्यवान्विहरति तदन्तं मार्जालीयं करोति । महाहविर्भिश्चरित्वा गार्हपत्ये महापितृयज्ञहवींषि श्रपयित्वा तैर्मार्जालीये प्रचरन्ति[2] । प्रैषवन्तः सवनीया । अनुब्रूहि यजेतीतरेषाꣳ हविषाम् । अंशुधा ज्योतिरुक्थ्यः संतिष्ठते । समानमुत्तरं कर्म यथा त्रिरात्रे तथा । स उवेव[3] शुनासीरीयः । ॥ ६० ॥ सप्तदशः ॥

अथातो महायज्ञ[4] इत्याचक्षते । ज्योतिरतिरात्र इत्येक आदीक्षते । तस्यापरिमिता दीक्षा द्वादशोपसदः । स तथा

---

१ Thus MD; •वर्तते the other MSS.

२ •रंति Be Be 7 DU.

३ Thus M; •ंडोम Be 7; •ष्टोम Be BDU.

४ Thus M Be BU Keś.; महापितृयज्ञ Be 7 D.

राजानं क्रीणाति यथा मन्यते पौर्णमास्ये मे यज्ञियेऽहन्सुत्या संपत्स्यत इति। तस्य तथा संपद्यते। प्रसिद्धेन कर्मणोपवसथादेत्यथास्यैतदहस्तथा वत्सा अपाकृता भवन्ति विश्वेभ्यो देवेभ्यो मरुद्भ्यो वरुणायेति। अथ पयो दोहयति सांनाय्यस्य वावृता तूष्णीं वाथ वसतीवरीः परिहृत्य पयांसि विमिश्योपवसन्त्य [1]प्रातस्त्रिवृद्धर्विंशदेकवदेव[2] सृणात्यथाग्नेयं पशुमुपाकरोति। तस्य वैश्वदेवो मारुतो वारुण आनीकवतः क्रैडिनः प्राजापत्यस्तूपर ऐन्द्र ऋषभ इत्युपालम्भ्या भवन्ति। तस्य प्रातःसवनीयाननुवर्तन्ते वैश्वदेवहवींषि। प्रैषवन्तः सवनीया। अनुब्रूहि यजेतीतरेषां हविषां। माध्यंदिनीयाननुवर्तन्ते सर्वाणि वरुणप्रघासहवींषि। ॥ ६१ ॥

स यत्र माध्यंदिनीये सवने धिष्णियान्विहरति तदजस्रं मार्जालीयं करोति। समासन्नेषु हविःषु गार्हपत्ये करम्भपात्राण्यभिपर्यग्निकृत्वा तैर्मार्जालीये प्रचरति। प्रैषवन्तः सवनीया। अनुब्रूहि यजेतीतरेषां हविषां। तृतीयसवनीयाननुवर्तन्त आनीकवतप्रभृतीनि महाहवींषि। स यत्र तृतीयसवने धिष्णियान्विहरति तदजस्रं मार्जालीयं करोति।

---

[1] Between प्रातस् and त्रिवृद् Be 7 has the following words: (प्रात)राग्नेयं पशुमुपाकरोति तस्यानीकवतः क्रैडिनः प्राजापत्यस्तूपर इत्युपालंभ्या भवंति तस्य प्रातःसवनीयाननुवर्तंत आनीकवतः प्रैषवंतः सवनीया अनुब्रूहि यजेत्यानीकवत-(त्रिवृद्)।

[2] Thus (एकवदेव) M Be 7; एकधैव Be U; एकवैव B; D om.

महाहविर्भिश्चरित्वा गार्हपत्ये महापितृयज्ञहवीꣳषि श्रपयित्वा तैर्मार्जालीये प्रचरति । प्रैषवन्तः सवनीया । अनुब्रूहि यजेतीतरेषाꣳ हविषान्त्सुधा ज्योतिरतिरात्रः संतिष्ठते । पुरस्ताच्छुनासोमानां वाजिनैश्चरित्वा त्रैयम्बकैश्चरति[1] । समानं कर्मावभृथादथैतस्मिन्नवभृथ उपादद्ते वारुणं निष्कासं तुषानिति । वारुणश्च वारुण्यामिक्षाध्यवदानीया भवत्यृजीषेण च तुषान्संप्रकिरन्ति[2] । प्रसिद्धो ऽवभृथ । उदयनीयवेलायां मैत्रावरुणीं वशामुपाकरोति । तस्यै द्यावापृथिव्या काया वैश्वकर्मणी शौरीत्युपालम्भ्या भवन्ति । तासां प्रसिद्धं वपाभिश्चरित्वा पशुपुरोडाशान्निर्वपति । तानानुवर्तन्त आदित्यप्रभृतीनि शुनासीरीयहवीꣳषि । प्रैषवन्तः पशुपुरोडाशा । अनुब्रूहि यजेतीतरेषाꣳ हविषाꣳ संतिष्ठते यथा पशुपशुः पशुबन्धवयांच पौर्णमासवैमृधाभ्यामिष्ट्वा यजमानायतन उपविश्य केशश्मश्रुणा लोहितायसेन च क्षुरेण शीर्षण्यं च वर्तयते परि च वपते पुरस्ताद्वाग्रे ऽथ दक्षिणतो ऽथ पश्चादथोत्तरतो ऽथोपरिष्टात्संतिष्ठन्ते चातुर्मास्याः सोमाः संतिष्ठन्ते चातुर्मास्याः सोमाः । ॥ ६२ ॥ अष्टादशः ॥

॥ इति सप्तदशः प्रश्नः[3] ॥

---

१ त्र्यंबकै॰ MSS.

२ ॰किरति M.

३ अथ (r. इति) बौधायन उत्तरतिसूत्रे प्रथमः प्रश्नः U.

Digitized by Google

बृहस्पतिसवेन यक्ष्यमाणो भवति । स उपकल्पयते ऽष्ट-
चतुस्त्रिꣳशा दक्षिणाः कृष्णाजिनꣳ सुवर्णरजतौ च रुक्मौ
पर्णमयं पात्रमाज्यमभिषेचनार्थाय वै ब्राह्मणं भवति परिवृक्तो
होता भवत्यध्वर्यो निर्मिरस्त्विष्टक इत्येष ह वै परिवृक्तो यः
पतति: परिवेष्यो[१] । ऽथ[१] हैष निर्मिरो यः शुक्रो विक्लिध-
स्विलकवान्मिक्लाघो[२] । ऽथ हैष चिक्लिक्षो यश्चिवेदो[३] । दीक्षते ।
तस्यैकराचीनस्य सोमं क्रीणन्ति । तिस्र उपसदस्तायते
त्रिवृदग्निष्टोमो रथंतरसामा प्रवर्ग्यवान्गायत्रीवैक स्तोमः ।
प्रज्ञातं देवसुवाꣳ हविषां करणं । तस्य बार्हस्पत्यो[४] ऽतिग्राह्यो[४] ।
बार्हस्पत्यः पशुरुपालम्भ्यः । समानमाभिषेकस्य कालादभिषेकस्य
काले यजमानायतने कृष्णाजिनं प्राचीनग्रीवमुत्तरलोमोप-
स्तृणाति । तद्यजमानं प्राञ्चमुपवेश्य सुवर्णरजताभ्याꣳ रुक्माभ्यां
पर्युपास्य पर्णमये पात्र आज्यमानीयाभिषिञ्चति बृहस्पतिः
प्रथमं जायमानो महो ज्योतिषः परमे व्योमन् । सप्तास्यस्तु-
विजातो रवेण वि सप्तरश्मिरधमत्तमाꣳसि ॥ देवस्य त्वा
सवितुः प्रसवे ऽश्विनोर्बाहुभ्यां पूष्णो हस्ताभ्याꣳ सरस्वत्यै वाचो
यन्तुर्यन्त्रेण बृहस्पतिसवेनाभिषिञ्चामीति । समुन्मृष्टे समुत्क्रो-
शन्तीति[५] समानमा मुखस्य विमार्जनात् । ॥ १ ॥

---

१ Thus MB Be; परिवेष्टव the other MSS.

२ Thus D; तिलकावा॰ M Be 7 U; तौलकवा॰ Be; तौलकावा॰ B.

३ Thus M; चिवेद्रो the other MSS.

४ Thus M Be 7 D; ॰पत्यवातिया॰ Be BU.

५ M reads: समुत्क्रोशंत्यभिषेचतायमणो + बृहस्पतिसवेनेति ।

तस्य प्रातःसवने सन्नेषु नाराशंसेष्वेकादश दक्षिणा नीयन्त । एकादश माध्यंदिने सवने सन्नेषु नाराशंसेष्वेकादशास्तृतीयसवने सन्नेषु नाराशंसेषु । माध्यंदिन एव सवने ऽश्वं दद्यादिति ह स्माह मौद्गल्यः । स वा एष[1] नैमार्जनो[1] यज्ञः । स यथा ह वा इयं गैरेयी[2] नदी[3] निमृजत्येवं[3] ह वा एष एतेन यज्ञक्रतुनेष्ट्वा पाप्मानं भ्रातृव्यं निमृजतेति[4] । स एतस्मिन्नेव पूर्वपक्षे चतुष्टोमेनाग्निष्टोमेन यजेत पुरा क्षेषाष्वायै । राजा राजसूयेनेजान इच्छति बृहस्पतिसवेनाभिषिच्येयेति[5] । तदु वा आहुर्न वै राजसूयाभिषिक्तो ऽन्येन यज्ञक्रतुनाभिषिच्येताप्रत्यवरोही ह[6] भवतीत्युभाभ्यां ब्रह्मसवाभ्यामभिषिच्या[7] इत्यभिषिच्येतैवेति[7] । दीक्षते । तस्य तिस्रो दीक्षास्तिस्र उपसदः । समानमाभिषेकस्य कालादभिषेकस्य काले माध्यंदिनीया एवैनं चमसा निमृजन्तो यन्ति । चतुर्विंश एष भवति ।

---

१ Thus M Be 7 D; एषसवनैमार्जनो BU; एष सवोपनिर्माजनो Be.

२ Thus M; गौरेयी the other MSS. (U गौरेयीर्) ।

३ नदी निमृजंत्येवं M; नदीनिमृजंत्येवं B; नदीर्निमृजनेत्येवं Be 7 D; नदीर्निमृजंत्येवं U; नदीं तीत्वा पांसुनिमृजंत्येवं Be. Read perhaps: नदी निमृजन्त्येत्येवं *i.e.* निमृजन्ती एति, *cp. infra* निमृजन्नेति ।

४ निमृज्यन्नेति Be 7.

५ Thus MD Be 7; •भिषिच्यन्नेति Be U; •भिषिच्येवेति B.

६ om. M.

७ Thus M only; •भिषिच्यात इत्यभिषिच्यतेवेति U Be 7 D; •भिषिच्यात इत्यभिषिच्येवेति B; •भिषिच्याभिषिच्येवेनैवेति Be.

Digitized by Google

राजा राजसूयेन यक्ष्यमाण आयावति[1] पितु र्वर्षेष्वभिषिक्ते-
ऽप्यभिषिच्येत[2] पुरोहिते स्थपतौ सूत इति । पुरोहितो
दीक्षते । तस्य तिस्रो दीक्षास्तिस्र उपसदः । समानमाभिषेकस्य
कालादभिषेकस्य काले शुक्रामन्थिनोः सꣳस्रावेणाभिषिञ्चति ।
चतुष्टोम एव भवति । ॥ २ ॥

स्थपति[3] स्थपतिसवेन यक्ष्यमाणो भवति स उपकल्पयत
आर्षभं चर्म सुवर्णरजतौ च रुक्मावौदुम्बरं पात्रं दध्यभिषेच-
नाय । दीक्षते । तस्य तिस्रो दीक्षास्तिस्र उपसद । आग्नेयस्य
मारुती पृश्निः पष्ठौह्युपालम्भ्या भवति । सप्त हवींषि
प्रातःसवनीयाननुवर्तन्ते यदाग्नेयो भवत्यग्निमुखा ह्यृद्धिरित्ये-
तानि । समानमाभिषेकस्य कालादभिषेकस्य काले यजमाना-
यतन आर्षभं चर्म प्राचीनग्रीवमुत्तरलोमोपस्तृणाति । तद्यज-
मानं प्राञ्चमुपवेश्य सुवर्णरजताभ्याꣳ रुक्माभ्यां पर्युपास्यौदुम्बरे
पात्रे दध्यानीयाभिषिञ्चति देवस्य त्वा सवितुः प्रसवेऽश्विनो-
र्बाहुभ्यां पूष्णो हस्ताभ्याꣳ सरस्वत्यै वाचो यन्तुर्यन्त्रेण
स्थपतिसवेनाभिषिञ्चामीति । समुत्क्रुष्टे समुत्क्रोशन्तीति समानमा
सुत्यस्य विमार्जनात् । एष स्थपतिसवः सप्तदशो ऽग्निष्टोम । एष
एव स्थपतिसव । एष वैश्यसव[4] । एष मासवो । आसा
वैनेनातः[5] पूर्वमीजिरे । ॥ ३ ॥

१ °आयतीति M.　　२ Thus MD Be 7; °षिच्येषु Be BU.
३ om. Be BU.　　४ वैश्यस्य एव Be 7.
५ *i. s. o.* यतः Be 7 यच, D यर्च ।

Digitized by Google

सूतः[1] सूतसवेन यक्ष्यमाणो भवति स उपकल्पयते कृष्णाजिनꣳ सुवर्णरजतौ च रुक्मौ पर्णमयं पात्रꣳ हिरण्यं घृतमभिषेचनाय। दीक्षते। तस्य तिस्रो दीक्षास्तिस्र उपसदो। ऽष्टौ हवींꣳषि प्रातःसवनीयाननुवर्तन्ते यदाग्नेयो भवत्याग्नेयो वै ब्राह्मण इत्येतानि। समानमाभिषेचनीयस्याभिषेकस्य काले यजमानायतने कृष्णाजिनं प्राचीनग्रीवमुत्तरलोमोपस्तृणाति। तद्यजमानं प्राञ्चमुपवेश्य सुवर्णरजताभ्याꣳ रुक्माभ्यां पर्युपास्य पर्णमये पात्रे घृतमानीय हिरण्येनोत्पूयाभिषिञ्चति देवस्य त्वा सवितुः प्रसवे ऽश्विनोर्बाहुभ्यां पूष्णो हस्ताभ्याꣳ सरस्वत्यै वाचो यन्तुर्यन्त्रेण सूतसवेनाभिषिञ्चामीति। समुन्मृष्टे समुत्क्रोशन्तीति समानमा मुखस्य विमार्जनात्। एष सूतसवः सप्तदशो ऽग्निष्टोम। एष एव सूतसव। एष ग्रामणीसव[2]। एष स्थपतिसव। स्थपतयो ह्येतेनातः पूर्वमीजिरे। ॥ ४ ॥ प्रथमः ॥

सोमसवेन यक्ष्यमाणो भवति स उपकल्पयते सौमीꣳ सूतवशां कृष्णाजिनꣳ सुवर्णरजतौ च रुक्मौ पर्णमयं पात्रं पयो ऽभिषेचनायाय वै ब्राह्मणं भवति यत्किंच राजसूयस्यते सोमं तत्सर्वं भवतीति। स आमावास्येन हविषेष्ट्वावदान्यानुमतप्रभृतिभिरेति संवत्सरं चातुर्मास्यैः सप्तेन्द्रतुरीयप्रभृतिभिरथ रत्निनाꣳ हविर्भिर्यजते। ऽथ देवसुवाꣳ हविर्भिर्यजते।

---

१ om. M.

२ ग्रामणि॰ M Be.

ऽथैताꣳ सौमीꣳ सूतवशामालभते[1]। तस्या वपमुद्दिते यजमानायतने कृष्णाजिनं प्राचीनग्रीवमुत्तरलोमोपस्तृणाति। तद्यजमानं प्राञ्चमुपवेश्य सुवर्णरजताभ्याꣳ रुक्माभ्यां पर्युपास्य पर्णमये पात्रे पय आनीयाभिषिञ्चत्यषाढं[2] युत्सु पृतनासु पप्रिꣳ सुवर्षामप्सां वृजनस्य गोपाम्। भरेषुजाꣳ सुक्षितिꣳ सुश्रवसं जयन्तं त्वामनु मदेम सोम॥ देवस्य त्वा सवितुः प्रसवे ऽश्विनोर्बाहुभ्यां पूष्णो हस्ताभ्याꣳ सरस्वत्यै वाचो यन्तुर्यन्त्रेण सोमसवेनाभिषिञ्चामीति। समुन्मृष्टे समुत्क्रोशन्तीति समागमा मुखस्य विमार्जनादथ सꣳसृपाꣳ हविर्भिर्यजते। अथ पञ्चहविषा द्विग्राममेष्ट्या यजते। अथ द्विपशुना पशुबन्धेन यजते। अथ सात्यदूतानाꣳ हविर्भिर्यजते। अथ पूर्वैः प्रयुजाꣳ हविर्भिर्यजते। अथ पौर्णमासवैमृधाभ्यामिष्ट्वोत्तरैः प्रयुजाꣳ हविर्भिर्यजते। अथ देविकाहविर्भिर्यजते। अथ त्रैधातवीयया यजते। अथ सौत्रामण्या यजते। संतिष्ठते सोमसवो ऽर्धचतुर्दशैर्मासैः॥ ५॥

पृथिसवेन[3] यक्ष्यमाणो भवति स उपकल्पयते रोहितं चर्मानडुहꣳ सुवर्णरजतौ च रुक्मावौदुम्बरं द्रोणं चतुःस्रक्ति चतुष्टयीरपो दिग्भ्यः संभृता[4]। अथ वै ब्राह्मणं भवति

१ ॰भते MD Be UB; ॰भेत Be 7.

२ The mantra is abbreviated in all the MSS.

३ पृथिवि॰ M, पृथिवी Be every time in this kh.

४ Thus M Be; समाहृता the other MSS.

Digitized by Google

यत्किंच राजसूयमनुत्तरवेदीकं तत्सर्वं भवतीति । स आमावास्येन हविषेष्ट्वाथान्यानुमतप्रभृतिभिरेति अथेन्द्रतुरीयप्रभृतिभिरथ रत्निनाꣳ हविर्भिर्यजते । अथ देवसुवाꣳ हविर्भिर्यजते । अथैतां चतुर्हविषमिष्टिं निर्वपत्याग्नेयमष्टाकपालमैन्द्रमेकादशकपालं वैश्वदेवं द्वादशकपालं बार्हस्पत्यं चरुमिति । तस्या[1] मयस्तुदिते[1] यजमानायतने रोहितं चर्मानडुहं प्राचीनग्रीवमुत्तरलोमोपस्तृणाति । तद्यजमानं प्राञ्चमुपवेश्य सुवर्णरजताभ्याꣳ रुक्माभ्यां पर्णपात्र्यौदुम्बरे द्रोणे चतुष्टयीरपः समवनीयाभिषिञ्चति[2] ये मे पञ्चाशतं ददुरश्वानाꣳ सधस्तुतिः । द्युमदग्ने महि श्रवो बृहत्कृधि मघोनां नृवदमृत नृणाम् ॥ देवस्य त्वा सवितुः प्रसवेऽश्विनोर्बाहुभ्यां पूष्णो हस्ताभ्याꣳ सरस्वत्यै वाचो यन्तुर्यन्त्रेण पृथिव्येनाभिषिञ्चामीति । वसुस्पृष्टे वसुत्वोपप्नोति समानमा सुचस्य विमार्जनादेव संसृपाꣳ हविर्भिर्यजते । अथ पञ्चहविषा दिशामवेष्ट्या यजते । अथोपातीत्य द्विपशुं पशुबन्धꣳ सात्यदूतानाꣳ हविर्भिर्यजते । अथ पूर्वैः प्रयुजाꣳ हविर्भिर्यजते । अथ पौर्णमासवैश्वाभ्यामिष्ट्वोत्तरैः प्रयुजाꣳ हविर्भिर्यजते । अथ दैविकाहविर्भिर्यजते । अथ त्रैधातवीयया यजते । अथ सौत्रामण्या यजते । संतिष्ठते पृथिसवोऽर्धेन[3] मासेन[3] । ॥ ६ ॥

१ Thus M Be 7 DUB; मध्याप्तु° Be.

२ Thus Be 7 DU; [illegible] M Be B, but cp. XII. 8 (p. 98, 5).

३ Thus M; मार्धे, र्धं, मासेन the other MSS.

Digitized by Google

गोसवेन यक्ष्यमाणो भवति स उपकल्पयते ऽयुतं दक्षिणाः सुवर्णरजतौ च रुक्मौ पर्णमयं पात्रं प्रतिधुगभिषेचनाय[1] । दीयते । तस्य षड् दीक्षाः षडुपसदः । समानमाभिषेकस्य कालादभिषेकस्य काले यजमानायतने कृष्णाजिनमात्रं वेदेरुद्धृतं भवति । तद्यजमानं प्राञ्चमुपवेश्य सुवर्णरजताभ्यां रुक्माभ्यां पर्युपास्य पर्णमये पात्रे प्रतिधुमानीय[2] इहत सोमं मभ्यभिषिञ्चति देवव्रातः सहसा इन्द्रः चर्षणीनां चर्षणीधृत्तमो मघोनाः। मराम्मचिले तस्वभागः चबे राष्ट्रे च आमटवि। प्रजापतेस्त्वा परमेष्ठिनः स्वाराज्येनाभिषिञ्चामि ॥ देवस्य त्वा सवितुः प्रसवे ऽश्विनोर्बाहुभ्यां पूष्णो हस्ताभ्यां सरस्वत्यै वाचो यन्तुर्यन्त्रेण गोसवेनाभिषिञ्चामीति । समुत्कृष्टे समुत्क्रोशन्तीति अक्लनमा मुखस्य विमार्जनात् एष गोसवः षट्त्रिंशः सर्वं उक्थ्य उभयसामायुतदक्षिणः[3] । पवमाने कण्वरथंतरं कुर्वन्ति[4] । ॥ ७ ॥ द्वितीयः ॥

ओदनसवेन यक्ष्यमाणो भवति स उपकल्पयते रोहितं चर्मानडुहं सुवर्णरजतौ च रुक्मौ शतमानं च प्रवर्तं चतुरो वर्णान्ब्राह्मणं राजन्यं वैश्यं शूद्रं चतुरो रसान्मधु सुरां

---

1 Thus M Be 7 D; प्रतिधुक्॰ the other MSS.

2 Thus M; प्रतिधुक्मानीय all the other MSS., but cp. Maitr. S. II. 2. 7, where the word is also used as a neuter (sc. पयः).

3 Thus Be 7 D; ॰सामायुतंदक्षिणाः M; ॰सामायुतदक्षिणः the other MSS.

4 Thus M; भवति the other MSS.

पथ अपस्त्वारि¹ पात्राणि सौवर्णꣳ राजतं काꣳस्यं मृन्मयं चतस्रो दक्षिणाः शतमानꣳ हिरण्यं तिल्वधन्वमश्वं मार्षः पूर्णं कमण्डलुं चतुष्टयीः शलाकाः पर्णमय्यौ नैयग्रोध्यावाश्वत्थ्यौ फाल्गुनपात्र्यौ² चत्वारि नानावृक्ष्याणि पात्राणि यजूꣳषीति दर्भपुञ्जीलान्यौदुम्बरं द्रोणं चतुःस्रक्ति चतुष्टयीरपो दिग्भ्यः संभृताः शतं³ च³ रथं चैतेनोपक्लृप्तेन रोहिणीमायतीमुपरमत्यंच⁴ रोहिणेति पूर्वाग्निमन्ववसृत्युत्तपनीयꣳ⁵ प्रासीनो ऽन्वाहार्यपचनमाहिताग्निरथाध्वर्युरपरराच आहुत्य सꣳप्राश्ने-कौदनꣳ⁶ श्रपयतेति । तं तथा श्रपयन्ति यथा पुरादित्य-स्योदयाच्छृतो⁷ भवत्युदिता सूर्येण कार्य इति ब्राह्मणमथैत-मोदनꣳ श्रपयित्वाभिघार्योदञ्चमुद्वासयत्यथैतौ पात्र्यौ निर्णि-ज्योपस्तीर्य तस्मिन्नेनमसंभिन्दन्नुद्धरति । सर्पिरासेचनं कृत्वा प्रभूतमाज्यमानीयाथैताꣳश्चतुरो वर्षान्दक्षिणत उदङ्मुखानु-पवेशयत्यथान्वारब्धे यजमाने जुहोति सिꣳहे व्याघ्र उत या

---

१ चाप॰ all.

२ Thus M; फाल्गुनपात्री Be B; फाल्गुनपात्रो DU; फाल्गुन्यौ पात्र्यौ Be.

३ Uncertain; शतं च M; वर्तं च Be 7 D; वर्षं च BU; वितं (omitting च) Be.

४ Read perhaps चच i.s.o. चच, cp. XIII. 36 (p. 145, 3), XV. 2 (p. 205, 10) and XVIII. 16.

५ ॰न्ववसृत्यु॰ M Be 7; ॰न्वसृत्यु॰ Be BUD.

६ Thus Be BU; स्थालोदनꣳ M; चौदनं Be BU.

७ Thus M Be 7 D; पुरस्तादादित्य॰ Be BU.

पृदाकाविति यतमः स्रुवाङ्गतीऽङ्गलाङ्गलैव षट्स्रावैः प्रवर्तमभिघारयति राडसि विराडसि सम्राडसि स्वराडसीत्यथैतं[1] प्रवर्तमपेणाहवनीयं[2] पर्याहृत्य दक्षिणतो निदधाति । ॥ ८ ॥

अथैतच्छौवर्णं पात्रं याचति । तस्मिंस्त्रिरः पवित्रं मध्वानीय सकृत्नीय पर्णमयीभ्यां स्रुवाकाभ्यामुपमन्थतीन्द्राय त्वा तेजस्वते तेजस्वन्तं श्रीणामीति । तेजो ऽसीति ब्राह्मणाय प्रयच्छति । तत्ते प्रयच्छामीति ब्राह्मणः प्रतिगृह्णात्यथ यजमानो मुखं विमृष्टे तेजस्वदस्तु मे मुखं तेजस्वच्छिरो ऽस्तु मे । तेजसाग्निमतः प्रत्यङ् तेजसा संपिपृग्धि मेति । पिरायम्य प्रग्रंसयति । तस्मा एतच्चैव पात्रं ददाति शतमानं च हिरण्यमथैतद्राजतं पात्रं याचति । तस्मिंस्त्रिरः पवित्रं सुरामानीय सकृत्नीय नैयग्रोधीभ्यां स्रुवाकाभ्यामुपमन्थतीन्द्राय त्वौजस्वत ओजस्वन्तं श्रीणामीत्योजो ऽसीति राजन्याय प्रयच्छति । तत्ते प्रयच्छामीति राजन्यः प्रतिगृह्णात्यथ यजमानो मुखं विमृष्ट ओजस्वदस्तु मे मुखमोजस्वच्छिरो ऽस्तु मे । ओजसाग्निमतः प्रत्यङ्ङोजसा संपिपृग्धि मेति । पिरायम्य प्रग्रंसयति । तस्मा एतच्चैव पात्रं ददाति तिसृधन्वं चाथैतत्कांस्यं पात्रं याचति । तस्मिंस्त्रिरः पवित्रं पय आनीय सकृत्नीयाश्वत्थीभ्यां स्रुवाकाभ्यामुपमन्थतीन्द्राय त्वा पयस्वते पयस्वन्तं श्रीणामीति । पयो ऽसीति वैश्याय

---

१ °चैतं all exc. M.

२ °पेणाग्निं M.

प्रयच्छति। तस्मै प्रयच्छामीति वैश्यः प्रतिगृह्णात्यथ यजमानो
मुखं विमृष्टे पयस्वदस्तु मे मुखं पयस्वच्छिरो अस्तु मे।
पयस्वाञ्छिश्नतः प्रत्यक् पयसा संपिपृग्धि मेति। शिराक्ष
प्रमृशति। तस्मा एतस्मैव पात्रं ददात्यश्वायैतन्मूत्रं
पात्रं पाययति। तस्मिंस्तिरः पवित्रमप आनीय सक्तू- ९
नोप्य फाल्गुनपाचीभ्यां[1] यवकाभ्यामुपमन्थतीन्द्राय त्वायुष्मत
आयुष्मन्तꣳ सौम्यासौत्यायुरसीति शूद्राय प्रयच्छति। तस्मै
प्रयच्छामीति शूद्रः प्रतिगृह्णात्यथ यजमानो मुखं विमृष्ट
आयुष्मदस्तु मे मुखमायुष्मच्छिरो अस्तु मे। आयुष्माञ्छिश्नतः
प्रत्यङ्ङायुषा संपिपृग्धि मेति। शिरापक्ष प्रमृशति। तस्मा १०
एतस्मैव पात्रं ददाति माषैश्च पूर्णं कमण्डलुमथैतमोदनमनु-
मृश्य प्राश्नाति। तस्य यत्र वहते तदप्सु प्रवेशयत्यथ शिरसा-
हृतं निष्पिबति। निष्पिबन्तमनुमन्त्रयत इममग्न आयुषे
वर्चसे कृधि प्रियꣳ रेतो वरुण सोम राजन्। मातेवास्मा
अदिते शर्म यच्छ विश्वे देवा जरदष्टिर्यथासदित्यथैतं प्रता- ११
मद्भिः प्रक्षाल्य दक्षिणे कर्णं आबध्नीत आयुष्टे विश्वतो
दधदित्यथैनमनुपरिवर्तयत[2] आयुरसि विश्वायुरसि सर्वायु-
रसि सर्वमायुरसीत्यथैनं त्रिभिर्दर्भपुञ्जीलैः पवयति यतो
वातो मनोजवा यतः क्षरन्ति सिन्धवः। तासां त्वा सर्वासाꣳ

---

१ फल्गुनपाचिभ्यां M; फाल्गुनपाचीभ्यां Be 7 BUD; फल्गुनीभ्याꣳ Be.
२ Thus M; एतं i.s.o. एनं the other MSS.

स्त्वाभिषिञ्चामि वर्चसेत्येनामाह दक्षिणमधिकटं[1] न्यचति[1] मधुष्ट्वा वाचि मह्यना सोम इत्यासङ्गाभ्यः। अग्निरिव विषतः प्रत्यक् सूर्य इव ज्योतिषा विभूरिति ॥ ९ ॥

यावदेवाध्वर्युस्तिष्ठति तावदेव प्रतिप्रस्थातौदुम्बरे द्रोणे चतुष्टयीरपः समवनीय चतुरो ग्रहान्गृह्णात्यपां यो द्रवते रसस्तमहमस्मा आमुष्यायणाय तेजसे ब्रह्मवर्चसाय गृह्णामीति पर्णमयेनापां य ऊर्मौ रसस्तमहमस्मा आमुष्यायणायौजसे वीर्याय गृह्णामीति नैयग्रोधेनापां यो मध्यतो रसस्तमहमस्मा आमुष्यायणाय पुष्ट्यै प्रजननाय गृह्णामीत्याश्वत्थेनापां यो यज्ञियो रसस्तमहमस्मा आमुष्यायणायायुषे दीर्घायुत्वाय गृह्णामीत्यौदुम्बरेणैतद्द्रोणकलशं चर्मानडुहं[2] प्राचीनग्रीवमुत्तरलोमोपस्तृणाति तद्यजमानं प्राञ्चमुपवेश्य सुवर्णरजताभ्यां रुक्माभ्यां पर्युपास्याभिषिञ्चत्यपां यो द्रवते रसस्तेनाहमिममामुष्यायणं तेजसे[3] ब्रह्मवर्चसायाभिषिञ्चामीति पर्णमयेनापां य ऊर्मौ रसस्तेनाहमिममामुष्यायणमोजसे वीर्यायाभिषिञ्चामीति नैयग्रोधेनापां यो मध्यतो रसस्तेनाहमिममामुष्यायणं पुष्ट्यै प्रजननायाभिषिञ्चामीत्याश्वत्थेनापां यो

---

१ Thus Be; दक्षिणमधिकटम्न्यचति M; दक्षिणे अधिकटे न्यचति BU; दक्षिणे अधिकोटं न्यचति Be 7 D.

२ All MSS. exc. M ins. अथैनमाग्निं।

३ In Be here and infra all the Datives (०वर्चसाय, ओजसे, वीर्याय etc.) are changed into Instrumentals; M has everywhere Instrum.

यज्ञियो रथस्तेनाहमिममामुष्यायणमायुषे दीर्घायुत्वायाभि-
षिञ्चामीत्यौदुम्बरेण। समुन्मृष्टे समुत्क्रोशन्तीति समानमा-
मुष्य विमार्जनादुत्तरत एतद्रूपाचितं यतं[1] तिष्ठति रथस्य[1]।
तदभिप्रैत्यभिप्रेहि वीरयस्वोग्रचेत्ता सपत्नहा। आतिष्ठ मित्र-
वर्धनस्तुभ्यं देवा अधिब्रुवन्त्विति रथस्य पक्षसी संस्पृशत्यङ्कौ
न्यङ्कावभितो रथं याविति। रथमातिष्ठत्यातिष्ठ वृत्रहन्निति
प्रतिपद्यायं सृजतु रश्मी उपसृजत्यातो ऽथैतच्छतं[2] त्रिः
प्रदक्षिणं परियाय[3] पुरस्तात्प्रत्यायाति। तदध्वर्यवे ददाति। स
एष ओदनसवो राज्ञो वा ब्राह्मणस्य वा वैश्यस्य वा पुष्टि-
कामस्य यज्ञः। ॥ १० ॥ तृतीयः ॥

पञ्चशारदीयेन यक्ष्यमाणो भवति। स उपकल्पयते सप्तदश
निरष्टान्वत्सतरानेकहायनान्पुरस्तात्प्रागग्नीध्रीयं[4] पौर्णमास्या-
मावास्येन हविषेष्ट्वा सप्तदश मारुतीः पृश्नीर्वत्सतरीराल-
भते। ऽभिप्रोक्षणतो वत्सतरान्व्यापयित्वोत्सृजन्त्यथेतराभिः
संज्ञां कुर्वन्ति। संवत्सरे पर्यवेते मरुद्भ्यः सांतपनेभ्यः सप्त-
दश पृषतीर्वत्सतरीरालभते। ऽभिप्रोक्षणतो वत्सतरान्व्याप-
यित्वोत्सृजन्त्यथेतराभिरेव संज्ञां कुर्वन्ति। द्वितीये संवत्सरे

---

१ Uncertain again, cp. p. 350, 6.; सतं ति० रथं च M; सर्वं ति० रथं च Be 7 D; सर्पं ति० रथस्य (omitting च) UB; वितस्ति० रथस्य Be.

२ Thus M sec. m., ०संहितं pr. m.; ०सङ्घ' Be 7 BDU; ०सङ्घं Be.

३ पर्याय M; परियाय B; परीयाय the other MSS.

४ Thus M Be; ०ग्नीर्ष्याः Be 7; ०ग्नीध्रं DU; ०ग्नीध्रां B.

Digitized by Google

पर्यवेते मरुद्भ्यो गृहमेधिभ्यः सप्तदश कल्माषीर्वत्सतरीरालभते । अभिप्रोक्षणतो वत्सतरान्स्थापयित्वोत्सृजन्त्यथेतराभिरेव संस्थां कुर्वन्ति । तृतीये संवत्सरे पर्यवेते मरुद्भ्यः क्रीडिभ्यः सप्तदशावच्छिन्ना वत्सतरीरालभते । अभिप्रोक्षणतो वत्सतरान्स्थापयित्वोत्सृजन्त्यथेतराभिरेव संस्थां कुर्वन्ति । चतुर्थे संवत्सरे पर्यवेते मरुद्भ्यः स्वतवद्भ्यः सप्तदश राजीवा[1] वत्सतरीरालभते[1] । अभिप्रोक्षणतो वत्सतरान्स्थापयित्वोत्सृजन्त्यथेतराभिरेव संस्थां कुर्वन्त्यथैतदेवाहर्दीक्षते । संवत्सरमुख्यां[2] बिभर्ति । द्वादशोपसदस्तस्याहानि त्रिवृदग्निष्टोमः पञ्चदश उक्थ्यः सप्तदश उक्थ्यः पञ्चदश उक्थ्यः सप्तदशोऽतिरात्रः सर्व मारुत स्तोमो भवत्यथैतेषां पशूनां त्रयः प्रथमेऽहन्यैन्द्रामारुता उक्षाणः सवनीया आलभ्यन्त । एवं द्वितीय एवं तृतीय एवं चतुर्थे । पञ्चोत्तमेऽहन्यालभन्ते । वर्षिष्ठमिव ह्येतदहर्मन्यन्ते वर्षिष्ठः समानानां भवतीति ब्राह्मणमथैतेषां पशूनां यदि नश्यति म्रियते वा याश्वमेधे प्रायश्चित्तिस्तां कल्पयान्यं तद्दैवत्यं[3] तद्वर्णं तद्वयसं तद्रूपं[4] तज्जातीयं[4] पशुमालभन्ते । स एष पञ्चशारदीयो राज्ञो वा ब्राह्मणस्य वा । यः कामयेत

१ Thus Be 7; राजीवा D; राजीवं U; राजीवंवत्स° Be; राजीवत्स° B; सप्तो राजीवंवत्स° M.

२ °मुखां M.

३ तद्देवत्यं MSS.

४ om. M.

Digitized by Google

बहोर्भूयान्स्यामिति स एतेन यज्ञक्रतुना यजेत । बहोरेव भूयान्भवति । ॥ ११ ॥

अग्निष्टुता यक्ष्यमाणो भवति । तस्य सर्वमेव समानं । पुरोरुच एवान्या । अग्न आयूंषि पवस इत्यैन्द्रवायवस्य । यज्ञा नो मित्रावरुणेति मैत्रावरुणस्याश्विना पिबतं । सुतमित्याश्विनस्य । द्वे विरूपे चरतः पूर्वापरं चरतो माययैताविति शुक्रामन्थिनोः । क्षोषि प्रता वो यह्वायाग्निमित्याग्रयणस्य । नियुत्वांस्तुक्थ्यस्य । नित्या ध्रुवस्याग्निनाग्निः समिध्यत इत्यैन्द्राग्नस्याग्निर्देवानां जठरमिति वैश्वदेवस्याग्निर्नियो बहुत्तम ईळे अग्निं स्ववसमिति तिस्रो मरुत्वतीयानां । मूर्धिमुत्थर्वं वह्निभिरिति माहेन्द्रस्य । विश्वासामदितिर्यज्ञियानां त्वे अग्ने सामन इति तिस्र आदित्यस्य[1] यहस्य[1] । पिता यज्ञस्य साधनमिति सावित्रस्य । नित्या पात्नीवतस्य । निधुमन्ति हारियोजनस्य । स एषोऽग्निष्टुत्पविवं । यथा ह वा इदं[2] हावादभिद्रुता[2] अभिहृष्टाः[2] पुनर्नवा[3] ओषधयो बहुमिहन्त्येवं ह वा एष एतेन यज्ञक्रतुनेष्ट्वा शुचिः पूतो मेध्यो भवति । स यदि सुप्तेन पापकमन्वेत निष्टुतं कुर्वीतेति ह वै

---

१ आदित्यवत्स्य M.

२ My conjecture; इयं हवादभिद्रुमादभिहष्टां M; इदमभिद्रुमादभि[...] B Be 7 (pr. m.) D (pr. m.) U Be (pr. m.); इयं हावादभिद्रुमोरं [...] 7 D in margin; इदं देवा अभिद्रुमादभिहृष्टाः Be (sec. m.).

३ Thus Be 7 BDU; पुनर्जवा Be M.

मुखेन पापं करोति यो ऽनूचानस्य वा मुनेर्वा कुत्सयतमव-गच्छति । यदि बाहुभ्यां पञ्चदशं कुर्वीत । स ह वै बाहुभ्यां पापं करोति यो ब्राह्मणायोपस्कृते । यद्युदरेण सप्तदशं कुर्वीत । स ह वा उदरेण पापं करोति यो ऽनाश्याकस्यान्नमश्नाति । यदि पद्भ्यामेकविंशं कुर्वीत । स ह वै पद्भ्यां पापं करोति ॥ १२ ॥

य[1] आरट्टान्वा[1] गान्धारान्वा[2] सौवीरान्वा करस्करान्वा[3] कलिङ्गान्वा गच्छति । स यदि सर्वत्र एव पापकमन्वेत चतुष्टोमेनाग्निष्टोमेन यजेत । तेन हैतेनर्तुपर्णो भाङ्गाश्विन[4] ईजे[4] शफालानां[4] राजा । तेन हैष मृगयामभिप्रययौ । तं हेन्द्रो ऽनुव्याहारयां[5] चक्रे ऽद्य त्वा नभ्यातये[6] यथा[7] यज्ञक्रतोरन्तराय[7] इति । स ह जिष्णु उदकमभ्यवेयाय[8] । तं ह तत्रैव स्त्रियं चकार । सा सुदेवला नामास । सा हैतदेव राष्ट्रमभ्याववर्त । सा स्त्री सती पुत्राञ्जनयां चकार । तेभ्यो हेन्द्रः समदं दधौ । ते हता विद्रुताः शिश्रिरे[9] । तानुभया-

---

१ Thus Be 7 D; योराट्टान्वा M Be; योराष्ट्रान्वा B; योरा-न्वा U.

२ न्वा॰ M.

३ Thus M Be 7 D; कार॰ Be BU.

४ ॰वाश्विनः रंजशौफालानां M.

५ ॰यां M Be 7 U; ॰षां Be B.

६ नयद्यातयेव M.

७ i.s.o. यथा यज्ञ॰ Be D: का संवयाका यज्ञ॰ ।

८ Thus M Be 7 D; ॰मभ्युपेयाय Be B.

९ Corrected; शि (or श्रि?) श्रिरे M; शिश्रिरे the other MSS.

नन्तरेण हृदन्यासां चक्रे । ऽथो हेन्द्र आजगाम । तामु[1] हाभ्युपेयाय[1] । ताꣳ होवाच सुदेवका३[2] इति[2] । भगव इति । प्रियं तवैतदिति[3] । किं मे भगवः प्रियं भविष्यतीत्येव वै मम तदप्रियमासीद्यस्मा अन्तरेतोरन्तरायो वृणीष्व नु यतरे ते पुत्रा जीवेयुरिति । यानेव भगव स्त्री सत्यध्यगममिति होवाच । तस्मादाहुः स्त्रियाः पुत्राः प्रेयाꣳसो भवन्तीति । स एतस्मिन्नेव पूर्वपक्षे चतुष्टोमेनाग्निष्टोमेन यजेत पुरा भ्रेषाच्छान्त्यै । ॥ १३ ॥

इन्द्रस्तुता यक्ष्यमाणो भवति । तस्य सर्वमेव समानं पुरोरुच एवान्यास्तिष्ठा हरी कस्य वृषा सुते सचेतैन्द्रवायवस्यैन्द्रं वयं महाधन इति मैत्रावरुणस्य । हिता वो वृषन्तम इत्याश्विनस्य । स सूर आजनयज्ज्योतिरिन्द्रमुत त्यदाश्विन्यमिति शुक्रामन्थिनोर्भरेष्विन्द्रमित्याग्रयणस्य । मित्योक्थ्यस्य । मिधुमन्ति[4] ध्रुवस्य । मपि चैनं पुरु संश्रमित्यैन्द्राग्नावार्तं नो चोकमनुनेषि विद्वानिति वैश्वदेवस्य । मित्वा मरुत्वतीयानां । मित्वा

---

१ My conjecture; तामथोऽभ्युपेयाय B Be; तामथाभ्युपेयाय M; तामभ्युपेयाय Be 7 D; तामथाभ्युपेयाय U.

२ सुदेवकाऽ इति (this is the way in which Nandīnāgari expresses the pluti) M; सुदेवका इति Be Be 7 D; सुदेवकाति BU. Properly speaking we expect सुदेवकाऽ३ इति, pluti from सुदेवकी ।

३ तवैतादिति all the MSS. exc. M, which reads तवैताद्यदिति; is pluti contained again in तवैतात् ?

४ मित्वा M only.

माहेन्द्रस्या नो विश्वाभिरूतिभिः कदाचन स्तरीरसीन्द्राय साम आग्निरमिति तिस्र आदित्यस्य[1] यद्द्येमा[1] ते धियमिति सावित्रस्य । निवृनक्ति पात्नीवतस्य । नित्या हारियोजनस्य । स एष पञ्चदश इन्द्रस्तुदिन्द्रियकामस्य । यो वा[2] ज्येष्ठबन्धुरपभूतः स्यात्स एतेन यज्ञक्रतुना यजेताश्नुते हैव ज्यैष्ठताम् । ॥ १४ ॥

अप्तोर्यामेण यक्ष्यमाणो भवति । दीक्षते । तस्यापरिमिता दीक्षा द्वादशोपसदस्त्रिवृद्बहिष्पवमानः पञ्चदशꣳ होतुराज्यꣳ सप्तदशं मैत्रावरुणस्यैकविꣳशं ब्राह्मणाच्छꣳसिनस्त्रिणवमच्छावाकस्य । त्रयस्त्रिꣳशो माध्यंदिनः पवमानश्चतुर्विꣳशꣳ होतुः पृष्ठꣳ रथंतरं च वैराजं च सामनी अन्यतरेणान्यतरत्परिष्टुवन्ति । चतुश्चत्वारिꣳशं मैत्रावरुणस्य वामदेव्यं च शाक्वरं च सामनी अन्यतरेणान्यतरत्परिष्टुवन्त्यष्टाचत्वारिꣳशं ब्राह्मणाच्छꣳसिनो नौधसं च वैरूपं[3] च सामनी अन्यतरेणान्यतरत्परिष्टुवन्त्येकविꣳशमच्छावाकस्य कालेयं च रैवतं च सामनी अन्यतरेणान्यतरत्परिष्टुवन्ति । तमेतमष्टापृष्ठ इति छन्दोगा आचक्षते । त्रिणव आर्भवः पवमानस्त्रयस्त्रिꣳशमग्निष्टोमसामैकविꣳशान्युक्थ्यानि[4] सषोडशिकानि पञ्चदशानीतराणि

---

१ आदित्यस्य॰ M Be.

२ om. Be 7 DU.

३ Thus (and cp. Śāṅkh. XV. 7. 4) M Tr U Be Keś.; वैराजं वैराज्यं or वैरत्यं the other MSS.

४ ॰न्युक्थानि M Tr; ॰न्युक्थ्यानि all the other MSS.

Digitized by Google

षिष्टुद्राथंतरः सप्तिसंस्तुद्राः पशवो ऽतिरेचुः[१] । सोमो वा एतदतिरिच्यमान इयाय[२] । ते[२] देवा[२] अब्रुवन्नग्नीर्वा पवम-त्यरेषि तस्य को याम इति । तदग्नोर्यामस्याग्नोर्यामत्वं । तस्मा एतान्यतिरिक्तस्तोत्राण्यवकल्पयां चक्रुस्त्रिवृद्धोतुर्जराबो-धीयं पञ्चदशं मैत्रावरुणस्य षोडशिषट्[३] सप्तदशं[३] ब्राह्मण-च्छंसिन उदङ्गोयमेकविंशमच्छावाकस्य वारवन्तीयं । तदु वा आहुर्यदच्छावाकममनु यज्ञः संतिष्ठतात्तं यज्ञं समये-दंषो हात्तं यजमानो यासुकः[४] स्वाहुीय एव स्तुवीरञ्जो-तास्तुमङ्ग्याश्तथा मध्यतो यज्ञः समाधीयत[५] इति । तदु वा आहुः सर्वाण्येवाग्निनानि स्तुतशस्त्राणि स्युर्यंद्रु[६] किंच[७] १०
रात्रिमुपातिरिच्यते सर्वं तदाग्निनमिति[८] त्वेकमथापरं पिष्ट-

---

१ The MSS. of the text seem all to be corrupt: °तिरेदु Tr; तिरेतुः M (if I see right!); तिरेतुः all the other MSS.; चतिरेदुरति-ग्नामतौत्यर्कः Bhav. (read °ग्नामन्तौ°).

२ Thus M; इयायवेतंदेवा BUD; इयायतंदेवा Be; इयायवेगंदेवा H; इयायवेतं Tr.

३ षोडशिनं सप्त° MH; षोभरन्गिरशिनं सप्त° UD; षो (सो) भरन्गिरशिनं-सप्त° Be Be 7; षोभरन्गिरशिंशिसप्त° B; षोपष्टं सप्त° Tr.

४ Thus M only; कासुकः all the other MSS.

५ Thus MHTr Keś.; समापयत the other MSS.

६ Thus all the MSS.; नच (i. s. o. यच) Karmānta (one MS. यदि) Keś. and Rudr. on Āp. XIV. 4. 15.

७ किंचन M.

८ Some of the MSS. again इतो; read perhaps °मितीत्येक° ।

Digitized by Google

त्पञ्चदशꣳ[१] सप्तदशमेकविꣳशमथैतेषां देवता अग्निरिन्द्रो विश्वे देवा विष्णुरिति ॥ १५ ॥ चतुर्थः ॥

मृत्युसवेन यक्ष्यमाणो भवति स उपकल्पयते शार्दूलचर्म सुवर्णरजतौ च रुक्मौ वैयाघ्रावुपानहौ[२] चार्मपक्ष्मावुपानहौ वृष्णिवाससं च क्षौमं च तिसृधन्वमासन्दीꣳ साधीवासां दुन्दुभिं विमितमौदुम्बरं द्रोणं चतुःस्रक्ति चतुष्टयीरपो दिग्भ्यः संभृताः शतं[३] च[३] रथं[३] चैतेनोपक्लृप्तेन चित्रामायतीमुपरमत्यंश[४] चित्रचेति पूर्वाग्निमन्ववस्यत्युत्तपनीयꣳ शालीनो ऽन्वाहार्यपचनमाहिताग्निरथान्वारब्धे यजमाने जुहोति व्याघ्रो ऽयमग्नौ चरति प्रविष्ट इति षट् स्रुवाहुतीरथ यजमानायतने शार्दूलचर्म प्राचीनग्रीवमुत्तरलोमोपस्तृणाति यत्ते शिल्पं कश्यप रोचनावदिन्द्रियावत्पुष्कलं चित्रभानु। यस्मिन्सूर्या अर्पिताः सप्त साकं तस्मिन्राजानमधिविश्रयेममित्यथ वैयाघ्रावुपानहावुपमुञ्चते[५] द्यौरसीति दक्षिणे पादे पृथिव्यसीत्युत्तरे

---

१ °दशं and the following, neutra HTr; पंचदशः सप्तदश एकविꣳशश° M; nominatives masc. the other MSS.; cp. also Rudr. on Āp. l. c.

२ वैयाघ्रीयावु° M.

३ Uncertain again, cp. supra p. 354, 3; शतं च रथं चै° M; सतं (च) रथं चै° Be 7 D; स्यं च रथं चै° BU; सितं च रथमे(तेनो°) Be.

४ Probably M reads चश, perhaps rightly, i.s.o. चच, cp. supra p. 350, 7.

५ वैय्याघ्राव्रावु° Be U; वैय्याघ्रियावु° M Be 7; वैयाघ्रियावु° D; वैयाघ्रावु° B

Digitized by Google

ऽथ दक्षिणं बाह्याघ्राभिप्रसर्पति व्याघ्रो वैयाघ्रे ऽधि विश्रयस्व दिशो महीः । विशस्त्वा सर्वा वाञ्छन्तु मा त्वद्राष्ट्रमधि भ्रशदित्यथास्मै धनुः प्रयच्छति यथा राजसूये तथा । तं यजमानं प्राञ्चमुपवेश्य सुवर्णरजताभ्याꣳ रुक्माभ्यां पर्युपास्यौदुम्बरे द्रोणे चतुष्टयीरपः समवनीयाभिषिञ्चति ॥ १६ ॥

या दिव्या आपः पयसा संबभूवुर्या अन्तरिक्ष उत पार्थिवीर्याः । तासां त्वा सर्वासाꣳ रुचाभिषिञ्चामि वर्चसा ॥ अभि त्वा वर्चसासिचं दिव्येन पयसा सह । यथासा राष्ट्रवर्धनस्तथा त्वा सविता करत् ॥ इन्द्रं विश्वा अवीवृधन्त्समुद्रव्यचसं गिरः । रथीतमꣳ रथीनां वाजानाꣳ सत्पतिं पतिम् ॥ वसवस्त्वा पुरस्तादभिषिञ्चन्तु गायत्रेण छन्दसेति पुरस्तादेता एव तिस्रो ऽनुद्रुत्य रुद्रास्त्वा दक्षिणतो ऽभिषिञ्चन्तु त्रैष्टुभेन छन्दसेति दक्षिणत एता एव तिस्रो ऽनुद्रुत्यादित्यास्त्वा पश्चादभिषिञ्चन्तु जागतेन छन्दसेति पश्चादेता एव तिस्रो ऽनुद्रुत्य विश्वे त्वा देवा उत्तरतो ऽभिषिञ्चन्त्वानुष्टुभेन छन्दसेत्युत्तरत एता एव तिस्रो ऽनुद्रुत्य बृहस्पतिस्त्वोपरिष्टादभिषिञ्चतु पाङ्क्तेन छन्दसेत्युपरिष्टादथास्योर ऊर्ध्वमुन्मृज्यते ऽरूपं त्वा सुकामुपं जनंकरमित्यथास्य बाहू अनुमार्ष्टि प्र बाहवा सिसृतं जीवसे न इत्यथैनावुपावहरतीन्द्रस्य[1] ते वीर्यकृतो बाहू उपावहरामीत्यथास्मै धनुः प्रयच्छति यदि पुरस्तादप्रत्तं भवति समुन्मृष्टे समुत्क्रोशन्तीति समानमा शुनःशेपस्य विमा-

१ °दुपावहरतो° B; °दुपावहरंती Be Be 7 UD; °दुपावरोहतो° M.

शेनादुत्तरत एतद्रूपायितं ग्रतं[1] तिष्ठति रथस्य[1]। तदभि-
मैत्र्यमिमेषि वीरयद्योगयेन्ता सपत्नहा। आतिष्ठ वृत्रहन्नम-
मुंत्रं देवा अधिमवमित्यथ रथस्य पक्षसी संप्रमृत्यग्नी न्यहा-
वमितौ रथं यौ ध्वान्तं वाताग्रमनु संचरन्तौ। दूरेहेतिरि-
न्द्रियावान्पतत्री ते नो ऽग्नयः पप्रयः पारयन्त्वित्यथ रथमुप-
तिष्ठते[2] नमस्त आत्ते गद्देत्यथ रश्मीनादत्त एवा ब्रह्मन्वेदस्त
तिष्ठा रथे अधि यद्ददस्तः। आ रश्मीन्देव युवसे स्वश्व इति
रथमातिष्ठत्यातिष्ठ वृत्रहन्नथमातिष्ठन्तं परिवृ लेन्द्रो मरुत्विम्
विप्रा सर्वौदृश्यमित्यातो[3] ऽध[4] धनुरधिज्यं[5] कुरुते परि मा
सेना घोषास्त्रो ऽनुमतिरनुमन्यतामिति द्वाभ्यामथैतच्छतं[6]
भिः प्रदक्षिणं परियाय[7] पुरस्तात्याथात्यथास्मै प्रत्यवरोहणत[8]

---

१ Uncertain again; सतं ति॰ रथस्य M; रूपं ति॰ रथस्य Be 7 BUD; (॰यायितः) तिष्ठति॰ रथस्य (omitting च) Be.

२ Thus M Be BU; रथमुपं i.s.o. रथं Be 7 D.

३ Thus Be U; ॰दृश्यमित्याभित्यातो B; ॰दृश्यमित्यस्य यतो Be 7 D; M om. यातो।

४ Thus M Be 7 D; च Be UB.

५ धन्विज्यं M, प्रज्यं the other MSS.

६ ॰च्छतं M; ॰तच्छयं Be 7 BUD; ॰तद्वयं Be.

७ Thus D; पर्याय M; परीयाय Be 7; परीयाय Be; परियायाय BU.

८ Although this reading is presented by M only, I did not hesitate to put it in the text as lectio difficilior; the other MSS. all प्रत्यवरोहण; it seems we have in प्रत्यवरोहणतः an ablat. of the same signification as प्रोहणतः X. 10. s. f.; cp. also अभिप्रोहणत XVIII. 11 and above all XI. 12 (p. 81, 2).

Digitized by Google

आसन्दीं निदधाति । तां तथा प्रत्यवरोहति यथा राजसू तथा । ॥ १७ ॥

यावदेवाचाध्वर्युस्तिष्ठति तावदेव प्रतिप्रस्थाता वाग्य ष्टतेनोपरमति । वारुणस्य[1] वारुणौ भवतः श्विष्टकृतः श्वि- वत्यावचास्मा[2] एतच्छतं[3] ददात्यथैनं विमितेऽभिविशन्ति[4] तस्योत्तरार्धे दुन्दुभिमाघ्नयति । तमसंयात्यादित्य आघ्नन्त्येन सङ्ग्रास्ति यजमान वाचं यच्छ राष्ट्रे च[5] जाग्रहीति[5] । ऊर्ध्वं वाचंयमो भवति । स यत्किंच[6] व्याहरति इदामी व्याहरत्युपसंगच्छन्त एतमेते राजस्थाः सूतग्रामण्यः[7] संग्रहीतारः कारुविद्या इति । तेभ्यः पष्ठौहीं वेहतं ददाति तां ते पचमाना रमयन्तो जागरयन्त आसते । ऽथाध्वर्युरपर- रात्र आहुत्य चतुष्टयीनामपां प्रत्येके मन्वसुपमथ्यामथ्य[8] वामवघ्राय वा प्रयच्छति । तत्[9] स[9] भक्षयति तूष्णीमेवं नवनीतेनाभ्यक्तेन व्याघ्रं परिषजाना इत्यथादित्यसुचम-

---

१ वरु° all MSS. exc. M.

२ श्विष्टकृता° all exc. M.

३ Uncertain again; एतच्चं Be 7 BUD; एतच्चितं Be; M has a blank of two akṣaras.

४ Thus M; °भिविशंति the other MSS.

५ Thus M; चराजस्र° Be BU; चर्मास्र° Be 7 D.

६ °किंचिद् M.

७ °ग्रामचय: M.

८ उपमंथ्य i.s.o. उपमथ्य all MSS.

९ Thus M Be; चरु the other MSS.

Digitized by Google

मुपतिष्ठत उदग्रावेतु सूर्य उदिदं मामकं वचः। उदिहि देव सूर्य सह वग्नुना मम। अहं वाचो विवाचनं मयि वागस्तु धर्मणिरिति। राजन्यबान्धिप्रव्रजतो ऽनुमन्त्रयते वन्तु नद्यो वर्षन्तु पर्जन्याः सुपिप्पला ओषधयो भवन्तु। अन्नवतामोदनवतामामिक्षवतामेषाꣳ राजा भूयासमिति॥ १८॥

अथैतद्द्वादशाहं[1] व्रतं चरति। स यदि प्राङ् वोदङ् वोच्चरति चर्मपक्षीभ्यां क्षौमं वसानो ऽथ यदि दक्षिणतः पश्चाद्वा वैयाघ्रीभ्यां कृष्णवाससं वसानो ऽथ द्वादशस्य व्युष्टायां द्वे स्रुवाहुती जुहोति ये केशिनो मर्ता इति ताभ्यामथ प्रोष्ठमारोहयत्यारोह प्रोष्ठं विषहस्व शत्रूनित्यथास्य शिरः प्रमन्दयति[2] अक्षीमन्तं कल्पतरो विलेखेत्यथास्य केशान्वपति येनावपत्सविता क्षुरेणेति। प्रवपतो ऽनुमन्त्रयते मा ते केशाननुगाद्वर्च एतदित्यथैनान्त्समुच्चित्य दर्भस्तम्बे निदधाति तेभ्यो निधानं बहुधा वैच्छन्नित्यथैनमुष्णोदकेनाप्लावयति बलं ते बाहुवोः सविता दधात्विति। तेन हैतेन मृत्युरीजे प्रजानामैश्वर्यमाधिपत्यꣳ राज्यं परीयामिति। ततो वै स प्रजानामैश्वर्यमाधिपत्यꣳ राज्यं पर्यैद्यः कामयेत समानानामैश्वर्यमाधिपत्यꣳ राज्यं परीयामिति स एतेन यज्ञक्रतुना यजेत। समानानामैश्वर्यमाधिपत्यꣳ राज्यं पर्यैत्यथ हैतेन सुरथः गैव्य[3] ईजे

---

१ अथैतं द्वा॰ M.

२ प्रमदयति M.

३ गैयं M.

ऽऽतिष्ठं परमतामियामिति । ततो वै स आतिष्ठं परमतामैत् । यः कामयेताऽऽतिष्ठं परमतामियामिति स एतेन यज्ञक्रतुना यजेताऽऽतिष्ठꣳ हैव[1] परमतामेति ॥ १९ ॥ पञ्चमः ॥

सद्यस्क्रिया यक्ष्यमाणो भवति । स यूपं च वृक्षं छेदयति खाण्डवं चैषां यूपस्य कारयति खाण्डवं खाण्डवस्य । तꣳ संहृत्य भुञ्जते वा नि[2] वा[2] दधत्यथास्यैतत्पुरस्तादेव पुरो देवयजने वेदिसंमितं विमितं[3] कारितं भवति । तदेतेन खाण्डवेन[4] परिश्रायं[4] कर्षयति । तस्मिञ्जघन्यवाग्यान्यवाग्यापयिता[5] परिश्रयतत्यथास्यैते रथा उपक्लृप्ता भवन्ति चतुर्युक्प्रष्टिवाही द्वियोग[6] सूरिरिति[6] । तेषु काल एव दधि विनाशनानाशयन्ति । स यौवनस्य जघन्याहःसु प्रव्रजितेषु यवेष्वृत्विजः पदेनाक्रापयतीच्छा वा मा याजयिष्यथ मत्तं वा वः कारयिष्यामीति[7] । तेषूपसमेतेषु काल एव प्रातरग्निहोत्रं जुहोत्युपसंगच्छन्त एवमेत ऋत्विजो । ऽथैनानाह सद्यस्क्रिया मा याजयतेति । तं तथेत्युत्तरे प्रत्याऽऽढक्ष्ये तदानीमेव

---

१ एव om. M.

२ Thus M only; न वा दधत्य० Be; न वा दधात्य० BU; निदधाति वा Be 7 DU (bis).

३ om. M.

४ Thus MUDB Be 7; ०खेनापरि० Be U (bis).

५ Thus M; तस्मिञ्जघन्यवाग्यान्यवाग्यापयिता Be 7 DU; तस्मिन् जघन्यवाग्यान्यवाग्यापयिता Be; तस्मिञ्जघन्यवाग्यान्यवाग्यापयिता B.

६ Thus M; द्वियुक्सूरि० the other MSS.

७ Thus M; करिष्यामीति the other MSS.

Digitized by Google

अवस्नावाणं[1] आस्थां कुर्वन्ति । तं[2] तदानीमेव तीर्थादानीय पवयित्वा दीक्षणीयामिष्टिं निर्वपति । तस्याꣳ संस्थितायां मुष्टी चैव न करोति वाचं च न यच्छति । निरुधत्यस्मा[3] एतद्धविरुच्छिष्टं व्रतभाजनमथ[4] प्रायणीयामिष्टिं निर्वपति । हविष्कृता वाचं विसृजते । ऽथास्मा एतद्धविरुच्छिष्टं प्रयच्छन्ति[5] व्रतभाजनमेतत्संस्कृता एवैते रथा आजिं धावन्ति । योजनं प्राक् चतुर्युक्त्रैपदं[6] दक्षिणा प्रष्टिवाही । गव्यूतिं पश्चाद्विद्योगः[7] । सोमशुद्धक् सूरिरिति । ते येनयेन संगच्छन्ते तस्मा आवेदयन्ते यजते ऽयमसावामुष्यायणो ऽमुष्य पुत्रो ऽमुष्य पौत्रो ऽमुष्य नप्ता यवस्मिकयेत्यायन्ति रथा । आगतेषु रथेषु अहिनालेषु नवनीतमुश्चीदति तद्विकाप्योत्पूयाज्यकुम्भे[8] प्रत्यस्यति अव-स्थावा[9] इति । ॥ २० ॥

---

१ Thus M Be U (bis); अवस्त्रियां BDU; अवस्त्रि॰या Be 7.

२ तं only given by M.

३ Thus M Be U (bis); निरुधात्य॰ B Be 7 DU.

४ Thus M Be U (bis); ॰भोजन॰ B Be 7 DU.

५ ॰यच्छति M Be.

६ Corrected; चतुर्युक्त्रैतंपदं Be U (bis); चतुर्युक्त्रैःपदं MBUD; चतुर्युक्त्रैपिक्रोशं पदं Be 7.

७ पश्चाद्विद्योकः MDUB; पश्चाद्विक्रोशः Be 7; पश्चाद्वियुक् Be.

८ Thus MU (bis); ॰याज्यंकुंभे the other MSS.

९ अवस्थावा Be U (bis), cp. Lāṭy. VIII. 4. 7; अवस्थावास्थायां M; अवस्त्रिया Be 7 BDU.

अथ प्रायणीयेन चरति । प्रायणीयेन चरित्वा पदे[न] चरति । पदेन चरित्वा त्रिवत्सेन साण्डेन वत्सतरेण राजा[नं] क्रीत्वोद्यातिथ्यं निर्वपत्यातिथ्येन प्रचर्यैकगणा उपसदो भवन्ति । ¹मध्यमयोपसदा प्रचर्योत्तरवेद्यै काले खलेवाल्यौ² मापयत्यथा- नडुहः संयुज्य यवाग्रस्तृत्य³ स्तृणन्ति³ । यवपुरीषैवोत्तरवेदि- र्भवत्यथ मध्ये ऽनडुहः संयुज्य प्राचो यवाग्रस्तृणन्तो⁴ यन्ति यववर्हिरेवैषा महावेदिर्भवत्यथाहवनीयं प्रणयत्याहवनीयं प्रणीय सदोहविर्धाने संमिनोति । सदोहविर्धाने संमित्याग्नी- षोमौ प्रणयत्यग्नीषोमौ प्रणीय वसतीवरीर्गृह्णाति । तासदाग्नी- मेव परिहृत्य प्रातरनुवाकमुपाकरोति । परिहिते प्रातरनुवा[के] ऽपो ऽच्छैत्यग्निरुदैत्यग्निष्टोमं क्रतुमुपैति । प्रसिद्धो ऽभिषवः प्रसिद्धं ग्रहा गृह्यन्ते । समानं कर्माश्विनाद्ग्रहादाश्विनं ग्र[हं] गृहीत्वा तिस्रो रशना आदाय चात्वालमभ्येति । तद्वै कटे परमिव चषालभाजनं भवति । सकषान्तां⁵ चात्वालमुत्कृष्याधे-

१ All the MSS. exc. M have तत् before मध्यमयो॰ ।

२ M reads खर्वा i.s.o. खलेवाली; are we to correct उत्तरवेद्यै काले खर्वां मापयति ? But then somewhere the words खलेवाली यूपो भवति must have fallen out, cp. the Karmānta.

३ Thus M; प्रहत्यस्तृणंति B; प्रस्तृत्यस्तृणंति Be; प्रस्तृत्यस्तृणंति U; प्रस्तृणंति U (bis); Be 7 D om. this passage.

४ प्रस्तृणंतो M; प्रस्तृहंतो all the other MSS; read perhaps प्रस्तृणन्तो ?

५ Uncertain reading; सकषांतां M Bo U (bis); सचषालांतां Be 7 DU; सचरषालांता B.

Digitized by Google

तान्पशूनुपाकरोत्यग्नीषोमीयमाग्नेयमनूबन्ध्यमिति । तेषामनूचीनं[१] वपाभिराद्रवन्ति ॥ २१ ॥

अग्नीषोमीयस्याध्वर्युर्वपया प्रथमया प्रपद्यते[२] । ऽनूची इतरे आचरन्ति । परिहितासु लोकीयासु हुतासु वपास्वग्नीषोमीयस्य वपया प्रचरति । परीतरे आययन्ति । प्रातःसवनीयानामग्नीषोमीयस्य पशुपुरोडाशो मुख्यो भवति । स्तुते माध्यंदिने पवमाने ऽग्नीषोमीयेण चरत्यनन्तर्हितं[३] आग्नेयस्य[३] वपया चरति । स्वे धामन्नाग्नेयेन[४] चरत्यनन्तर्हितं[५] एवानूबन्ध्यस्य[६] वपया चरति । तृतीयसवनीयानामनूबन्ध्यस्य पशुपुरोडाशो मुख्यो भवत्यसमुदिते ऽनूबन्ध्येन चरति । संतिष्ठते सद्यस्क्रीः । तस्य यदग्नयस्क्रियते व्यृद्धमेवास्य तत्पुनर्यज्ञ[७] एवास्य[७] तद्यादित्याश्च[७] ह वा अङ्गिरसश्च सुवर्गे लोके पस्पृधिरे । ते

---

१ ०नूचीनां M.

२ प्रतिपद्यते M.

३ Thus M; ०र्हितमाग्नेयस्य the other MSS.

४ Thus M Be B U U(bis) D (pr. m.) Be 7 (pr. m.); ०ग्नेयस्य Be 7 (sec. m.) D (sec. m.).

५ चरत्य० M Be 7 BD; चरंत्य० Be U U(bis).

६ च ins. Be 7 BD.

७ Thus my conjecture; तत्पुनर्यज्ञ एवास्य स तथादित्याश्च MU (bis); तद् भृशमेवास्य तत्पुनर्यज्ञ एवास्य स तथादित्याश्च Be; तस्य यज्ञयज्ञस्य तद्यादित्याश्च B; तस्य यज्ञयज्ञ एवास्य तद्यादित्याश्च Be 7 DU.

Digitized by Google

ऽग्निरथ आदित्यानभिप्रजग्मुरग्निना[1] धूतेन यःसुखा
इत्यंधायाकमवचुत्येति ॥ २२ ॥

आदित्याः प्रोचुर्नेमो नवाऽ होतेति। ते ऽमुमादित्य
श्वेतं भूतं दक्षिणां निन्यिरे[2] हिरण्याभिभूतरश्मं[3]। तस्मा
ल्लिङ्गे श्वेताश्वो दक्षिणा हिरण्याभिभूतरश्मो।
आदित्यस्य तद्रूपमथ यद्धिरण्याभिभूतरश्मो रश्मीनां
त्रिवृतः सतश्चतुर्विंशौ माध्यंदिनार्भवौ भवतश्चतुश्चत्वारिंश
होतुः पृष्ठं। चतुर्विंशमग्निष्टोमसाम। त्रिवृदन्यत्सर्वं। श्वेत
ददात्यृतुक्रिया यक्ष्यमाणो[4] ग्रीष्मेषु दीक्षते। स ग्री
संतिष्ठत औपवस्थ्यादेकमहः[5] सुत्यमेकमहस्तस्य त्रिवृत
सतश्चत्वारिंशौ माध्यंदिनार्भवौ भवतश्चतुश्चत्वारिंशं हो
पृष्ठं। चतुश्चत्वारिंशमग्निष्टोमसाम। त्रिवृदेवान्यत्सर्वं।
वडवां ददाति। परिक्रिया यक्ष्यमाणो माघेषु दीक्षते।
ऽहरेव संतिष्ठत आ क्रयादेकमहरौपवस्थ्यादेकम
सुत्यमेकमहस्तस्य त्रिवृत एव सतो ऽष्टाचत्वारिंशौ माध्य
दिनार्भवौ भवतो। ऽष्टाचत्वारिंशं होतुः पृष्ठमष्टाचत्वारिं

---

१ ०ग्र० found in M only.

२ Thus M; all the other MSS. more or less corrupt.

३ Thus here and infra all the MSS.; are we to read ०अभिरश्मि० i.s.o. ०अभिभूत० ?

४ All MSS. exc. M ins. भवति।

५ औपवसथाद० or ओपवसथाद० MSS.

६ Thus M; औपवसथाद० the other MSS.

Digitized by Google

यमग्निष्टोममयाम । पितृदेवाश्च सर्वे । यथाश्रद्धं ददात्यतिक्रिया यजमानपत्निषु दीयते । स चतुरहेण संतिष्ठत या क्रयादिकमहरोत्तरवेदेरेकमहरौपवसथ्यादेकमहः[1] सुत्यमेकमहर्ववृष्टोम एव भवति । ॥ २३ ॥ षष्ठः ॥

व्रात्यस्तोमेन यक्ष्यमाणो भवति । ते राजनि वा ब्राह्मणे वा प्रतिपरमिच्छन्ते मायाय वर्तवे वा । ते यमभिसंजानते तं गृहपतिं कुर्वन्ति । स एषां व्रतानि चरति । यो ऽधःसंवेशनाद्वाप्यनुपायी भवति । तद्धि दीक्षितव्रतमंच यत्कृष्णं वसः कृष्णदूषं परिधत्ते दीक्षितवसनस्य[2] तद्रूपमंच यत्कृष्णावलक्षावजिने धारयति कृष्णाजिनयोस्तद्रूपमंच यद्गुवर्णरजतौ रुक्मौ बिभर्ति परिधान्ययोस्तद्रूपमंच यत्कृष्णमुष्णीषं धारयति दीक्षितोष्णीषस्य तद्रूपमंच यच्चर्ममयैर्बाणवद्भिस्त्रिधन्वं धारयति दीक्षितदण्डस्य तद्रूपमंच यद्व्रात्यवादं वदति दीक्षितवादस्य तद्रूपमंच यत्कुर्वानुपानहौ[3] धारयति नेद्दीक्षितः सममेध्यमधितिष्ठानीति[4] तत्तस्य च वा एतद्रूपस्य यज्ञस्य प्रतोदस्य एव यूपः । प्रतोदपरिषेवणं[5] यथाहुः । रथमुखमा-

---

१ Thus M ; °रौपवसथात्° the other MSS.

२ Thus M ; °वसनीवस्य D ; °वसनीयस्य Be 7 ; the other MSS. still more corrupt.

३ Thus M ; कन्नुवीनानुपानहौ Be 7 D ; कनकुवानुपानहौ B Be U.

४ Thus Be 7 ; °तिष्ठातीति M.

५ °परिषेवणं M.

Digitized by Google

हवनीय। ईषे[1] वेदिर्युगमुत्तरवेदिरुत्तरयुगमुत्तरनाभिरु... हविर्धाने। पक्षसी आग्नीध्रीयमार्जालीयौ। कूबरे[2] ... किंकरावनाना[3] धिष्ण्या। वन्धुरं[4] पत्नीशालं। रथोप... गार्हपत्यो। ऽधिष्ठानं पुरावगार्हपत्यस्तं यच्च प्रमार्ष्टि[5] ... स एषां पशुर्यमपूपं स्थालीपाकं स चरुपशुपुरो... यां परिष्कन्दं[6] ह्वयति सा पुरोनुवाक्या। यदाहरति ... याज्या। यद्धनन्ति स वषट्कारो। यां कुम्भां[7] विमते ... पुरोनुवाक्या। यामधीवाक्यां[8] सा याज्या। यां किल... ह्वयति स प्रसवः[9] प्रतिगरो[10]। यदभिक्रोशन्ति स उद्गी... स एवमेतं यज्ञक्रतुं परोक्षमुपेत्य[11] प्रत्यक्षं नोपेयुः ॥ २४ ॥

यथा दीक्षितावक्षीणौ विच्छिन्नसोमपीथा ... एवं सुत्याद्वात्यावश्चितस्य[12] व्रात्यस्तोमेनानीजानस्य नार्...

---

१ Thus corrected; ईषो M; ईषा the other MSS.

२ Thus M; कबुषी the other MSS.

३ Thus M; किंक (or क)रावनना the other MSS.

४ बंधुरं M; वधुरं Be.

५ Thus M; प्रमार्ष Be; प्रमाष्ट Be 7 BUD.

६ प्रस्कंदं MSS. exc. M.

७ कुंभ्यां MSS. exc. M.

८ °मधिवाक्यां MSS. exc. M.

९ प्रसं MSS. exc. M.

१० प्रसप्रतिगरो MSS. exc. M.

११ परोक्षमुपेत्य Be BU; परोक्षादुपेत्य Be 7; पुरोक्षादुपेत्य M.

१२ °व्रत्याव° i.s.o. °व्रात्याव° M.

निष्कृतसोमपीथ इव ह्येषो ऽथाग्नयस्तेषां ये ऽनाहिताग्नयस्ते यथाकृतं विपरेत्याग्नीनाधाय यथाग्निहोत्रं यथाग्निहोत्रा दृषिवाभि गृहपतिमुपसमायन्ति । तेषां ब्रह्मबन्धुर्मागधो मागधवाश्यो ब्रह्मबन्धुःपुंश्चलू पुंश्चलूवाश्या जरत्कटुर्यो जरत्प्रयोग्याभ्यां[1] युक्तो । व्यूढो वा एष यो ब्रह्मबन्धुर्मागधो मागधवाश्यो । व्यूढा ब्रह्मबन्धुःपुंश्चलू पुंश्चलूवाश्या । व्यूढो जरत्कटुर्यो जरत्प्रयोग्याभ्यां[1] युक्तो । व्यूढेनैव व्यूढं निरवदयते तदेतद्ब्रह्मबन्धनं समवप्रान्तं दक्षोपानहं शामूलाजिनं[2] । रथे त्रिधन्वगृहः समस्तामाकर्षति । दृषिवाणां काच एतदेवाच मवल्बितियो दृषिवा विभजन्ते । तस्य प्रातःसवनीयाननुवर्तन्ते पंचाग्नेयं हवीꣳष्यसंज्ञातमिव वा एते चरन्ति ये व्रात्यं चरन्ति । अग्नेरेवैनान्नापयन्ति । माध्यंदिनीयाननुवर्तन[3] ऐन्द्रामारुत[4] एकादशकपालं[5] । ऐन्द्रो वै व्रात्यो मारुतो यामो । यामेये- वैनान्समीचो दधाति । तृतीयसवनीयाननुवर्तन आदित्येभ्यो भुवद्वद्भ्यश्चरंभूता इव वा एते चरन्ति ये व्रात्यं चरन्ति । भूतिमेवैनाग्मनयन्त्यनूबन्ध्यस्य पशुपुरोडाशमनुवर्तन आदित्य-

---

१ ॰प्रयोगाभ्यां MSS. exc. M.

२ शास्तुलारित्नं M ; शामूलाजिनं the other MSS, but cp. Karmānta.

३ ॰वर्तंत all.

४ ॰मारुता all.

५ ॰कपाल M ; ॰कपाला the other MSS. ; this passage is missing in Be 7 D.

Digitized by Google

स्थरप्रतिष्ठिता इव वा एते चरन्ति ये व्रात्यं चरन्तीं अदितिरस्यामेव प्रतितिष्ठन्ति ॥ २५ ॥

स एव ज्येष्ठानामग्निष्टोमस्तस्य चत्वारि षोडशानि पवमानावुभे एवाच्छावाकस्य स्तोत्रे एष एव[1] सप्तो षुक्थ्यस्तस्य षट् षोडशानि सर्वे पवमानाः सर्वाण्यच्छावा स्तोत्राणि तेन हैतेन मरुत ईजिरे तेषां विष्णु स्थ राजायो[2] हैतेन दैव्या व्रात्या ईजिरे तेषां बुधः सौ स्थपतिराजायो हैतेन कुरुपञ्चालाः पुत्रा ईजिरे तेषामौ दितिर्गौपालायनो वैयाघ्रपद्य स्थपतिरास तेन हैता व्रात्या अभिप्रययुस्तान् पितर ऊचुर्मा पुत्रकाः पञ्चा विष्टोपवादिनो वै पञ्चाला उप वो वदिष्यन्तीति ता नादृत्यैव प्रययुस्ते ह केशिनो दार्भ्यस्योपवसथमाजग्मुस्तान् भूते वरिष्यमाणश्च सर्पतो[3] ऽभ्यालेभिरे पवित्रं वै वरिष्य माण आत्मानं पवयिष्यामह इति वदन्तो ऽथ ह पञ्चा गन्धर्वायणो वालेय आग्निवेश्यो ऽनूचान आस तान्[4] स सर्पतः पप्रच्छ के सर्पन्तीति[5] वयं मरुत इति तेषां वः स्थपतिरित्ययं विष्णुरित्यौपोदितिर्गौपालायनो वैयाघ्रपद्य प्रत्युवाच यत्किं चकर्थ कस्तच्चारेतीति ह परोक्षान्नतमु-

१ om. M.

२ स्थपतिरास वैयो Be.

३ संसर्पतो MSS. exc. M.

४ तान्हवाव स्व M; तान्हव UB Be; न्हव Be 7 D.

५ Thus M; प्रसर्पन्तीति the other MSS. Read perhaps सर्पथेति?

Digitized by Google

निर्दिदेशेति[1] । तान्होवाचाविदुषो व उपावादिशाप वो कुमर इति । पिता वै[2] तत्पुत्रानुपावादीदिति हैनमूचुः पापीयसी ते प्रजा भविष्यतीति । तथा[3] हैवास[3] । ततो[3] ह वा एतत्पञ्चालेषु गन्धर्वायणा वालेया आग्निवेश्याः पापायिता इव । महाकुलं ह[4] तत्पुरा[4] बभूव । स यो व्रात्यमुपवदेदेवमेवैनमुपवदेदथ यो व्रात्यो ऽयं प्रतिवचनाय स्यादेवमेवैनं प्रतिब्रूयात् । ॥ २६ ॥

अथातो भासविलोमा इत्याचक्षते । त्रिवृद्भ्यावर्ति पञ्चदशमग्निष्टोमसाम सर्वे षोडशाः पवमानाः । पञ्चदशमभ्यावर्ति सप्तदशमग्निष्टोमसाम सर्वे षोडशाः पवमानाः । सप्तदशमभ्यावर्त्येकविंशमग्निष्टोमसाम सर्वे षोडशाः पवमाना । एकविंशमभ्यावर्ति त्रिणवमग्निष्टोमसाम सर्वे षोडशाः पवमानास्त्रिणवमभ्यावर्ति त्रयस्त्रिंशमग्निष्टोमसाम सर्वे षोडशाः पवमानास्त्रयस्त्रिंशमभ्यावर्ति त्रिणवमग्निष्टोमसाम सर्वे षोडशाः पवमानास्त्रिणवमभ्यावर्त्येकविंशमग्निष्टोमसाम सर्वे षोडशाः पवमाना । एकविंशमभ्यावर्त्ति सप्तदशमग्निष्टोमसाम सर्वे षोडशाः पवमानाः । सप्तदशमभ्यावर्ति पञ्चदशमग्निष्टोमसाम सर्वे षोडशाः पवमानाः । पञ्चदशमभ्यावर्ति त्रिवृदग्निष्टोमसाम सर्वे षोडशाः पवमानाः । ॥ २७ ॥ सप्तमः ॥

---

1 Conjecturally; परोक्षाव्रतमनुदिदिशिदेशेति M; परोक्षाद्व्रतमनुनिर्दिशेति Be 7 DU; परोक्षाद्व्रतमनुदिदिशेतिने B; परोक्षाद् व्रतमनुदिदिशेति Be.

2 All MSS. exc. M ins. the akṣara स्तां।

3 तथाहैवासततो MSS.

4 Thus M; हैतत्पुरा the other MSS.

अथ वै भवति देवा वै यज्ञमकुर्वत तदसुरा अन्वकुर्व-
तेति । स देवाञ् चक्रे प्रजापतिः कथं[1] न्वहमसुरैर्देवान्व्यावर्तये-
यमिति । स एतं यज्ञक्रतुमनिरुक्तमुपहव्यमपश्यत्तमेकेनानुना-
क्रयतेति । स यदाह प्रातर्यावभ्यो देवेभ्य इति मरुद्भ्यः
प्रातर्यावभ्यो देवेभ्य इति तदाहाथ यदाह सोमः पवत
इतीन्दुः पवत इति तदाहाथ यदाहेन्द्राय पुरोडाशानामिति
शक्राय पुरोडाशानामिति तदाहाथ यदाह वायव इन्द्रा-
वायुभ्यामिति नियुत्वते शक्रनियुद्भ्यामिति तदाहाथ यदाह
मित्रावरुणाभ्यामित्यृतायुभ्यामिति तदाहाथ यदाहाश्विभ्या-
मिति नासत्याभ्यामिति तदाहाथ यदाहेन्द्राय सोमाविति
शक्रायेन्दूनिति तदाहाथ यदाहेन्द्राग्निभ्यामिति शक्रजात-
वेदोभ्यामिति तदाहाथ यदाह विश्वेभ्यो देवेभ्य इति मरुद्भ्यो
विश्वेभ्यो देवेभ्य इति तदाहाथ यदाहेन्द्राय मरुत्वत इति
शक्राय गणवत इति तदाहाथ यदाह महेन्द्रायेति महते
शक्रायेति तदाहाथ यदाहादित्येभ्य इति मरुद्भ्य आदित्येभ्य
इति तदाहाथ यदाह वनस्पतय इति वनर्नृपायेति[2] तदाहाथ
यदाह देवाय सवित्र इति महते[3] देवाय सवित्र इति
तदाहाथ यदाह विश्वेभ्यो देवेभ्य इति मरुद्भ्यो विश्वेभ्यो देवेभ्य

---

१ कथन्वहमसु॰ M; कथमन्वहमसु॰ Be 7 D; कथयन्वायमसु॰ Be BU.

२ Conjecturally; वनेर्पापायेति M; वनेवचपयेति Be 7 D; वनेवचवयेति B U; वनेवर्षापायेति Be.

३ Thus M; समहते Be 7 Bc D; ममहते BU.

Digitized by Google

हवि तथाहोच यथाह देवानां पत्नीभ्य इति महतीभ्यो देवानां पत्नीभ्य इति तथाहोच यथाहेन्द्राय हरिवत इति इन्द्राय मघवत इति तथाह । धाना इन्दुभ्य¹ इत्यु हैके आद्रियन्ति । ॥ २८ ॥

तदेतद्वचनिव यज्ञायज्ञियस्य² स्तोत्रयज्ञायज्ञियस्य नाव³ स्तोत्रे स तां निश्वाय । तं ह असुरा उपेचामेव चक्रिरे किं वा वै करोति⁴ किं वा नेति । स यदा निदां चकार न वा इम एतर्हि पापभद्रयोश्चोरौश्रत इति तदेनां निश्वाय देवो वो द्रविणोदा इति । प्रजापतिर्वै देवो द्रविणोदाः । पूर्णां विवष्ट्वासिचमिति । पूर्णां व्युदचत्यासिचमिति⁵ तदुदा सिञ्चध्वमुप वा पृणध्वमित्यात्थ कामंकामं पूरयाध्वा इति आदिद्वो देव ओहत इति । साध्येभ्यो देवेभ्यः प्रजापतिः कामंकाममूहते⁶ । सप्तदश स्तोमो⁷ भवति⁷ । सप्तदशः प्रजापतिः । प्रजापतेराप्त्यै । अथो ऽभितद्रुदंचिषा⁸ । प्राजा-

---

१ Thus M Be; इंदुभ्य the other MSS.

२ °यज्ञीयस्य M Be.

३ om. all exc. M.

४ करोतती (sic!) M; indication of pluti?

५ व्युदचत्या° B Be U; व्युदचत्य° Be 7; व्युदचत्य° D; व्युदचंत्य° M.— °सिचम्° BUD; °सिञ्च° M; °सिञ्च° Be 7 (pr. m.) Be; °सिञ्चच° Be 7 (sec. m.).

६ Uncertain reading, °मूहतं M; मूहतः the other MSS.

७ स्तोमा भवंति M; स्तोमो भवति the other MSS.

८ चित्राद्रुदंचि° i.s.o. चित्रद्रुदंचि° all the MSS. exc. M.

Digitized by Google

पाप्मो वा[1] यद:[1] । प्रजापतेरनुरूपस्याय । यः पा
भ्रातृव्येण व्याविवृत्सेत[2] स एतेन यज्ञक्रतुना यजे
यैव पाप्मना भ्रातृव्येणावर्तत । इन्द्रो वृत्रं हत्वा
परावतमगच्छदपाराधमिति मन्यमानस्तं देवा यज्ञेनान्वै
५ यतमाग्निर[3] दुर्गां[3] यजिरे[3] भूयो भागधेयं भूयसीं प्रो
मभ्युपावर्तेनोति[5] वदन्तः । स ह प्रातःसवने नाजगाम ।
सर्व एव प्रातःसवनस्य भक्षां[7] चक्रुः[7] । को न्वपेन्द्रस्य[8] सो
भविष्यतीति । तद् संतिष्ठमाने प्रातःसवने ऽभ्याग
यज्ञं प्रति[9] अपुर्तो[10] सर्व एव यमयाध्वर्येव याव

१ Thus M; यावः the other MSS.

२ Thus corrected (cp. S'at. Br. XII. 4. 4. 2); व्याविवृत्सेति all exc. M, which has व्याविवर्तेद् ।

३ यज्ञेपुरे M; यज्ञेपुरे the other MSS.

४ याग्निरं दुदुर्वं यजिरे Be 7 Be D; याग्निरं दुदुरे यजिरे B; याग्नो यजिरे M; cp. on this passage Pañc. Br. XVIII. 5. 12.

५ °वावर्तिंष्यतीति M.

६ I.s.o. वै (thus M Be B), यतः Be 7 D.

७ Thus M; नावकर्षां चक्रुः or नावकर्षांचक्रुः the other MSS. (in Be 7 the passage is missing). Probably the negation has fallen out somewhere.

८ यपेंद्रस्य M.

९ प्रतिप्रति M.

१० Thus my conjecture; यजुवे M; यजुवे or यजुवे the other MSS.; cp. Āp. śrs. XXII. 10. 13.

Digitized by Google

ऽच्छावाकस्य भक्षं प्रत्याजह्रुः[1] इभिरे[2] येन्द्रा इव ह्यमन्यन्त तस्मात्तीव्रसोमे सर्व एव चमसाध्वर्यव आगच्छन्त्यच्छावाकस्य भक्षं प्रत्याघ्नन्ति[3] येन्द्रा इव हि मन्यन्ते तर्हि वाव तद्यवीयांसु वा आहुः सर्व एवैतर्हि यज्ञः येन्द्र इति तन् नाभिमुमुहुः[4] ॥ २९ ॥

इहा इहा इहेतीहेहीहेहीहेहीति[5] स वा एनं गच्छन्तं-मनुसृत्येदं[6] ते इहेदमायं तदभ्युपावर्तस्वेति स वा एनं गच्छन्तमाध्यंदिनस्य सवनस्यान्यगापि निरागन् स ंस्थितकलशमेव चमसानां[7] प्रातःसवने ऽवनयेद्दधि माध्यंदिने सवने विमथितं तृतीयसवने सास्य तीव्रता सप्तदश स्तोमो भवति सप्तदशः प्रजापतिः प्रजापतेराप्त्यै गर्भिणी वडवा दक्षिणा इन्द्रियं वै गर्भ इन्द्रियं वशामः सेन्द्रियत्वाय[8] यो ज्याया वोपतपता वाभिमानं नीतः स्यात्स एतेन यज्ञक्रतुना यजेतानुते हैव तीव्रतामिन्द्रो ऽकामयत वि पाप्मानं हनीय

---

१ Thus M only; प्रत्याजह्रुः or ॰जह्रुः the other MSS.

२ M ins. च before इभिरे।

३ प्रतिघ्न॰ MSS. exc. M.

४ Thus M; न वा अभि॰ U; नवाभि॰ Be B; नवाभि॰ Be 7 D.

५ Thus M Be B; इहे तीहे इहे इहेहीति U; Be 7 D (which write only once इहा): इहेतिहेहिहेहिहेहीति।

६ Before इदं M has once more पृच्छ।

७ Uncertain; M reads as above given; संस्थितकलशं Be 7 UDB; संस्थितकलशं Be.

८ Thus M Be BU; सेन्द्रत्वाय Be 7; सेन्द्रात्वाय D.

श्रैष्ठ्यं देवानां गच्छेयमिति स एतं यज्ञक्रतुमपश्यत्तमाहरत्ते-
नायजत ततो वै स वि पाप्मानमहत श्रैष्ठ्यं देवानामगच्छत्स यः
कामयेत वि पाप्मानꣳ हनीय श्रैष्ठ्यꣳ समानानां गच्छेयमिति
स एतेन यज्ञक्रतुना यजेत येव पाप्मानꣳ हते श्रैष्ठ्यꣳ समा-
नानां गच्छति तस्यातिग्राह्यो वि न इन्द्र मृधो जहि नीचा
यच्छ पृतन्यतः। अधस्पदं तमीं कृधि यो अस्माꣳ अभिदास-
त्युपयामगृहीतोऽसीन्द्राय त्वा विमृधाय जुष्टं गृह्णामीति
परिमृज्य सादयत्येष ते योनिरिन्द्राय त्वा विमृधायेति तस्य
त्रिवृत्पञ्चदशौ विपर्यासꣳ स्तोमौ भवतस्ताः षड् गायत्री-
र्गायत्री[1] वै[1] छन्दसां[1] वि पाप्मानमहत गायत्र्यैव तद्यजमानो
वि पाप्मानꣳ हते ॥ ३० ॥

इन्द्रो ऽकामयतौद्भिद्यꣳ[2] श्रैष्ठ्यं देवानां गच्छेयमिति
स एतं यज्ञक्रतुमपश्यत्तमाहरत्तेनायजत ततो वै स औद्भिद्यꣳ
श्रैष्ठ्यं देवानामगच्छद्यः कामयेतौद्भिद्यꣳ श्रैष्ठ्यꣳ समानानां
गच्छेयमिति स एतेन यज्ञक्रतुना यजेतौद्भिद्यꣳ हैव[3] श्रैष्ठ्यꣳ
समानानां गच्छति तस्यातिग्राह्यो ऽयं चतुरष्टोमो
विश्वजिदुद्भिदग्निष्टोमः। ऋषिर्विप्रः काव्येनोपयामगृहीतो-
ऽसीन्द्राय त्वोद्भिदे जुष्टं गृह्णामीति परिमृज्य सादयत्ये-

---

१ Thus M only; गायत्र्येव वै छन्दांसि all the other MSS.

२ All MSS. ins. च वै exc. M.

३ हवै MB.

४ M ins. (against Taitt. Br.) यथोपाः।

Digitized by Google

ते योनिरिन्द्राय त्वोज्जिद इति । तस्य पञ्चदशैकविंशौ
विपर्यासंः स्तोमौ भवतस्ताः षड् बृहत्यो । बृहती वै
छन्दसामुदभिनदित्येव[1] तद्यजमान उद्भिनत्तीन्द्रो ऽकामयत
वलं[2] भित्त्वा पशून्सृजेयेति । स एतं यज्ञक्रतुमपश्यत्तमाहर-
त्तेनायजत । ततो वै स वलं[2] भित्त्वा पशूनसृजत । यः कामयेत ९
वलं[2] भित्त्वा पशून्सृजेयेति स एतेन यज्ञक्रतुना यजेत । वलमेव[2]
भित्त्वा पशून्सृजते । तस्यातिग्राह्य इन्द्र ओषधीरसनोदहानि
वनस्पतीँरसनोदन्तरिक्षम् । बिभेद वलं नुनुदे विवाचो ऽथा-
भवद्दमिताभिक्रतूनामुपयामगृहीतो ऽसीन्द्राय त्वा वलभिदे
जुष्टं गृह्णामीति । परिप्लाव्य सादयत्येष ते योनिरिन्द्राय त्वा १०
वलभिद इति । तस्य पञ्चदशैकविंशौ विपर्यासंः स्तोमौ भव-
तस्ताः गायत्र्यो । गायत्री[3] वै[3] छन्दसां[3] वलमभिनद्गायत्र्येव[3]
यजमानो वलं भित्त्वा पशून्सृजते । ॥ ३१ ॥ अष्टमः ॥

अतयेयेन यक्ष्यमाणो भवति । स यद्यन्नानां कामयते
अन्नादित्तो भूत्वा दीयते यदा[4] लभते[4] तत्र । स एकाहं ११
नाश्नात्यथाश्नाति । द्व्यहं नाश्नात्यथाश्नाति । त्र्यहं नाश्नात्यथा-
श्नाति । सो ऽथैव विराजमाप्नोति[5] । राजानं क्रीत्वोद्घातिथ्यं

---

१ बृहतीत्येव M.

२ वलं most of the MSS.

३ Thus M; गायत्र्येव छन्दसां वलमभिद्गायत्र्येव the other MSS.

४ यद्ग्लभते M.

५ Thus my conjecture; विराजमाप्नोति M; विराजा यजेतेति the other MSS.

Digitized by Google

निर्वपति । वधु वा एतदुपात्येति चतुरहं नाम्नात्यथाम्नाति पञ्चाहं नाम्नात्यथाम्नाति । षडहं नाम्नात्यथाम्नाति । त्रि उपसदस्त्रिंशत्संपद्यन्ते[1] । त्रिंशदक्षरा विराड्विराजं विरा राजेवान्नाद्यमवरुन्धे । ऽथ य एकादश स्तन एवास्मै स । दु एवैनां तेनाथ य एकत्रिंश स्तन एवास्मै स । दुह एवै तेन । स उपसत्स्वाज्यव्रतो भवति । शीतस्य[2] सर्वविशि रज्जुभिरुपनह्यन्त्यथ द्वाभ्यामथैकया । शीतस्य[3] वैव[3] त्रिभिः पर्वभिरुपनह्यन्त्यथ द्वाभ्यामथैकेन । त्रिशीर्ने वा सर्वि चोभि पर्युष्यवद्धात्यथ द्वे अथैकं त्रिस्तनद्विस्तनैकस्तन रूपाणि कुर्वन्नादित्याद्दिवा पर्यावर्तते नाग्नेरधि ना दुम्बरः सोमचमसश्चतुःस्रक्तिर्भवति[4] त्रिवेदाः[5] सगोपः । ॥ ३३ ॥

सप्तदश स्तोमो भवति । सप्तदशः प्रजापतिः । प्रजाप मन्नाद्यं नोपानमत्तां देवा व्रतसत्याभ्यामन्वेषुः[6] । स यत्स यदेवाग्नेनावरुद्धं तस्यावरुद्ध्या इति तद्य यदा यद्देवानशनेनावरुद्धं तस्यावरुद्ध्या इति तद्य यदुपसत्स्वाज्य भवत्येतद्वै देवानां प्रियं धाम यदाज्यं । देवानामेव प्रि धामावरुन्धे इति तद्य यदादित्याद्दिवा पर्यावर्तते नाग्नेरा

१ ०पद्यन्ते Be 7 BD ; ०पद्यते M Be U.

२ Thus M ; त्रिशीर्णस्य the other MSS.

३ Thus M ; त्रिशीर्णस्य वैव Be U ; त्रिशीर्णस्यैव Be 7 D ; त्रिशीर्णस्य वै B.

४ व्रत M.

५ Thus M B U ; त्रिवेदः Be Be 7 D.

६ ०मन्वेषुः all the MSS. exc. Be which has : ०मनेषुः ।

Digitized by Google

यज्ञमेते वै देवानाममृतपत्ये । नेद्देवानाममृतपत्ये पृष्ठतः करवाणीति तदेष यदौदुम्बरो भवत्यूर्ग्वा अन्नाद्यमुदुम्बर । ऊर्जमेवान्नाद्यमवरुन्धा इति तदेष यत्सोमचमसो भवत्येतद्वै देवानां परममन्नं यत्सोमः । परमेणैवास्मा अन्नाद्येनावरमन्नाद्यमवरुन्द्ध इति तदेष यच्चतुःस्रक्तिर्भवति यदेव दिशो ऽन्नाद्यं प्राविशन्तदवरुन्धा इति तदेष यन्निवेद्या[1] भवति न ह्येतामेकवेद्या इष्टिमाशुपन्तुमर्हतीति तदेष यत्सगोपो भवत्यात्मा वै सगोप आत्मन्नेव यजमानं यथो ऽन्नाद्यं प्रतिष्ठापयानीति तत् ॥ ३३ ॥

तं माध्यंदिनीयैश्चमसैः सहोन्नीय जुह्वति । तस्यर्त्विजो हुतं हविर्धानयोः काले अग्रेण उपातिष्ठन्ति । तं ब्रह्माणः यन्तं[2] समुपविश्य भक्षयन्ति यद्धुतं मन्यन्ते तेन । यद्धुतेन भक्षयन्ति अहुतपेयवर्तंपेयम् ॥ दिशो ऽकामयन्तान्नाद्यः स्यामान्नाद्यमवरुन्धीमह्यन्नाद्यमस्यां प्रतितिष्ठेदिति । ता एतं यज्ञक्रतुमपश्यंस्तमाहरंस्तेनायजन्त । ततो वै ता अन्नादो ऽभवन्नन्नाद्यमवारुन्धतान्नाद्यमासु प्रत्यतिष्ठन् । कामयेतान्नादो मे प्रजा स्यादन्नाद्यमवरुन्धीतान्नाद्यमस्यां प्रतितिष्ठेदिति स एतेन यज्ञक्रतुना यजेतान्नाद्येवास्य प्रजा भवत्यन्नाद्यमवरुन्द्धे ऽन्नाद्यमस्यां प्रतितिष्ठति । तस्य चतसृषु यक्ष्यमाणो[3] ऽष्टाकष्टाकाभ्यानि[3]

---

१ निवेद्यो M.

२ Thus corrected according to the Karmānta; सतं all the MSS.

३ •मायोद्यशम्याभ्यावि M; •मामोष्ठाशाभ्यानि Be; •मामसष्ठाशाभ्यानि B Be 7 UD; cp. supra XV. 18 (p. 222, 12).

Digitized by Google

द्वादशो माध्यंदिनः पवमानः षोडशानि पृष्ठानि सप्त आर्भवः पवमानश्चतुर्विंशमग्निष्टोमसाम । तं द्विशं सह इत्याचक्षते ॥ छन्दांस्यकामयन्त यशो ऽश्नुवीमहि ऽवरुन्धीमहि यशो ऽस्मासु प्रतितिष्ठेदिति । तान्येतं यज्ञ मपश्यंस्तमाहरंस्तेनायजन्त । ततो वै तानि यशो ऽश्नुवत ऽवारुन्धत यश एषु प्रत्यतिष्ठद्यः कामयेत यशो ऽश्नुवीय ऽवरुन्धीय यशो मयि प्रतितिष्ठेदिति स एतेन यज्ञक्र यजेत । यश एवाश्नुते यशो ऽवरुन्द्धे यशो ऽस्मिन्प्रतितिष्ठ तस्य स्तोमा अस्तुवतैकस्यामथ तिसृष्वेकस्यामथ तिसृषु । तं छन्दसामेकत्रिक इत्याचक्षते ॥ स्तोमा अकामयन्तेति स परिवादस्तस्य[2] स्तोमास्त्रिवृदथ पञ्चः पञ्चदशास्त्रिवृदथ सप्तदशास्त्रिवृदथ पञ्च एकविंशास्तमेतं स्तोमानामेकत्रि इत्याचक्षते ॥ ३४ ॥

इन्द्राग्नी वा अकामयेतां समानलोकौ स्याव सम लोकमियावेति । तावेतं यज्ञक्रतुमपश्यतां । तमाहरतां । तेना यजेतां । ततो वै तौ समानलोकावभवतां समानं लोकमैता समानलोकावपश्य[4] यौ कामयेतां राजा च पुरोहि

---

1 Thus all the MSS (only संविंश D); in Be 7 स has been cancelled.

2 परीवाद० M.

3 Thus MD Be 7; एकंचिक BU; एकचिंश Be.

4 Thus M; ०लोकावपश्यन Be 7 BUD; ०लोकावपद्य Be.

Digitized by Google

BIBLIOTHECA INDICA:

A COLLECTION OF ORIENTAL WORKS

PUBLISHED BY THE
ASIATIC SOCIETY OF BENGAL.

NEW SERIES, No. 1322.

बौधायन श्रौतसूत्रम् ।

BAUDHĀYANA ŚRAUTA SŪTRAM.

LIBRARY
UNIVERSITY OF CALIFORNIA

EDITED BY
DR. W. CALAND OF UTRECHT.

VOL. II, FASCICULUS V.

CALCUTTA:
PRINTED AT THE BAPTIST MISSION PRESS,
AND PUBLISHED BY THE
ASIATIC SOCIETY, 1, PARK STREET.
1912.

Digitized by Google

LIST OF BOOKS FOR SALE

AT THE LIBRARY OF THE

ASIATIC SOCIETY OF BENGAL,

No. 1, PARK STREET, CALCUTTA,

AND OBTAINABLE FROM

The Society's Agents—

MR. BERNARD QUARITCH, 11, *Grafton Street, New Bond Street, London, W.*,
AND MR. OTTO HARRASSOWITZ, BOOKSELLER, *Leipzig, Germany.*

*Complete copies of those works marked with an asterisk * cannot be supplied—some of the Fasciculi being out of stock.*

BIBLIOTHECA INDICA.

Sanskrit Series.

Advaitachintā Kaustubha, Fasc. 1-3 @ /10/ each ...	Rs.	1	14
Aitarēya Brāhmaṇa, Vol. I, Fasc. 1-5; Vol. II, Fasc. 1-5; Vol. III, Fasc. 1-5, Vol. IV, Fasc. 1-8 @ /10/ each ...		14	6
Aitareyalocana ...		2	0
Amarakosha, Fasc. I ...		2	0
*Anu Bhāshya, Fasc. 2-5 @ /10/ each ...		2	8
Anumana Didhiti Prasarini, Fasc. I, @ /10/ ...		0	10
Aṣṭasāhasrikā Prajñāpāramitā, Fasc. 1-6 @ /10/ each ...		3	12
Ātmatattvaviveka, Fasc. I ...		0	10
Açvavaidyaka, Fasc. 1-5 @ /10/ each ...		3	2
Avadāna Kalpalatā, (Sans. and Tibetan) Vol. I, Fasc. 1-9. Vol. II, Fasc. 1-9 @ 1/ each ...		18	0
Bālam Bhaṭṭī, Vol. I, Fasc. 1-2, Vol. II, Fasc. 1, @ /10/ each ...		1	14
Baudhāyana Srauta Sūtra, Fasc. 1-3; Vol. II, Fasc. 1-4 @ /10/ each		4	6
Bhāṭṭa Dīpikā, Vol. I, Fasc. 1-6; Vol. II, Fasc. 1, @ /10/ each ...		4	6
Bauddhastotrasangraha ...		2	0
Bṛhaddevatā, Fasc. 1-4 @ /10/ each ...		2	8
Bṛhaddharma Purāṇa, Fasc. 1-6 @ /10/ each ...		3	12
Bodhicaryāvatāra of Çāntideva, Fasc. 1-5 @ /10/ each ...		3	2
Cri Cantinatha Charita, Fasc. 1-3 ...		1	14
Çatadūṣaṇī, Fasc. 1-2 @ /10/ each ...		1	4
Catalogue of Sanskrit Books and MSS., Fasc. 1-4 @ 2/ each ...		8	0
*Çatapatha Brāhmaṇa, Vol. I, Fasc. 1-7; Vol. II, Fasc. 1-5 Vol. III, Fasc. 1-7; Vol. V, Fasc. 1-4 @ /10/ each ...		14	6
Ditto Vol. VI, Fasc. 1-3 @ 1/4/ each ...		3	2
Ditto Vol. VII, Fasc. 1-5 @ /10/ ...		3	2
Çatasāhasrikā-prajñāpāramitā, Part I, Fasc. 1-16 @ /10/ each ...		10	0
*Caturvarga Chintāmaṇi, Vol. II, Fasc. 1-25; Vol. III, Part I, Fasc. 1-18, Part II, Fasc. 1-10; Vol. IV, Fasc. 1-6 @ /10/ each		36	14
Ditto Vol. IV, Fasc. 7-8, @ 1/4/ each ...		2	8
Ditto Vol. IV, Fasc. 9-10 @ /10/ ...		1	4
Çlokavartika, (English), Fasc. 1-7 @ 1/4/ each ...		8	12
*Çrauta Sūtra of Çānkhāyana, Vol I, Fasc. 1-7; Vol. II, Fasc. 1-4; Vol. III, Fasc. 1-4; Vol. 4, Fasc. 1 @ /10/ each ...		10	0
Çrī Bhāshyam, Fasc. 1-3 @ /10/ each ...		1	14
Dāna Kriyā Kaumudī, Fasc. 1-2 @ /10/ each ...		1	4
Gadadhara Paddhati Kālasāra, Vol. 1, Fasc. 1-7 @ /10/ each		4	6
Ditto Ācārasāra, Vol. II, Fasc. 1-4 ...		3	2
Gobhilīya Grhya Sūtra, Vol. I, @ /10/ each ...		3	2
Ditto Vol. II, Fasc. 1-2 @ 1/4 /each ...		2	8
Ditto (Appendix) Gobhila Parisista ...		2	0
Ditto Grihya Sangraha ...		0	10
Haralata ...		1	14
Karmapradiph, Fasc. 1 ...		1	4
Kāla Viveka, Fasc. 1-7 @ /10/ each ...		4	6
Kātantra, Fasc. 1-6 @ /12/ each ...		4	8
Kathā Sarit Sāgara, (English) Fasc. 1-14 @ 1/4/ each ...		17	8
Kurma Purana, Fasc. 1—9 @ /10/ each ...		5	10
Kiranavali, Fasc. I, @ /10/ ...		0	10
Madana Pārijāta, Fasc 1-11 @ /10/ each ...		6	14
Mahā-bhāsya-pradīpodyota, Vol. I, Fasc. 1-9; Vol. II, Fasc. 1-12; Vol. III, Fasc. 1-10 @ /10/ each ...		19	6
Ditto Vol. IV, Fasc. 1-2 @ 1/4 each ...		2	8
Manuṭīkā Saṅgraha, Fasc. 1-3 @ /10/ each ...		1	14
Mārkaṇḍeya Purāṇa, (English) Fasc. 1-9 @ 1/- each ...		9	0
*Mīmāṁsā Darçana, Fasc. 10-19 @ /10/ each ...		6	4
Mugdhabodha Vyakarana, Fasc 1-2, @ /10/ each ...		1	4

Digitized by Google

समानलोकौ स्याव समानं लोकमियावेति तावेतेन यज्ञक्रतुना यजेयाताᳪ᳭[1] समानलोकावेव भवतः समानं लोकमितो ऽरत्नो यज्ञायुधः प्रावृक्षसमयः या ब्राह्मणस्य दक्षिणाश्वतरीरथः सर्वायुधो ऽप्रावृक्षः काᳪ᳭स्यतूणीबन्धः[2] सा राजन्यस्य दक्षिणा तस्य त्रिवृत्पञ्चदशौ विपर्यासᳪ᳭ स्तोमौ भवतस्त्रिवृदेव ब्राह्मणस्य पञ्चदशो राजन्यस्य तमेतमिन्द्राग्नियोः कुलाय इत्याचक्षत एष एव सम्पितापुत्रीय एष सलोकीय एष भागः ॥ ३५ ॥ नवमः ॥

अभिचरणीयैः सोमैर्यक्ष्यमाणो भवति स दशानि यज्ञायुधान्युपकल्पयते बाधकानि च तैल्वकानि च श्ववानसो[3] ऽधिषवणे फलके पुरुषास्थन्[4] दृषदौ स यथाध्वर्युरुपाᳪ᳭शुं परीक्ष्याजानमभिषुणोति तस्य यो ऽᳪ᳭शुः परापतति तमेतस्मिन्नाव आधायोपसंष्ठाप्याहामुं जहाय त्वा होष्यामीत्या तमितोऽन्त्याहे ऽथैतं मन्त्रमाहवनीये ऽनुप्रहरतीदमहममुमामुष्यायणं परिभुना[5] भङ्गेन[5] विध्यामीत्यथ यं यजमानो द्वेष्टि

---

१ यजेतां all exc. M.

२ ॰तूणीबंधः Be; ॰तूणिबंधः U; तूष्णीबंधः M; ॰तूणिबंधाः B; नीणिबंधः Be 7 D.

३ Thus M Be; श्ववनभ्ये Be 7 D (cp. Āp. XXII. 4. 17, S'āṅkh. XIV. 22. 18, Ṣaḍv. br. III. 8); श्वाननभ्ये U; श्वाननभोम्यो B; cp. the Dvaidhasūtra.

४ Thus M; all the other MSS. corrupt.

५ Thus M; परिभुनासंग्येन Be U B; परिपाशाभंग्येन Be 7 D.

Digitized by Google

तं मनसा ध्यायत्यथैतत्पात्रं चरे यथायतनꣳ सादयत्यमुष्य त्वा प्राणे सादयामीति । स यं कं च यदं स्तृणात्येवमेवैनं स्तृणाति । यदु[1] किं[1] च[1] पापꣳ सादयत्येवमेवैनत्सादयति । स एष त्रिवृदग्निष्टोम एकस्तोम[2] एकहविर्धानस्तꣳ श्येन इत्याचक्षते ॥ ऽथेषुः[3] । समानमभिचरणीयꣳ शिल्पं । तिसृषुतिसृषु[4] स्तुवते । रथो हविर्धान॥मथ संदꣳशः । समानमभिचरणीयꣳ शिल्पं । द्वौ त्रयस्त्रिꣳशौ मध्यत स्तोमौ भवतो । द्वे[5] हविर्धाने ॥ अथेन्द्रवज्रः । समानमभिचरणीयꣳ शिल्पं । पञ्चदश एव भवति ॥ ॥ ३६ ॥

दुरग्नेन[6] यक्ष्यमाणो भवति । स उपकल्पयते षष्टिꣳ शतमानानि हिरण्यानि त्रिꣳशतꣳ सुवर्णानि त्रिꣳशतꣳ रजतानि[7] बह्वन्यद्धिरण्यꣳ । स आमावास्येन हविषेष्ट्वा सौर्यं चरुं निर्वपति । तस्मिन्सुवर्णꣳ शतमानं ददात्यथ सायꣳ हुते ऽग्निहोत्रे चान्द्रमसं चरुं निर्वपति । तस्मिन्रजतꣳ[7] शतमानं ददाति । स एवमेवैताभ्यामिष्टिभ्यामहरहर्यजमानो मासमेत्यथ दीक्षते । दीक्षणीयायां द्वादशमानꣳ हिरण्यं ददाति ।

---

१ यत्किंच M.

२ This word twice in Be 7 B U D.

३ Thus M only ; वैषु all the other MSS.

४ तिसृषु once in M, which adds also च after स्तुवते ।

५ द्वेद्वे M.

६ Thus M U B Be ; दुराग्नेन D ; दुराग्नेन Be 7.

७ राजत॰ M.

Digitized by Google

आग्नीध्रीयायां चतुर्विंशतिमानं ददात्यातिथ्यायां द्वे[1] चतुर्विंशतिमाने[1] ददाति[1] । प्रथमायामुपसदि चत्वारि ददाति । द्वितीयस्यामुपसद्यष्टौ ददाति । तृतीयस्यामुपसदि षोडश ददाति । चतुर्थ्यामुपसदि द्वात्रिंशतं[2] ददाति । पञ्चम्यामुपसदि चतुःषष्टिं ददाति । षष्ठ्यामुपसद्यष्टाविंशं शतं चतुर्विंशतिमानानां[3] ददात्यथातः शतसंख्येवाग्नीषोमीयस्य हुतायां वपायां द्वे शते ददात्याग्नेयस्य हुतायां वपायां चत्वारि ददाति । प्रातःसवनीयेष्वष्टौ[4] ददाति । माध्यंदिनीयेषु षोडश ददाति । दक्षिणानां काले द्वात्रिंशतं ददाति । तृतीयसवनीयेषु चतुःषष्टिं ददात्यनूबन्ध्यस्य हुतायां वपायामष्टाविंशं शतानां[5] ददाति । स यदेताभ्यामिष्टिभ्यामध्वरश्च यजते सूर्याचन्द्रमसोरेव तस्यायुष्यं सलोकतामाप्नोति । ॥ १७ ॥

[6]अथ यद्धिरण्यदक्षिणो[7] भवति हिरण्मयमेव तद्यजमान

---

१ Thus M; विंशतिमानं ददात्यथ Be B; in the other MSS. this passage is missing.

२ Thus M U; विंशतं Be; in the other MSS. this passage is missing.

३ Thus M; ॰शतिमानं the other MSS.

४ ॰सवनीयेष्टौ Be 7 D.

५ Thus M Be 7; शतमानानां Be B U.

६ During the printing I was so happy as to obtain, for the remaining part of this praśna, from Mr. Muthu Dikshitar of Lalgudi (Manakkāl, Madras) a copy (designed by me as L) from a MS. in his possession. This MS. is in Grantha and independent from my MSS., but, on the whole, not much better.

७ Thus M; यद्धिरण्यं दक्षिणा the other MSS.

Digitized by Google

इन्द्रो यातो ऽवसितस्य राजा शमस्य च शृङ्गिणो वज्रबाहुः । सेदु राजा चेति[१] चर्षणीनामरान्न नेमिः परि ता बभूवेति । यजतीन्द्रो राजा जगतश्चर्षणीनामधि क्षमि विषुरूपं यदस्ति । ततो ददातु दाशुषे वसूनि चोदद्राध उपस्तुतश्चिदर्वाक् स्वाहेति । इन्द्र एवास्मा इन्द्र आविर्भवति । १
तस्मै[२] कामाग्नुवते ॥ कामान्धर्ह[३] ह[२] वाभ्रव्यं बृहस्पतिराङ्गिरसो याजयां चकार । तस्य होपवसथीये ऽहन्क्रुद्धा[४] वौवाच[५] । स होवाचाध्वर्यो[५] वि[५] वै[५] मे मङ्गागात्त्वं मे यज्ञं स्थापयेति । तद्ध होवाचाम्वदे तदुपवसथः[६] श्वो यज्ञः संस्थावेति[७] । स होवाच सनेव मे स्थापयेति । तस्य[८] ह तावद्विदिलायेन[९] हविर्धाने १०

---

१ चेति (as TBr. II. 8. 4. 3) Be B D U; क्षयति (as RV. I. 32. 15) Be 7.

२ नक्षिम Be L.

३ Corrected; कामावाव B U Be (pr. m.); कामावार्दव Be 7; कामावर्व D; कामौवर्वाव Be (sec. m.); कवौवर्वान्हव L.

४ My conjecture; हनूक्राविधाय B U L; हनूपक्राविधाय Be; हनूंचाकृपिधाय Be 7 D.

५ Thus Be; all the other MSS. corrupt.

६ Uncertain r.; होवाचाम्वहैतदु° Be 7 D; होवाचाश्वयंवेतदु° Be B U; होवाच अर्धयवेत उप° L.

७ °स्थावेति Be B U; °स्थाहेति Be 7 D; °स्थावेति L.

८ तस्या MSS. exc. L.

९ तावद् only in Be (sec. m.); भवद् L; instead of विदिला (thus L Bc) विदिंला the other MSS.

Digitized by Google

चर्मकुलूयसमुपवे निधायाऽऽशूच्यमवचुद्य[1] चकार[1] यचिद्दि तं म्लेच्छ उलूखलक पुच्छे। इह द्युमत्तमं वद जयतामिव दुन्दुभिरित्यथ होढचमसे वसतीवरीभ्यो ऽध्यपो[2] निःषिच्य समुद्रावृत्य जुह्वां चकार यथा जना सꣳस्थापे मतानि[3] कोमतिनां[4] ममामाक्षोभयाति[5]। कानान्धस्य[6] प्रस्थितं[7] वाभ्रव्य[8] तौग्रस्तवꣳ[8] मवदिन्द्र[9] सुपस्य स्वाहेति। स एष उत्सन्नस्य वा वीतप्रहुतस्य वा[10] नीतस्य[10] वा यज्ञः। स[11] यदागता[12] स्यादथ चतुष्टोमेनाग्निष्टोमेन यजेत पुरा क्षेपाच्छाये ॥ ४१ ॥

मनुर्वैवस्वतो ऽकामयत प्रजाꣳ सृजेय प्रजामवरुन्धीय प्रजां विन्देया[13] मा[13] प्रजया चचीरत्रिति[13]। स एतं

---

१ •चमवलूखाचकार L.

२ चपो only in Be L.

३ हताणि MSS. exc. L: मताणि।—जनासखाये L.

४ मतिनां Be; मतीमूर्षं L; हतीनां the other MSS.

५ ममामाक्षोभयाति Be, •यति L; ममामामाक्षोपयति the other MSS.

६ Thus Be L; the other MSS. corrupt.

७ प्रस्थितं all exc. Be which has प्रस्थितं।

८ वाभ्रव्यतौग्रस्तवं Be B; वाभ्रव्यःतौहस्तवं U; वाभ्रव्येतौहस्तव Be 7; वाभ्रव्येतौहस्तव D, वाभ्रंव्यचिग्रस्तवं L.

९ मवदिंद्रां Be 7 D; मिंद्रवदिंद्रा Be; मिवपर्तींद्रा B; मिवपंर्तींद्रा U; मिवदिन्द्रो L.

१० Thus Be L; वतितस्य BUD; वत्तंतस्य Be 7.

११ स MSS.

१२ यदागत Be L; यदागता B Be 7 DU.

१३ Conjecturally; विन्देय मा प्रजयाचचीरत्रिति BU; विंदेय माप्रजमाच• Be; विंदेय माप्रजयाचचरंतीति Be 7 D; विन्देयप्रजयाचचौ• L.

यज्ञक्रतुमपश्यत्तमाहरत्तेनायजत । ततो वै स प्रजामसृजत प्रजामवारुन्द्ध प्रजामविन्दतैनं प्रजायाजत[1] । यः कामयेत प्रजाः सृजेय प्रजामवरुन्धीय प्रजां विन्देया[2] मा प्रजया यजीरन्निति[2] स एतेन यज्ञक्रतुना यजेत । प्रजामेव सृजते प्रजामवरुन्द्धे प्रजां विन्दत[3] एनं[3] प्रजया यजते । तस्य[4] प्राचीनस्तोमास्त्रयस्त्रिवृतस्त्रयः पञ्चदशास्त्रयः सप्तदशास्त्रय एकविंशाः ॥ सो ऽकामयतान्नादी मे प्रजा स्यादन्नाद्यमवरुन्धीतान्नाद्यमस्यां प्रतितिष्ठेदिति । स एतं यज्ञक्रतुमपश्यत्तमाहरत्तेनायजत । ततो वै तस्यान्नादी प्रजाभवदन्नाद्यमवारुन्द्धान्नाद्यमस्यां प्रत्यतिष्ठद्यः कामयेतान्नादी मे प्रजा स्यादन्नाद्यमवरुन्धीतान्नाद्यमस्यां प्रतितिष्ठेदिति स एतेन यज्ञक्रतुना यजेतान्नाद्येवास्य प्रजा भवत्यन्नाद्यमवरुन्द्धे ऽन्नाद्यमस्यां प्रतितिष्ठति । तस्य दश स्तोमा । दशसु दशसु स्तुवते विराजो रूपं ॥ वागाम्भृण्यकामयतापरिमितं यशो ऽश्नुवीयेति । सैतं यज्ञक्रतुमपश्यत्तमाहरत्तेनायजत । ततो वै सापरिमितं यश आश्नुत । यः कामयेतापरिमितं यशो ऽश्नुवीयेति स एतेन यज्ञक्रतुना यजेतापरिमितमेव यशो

१ °यजते all exc. Be L.

२ विंदेय मा प्रजामायजरंन्निति Be D; विंदेय प्रजयायजरंतीति B Be 7 U; विन्देय मा प्रजामायजीरन्निति L.

३ Thus corrected; विंदत एवं Be L; विंदतैनं the other MSS.

४ Only in Be L.

Digitized by Google

ऽयुते । तस्य ह्यस्तु यक्ष्यमाणः शते सहस्रे ऽयुते प्रयुते ऽर्बुदे न्यर्बुदे समुद्रे मध्ये ऽन्ते परार्धे ॥ ४२ ॥

यमो वैवस्वतो ऽकामयत पितॄणामैश्वर्यमाधिपत्यꣳ राज्यं परीयामिति । स एतं यज्ञक्रतुमपश्यत्तमाहरत्तेनायजत । ततो वै स पितॄणामैश्वर्यमाधिपत्यꣳ राज्यं पर्यैत् । कामयेत समानानामैश्वर्यमाधिपत्यꣳ राज्यं परीयामिति स एतेन यज्ञक्रतुना यजेत । समानानामैश्वर्यमाधिपत्यꣳ राज्यं पर्येति । तस्य शते यक्ष्यमाणः सहस्रे ऽयुते नियुते प्रयुते ऽर्बुदे न्यर्बुदे समुद्रे मध्ये ऽन्ते परार्धे पदे पक्षे । नित्यमुक्था मन्थेन यमाग्नो मन्यत एतावति[1] मे[1] कृतमित्यथ[1] यज्ञतन्त्रं । आतिथ्येन प्रचर्य गार्हपत्ये प्रवर्ग्यं प्रवृणक्ति । तेनाहवनीये प्रचरति । तं काम उद्वासयति । शिरो वा एतद्यज्ञस्य यदातिथ्यं । यशः प्रवर्ग्यः । शीर्षन्नेव यज्ञस्य यशो दधातीति नु यज्ञप्रवर्ग्यो । ऽथ सुते प्रवर्ग्यः । पवमानेन चरित्वाग्नीध्रे[2] प्रवर्ग्यं प्रवृणक्ति । तेनाहवनीय एव प्रचरति । तं तदाग्नीध्र एवोद्वासयति । शिरो वा एतद्यज्ञस्य यत्पवमानो । यशः प्रवर्ग्यः । शीर्षन्नेव यज्ञस्य यशो दधातीति नु सुत्याप्रवर्ग्यो । ऽथ यज्ञप्रवर्ग्यो । ऽथ सुते प्रवर्ग्यो । ऽथ सुत्याप्रवर्ग्यः[3] ॥ ४३ ॥ एकादशः ॥

---

१ Uncertain r.; एतावतीमेकृतमित्यथ Be; एतावन्ति मे कृत॰ L; एतावती (ति) मेत्यथ the other MSS.

२ MSS. exc. L ins. वै ।

३ The close of this chapter must contain several corruptions.

१पुरूरवा ह पुरा ऐडो राजा कल्याण आस । तꣳ होर्वश्यप्सराभिदध्यौ । तꣳ संवत्सरं कामयमानानुचचार । तꣳ ह स वै२ पूर्वं ऽभिक्राम्यति । तद्धातिचिरं मेने । तस्य ह धावतः पुरो रथं कर्तं दर्शयामास । तꣳ ह दृष्ट्वा राजावतस्थौ । तꣳ हावस्थाय न ददर्शाथो ह पुनरातस्थौ । तꣳ हास्थायैव ददर्श । स ह सारथिं पप्रच्छ सारथे किं पश्यसीति । त्वां भगव इति होवाच रथमश्वाम्यन्त्वानमिति । स हैषां चक्रे हृष्यामि वै किलेति । तꣳ ह वागभ्युवाच न वै हृष्यसि वै त्वामेतं३ कर्तमदीदृशमित्यथ कस्त्वमित्यहमुर्वश्यप्सरेति होवाच । या त्वा संवत्सरं कामयमानान्वचारिषं । तां मा जायां विन्दस्वेति४ । दुरुपचारा ह वै भवति५ देवा५ इति५ होवाच । का त६ उप- १
चर्येति६ । घृतं७ ममोपसदः७ स्युः७ । घृतꣳ घृतं मा वर्षिष्ठुत्वा

---

१ This and the following adhyāyas are found also in a badl[y] corrupted tradition. I did not note all the various readings no[r] all my emendations; the list of them would fill more spac[e] than the text itself.

२ Thus L only; चैव or हैव the other MSS.

३ त्वचितं or त्वचितम॰ MSS.

४ L Be sec. m. विन्दस्वेति ।

५ Thus L U Be 7; भवंति देवा इति B Be (pr.m.); भवन्ती देवी[ति] Be (sec. m.).

६ Thus L Be (sec. m.); तवाचार्येति the other MSS.

७ Instead of these three words given thus by Be and [L] (which only gives स instead of स्व), the other MSS.: सं जायेत[...] वदसु or संजायेत इति वदत ।

Digitized by Google

यदहरागच्छेयुस्तद्राययना वा । न त्वा नग्नं पश्येयमिति । सर्वमेवैतद्भगवति सुकरमिति होवाच । कथा त्वपि[1] जाया पतिं नग्नं न पश्यतीत्यन्तर्वासं वसीथा[2] इति होवाचानग्नो भवेति[3] । तथा चहोवाचान्तर्वासं वसानः । सा ह स्म जाता-जातानेव पुत्रानपविध्यति । ताꣳ ह राजोवाच पुत्रकामा ह वै भगवति वयं मनुष्याः स्मो जाताञ्जातान्नु त्वमपविध्यसीति । सा होवाच यर्थेतराचयो भवन्ति चीर्णायुषो ऽन्ये । भूयः प्रियं करवावहा इति । सायुं[4] चामावसुं च जनयां चकार । सा होवाचेमौ विश्वतेमौ[5] सर्वमायुरेष्यत इति । प्राङायुः प्रवव्राज । तदेते कुरुपञ्चालाः[6] काशिविदेहा इत्येतदायवं प्रव्राजं । प्रत्यङ्ङमावसुस्तस्यैते गान्धारयः[7] स्पर्शवो ऽराट्टा इत्येतदामावसवम्[8] । ॥ ४४ ॥

अथो हास्या एषा पूर्वचित्तिरप्सरा स्वसा बभूव । सा हैनां पप्रच्छ ज्योग् वै मे स्वसा मनुष्येष्ववात्सीद्धन्तैनामच्छाया-

---

१ त्वपि L, त्वपि the other MSS.

२ वसीथा L Be (sec. m.) वासीत्वाम the other MSS.

३ भवति MSS. exc. L, which has वेद च वाससो भवतीति ।

४ सायुं Be (sec. m.).

५ विश्वते॰ Be L ; the other MSS. om. these words.

६ ॰पांचालाः L B.

७ The proper names given acc. to Be (sec. m.); the other MSS. गांधारा (or रो) पचस्वर्शवोहारा (or त्व) सा (or चा) ।

८ इत्येतन्मावसव or इत्येतन्मामवसव or इत्येतन्मामावसम् MSS.

Digitized by Google

नीति । तथा यथागत्यैव संगमं न लेभे । ऽथो हास्या अविधूयमुपश्लापदासीद्वत्स[१] ह स्म वै पूर्वाणां महिषीणां रूपं[२] भवति । तद्रूपकल्पं कृत्वा प्रमार्य[३] पिकापाद्यो[४] हास्या उरस्वीरप आसन्द्योपाद्दे बद्ध आस । तद्ध स्म प्रममाथ । तस्मिन्नि-चमाचे हस्रे[५] ऽयमवीरज[६] इति । तच्छ्रुत्वा राजोत्पपात । तामभ्यागम[७] तामभ्युपेयाय । तद्ध[८] सा[८] नकुलौ[८] भूत्वा प्रत्युपेयाय । तस्य हान्तर्वासमवलुञ्चोपाय ह स्म विद्युतं जनयां चकार[९] । [१०]तद्ध स्म विद्युति नग्नमनुचक्षावथो ह राजाजगामास्माकरं वा अवमनीत उरुपमत्ययाकरंरि नूनमिति[११] प्रत्यहं प्रजहिष्यामीति । किं व्यभूदिति । नग्नं[१२] माद्दर्शमिति[१२] होवाच । तस्यां प्रव्रजितायामभिषविद्धः

---

१ Thus (only अवि॰ or अवा॰) MSS.

२ Only in Be (sec. m.).

३ Thus Be L (sec. m.); प्रर्ज the other MSS.

४ पिक्षापाद्यो Be (sec. m.); पिक्षापाद्यो or पिक्षपाद्यो or पिक्षाप[illegible] the other MSS.

५ हसैमे Be (sec. m.); हसैमे L; हस्रे the other MSS.

६ Corrupt; यमवीरजा Be (sec. m.) L; यमविराजा the other MSS.

७ ॰भ्यागत्य MSS.

८ Conj.; तंकुलौ Be (sec. m.); तसंमेकुलौ the other MSS.

९ Thus L Be (sec. m.); जनयामास the other MSS.

१० Be 7 ins. वाङ्के चकार, B Be (orig.) ins. वांचोपकार।

११ These corrupted words without any var. r. in all MSS.

१२ चाद्दर्शमिति MSS.

Digitized by Google

ग्रोपह्वयाञ्चकार[1] । तꣳ होवाच बृहस्पतिराङ्गिरसो यन्त्वा ग्रहैष्म[2] याजयिष्याम्यपि त्वा पुनर्जिन्विष्यामीति[3] । तꣳ ग्रहैष्म[4] बृहस्पतिराङ्गिरसो याजयां चकार । ताꣳ हावभृथादेवोदेत्य प्रतिददर्श । ताꣳ ह पुत्रौ प्रतीत्योचतुरिह नौ नय यत्र ते गतिर्वसिनौ[5] वा[5] पितरमप्यूहथ[5] इति । सा[6] होवाच सं वां[7] पुत्रकौ जनेय यावदिह तिष्ठ एव राष्ट्रीर्वत्स्यामि यो माञ्च्यय वचो मोघमवदिति । तथा यद तिष्ठ[8] एव[8] राष्ट्रीरवाचामन्तर्वायं वसानयस्याꣳ रेतः सिषिचे । सा होवाच[9] कथमिदꣳ स्यादिति । कथꣳ हि नूनाꣳमिति[10] राजा प्रत्युवाच । स होवाच नवां कुम्भीमाहरेति । तस्यामेनयोः सिषेचाथ[11] स कुरुक्षेत्रे विषवन्त्यो[12] नाम पुष्करिण्यस्तासामुत्तरार्ध्यां सुवर्ण-

---

१ Conj.; ग्रोमं चकार or चकार MSS.

२ ग्रहैमे MSS.

३ ॰जिह्विष्या॰ MSS.

४ ग्रहैष MSS.

५ Thus Be (sec. m., only ॰मप्यूहथ); ॰वसिष्येवाभ्यितरं मप्यूहथ or ॰वसिष्येवायपित॰ the other MSS.

६ From सा unto होवाच (p. 399. 8) only in Be L.

७ वा Be.

८ om. Be.

९ cp. p. 399, n. 6.

१० नूनाचमिति L, नूनामिति the other MSS.

११ Thus L; तस्यामेनं॰ Be (sec. m.); तस्यामेषं the other MSS.

१२ विषवन्त्यो Be (sec. m.); विषवन्त्येनाः the other MSS.

Digitized by Google

बृहस्पतिर्देवानां पुरोहित आसीदुशना[1] काव्यो ऽसुराणां । ब्रह्मण्वन्तो देवा आसन्ब्रह्मण्वन्तो ऽसुरास्ते बहून्संग्रामान-विजयमाना आसां चक्रिरे । तेषां न कतरे चन भविष्यदा-जज्ञुर्गन्धर्वो हैव सूर्यवर्चा भविष्यदाजज्ञे । तस्यो हेन्द्रो जायाया[2] उपह्वाय्य[2] आस । तां होवाचामुदिताङ्गि[3] त्वमिदं गन्धर्वं पृच्छ किमर्थमिदं देवासुरा न विजयन्तीति । तं तथेति होवाच त्वमपि स्म आगच्छतादिति । स हान्तः समुद्रे हिरण्यया[4] नावया सहजानि कुमार्यां[5] चक्रे । ऽथो हेन्द्र आजगाम । स ह सौवर्णः पटरो भूत्वा नौमण्ड[6] उपशिश्ये[7] । तां हागतमेव विदित्वा[8] पप्रच्छामुदिताङ्गे[9] त्वमिदं ब्रूहि १०
किमर्थमिदं देवासुरा न विजयन्तीति । मोक्षैरिति होवाच कर्णिनी वै नौराप[10] इति । ब्रह्मण्वन्तो देवा इति होवाच ब्रह्मण्वन्तो ऽसुरा इति । तच्छ्रुत्वेन्द्रो हरिशुकरूपं[11] कृत्वोत्पपात ।

---

१ Thus MSS.

२ Thus L and Be (sec. m.), which has, however, •हाजमाय; जायायाहाय उपहाय्य चास the other MSS.

३ •मुदितांगि or •तांचि MSS.

४ हिरण्यया MSS. exc. B.

५ Uncertain; सहजानिकुमार्यायां L; r. सहजानि: ? cp. TS. III. 2. 8. 5

६ नौमंड L; नौमंडप Be (sec. m.); नैमंध्ये the other MSS.

७ •शिश्येप MSS. exc. Be which has: •शिश्ये ।

८ विता L.

९ •दितांग L Be (rightly ?); •मुदितांचि the other MSS.

१० Thus L; नौरूप Be (sec. m.); नोराप the other MSS.

११ Emended; हरिः शुकोरूप L; हरिः शुकरूपं the other MSS.

Digitized by Google

तꣳ ह दृष्ट्वोवाच[1] मघवन्नो[2] इति यतरेषाꣳ[3] हरिस्ते जेष्यन्तीति । स ह गत्वोशनसं[4] काव्यमुपमन्त्रयां चक्रे जयन्त्याश्च[5] दुहित्रा शतसृभिश्च कामदुघाभिः । स हाग्मतो ऽसुरेभ्यो ऽधि देवानुपसमियाय[6] । ततो ह वा एतद्देवा असुरान्संग्रामं जिग्युः । ॥ ४६ ॥

स ह गुरुरिव मेने गरमिव गीर्त्वा बहु वित्तमसुराणां प्रतिगृह्य । स होवाच गुरुरिवास्मि गरमिव गीर्त्वा बहु वित्तमसुराणां प्रतिगृह्य हन्त मा याजयेति । तं द्वादशस्तोमेनाग्निष्टोमेन बृहस्पतिराङ्गिरसो याजयां चकार । तेन हैनोर्ध्वꣳ हिरण्यमुज्जगार । तद्ध[7] दृष्ट्वा[7] चक्रे हन्ताहमिदमसुरेभ्यो निर्हराणीति । तद्धेन्द्र[8] आघ्रायैव शिलां[9] चकार । ते ह वा एत[10] औशनसा नाम कुरुक्षेत्रे पर्वतगाः[11] ॥

---

१ Uncertain; दृष्ट्वेचनो L; दृष्ट्वाचो Be; दृष्ट्वैवच the other MSS.

२ Thus Be; मघवयेन्मघवच्छिति L; मघवान्नूनघवा the other MSS.

३ Thus L; यतर रषां Be; यद्तरेषां the other MSS.

४ Thus MSS. exc. Be which has स चाग॰ and L: स चागत्यो॰ ।

५ My conjecture; जयंतच Be; जयन्त्याच L; जायत्याच or यत्याच the other MSS.

६ Thus L; ॰समीयाच Be; ॰समीपच or ॰समीयाप the other MSS.

७ तंदृष्ट्वे॰ Be; तद्दृष्ट्वो॰ L; तद्वेदृष्ट्वे॰ the other MSS.

८ Thus L; तथेंद्र Be; तथेंद्रे or तद्धेंद्रे the other MSS.

९ शिलीम् L.

१० Only in L and Be.

११ पर्वतेश्चाः L.

Digitized by Google

स ह चक्षुरिवाचरदप्रतिष्ठितः[1] । स होवाच चक्षुरिव वा अहमप्रतिष्ठितो[2] । हन्त मा याजयेति । तमेकविंशप्रतिष्ठेनेनाग्निष्टोमेन बृहस्पतिराङ्गिरसो याजयां चकार । ततो वै स प्रतितस्थावथो[3] हेन्द्रः[4] कामदुघा अवरुरुधे[5] । तं ह सायमेतमुवाच प्रातरेतादिति । प्रातरेतमुवाच सायमेतादिति । स एवमेव संवत्सरं नेनीयामास । स होवाच प्रातरेतादिति । मा सायमात्य सायमेतादिति । मा प्रातरात्य को ऽयमेतः कतमो ऽयमेतो । यमेनमेतं[6] मघवन् ब्रवीषीति[7] होक्त्वा प्रवभ्राजाथो हेन्द्र उक्थानि कामदुघाश्चकार । तां ह स वरुणाय प्रददाविदं तव[8] मम[8] चेदममुष्य[8] च गौश्चेति । बृहस्पतय आङ्गिरसायेदं नावाख्यास्ता विधारयानावरुन्धेदमभ्यनौति[9] विष्णवे शिपिविष्टाय चेत्यैषैवोक्थानां

---

१ °ाचरद° only in L and Be.

२ °वाश्चिमप्रति° Be; वा चश्चिवप्रति° L; °वखाप्रति° the other MSS.

३ Emended; प्रतनस्थानथो L; प्रतनस्थापयद्धो the other MSS.

४ वेन्द्रं MSS.

५ चभिवरुधे L; चभिवरोधे Be; चावरोधे the other MSS.

६ यमेनमेतं (or °तद्) L Be; यमेवमेतरम् or यचमेवमेतरम् the other MSS.

७ Thus L; ब्रवीषि इति Be; ब्रवीति the other MSS.

८ तवचमच इदममुष्य Be; तवचममेचेदममुष्य L; तीव (तवि) मम चेदमु the other MSS.

९ Thus (hopelessly corrupted as it seems) Be; नावाख्यावि धारयाप्रावरुरुन्धेदमभ्यनौति L; नावाख्याचा (or ख्या) विधारयावा (or चा वरुन्धेदमंजबीति the other MSS.

Digitized by Google

हृष्टिरेतश्चिदानमथो ह्यस्यैव मनुर्वैवस्वतः शून्यमानः सम्प्रखाय[1] ' तस्मै चतुर्थौ प्रददौ ' ताꣳ सो ऽस्यां न्यदधात्सेयं[2] हृष्टिरेवैष[2] हृष्टेः[2] हृष्टिरेतश्चिदानं ' तौ ह वा एतावौशनसौ नाम पुनस्तोमौ भवतः ' स यो गुरुरिव मन्येत गरमिव गीर्त्वा याज्यं वा याजयित्वाप्रतिग्राह्यस्य वा प्रतिगृह्य तं द्वादशस्तोमेनाग्निष्टोमेन याजयेदप्सु ते हैव लघुतामथ यो लघुरिव चरेदप्रतिष्ठितस्तमेकविꣳशतिस्तोमेनाग्निष्टोमेन याजयेत्प्रत्येव तिष्ठति " ॥ ४७ ॥ त्रयोदशः ॥

अथ प्रणोदः ' समानमभिचरणीयꣳ शिल्पं ' प्रातःसवनीयाननुवर्तते ऽग्नये प्रवते पुरोडाशो ऽष्टाकपालस्त्रिवृदेव भवत्यथ विबाधः ' समानमभिचरणीयꣳ शिल्पं ' माध्यंदिनीयाननुवर्तते ऽग्नये विबाधवते पुरोडाशो ऽष्टाकपालस्त्रिवृदेवैष भवत्यथ प्रतिनोदः[3] ' समानमभिचरणीयꣳ शिल्पं ' तृतीयसवनीयाननुवर्तते ऽग्नये प्रतीकवते पुरोडाशो ऽष्टाकपालस्त्रिवृदेवैष भवत्यथाग्नेरतिव्याधः ' समानमभिचरणीयꣳ शिल्पमनूबन्ध्यस्य पशुपुरोडाशमनुवर्तते ऽग्नये वसुमते पुरोडाशो ऽष्टाकपालस्त्रिवृदेवैष भवत्यथेन्द्रवज्रः ' समानमभिचरणीयꣳ शिल्पं ' पञ्चदश एष भवति " शुनस्कर्णो ह

---

1 Thus L Be; सम्ब (or सन) खाय the other MSS.

2 सेयं हृषिरेवैषहृषे L; सोयं हृषिरेवैष हृषेः Be; सेयंहृषिरेवैवतुष्टेः the other MSS.

3 प्रतीनोदः L.

Digitized by Google

वै ग्रैव्यो राजा पुष्कलद्वयाज्यास। स ह पापीयाञ्जनतां[१] प्रतिहितां[१] प्रतिख्यायर्त्विजः[१] पप्रच्छास्ति स्वित्स यज्ञक्रतुर्य- नाहमिहैव प्रयायामित्यस्ति[२] हीति[२] हैनमृत्विजः प्रत्यूचुस्तस्या अध्वर्युरयोनौनपुरोरुक्कान्[३] प्रहाञ्जयाह। स्वराण्युद्गाता सामान्यनैडान्यनिधनानि[४]। पराङेवास्मिंश्च[५] होतानूवाच। स हावभृथादेवोदेत्य ममार। यं द्विष्यात्तस्यैवं यज्ञं[६] कुर्यादुप- स्तृतं[७] वा याजयेत्क्षिप्रं हैवास्माल्लोकात्प्रैत्यथ राद्धिमराद्धा- वित्याचक्षते। चतुष्टोमे राद्धिकृतं[८] धान्यं ददाति। स राद्धि- श्चतुष्टोम एव मरायकृतं। स मरायो॥ ऽथाञ्जनाभ्यञ्जना- वित्याचक्षत। आङ्काका[९] अलंकृता[९] ऋत्विजः प्रचरन्ति। स।

१ पापो (पापा) जनतां etc. as above Be L; पापीयांजावता प्रतिहि- प्रतिषा (or षां) यर्त्विजः the other MSS.

२ प्रयायामी(मि)त्यस्ति हाइ (हा) इति Be L; प्रायचमित्याखि होइ इति the other MSS.

३ Conjecture; °योनौनपुरोरुक्कान् Be; चयैनाण्पुरोरुक्कान् L; चयोनपुरो- रुक्तान् the other MSS.

४ सामान्यनैवनृनिनिध° Be; मान्यनैनन्यनिध° L; सामान्यनैडान्- (न्याड°) the other MSS.

५ पराङेवम्मं Be; पराङ्वम्यं L; परां (or परा) इति (or इव) हु (or ह) चम्य the other MSS.

६ यज्ञे MSS.

७ °दुपाकृतं L.

८ राद्धौ° Be; राद्धि° the other MSS.

९ चांङ्काचालंकृता Be; चाङ्काकाचालंकृता L; चाङ्काचालंकृता the other MSS.

सृष्टिरेतच्छिदामथो हास्यैव मनुर्वैवस्वतः शून्यमानः बभ्रु-स्वाप[1] । तस्मै चतुर्यौ प्रददौ । ताऽ सो ऽस्यां न्यदधात्सेयं[2] ऋष्टिरेवैष[2] ऋष्टेः[2] सृष्टिरेतच्छिदां । तौ ह वा एतावौशनसौ नाम पुनस्तोमौ भवतः । स यो गुरुरिव मन्येत गरमिव गीर्त्वायाज्यं वा याजयित्वाप्रतिग्राह्यस्य वा प्रतिगृह्य तं द्वादश-स्तोमेनाग्निष्टोमेन याजयेदप्सु ते हैव लघुतामथ यो लघुरिव चरेदप्रतिष्ठितस्तमेकविंशतिस्तोमेनाग्निष्टोमेन याजयेत्प्रत्येव तिष्ठति ॥ ४७ ॥ त्रयोदशः ॥

अथ प्रणोदः । समानमभिचरणीयं शिल्पं । प्रातःसवनीयाननुवर्तते ऽग्नये प्रवते पुरोडाशो ऽष्टाकपालस्त्रिवृदेव भवत्यथ विबाधः । समानमभिचरणीयं शिल्पं । माध्यंदिनीयाननुवर्तते ऽग्नये विबाधवते पुरोडाशो ऽष्टाकपालस्त्रिवृदेवैष भवत्यथ प्रतिनोदः[3] । समानमभिचरणीयं शिल्पं । तृतीयसवनीयाननुवर्तते ऽग्नये प्रतीकवते पुरोडाशो ऽष्टाकपालस्त्रिवृदेवैष भवत्यथाग्नेरतिव्याधः । समानमभिचरणीयं शिल्पमनूबन्ध्यस्य पशुपुरोडाशमनुवर्तते ऽग्नये वसुमते पुरोडाशो ऽष्टाकपालस्त्रिवृदेवैष भवत्यथेन्द्रवज्रः । समानमभिचरणीयं शिल्पं । पञ्चदश एष भवति ॥ शुनस्कर्णो ह

---

१ Thus L Be; सम्ब (or सश्च) चाष the other MSS.

२ येयं ऋषिरेवैषऋषे L; सोयं ऋषिरेवैष ऋषेः Be; सेच्छेऋषिरेच्चैवतुष्टेः the other MSS.

३ प्रतीबोदः L.

जयति। तदेतास्तस्य: शाखा अनुदिशं मापयन्ति। प्रचरन्ति प्राञ्चः प्रचरन्ति दक्षिणा प्रचरन्ति प्रत्यञ्च उदञ्चः प्रचरन्ति। मध्ये गार्हपत्यो भवति। मध्यत आसीनायाश्वतरीरथैर्भवा-न्संवहन्त्यनुदिशꣳ स्तोमाः स्तुरित्येतदेकमेकविꣳशाः स्तुरि-त्येतदेकमनादृत्य तच्चतुष्टोमानेव कुर्वन्ति॥ पार्थः। पार्थौ[1] स्थपतिर्देवानैषत्स[2] ह[2] सुतसोमान्सहस्रदक्षिणान्सहस्रमसुनोत्स ह[2] देवानाप[2]। स[2] एतान्सोमानाहरिष्यन्नुपकल्पयते[3] शाखाः[4] सहस्रꣳ सहस्राणि सहस्रमश्वतरीरथाꣳस्तदेताः शाखा अनु-दिशं मापयन्ति द्वे च शते पश्चाच्छतं च पुरस्तादेवं दक्षि-णत एवं पश्चादेवमुत्तरतः। प्रचरन्ति प्राञ्चः प्रचरन्ति दक्षिणा प्रचरन्ति प्रत्यञ्च उदञ्चः प्रचरन्ति। मध्ये गार्हपत्यो भवति। मध्यत आसीनायाश्वतरीरथैर्भवान्संवहन्त्यनुदिशꣳ स्तोमाः स्तुरित्येतदेकमेकविꣳशाः स्तुरित्येतदेकमनादृत्य तच्चतुष्टोमा-नेव कुर्वन्ति॥ ॥ ४९ ॥ चतुर्दशः ॥

यमाभ्याꣳ सोमाभ्यां यक्ष्यमाणो भवति। स तथा देवय-जनं जोषयते यथान्तरेण चात्वालोत्करावुदक्संचारी स्यादिति। तदेते प्रचाञ्चक् शाखे मापयन्ति। स दक्षिणार्ध्याꣳ[5] शाखामध्यव-

---

१ Thus Be; पार्थे and पार्थैं the other MSS.

२ Instead of सह Be सन, L सञ; सवन the other MSS.

३ Thus my conjecture; सहति सताञ्सोमानाचरि॰ MSS. exc. B which has only सतोमानाचरि॰ and L, which has सचेतिसचानान्सोमा॰

४ शाखा Be; शाखार्त्त L; शाखापि the other MSS.

५ Thus L Be; दक्षिणतां the other MSS.

श्वाय मथित्वाग्नीन्विहृत्य दीक्षणीयामिष्टिं निर्वपत्यथोत्तरास्याꣳ प्राचामध्यवसाय मथित्वाग्नीन्विहृत्य[1] दीक्षणीयामिष्टिं[1] निर्वपति[1] । तयैव प्रचर्याथामुष्य प्रचरतीह दीक्षाहुतीर्जुहोत्यथामुष्येह प्रायणीयामिष्टिं निर्वपत्यथामुष्य । तयैव प्रचर्याथामुष्य प्रचरतीह पदेन चरित्वा राजानं क्रीत्वोह्यातिथ्यं निर्वपत्यथामुष्य । तेनैव प्रचर्याथामुष्य प्रचरतीह प्रथमाभ्यां प्रवर्ग्योपसद्भ्यां प्रचरत्यथामुष्येह मध्यमाभ्यां प्रवर्ग्योपसद्भ्यां प्रचरत्यथामुष्येह महावेदिं पूर्वं परिग्राहं परिगृह्णात्यथामुष्येहोत्तमाभ्यां प्रवर्ग्योपसद्भ्यां प्रचरत्यथामुष्येहाहवनीयं प्रणयत्यथामुष्येह सदोहविर्धाने संमिनोत्यथामुष्येहाग्नीषोमौ प्रणयत्यथामुष्येह[2] यूपस्याहृता यूपमुच्छ्रयति स्वर्वन्तं यूपमुच्छ्रित्याग्नीषोमीयं पशुमुपाकरोत्यथामुष्य । तयैव प्रसिद्धं वपया चरित्वा वसतीवरीर्गृह्णात्यथामुष्येह पशुपुरोडाशं निर्वपत्यथामुष्य । तेनैव प्रचर्याथामुष्य प्रचरतीहाग्नीषोमीयेण प्रचरत्यथामुष्येह[3] वसतीवरीः परिहृत्य पशाꣳसि विशिष्योपवसन्त्यथामुष्येह त्वेव संविशन्तीह राजानमुपावहृत्य प्रातरनुवाकमुपाकरोत्यथामुष्येहानुपूर्वꣳ सवनानि[4] संतिष्ठन्त आ समुदितादेवमेवोत्तरस्याꣳ प्राचायाꣳ सवनानि[4] संतिष्ठन्त आ समुदितादिहावभृथेन प्रचरत्यथामुष्येहोदयनीयामिष्टिं

---

१ These six words, indicated by • in Be, are given only by L.

२ प्रणयत्य• L Be; प्रचंयत्य• the other MSS.

३ चरत्य• MSS.

४ Thus L Be; सवनीयानि the other MSS.

निर्वपत्यथामुष्य तयेह प्रचर्यामुष्य प्रचरतोहैव मैत्रावरुणीं वशामुपाकरोत्यथामुष्य तयेह प्रचर्यामुष्य प्रचरति समान्युदवसनीयेष्टिरथ[1] यत्प्राक्[2] सवनेभ्यो[2] ऽधि व्यतिषक्तानि कर्माणि क्रियन्ते तस्मात्समावन्तदूरे व्यतिषक्तौ सह[3] प्रयाते अथ यदनुपूर्वं सवनानि संतिष्ठन्ते तस्मादनुपूर्वौ अवसेते अथ यदूर्ध्वं[4] सवनेभ्यो ऽधि व्यतिषक्तानि कर्माणि क्रियन्ते तस्मात्सहाग्रयन्ति सह पाययन्ति सह चरतो ऽथ यत्समान्यरण्वित्स्मात्समानौ[5] योनिरग्निश्च ह वा आदित्यश्च समानलोकं[6] जिगीषमाणावेतं यज्ञक्रतुमपश्यतां तमाहरतां तेनायजेतां ततो वै तौ समानलोकावभवतां समानं लोकमैतां[7] यः कामयेताग्नेश्चादित्यस्य च समानं लोकमियामिति स एतेन यज्ञक्रतुना यजेताग्नेश्चैवादित्यस्य च समानं लोकमेति ॥ ५० ॥ पञ्चदशः ॥

वाजयाजी ह वा अन्यो भवत्यन्य उ वाजपेययाज्येव ह वै वाजयाजी यः पेयैरनिहाय वाजेन यजत एष उ वाजपेययाजी यः पेयैरिहाय वाजेन यजते तस्मादु पेयैरेवेहाय

---

१ Thus L Be; समान्युदव॰ the other MSS.

२ यत् only in L; प्रातः instead of प्राक् L; सवनेभ्यो L Be.

३ Only in L and Be.

४ यदनुपूर्वं MSS. exc. and Be.

५ यत् om. L Be; यत्समान्यरणौ the other MSS.

६ समानं L Be; समानलोका the other MSS.

७ After ऐतां L Be have समानलोकावभवत्; the other MSS. rea[d]
समानंलोकावयवकल्प or ॰कावयवकल्प।

वाचेन यजेत । पेयैर्यद्यसमाप्तो भवति । सो ऽमिहैव पौर्ण-मासौ दीक्षते । तस्यापरिमिता दीक्षा द्वादशोपसदः । स तथा राजानं क्रीणाति यथा मन्यते ऽमावास्यायां[1] मे यक्ष्ये ऽनुसुत्या संपत्स्यत इति । तच्च तथा संपद्यते । प्रसिद्धेन कर्मणोपवसथादेत्याथ वसतीवरीः परिहृत्य पयाꣳसि विभि-योपवसथ्यमेताꣳ सकलेष्टिं निर्वपत्याग्नेयमष्टाकपालमैन्द्रमेका-दशकपालं वैश्वदेवं द्वादशकपालं । तथा द्वादशाहानि यजते । ऽथ यथोदये ऽह्नि पौर्णमासेन हविषा यजते येनास्यानिष्टं भवत्यथ चतुर्दशे ऽहन्यामावास्येन हविषा यजते येनास्यानिष्टं भवत्यथैतेषां यज्ञक्रतूनामेकैकेन यजते । ऽथ पुनर्दीक्षते । स एवमेव संवत्सरं यजते । तस्याहानि त्रिवृत्पञ्चदशो[2] ऽथ त्रिवृत्सप्तदशो ऽथ त्रिवृदेकविंशो ऽथ त्रिवृत्त्रिणवो[3] ऽथ त्रिवृत्त्रयस्त्रिंशो ऽथ त्रिवृच्चतुष्टोमो[4] । मासानामेव रूपं पेयाः[5] । संवत्सरस्य रूपं वाच । एवमस्यैव[6] संवत्सरः परीष्ट

११ एवमाप्तो भवत्यथाहीनविधिस्तस्याहानि[7] त्रिवृत्पञ्चदशः[8] सप्त-दशश्चतुष्टोमस्त्रिवृदेवाथैकविंशो[8] ऽथ त्रिणवो ऽथ चतुष्टोम-

---

१ अमावास्ये Be, अमावास्ये L (the other MSS. om. this passage).

२ Thus L Be; °पंचदशः सप्तदशः the other MSS.

२–४ Thus L Be; the other MSS. have only त्रिवृच्चतुष्टोमो ।

५ Thus L Be; रूपमपेयाम् or °पेयाद् the other MSS.

६ Thus L Be; स एव the other MSS.

७ °विधस्तस्या° Be.

८ Thus L Be; °पंचदशःचतुष्टो° the other MSS.

स्त्रिवृद्देवाय चयस्त्रिंशो ऽथ चतुष्टोमस्त्रिवृद्देवाय[1] चतुश्चत्वारिंशो ऽथ चतुष्टोमो ऽथातिरात्रो। द्वादश[1] मासाः सप्तदश क्रतवो। नवसु मासेषु नव क्रतूनुपेत्यथातिग्रियन्ते चयश्च मासा अष्टौ च क्रतवः। स द्वौ त्रिरात्रौ कुरुत एकं च द्विरात्रं। यद्यु वा एतदुपात्येति चतुष्टोमेनाग्निष्टोमेन यजेत। मासानामेव रूपं स्तुतशस्त्राणि संवत्सरस्य रूपमग्निष्टोमो[2] वाज[2]। एवमस्यैष[2] संवत्सरः परीष्ट एवमाप्तो भवत्यथातो ऽयुजश्चैव[4] युग्माश्चैकस्यां स्तुवते ऽथ तिसृष्विति ह्ययुजो। ऽथ युग्माश्चतसृषु स्तुवते ऽथाष्टास्विति युग्मा। अयुजां चैव[5] युग्मानां चैव सायुज्यं सलोकतामाप्नुवन्ति य एतेनायनेन [6] यन्ति य उ चैनदेवं विदुः॥ ॥ ५१ ॥

अथातो दिशामेव। चित्त्याप्त्यै। पञ्चदशो दक्षिणायै। सप्तदशः प्रतीच्या। एकविंश उदीच्यै। त्रिणव हृत[1]

१—१ Wholly uncertain; चतुष्टोमैर्विंशो च चतुष्टोमत्रिवृद्देवाय च
चत्वारिंशोचाद्वाचत्वारिंशोच चतुष्टोमोथातिरात्रोद्वादश L Be; चतुष्टोमत्रि
वाय चतुश्चत्वारिंशोच चतुष्टोमोथातिरात्रोच द्वादश the other MSS., part
incomplete.

२ Thus MSS. exc. Be, which reads ०ष्टोमस्यैष and L, whi
omits वाज।

४—५ Thus, on the whole, L; युजश्चैकस्यां स्तुवते च तिसृष्विती ह्ययु
च युग्मांश्चतसृषु स्तुवते चाष्टास्विति युग्मा अयुजांचैव Be; युजश्चैव युग्मा (or
चैकस्यां स्तुवते (ति) च तिसृष्विति ह्ययुजो च युग्मांश्चतसृषु स्तुवते चाष्टास्वि
युग्मा अयुजश्चैव the other MSS.

६ Only in Be.

ऊर्ध्वायै । चतुस्त्रिꣳशो ऽन्तो ऽर्वाच्यै । सर्वासामेव चतुष्टोमो । दिशामेव सायुज्यꣳ सलोकतामाप्नुवन्ति य एतेनायनेन यन्ति य उ चैनदेवं विदुरथात ऋतूनामेव । त्रिवृद्वसन्तस्य । पञ्चदशो ग्रीष्मस्य । सप्तदशो वर्षाणामेकविꣳशः शरदस्त्रिणवो हेमन्तस्य । त्रयस्त्रिꣳशः शिशिरस्य । सर्वेषामेव चतुष्टोम । ऋतूनामेव सायुज्यꣳ सलोकतामाप्नुवन्ति य एतेनायनेन यन्ति य उ चैनदेवं विदुरथात ऋषीणामेव । त्रिवृद्वसिष्ठस्य । पञ्चदशो भरद्वाजस्य । सप्तदशो विश्वामित्रस्यैकविꣳशो जमदग्नेस्त्रिणवः कश्यपस्य[1] । त्रयस्त्रिꣳशो गौतमस्याङ्गिरसस्य[2] चतुष्टोम । सर्वेषामेव चतुष्टोम । ऋषीणामेव सायुज्यꣳ सलोकतामाप्नुवन्ति य एतेनायनेन यन्ति य उ चैनदेवं विदुरथातो देवतानामेव । त्रिवृदग्नेः । पञ्चदश इन्द्रस्य । सप्तदशः प्रजापतेरेकविꣳशो ऽसुख[3] तपतस्त्रिणवश्चन्द्रमसस्त्रयस्त्रिꣳशो विश्वेषां देवानाꣳ[4] । सर्वासामेव चतुष्टोमो । देवतानामेव सायुज्यꣳ सलोकतामाप्नुवन्ति य एतेनायनेन यन्ति य उ चैनदेवं विदुः ॥ ५२ ॥

अथातो दर्शपूर्णमासयोरयनमित्याचक्षते । सूर्याचन्द्रमसोरयनमित्येक आहुः । पौर्णमासेन[5] सोमेन यक्ष्यमाणो भवति । दीक्षते । तस्यापरिमिता दीक्षाः पशुपसदः । स तथा राजानं

---

१ कश्य॰ Be, काश्य॰ the other MSS.

२ Thus L and Be; all the other MSS. om. चत॰ ।

३ Instead of सुख Be: अप, L सु ।

४ Thus L Be; the other MSS. have स्वं after देवानां ।

५ पूर्णं॰ MSS. exc. L.

Digitized by Google

क्रीणाति यथा मन्यते पौर्णमास्यै मे वसिष्ठे ऽहन्सुत्या संपत्स्यत इति । तस्य तथा संपद्यते । प्रसिद्धेन कर्मणोपवसथादेत्यथ वसतीवरीः परिहृत्य पयाꣳसि विसिच्योपवसन्त्यथ प्रातराग्नेयं पशुमुपाकरोति । तस्याग्नीषोमीय उपालम्भ्यो भवति । तस्य प्रातःसवनीयाननुवर्तन्ते पौर्णमासहवीꣳषि । प्रैषवन्तः सवनीया अनुब्रूहि यजेतीतरेषाꣳ हविषान्तुधा ज्योतिरुक्थ्यः संतिष्ठत ॥ आमावास्येन सोमेन यक्ष्यमाणो भवति । दीक्षते । तस्यापरिमिता दीक्षा द्वादशोपसदः । स तथा राजानं क्रीणाति यथा मन्यते ऽमावास्यायै मे वसिष्ठे ऽहन्सुत्या संपत्स्यत इति । तस्य तथा संपद्यते । प्रसिद्धेन कर्मणोपवसथादेत्यथास्यैतदहरिन्द्राय वत्सा अपाकृता भवन्त्यैन्द्रं पयो दोहयति सांनाय्यस्य वावृता तूष्णीं वाथ वसतीवरीः परिहृत्य पयाꣳसि विसिच्योपवसन्त्यथ प्रातराग्नेयं पशुमुपाकरोति । तस्यैन्द्र ऋषभ उपालम्भ्यो भवति । तस्य प्रातःसवनीयाननुवर्तन्त आमावास्यानि हवीꣳषि । प्रैषवन्तः सवनीया अनुब्रूहि यजेतीतरेषाꣳ हविषान्तुधा ज्योतिरतिरात्रः संतिष्ठते । सूर्याचन्द्रमसयोरेव तत्सायुज्यꣳ सलोकतामाप्नुवन्ति य एतेनायनेन यन्ति य उ चैनदेवं विदुर्य उ चैनदेवं विदुः ॥ ५३ ॥ षोडशः[1] ॥

॥ इत्यष्टादशः प्रश्नः ॥

---

१ इत्युत्तरा ततिः समाप्ता MSS.

सावित्रꣳ स्वर्गकामश्चिन्वीत । पशुबन्धे चेष्टीयते षड्ढोतारꣳ हुत्वा यूपाहुतिꣳ हुत्वा यूपꣳ सयजुषं कृत्वा वेदिं विमिमीते । वेदिष्टतीये यजेतेति विज्ञायते । तस्याः सौमिकं मानमेतावदेव नाना । सौमिकात्प्रक्रमात्तृतीयो ऽꣳशः प्रक्रमः स्यात्तेन वेदिं विमिमीते । अपि वा पदाष्टृण्या[1] पार्श्वमानी पदं तिरः पशुमानेन तयोर्यः कर्णसंमितः प्रक्रमः स इष्यते । पदाद्वा नवमस्तदष्टृण्या[2] तयोस्तु यः कर्णसंमितः स प्रक्रमार्धेन[3] सैषा सौमिकी वेदिरग्नीनन्वाद्ध्याहुतमुपेयादिध्माबर्हिः संनह्य[4] स्तम्बयजुर्हरतीदमेव प्रसिद्धं पौरोडाशिकं निर्वजुषा तूष्णीं चतुर्थं पूर्वं परिग्राहं परिगृह्णाति करणं जपत्युद्धन्त्युद्धताद्दाग्नीध्रस्त्रिर्हरति । यदाग्नीध्रस्त्रिर्हरत्यथैतमग्निं प्रत्यञ्चं यूपावटीयाच्छङ्कोर्विमिमीते । पञ्चसंमितश्चेतव्य इति रथचक्रमात्र एवैष उक्तो भवत्यथाप्युदाहरन्ति द्व्यरत्निः[5] प्रथमं पक्षं द्वौ सार्धौ मध्यमं त्रिभागोनास्त्वथ उत्तममिति । तेषामन्यतममाचीयꣳ रज्जुमुभयतःपाशां कृत्वोत्तरवेदिदेशस्य मध्ये शङ्कुं निहत्य तस्मिन्पाशौ प्रतिमुच्य तस्मिन्नन्ते ऽन्यꣳ शङ्कुं

---

१ Thus MHBU ; पद॰ Be Ben.

२ Thus M Ben. ; नवमात्तस्माद्दृण्या U ; नवमस्तस्माद्दृण्या H ; नवमस्तद-दृण्या Be ; B om. the whole phrase.

३ Thus MHU ; ॰मार्धस्तेन Be Ben.

४ Thus MHUB ; संबद्धा Be Ben.

५ ॰रत्निं M.

प्राश्य तेनैनं प्रदक्षिणं परिमण्डलं[1] परिलिखत्यपोद्धृत्य खात्वा कर्षूः खानयन्त्युत्कृयन्त्यपरा[2] । दक्षिणतश्च पश्चाच्च वर्षीयसीः कुर्वन्त्यथ यावत्याश्चात्वालोऽस्तु वाऽस्त्वेवं दर्भस्तम्बमुदपात्र-मौत्तरवेदिकांश्च[3] संभारानधि मधुमिश्रान् हिरण्यं च शर्कराः[4] सिकताश्च[4] दर्भानित्येतत्समादायोत्तरार्धे समवादध-न्त्यथ हस्ताभ्यामात्मन्यग्निं[5] गृह्णीते मयि गृह्णाम्यग्रे अग्निं यो नो अग्निरिति । स्वयंचितिं जपति यास्ते अग्ने समिधो यानि धामेति । अथैतमश्वमभिमृश्यान्तःशर्करमिमामुपदधाति प्रजा-पतिस्त्वा सादयतु तया देवतयाङ्गिरस्वद्ध्रुवा सीदेत्यथ प्रत्यु-त्सुत्वोदपात्रमुपनिनीय दर्भस्तम्बमुपदधाति वाक्त्वा समुद्र उपदधात्विति वा तूष्णीं वाथैनत् स्रुवाहुतिभिरभिजुहोति यजूर्भ्यो ऽपावभिरिति पञ्चभिर्यथादेवतं हुत्वा सदृशीरेवं करोति । ॥ १ ॥

अथ चात्वालखाद्धृता चात्वालं परिलिखत्युत्तरवेदेराहृतो-त्तरवेदिं निवपत्युत्तरनाभिमुत्खाय यूपावटं[6] चात्वालं[6] प्रोक्ष्य चात्वालावकृत्य सिकता निवपत्यग्ने तव श्रवो वय इति

---

१ परि॰ om. M. and some of the other MSS.

२ खानयन्त्य॰ M.

३ च om. M.

४ सिकताः शर्कराश्च M.

५ Thus MHUB; ॰त्मन्नग्निं Be Ben.

६ Om. M Be Ben.; M om. also प्रोक्ष्य।

Digitized by Google

यङ्गिरस्वच्छन्दसमंयोर्ध्वचित उपदधाति चित स्थ परिचित ऊर्ध्वचितः श्रयध्वं तया देवतयाङ्गिरस्वद्ध्रुवाः सीदतेत्यथानुबृहत्याप्यायस्वेति गायत्र्या ब्राह्मणस्य सं ते पयांसीति त्रिष्टुभा राजन्यस्य । यथास्तु यथाशर्करमनुव्यूहति । तस्यां[1] नव[1] परिमण्डला[1] लेखा लिखत्यथ[2] दध्ना मधुमिश्रेण शर्कराः समज्य सायमग्निहोत्रं हुत्वाग्नीन्परिस्तीर्योपवसत्यथ प्रातर्हुते ऽग्निहोत्रे व्याघारयत्युदपात्रं भस्म पुरीषमूषान्सिकता यावदुत्तममङ्गुलिकाण्डं यज्ञपरुषा संमितं तावन्मात्रीः[3] पञ्चाशीतिशतं हिरण्येष्टकाः शर्करा वा घृताक्तास्तावत्यो[4] लोकंपृणा अपरिमिता वा चतस्रः स्वयमातृण्णाः सहस्रं हिरण्यशल्कानूर्ध्वं चिन्वी । ऽपरिमितानित्येक आहुस्ते यदि सहस्रं भवन्ति द्वे द्वे शते पञ्चनाडीष्वोते[5] भवतो । ऽथोदित आदित्ये द्वाभ्यामात्मन्नग्निं[6] गृह्णीते मयि गृह्णाम्यग्रे अग्निं यो नो अग्निरिति । स्वयंचितिं जपति यास्ते अग्ने समिधो यानि धामेति । श्वेतमश्वमभिमृश्याधिद्रवणं जपत्यपामिदं न्ययनं नमस्व इति द्वाभ्यामंसापरार्धे उदपात्रमुपदधाति वाक्या

1 Thus Ben. UH (the last •मण्डला); तस्यां नव मंडला Be; तस्मिन्नेव परि• MB.

2 लिखित्वा MB.

3 •मात्रं M.

4 घृताभ्यक्ता• M.

5 Thus MHU; •नाडीष्वोते B; •नाडीप्रोते Be Ben.

6 Thus MBHU; •त्मन्नग्निं Be Ben.

Digitized by Google

समुद्र उपदधे सुप्रजावनिं रायस्पोषवनिं मह्यं यजमाना-येति। तयादेवतं कृत्वा सूददोहसं करोत्यथ संभारानिवप-त्यग्नेर्भस्मासीति भस्माग्नेः पुरीषमसीति पुरीषं संज्ञानमसि कामधरणमित्युपाम्यथि ते कामधरणं भूयादिति सिकता। अथैनाः संप्रयौति सं या वः प्रियास्तनुवः सं प्रिया हृदयानि वः। आत्मा वो अस्तु संप्रियः संप्रियास्तनुवो ममेत्यथैनाः कल्प-यति कल्पेतां द्यावापृथिवी कल्पन्तामाप ओषधीः। कल्पन्ता-मग्नयः पृथङ्मम ज्यैष्ठ्याय सव्रता इति। ताःस्तथा कल्प-यति यथा न लेखाः संलोपयन्ते[१]। सर्वो वा सर्वं क्रियते सर्वकाले॥ २॥ प्रथमः॥

अथान्तमायां लेखायां पूर्वपक्षस्य दिनेष्टका उपदधाति संज्ञानं तया देवतयाङ्गिरस्वद्ध्रुवा सीद विज्ञानं तया देवत-याङ्गिरस्वद्ध्रुवा सीदेति पञ्चदश। तासामन्तरालेष्वेतेषामेव दिनानां मुहूर्तेष्टका उपदधाति चित्रस्तया देवतयाङ्गिरस्व-द्ध्रुवा सीद केतुस्तया देवतयाङ्गिरस्वद्ध्रुवा सीदेति पञ्चदश। सर्वासां पारे सूददोहसः करोत्यथाभ्यन्तरायां लेखायां पूर्व-पक्षस्य अपेष्टका उपदधाति दर्शा तया देवतयाङ्गिरस्वद्ध्रुवा सीद दृष्टा तया देवतयाङ्गिरस्वद्ध्रुवा सीदेति पञ्चदश। तासामन्तरालेष्वेतासामेव[२] अपाणां मुहूर्तेष्टका उपदधाति दाता तया देवतयाङ्गिरस्वद्ध्रुवा सीद प्रदाता तया देवतयाङ्गि-

१ संलोपयंते Be Ben.

२ Thus MU; एतेषामेव the other MSS.

रस्वद्ध्रुवा सीदेति पञ्चदश । सर्वासां पारे सूददोहसः करोत्यथाभ्यन्तरायां लेखायामपरपक्षस्य दिनेष्टका उपदधाति प्रस्तुतं तथा देवतयाङ्गिरस्वद्ध्रुवा सीद विष्टुतं तथा देवतयाङ्गिरस्वद्ध्रुवा सीदेति पञ्चदश । तासामन्तरालेष्वेतेषामेव दिनानां मुहूर्तेष्टका उपदधाति सविता तथा देवतयाङ्गिरस्वद्ध्रुवा सीद प्रसविता तथा देवतयाङ्गिरस्वद्ध्रुवा सीदेति पञ्चदश । सर्वासां पारे सूददोहसः करोत्यथाभ्यन्तरायां लेखायामपरपक्षस्य क्षपेष्टका उपदधाति सुता तथा देवतयाङ्गिरस्वद्ध्रुवा सीद सुन्वती तथा देवतयाङ्गिरस्वद्ध्रुवा सीदेति पञ्चदश । तासामन्तरालेष्वेतासामेव क्षपाणां मुहूर्तेष्टका उपदधात्यभिशास्ता तथा देवतयाङ्गिरस्वद्ध्रुवा सीदानुमन्ता तथा देवतयाङ्गिरस्वद्ध्रुवा सीदेति पञ्चदश । सर्वासां पारे सूददोहसः करोत्यथाभ्यान्तरायां लेखायां पूर्वपक्षेष्टका उपदधाति पवित्रं तथा देवतयाङ्गिरस्वद्ध्रुवा सीद पवयिष्यꣳस्तथा देवतयाङ्गिरस्वद्ध्रुवा सीदेति द्वादश । सर्वासां पारे सूददोहसः करोत्यथाभ्यन्तरायां लेखायामपरपक्षेष्टका उपदधाति सहस्वाꣳस्तथा देवतयाङ्गिरस्वद्ध्रुवा सीद सहीयाꣳस्तथा देवतयाङ्गिरस्वद्ध्रुवा सीदेति द्वादश । सर्वासां पारे सूददोहसः करोत्यथाभ्यन्तरायां लेखायां मासेष्टका उपदधात्यरुणस्तथा देवतयाङ्गिरस्वद्ध्रुवा सीदारुणरजास्तथा देवतयाङ्गिरस्वद्ध्रुवा सीदेति त्रयोदश । सर्वासां पारे सूददोहसः करोत्यथाचैके[१]

१ Thus Be HUB; °थाचैकेन Ben.; अथैके M.

लोकान्तरालेषु[1] सिकता निवपन्त्येतस्या ओषत्या इत्यथाभ्यन्तरायां लेखायां मुहूर्तानां मुहूर्तेष्टका उपदधातीदानीं तया देवतयाङ्गिरस्वद्ध्रुवा सीद तदानीं तया देवतयाङ्गिरस्वद्ध्रुवा सीदेति पञ्चदश । सर्वासां पारे सूददोहसः करोत्यथाभ्यन्तरायां लेखायां कलिष्टकाश्चर्लिष्टकाश्चोपदधात्यग्निष्टोमस्तया देवतयाङ्गिरस्वद्ध्रुवा सीदोक्थ्यस्तया देवतयाङ्गिरस्वद्ध्रुवा सीदेति सर्वग्निर्ऋतुस्तया देवतयाङ्गिरस्वद्ध्रुवा सीद सूर्य ऋतुस्तया देवतयाङ्गिरस्वद्ध्रुवा सीदेति तिस्रः । सर्वासां पारे सूददोहसः करोत्यथ मध्ये[2] नाभ्यां संवत्सरेष्टका उपदधाति प्रजापतिस्तया देवतयाङ्गिरस्वद्ध्रुवा सीद संवत्सरस्तया देवतयाङ्गिरस्वद्ध्रुवा सीदेति चतस्रः । सर्वासां पारे सूददोहसः करोति । ॥ ३ ॥

तदेतास्ततः स्वयमातृण्णा यावति । ता दिक्षूपदधाति भूरग्निं च पृथिवीं चेति पुरस्ताद्भुवो वायुं चान्तरिक्षं चेति दक्षिणतः स्वरादित्यं च दिवं चेति पश्चाद्भूर्भुवः स्वश्चन्द्रमसं च दिशश्चेत्युत्तरतः । सर्वासां पारे सूददोहसः करोत्यथ लोकंपृणा उपदधाति लोकं पृण छिद्रं पृणाथो सीद शिवा त्वम् । इन्द्राग्नी त्वा बृहस्पतिरस्मिन्योनावसीषदन्निति । तयादेवतं करोति तया देवतयाङ्गिरस्वद्ध्रुवा सीदेत्यथ सूददोहसं करोति

---

१ Thus Be Ben.; लोकान्तरेषु M; लोकांतरेषु HU; लेखायां B.

२ मध्यमे M.

ता अस्य सूददोहसः सोमꣳ श्रीणन्ति पृश्नयः । जन्मन्देवानां विशस्त्रिष्वा रोचने दिव इति । प्राच्याय लोकंपृणया प्रत्यौत्यग्निं प्राचीभिः संप्रच्छादयन्ति । संप्रच्छन्नं पश्चात्प्राचया परिकर्षति लोकं पृण छिद्रं पृणेत्यथानभिमृष्टं चितिकॢप्ता भवत्यथाग्निमभिमृशति[1] यत्ते ऽचितं यदु चित्तं ते अग्न इति द्वाभ्यामथ चितिकॢप्ताभिमृशति चित्तिमचित्तिं चिनवद्वि विद्वानित्यग्ने देवाꣳ इहावहेत्याग्नेय्या गायत्र्यैतां चितिमभिमृश्य द्वे[2] अवद्रवणे[2] जपति[2] वाग्न आयन्प्राणदा इत्यथ[3] अश्वमश्वमभिमृश्य तनुपुरीषमुपदधाति पृष्टो दिवीति । तथादेवतं कृत्वा सूददोहसं करोत्यथ पाश्यामप आनीय हिरण्यशकलान्संप्रकीर्य द्वाभ्यां द्वाभ्याꣳ[4] शताभ्यां प्रोक्षति सहस्रस्य प्रमा असीति पुरस्तात्सहस्रस्य प्रतिमा असीति दक्षिणतः सहस्रस्य विमा असीति पश्चात्सहस्रस्योन्मा असीत्युत्तरतो । ऽथ मध्ये[5] द्वाभ्याꣳ शताभ्यां प्रोक्षति साहस्रो ऽसि सहस्राय त्वेत्यथोत्तरार्धे तिष्ठन्निष्टका धेनूः कुरुत इमा मे अग्न इष्टका धेनवः सन्त्वित्यान्तादनुवाकस्याथैके ऽर्कपर्णेनाक्षीरेण[6] चरमायामिष्टकायां जुहोति । स यदहैनं[7]

---

१ परि instead of अभि M.

२ Thus HUB; द्वे अभिद्रवणे ज॰ Be Ben; द्वाभ्यामभिद्रवति M.

३ अथ instead of अच M Ben. U.

४ द्वाभ्यां twice in BU only.

५ om. M.

६ के॰ om. B Be H.—॰ज्याज्यो॰ Be Ben.

७ Thus M; सचदुरैनं B; दुवेरेनं Ben; यदुरेनं Be; यचदरेनं HU.

करिष्यन्भवत्यथैतस्यार्कपर्णस्य[1] पुटमन्तरवस्ताविधं कृत्वोदक् तिष्ठन्मुखदघ्ने धारयमाणा हराम्बेति । स यत्र धारेष्टकां[2] प्राप्नोति तत्प्रतिपद्यते त्वमग्ने रुद्र इत्यास्मादनुवाकस्याथैतदर्कपर्णं यं द्विष्टि तस्य संचरे पशूनां न्यस्यति । यदु वै न द्वेष्यावटे न्यस्यत्यथैनमुपतिष्ठते त्वमेव त्वां वेत्थ यो ऽसि सो ऽसीत्येतेनानुवाकेनाथ सहस्रारविहाराभ्यामुपतिष्ठते । संवत्सरो ऽसि परिवत्सरो ऽसीत्येतेनानुवाकेनाथाह होतरग्नेरुक्थेनाग्निमनुशंसेति । [3]यदि होता न कामयते यजमान एव यथनेनाग्निं तृणानि संस्तीर्य तेषूपविश्याग्नेरुक्थेनाग्निमनुशंसति । भूर्भुवः स्वरित्येताभ्यामृग्भ्यां[4] त्रिस्त्रिरेकैकामन्वाह प्रणवेनाभिसंधानमेवमन्यथाप्युपसंधाने प्रणवेनैवाभिसंधानमथ[5] । ये ब्राह्मणा अङ्गविदस्तेभ्यो यद्विद्या न नयेयुरिहश् स्यादग्निमथ हवीरन्तेभ्यो यथाश्रद्धं दद्यात्तिलंहमेवैतत्क्रियते । नास्याग्निं हृयत इति ब्राह्मणम् । ॥ ४ ॥ द्वितीयः ॥

अथाभ्याधानप्रभृति पाशुबन्धिकं कर्म तायते । विद्वमाग्निप्रणयनात्कृत्वाग्निं प्रणीयोपसमाधायाध्वराहुतिभिरभिहुय[6] नानाचतुर्गृहीतैरेता[6] आहुतीर्जुहोति । त्वमग्ने रुद्र

---

१ •त्यथैतदर्क• Be Ben.

२ •रेष्टकाग्निं M.

३ Before यदि Be HU ins. स।

४ साम्भ्यां instead of ऋग्भ्यां M.

५ प्रणवेनैवाभि• M.

६ Thus HU (only •हुतीभि•); •ध्वराहुतीभिरभिहूयमानां चतु• M •ध्वराहुतीरभिहूयमानानां चतु• Be Ben; •ध्वराहुतिभिर्हुत्वा नानाचतु• H

इति प्रतद्वीर्यस्य रूपमग्नाविष्णू इति वसोर्धारायाः अन्नपत इत्यन्नहोमः सप्त ते अग्ने समिधः सप्त जिह्वा इति विश्वप्रीरित्येव स्रुवेणोपघातमेकविंशतिमाहुतीर्जुहोत्यग्नये स्वाहा वसवे स्वाहेति हुत्वाहुत्वैव संस्रावान्यजमानस्याञ्जलावावपति[1] तैर्यजमानो मुखं विमृष्टे राज्ञी विराज्ञीत्येतेनानुवाकेनोत्तरपरिग्राहप्रभृति पाशुबन्धिकं कर्म तायते सिद्धमा मनोतायाः कृत्वा मनोतामनुद्रुत्य पशोरवदानानि संसृज्यौदुम्बरे[2] पात्रे[2] पूष्णो मृत्युपदं गृह्णाति विपश्चिते पवमानाय गायतेत्यनुद्रुत्योपयामगृहीतोऽसि मृत्यवे त्वा जुष्टं गृह्णामीति दर्भैः परिमृज्योत्तरवेद्याꣳ संसादयत्येष[3] ते योनिर्मृत्यवे त्वेत्येव पशुना चरत्येव वनस्पतिना चरत्येव पुरस्तात्स्विष्टकृतोऽथैतं ग्रहꣳ होष्यन्नप उपस्पृशति[4] विधुरसि विध मे पाप्मानमित्यथ जुहोत्यप मृत्युमप क्षुधमपेतः शपथं जहि। अधा नो अग्न आवह रायस्पोषꣳ सहस्रिणम्॥ ये ते सहस्रमयुतं पाशा मृत्यो मर्त्याय हन्तवे। तान्यज्ञस्य मायया सर्वानवयजामहे स्वाहेत्यथ हुत्वोपस्पृशेद्विधुरसि विध मे पाप्मानमित्यथ स्विष्टकृता चरत्युपह्वयमानायामिडायामुप-

---

१ Thus (आवपति) M Be Ben BU (sec. m.); आवयति HU (pr. m.).

२ Thus all exc. B, which has ०म्बरेषु पात्रेषु।

३ ष om. HU.

४ Thus M Be Ben; ०स्पृशेद् BHU.

Digitized by Google

स्टह्वन्ति[1] यदहमुपहूतं[2] यदहं यजमानो भक्षयति भक्षो ऽस्यक्त-
भक्षस्य ते मृत्युपीतस्यामृतवतः स्वगाकृतस्य मधुमत उप-
हूतस्योपहूतो भक्षयामीति । भक्षयित्वात्मानं प्रत्यभिमृशते
मन्त्राभिभूतिः केतुर्यज्ञानामित्यन्तादनुवाकस्यानुयाजप्रभृति
पाशुबन्धिकं कर्म तायते । सिद्धमा दक्षिणानां कालाद्दक्षि-
णानां काले धेनुमृषभमनड्वाहं दत्त्वैकविंशतिर्दक्षिणा[3]
ददाति । शतं ददाति । सहस्रं ददात्यन्विष्टकं दक्षिणा
ददाति । यदि न विन्देत मन्थानेतावतो दद्यादोदनान्वा ।
पष्ठौहीं त्वष्टवतीं दद्याद्धिरण्यं ददाति । वासो ददाति ।
तेनायुः प्रतिरत इति ब्राह्मणं । तं चेत्सौम्ये ऽध्वरे चिन्वीत
प्रथमायामुपसदि चेपकरणं । मध्यमोत्तमे उपसदावन्तरेणोप-
धानं । काले ऽग्निप्रणयनं । दक्षिणानां काले दक्षिणाः । सव-
नीयस्य यूपो मृत्युपशुँ चेदहीने सत्रे वा चिन्वीत प्रथमे
ऽहनि दक्षिणाः प्रथमे ऽहनि यूपो मृत्युपशो । न सत्रे
दक्षिणा नीयन्ते । नाचिकेत एव मृत्युपशुः स्यादित्येतदपर-
मग्निं चित्वा सौत्रामण्या यजेत मैत्रावरुण्यामिक्षया वेति ।
तस्य सायमग्निहोत्रे हुते सायंदोहः प्रातरग्निहोत्रे हुते
प्रातर्दोहः । पशुपुरोडाशेन सह अपयमंयमुदिते चर्यां ।
संतिष्ठते सावित्रः । ॥ ५ ॥ तृतीयः ॥

---

१ उपप्रह्वयंति M.

२ यदमित्रोपहूतं M.

३ ददाति instead of दत्त्वा M.

अथ नाचिकेतस्य[1] । प्रसिद्धं चयनकरणं यथा सावित्रस्यैता-
वदेव नाना । नात्र लेखा भवन्त्यथ याश्चितीरुपदधाति लोको
ऽसि स्वर्गो ऽसीत्यञ्जलिनैकविंशतिं यथा निपतन्ति[2] तास्तथा-
तथोपदधाति । तदेतदन्यत्रापि[3] प्रकीर्णानामुपधानस्य[4]
निदानं । यदि[5] प्राच्यः पञ्च पुरस्तात्पञ्च दक्षिणतः पञ्च
पश्चात्पञ्चोत्तरत एकां मध्ये । ऽथ यदि चित्यस्य पुरस्ता-
त्तिस्रो दक्षिणतः सप्त पश्चात्तिस्र उत्तरत एकां मध्ये । ऽथ
यद्यूर्ध्वाः[6] पश्चात्कोष्ठ्याः[7] प्रभृत्यूर्ध्वाः[8] स्वयमातृण्णावकाशादथ
यदि प्राचीः स्वयमातृण्णावकाशात्प्रभृति[9] प्राचीः । स्वयमातृ-
ण्णाभ्यः प्रभृति चिन्वत ऊर्ध्वं । स यदीच्छेत्तेजस्वी यशस्वी
ब्रह्मवर्चसी स्यामिति प्राङ् होतुर्धिष्ण्यादुत्सर्पेदित्याहवनीय-
सकाशादेवं प्रागास्यमानौ सा मा प्रोर्णोतु तेजसा यशसा
ब्रह्मवर्चसेनेति । तेजस्व्येव यशस्वी ब्रह्मवर्चसी भवतीत्यथ
यदीच्छेद्भूयिष्ठं मे श्रद्दधीरन्भूयिष्ठा दक्षिणा नयेयुरिति

---

१ नाचिकेतचयन Be Ben.

२ निपतंति HUB ; निपतति Be ; निवपंति M ; निवपति Ben.

३ तैरेतद्० M.

४ Thus H Be ; प्रकीर्णानामुपदधा० U ; प्रकीर्णानुपधा० Ben ; प्रकीर्णा-नुपधा० B ; प्रकीर्णानामुपधा० M.

५ स यदि M.

६ Thus MB ; यद्यूर्ध्वे H ; या ऊर्ध्वाः Be Ben ; यद्यूर्ध्वं U.

७ Thus BH ; कोष्ठ्याः U ; कोष्ठा H Ben ; कोष्ट्या Ben ; कोष्ठ M.

८ ०र्ध्वा वा ।

९ ०काशप्र० M.

Digitized by Google

दक्षिणासु नीयमानासु प्राच्येहि प्राच्येहीति प्राची जुषाणा वेत्वाज्यस्य स्वाहेति स्रुवेणोपहत्याहवनीये जुहुयाद्भूयिष्ठ-मेवास्मै श्रद्दधते । भूयिष्ठा दक्षिणा नयन्तीति ब्राह्मणं । संतिष्ठते नाचिकेतः । ॥ ६ ॥ चतुर्थः ॥

अथ ब्रह्मचितः[1] । प्रसिद्धं चोपकरणं यथा सावित्रस्यैताव- ९
देव नाना । नाच लेखा भवन्त्यथ पुरस्तादुदीचीर्दश होत्रेष्टका
उपदधाति चित्तिः स्रुक्तया देवतयाङ्गिरस्वद्ध्रुवा सीद चित्त-
माज्यं तया देवतयाङ्गिरस्वद्ध्रुवा सीदेति दशाथ हृदयेष्टका-
मुपदधाति सुवर्णं घर्मं परिवेद वेनमित्यनुद्रुत्य देवैः स
मानसीन आत्मा जनानामित्यातो । ऽथ यजुरिष्टके उपदधा- १०
त्यग्निर्यजुर्भिस्तया देवतयाङ्गिरस्वद्ध्रुवा सीद सविता स्तोमै-
स्तया देवतयाङ्गिरस्वद्ध्रुवा सीदेत्यथ पत्नीष्टके उपदधाति
सेनेन्द्रस्य तया देवतयाङ्गिरस्वद्ध्रुवा सीद धेना बृहस्पतेस्तया
देवतयाङ्गिरस्वद्ध्रुवा सीदेति । सर्वासां पारे सूददोहसः करो-
त्यथ दक्षिणतः प्राचीश्चतुर्दशेष्टका उपदधाति पृथिवी होता ११
तया देवतयाङ्गिरस्वद्ध्रुवा सीद द्यौरध्वर्युस्तया देवतयाङ्गिर-
स्वद्ध्रुवा सीदेति चतस्रो । ऽथ हृदयेष्टकामुपदधाति ब्रह्मेन्द्र-
मग्निमित्यनुद्रुत्य यज्ञमेतं चतुर्होतॄणामात्मानं कवयो निचि-
क्युरित्यातो । ऽथ यजुरिष्टके उपदधातीन्द्र उक्थामदैस्तया
देवतयाङ्गिरस्वद्ध्रुवा सीद मित्रावरुणावाग्निषा तया देवत- १२

---

१ ब्रह्मचितस्य M Be.

याङ्गिरस्वद्ध्रुवा सीदेत्यथ पत्नीष्टके उपदधाति पथ्या पूषा तया देवतयाङ्गिरस्वद्ध्रुवा सीद वाग्वायोस्तया देवतयाङ्गिरस्वद्ध्रुवा सीदेति । सर्वासां पारे सूददोहसः करोत्यथ पश्चादुदीचीः पञ्चहोत्रेष्टका उपदधात्यग्निर्होता तया देवतयाङ्गिरस्वद्ध्रुवा सीदाश्विनाध्वर्यू तया देवयाङ्गिरस्वद्ध्रुवा सीदेति । चतस्रो ऽपि वाश्विनाध्वर्यू इत्येतेनैव मन्त्रेण द्वे इष्टके समानतयादेवते उपदधाति । तया देवतयाङ्गिरस्वद्ध्रुवे सीदतमिति[1] मन्त्रꣳ[1] संनमयत्यथ[1] हृदयेष्टकामुपदधाति शतं नियुतः परिवेदे-त्यनुद्रुत्य प्राणसुवं तेन कृप्तो ऽमृतेनाहमस्मीत्यातो । ऽथ यजुरिष्टके उपदधात्यङ्गिरसो धिष्णियैरग्निभिस्तया देवतयाङ्गिरस्वद्ध्रुवा सीद मरुतः सदोहविर्धानाभ्यां तया देवतयाङ्गिरस्वद्ध्रुवा सीदेत्यथ पत्नीष्टके उपदधाति दीक्षा सोमस्य तया देवतयाङ्गिरस्वद्ध्रुवा सीद पृथिव्यग्नेस्तया देवतयाङ्गिरस्वद्ध्रुवा सीदेति । सर्वासां पारे सूददोहसः करोत्यथोत्तरतः प्राचीः पञ्चोपेष्टका उपदधाति वाग्घोता तया देवतयाङ्गिरस्वद्ध्रुवा सीद दीक्षा पत्नी तया देवतयाङ्गिरस्वद्ध्रुवा सीदेति त्यथ हृदयेष्टकामुपदधाति सुवर्णं कोशꣳ रजसा परीवृतमित्यनुद्रुत्येन्द्रस्यात्मानꣳ शतधा चरन्तमित्यातो । ऽथ यजुरिष्टके उपदधात्यापः प्रोक्षणीभिस्तया देवतयाङ्गिरस्वद्ध्रुवा सीदौषधयो बर्हिषा तया देवतयाङ्गिरस्वद्ध्रुवा सीदेत्यथ

१ इत्यथ संनमयत्य° M ; इति मंत्रं संनमयत्य° H Be Ben. U (pr. m.) ; संनमय° BU (sec. m.).

Digitized by Google

पञ्चेष्टके उपदधाति वसूनां गायत्री तया देवतयाङ्गिरस्वद्ध्रुवा सीद रुद्राणां त्रिष्टुभया[1] देवतयाङ्गिरस्वद्ध्रुवा सीदेति । सर्वासां पारे सूददोहसः करोत्यथोपरिष्टात्प्राचीः सप्तहोत्रेष्टका उपदधाति महाहविर्होता तया देवतयाङ्गिरस्वद्ध्रुवा सीद सत्यहविरध्वर्युस्तया देवतयाङ्गिरस्वद्ध्रुवा सीदेति यद्यपि नानाधृष्यश्चाप्रतिधृष्यश्च यज्ञस्याभिगरावित्येतेन मन्त्रेण द्वे इष्टके समानतयादेवते उपदधाति । तया देवतयाङ्गिरस्वद्ध्रुवे सीदतमिति मन्त्रं संनमयत्यथ[2] हृदयेष्टकामुपदधातीन्द्रो राजा जगतो य ईश इत्यान्तादनुवाकस्याथ यजुरिष्टका उपदधात्यदितिर्वेद्या तया देवतयाङ्गिरस्वद्ध्रुवा सीद सोमो दीक्षया तया देवतयाङ्गिरस्वद्ध्रुवा सीदेति यथोद्गाथ पत्नीष्टका उपदधात्यादित्यानां जगती तया देवतयाङ्गिरस्वद्ध्रुवा सीद विष्णोरनुष्टुभया[3] देवतयाङ्गिरस्वद्ध्रुवा सीदेत्यष्टादश । सर्वासां पारे सूददोहसः करोत्यथ यथावकाशं षडिष्टका उपदधाति वाचस्पते विधे नामन्निति दशहोतुर्वाचस्पते वाचो वीर्येणेति चतुर्होतुः सोमः सोमस्य पुरोगा इति पञ्चहोतुर्भूर्भुवः सुवरिति षड्ढोतुर्वाचस्पते हृदिधे नामन्निति सप्तहोतुः । सर्वासां पारे सूददोहसः करोत्यथ यथावकाशमेव प्रतिपदेष्टका उपदधाति । देवस्य त्वा सवितुः प्रसव इत्यनुद्रुत्यैषा ते

---

१ त्रिष्टुभया M.

२ Thus MH ; संनमय° the other MSS.

३ °नुष्टुभया .

Digitized by Google

काम दक्षिणोत्तानस्याङ्गिरसः प्रतिगृह्णात्वित्येकामविंशमपि वा गन्धर्वाप्सराभ्यः स्वगाकरणे इत्येतेन मन्त्रेण द्वे इष्टके समानतयादेवते उपदधाति । तया देवतयाङ्गिरस्वद्ध्रुवे सीद-तमिति मन्त्रं संनमयति[१] । स्वयमातृण्णाभ्यः प्रभृति चिद्रू-मत ऊर्ध्वं । संतिष्ठते ब्रह्मचित् । ॥ ७ ॥ पञ्चमः ॥

अथ समस्तस्य । प्रसिद्धं चयनकरणं यथा सावित्रस्यैतावदेव नाना । सावित्रो ऽग्निः प्रथमा चितिर्लोकंपृणा[२] द्वितीया । नाचिकेतस्तृतीया । लोकंपृणा[२] चतुर्थी । ब्रह्मचित्पञ्चमी । सर्वासु चितिषु स्वयमातृण्णा[३] । पुरीषान्ताश्चितयो । ऽग्ने देवाꣳ इहावहेत्येताभिः पञ्च[४] चितीरभिमृशति[४] । तं चेत्सौम्ये ऽध्वर उत्तम[५] एव यज्ञे चिन्वीत प्राग्दीक्षणीयायै द्विवः श्येनीभि-र्यजेतोदवसानीयाया[६] अपाषाभिः[६] । सकृत्प्रयुज्य[७] समस्यति । संतिष्ठते समस्तः । ॥ ८ ॥ षष्ठः ॥

---

१ Thus U (pr. m.); संनमति the other MSS.; M om. this passage.

२ •ग्रणाभिर् (•भिस्) M Be UH, but cp. Āp. xix. 15. 11.

३ •तृण्णाः M.

४ Thus H; पंचभिः पंच चितीर• U; पंच चितयो भिमृशति Be Ben; पंच चितयोभिमृशंते M; पंचभिश्चितीरभिमृशति B.

५ उत्तमे U; instead of उत्तम एव यज्ञे M has उत्तरवेद्यां ।

६ Thus HU (sec. m.); •सानीयायापा• M Ben Be U (pr. m.); •नायायापा• B; cp. Sāyaṇa on T Br., vol. iii, p. 815; चपाषाभिः MU Be; the other MSS. indistinctly (ष or ख).

७ प्रयच्छेतं UH; प्रयच्छ च M.

Digitized by Google

अथ वैश्वसृजस्य । प्रसिद्धं लेपकरणं यथा सावित्रस्यैतावद्देव नाना । तिस्रो लेखा भवन्त्ययान्तमायां लेखायामुपदधाति यथामृतं यच्च मर्त्यमित्यष्टादश । सर्वासां पारे सूददोहसः करोत्यथाभ्यन्तरायां[१] लेखायामुपदधाति सर्वा दिशो दिक्ष्विति पञ्चदश । सर्वासां पारे सूददोहसः करोत्यथाभ्यन्तरायां लेखायामुपदधाति सर्वान्दिवꣳ सर्वान्देवान्दिवीति नव । सर्वासां पारे सूददोहसः करोति । सप्तमाद्याश्वः प्रभृति षिड्मत ऊर्ध्वं । तं चेद्धीने[२] मध्ये[२] वा चिन्वीत प्रतराणे[३] विश्वजिति सर्वपृष्ठे दक्षिणानां काले ब्रह्मा वद्-स्वाधीनो वैश्वसृजामध्याचष्ट[४] ऋचां प्राची महती दिगुच्यत इति[५] पञ्चो ऽर्धर्चशो ब्राह्मणे[६] वाक्यप्रसंख्या अध्वर्युः प्रतिगृणात्यों हदहृतं[७] हदसत्यं हददरात्म हदहिति । तस्योत्तमे पर्याये ऽरात्म[८] हदसंपद्यते[८] । संतिष्ठते वैश्वसृजः । ॥ ९ ॥ सप्तमः ॥

---

१ °यांतमायां M.

२ चेद्दुहीनीयाधिये Be Ben.

३ प्रतराणे ins. M.

४ वैश्वसृजाम् Be Ben; विश्वसृजाम् UHB; वैश्वसृजं M.

५ इत्युच्यु M.

६ ब्राह्मणं B.

७ Thus BUH; Be Ben have each time मद् after हृदत् and M reads everywhere ब्रह्मन् instead of हृदत् ।

८ °रात्मब्रह्मसंप° M.

एतेनारुणकेतुको व्याख्यातो । यावन्मन्त्रमिष्टकाः[१] । लोकंपृणाश्च यथमात्रमाम्नाय एव । पुष्करपर्णꣳ रुक्मꣳ हिरण्मयं[२] पुरुषं कूर्ममित्यातपति वर्ष्या इति यथासमाम्नातं[३] । पञ्चस्वा इत्यविभ्रोष्या[४] इत्यर्थः । उत्तरवेद्यावपनकाले तां तूष्णीं आगुदग्नौ[५] ख्यात्वान्वप मृदं निवपति । विदेरग्निरित्यादि कुप्यते । ध्रुवासीति प्रतिपद्यते । इतराश्मनीष्टका उपदध्याद्रुद्रं कर्णभिरिति द्वाभ्याꣳ शान्तिं कृत्वा ताभ्यामुपदधात्यपमापामिति पञ्चभिर्मन्त्रमानाभिरश्मोदकꣳ । शिवा न शन्तमेति सौषध्यो[६] ऽपो[६] ऽध्वर्यवे ददाति । स ताः प्रतिगृह्य शिवा न इत्युपदधाति । सुमृडीकेति भूमिवतीमुपदध्यादेताः पुरस्तात्स्वतिः प्रत्यञ्चमित्यष्टौ मध्ये शुक्रं ते अन्यदिति च । साकंजानामित्येकादश पुरस्ताद्दक्षिणतो ऽविदुःखोत्थितश्चैवेति पश्चिद्देव वः सतपस इति चातितापाणीति चतस्रो मदन्तीस्वाः प्रवर्ग्यवदायन्तयोः शान्तिं कृत्वात्यूर्ध्वाच इति मौष्टुतुमण्डलान्वव द्रप्स इति चारोम इत्यष्टौ[७] सूर्यनामभिः[७] पद्मो

१ यावन्मात्रम॰ MU.

२ om. MB Be Ben.

३ ॰म्नाता M.

४ इत्यमोष्या MU BH.

५ ॰दग्नं MU (sec. m.).

६ सौषध्योपो B; सौषध्या अपो UH; सौषध आपो M; सौषध्या आपो Be; सौषध्या आपो Ben.

७ Thus B Ben; इति अष्ट सूर्य॰ Be; इत्यष्टौ अष्ट सूर्य॰ HU; M om. सूर्यनामभिः ।

Digitized by Google

यत्ते शिल्पमिति च । व्याहृतीर्जपित्वापो व इति यजमान
उपतिष्ठत । एवमुत्तरैरुपस्थानं व्याहृतीर्जपित्वा । सप्त सूर्याः
सप्त दिशो नानासूर्या यद् द्यावश्चित्रं देवानामिति चतस्रः
सौरीः पुरस्तात्केदमभ्रमित्येकामर्धमासा इत्युपरिष्टात्कांश्चा
अप्सु निविशन्त इति[1] दक्षिणतः । किंस्विद्वपेति पञ्च ९
वैष्णवीः[2] । पृच्छामि त्वा परं मृत्युमिति चतस्रो मृत्युमतीः ।
पृच्छामि त्वा पापकृत इति चतस्रो निरयवतीरा[3] चक्षिमा
नयेति द्वे । अग्निश्च जातवेदाश्चेत्यष्टौ दिश्या दिशो व इति
यजमानः । प्रभ्राजमाना इत्येकादश रुद्राः । प्रभ्राजमान्य
इत्येकादश रुद्राण्यः पदशो मध्ये । रूपाणि व इति यज- १०
मानः । स्वानभ्राडित्येकादश गन्धर्वगणाः पदशः पश्चाद्गौरी
मिमायेत्येका[4] । वराहवः स्वतपस इति सप्त वाताः पदशः ।
समानमेतदिति वृष्टिमती[5] । यदक्षरमिति श्लोको । अम-
दग्निरित्याप्यायितस्तंयोरिति शंयुः । महस्वदित्यष्टौ
संयानीः । स संग्राम इति द्वे च[6] । पवित्रवन्तः पवित्रं ते ११
ब्रह्मा देवानामसतः सद इति चतस्रः पवित्रवत्य उत्तरतो ।
ऽग्नौ च प्लवा इति सप्त मध्ये । ऽन्धो मणिमिति पञ्च ·

---

१ द्वे ins. M.

२ Thus BHU ; वैष्णवः M Be Ben.

३ निरयवती॰ B ; पवमतीर॰ Ben ; यमवतीर॰ Be.

४ सर्वा H Be Ben U.

५ ॰तीं HU ; इति भिर् M ; Be Ben om. the word.

६ om. B.

Digitized by Google

वैश्वदेवीरुत्तरत । आ तमग्ने रथमिति तिस्र । आतनुष्वेति चतस्र । आ मन्द्रैरित्येका यजमान उपदध्यादंशुभिश्चेति द्वे । सुब्रह्मण्योमित्येकामरुणाश्वा इति चतस्रो रेवतीर्ब्रह्मण उद्रथमसीति चतस्रो ब्रह्मसदना । महद्योनीमित्यष्टौ दिश्या । मित्रस्य वरुणस्येत्यष्टौ दिश्याः । पुष्करपर्णꣳ रुक्मꣳ हिरण्मयं पुरुषं कूर्ममिति महाग्निवदेव[1] । तान्युपधाय हꣳसः शुचिषदिति द्वे दूरोहणे पुरुषमभितस्सदित्यदमिति द्वे मध्ये । वसूनाꣳ रुद्राणामित्यष्टावुत्तरतो । रश्मयो व इति यजमान । आरोगस्येत्यष्टावुपरिष्टादापो व इति यजमानः । प्रभ्राजमानानामित्येकादश प्रभ्राजमानीनामिति चैकादश मध्ये । रूपाणि व इति यजमानो । ऽग्नेः पूर्वदिश्यस्येत्यष्टौ दिश्या । दिशो व इति यजमानो । दक्षिणपूर्वस्यामिति चतस्रो नरकवतीर्यथालिङ्गमा यस्मिन्निन्द्रियाणि प्रतक्रतविति द्वे दक्षिणत । इन्द्रघोषा वः संज्ञानमिति षड् दिश्या । आदित्य सर्व इति पञ्च दिश्या । एवा ह्येवेति षड् दिश्या । आपमापामिति नवोपरिष्टादपाꣳ रसमित्येका । कामस्तदग्र इति संकल्पवतीमापो ह यदित्योघवतीं । विधाय लोकानिति स्तभनवतीं । केतव इत्येकामिमा नु कमिति तिस्र । आप्लवस्वेति सप्तदश चपण्णो । विशीर्ष्णीमिति द्वे । पर्जन्यायेति

1 Thus H Be; °वदेव B; M Ben U om. एव, but M has एतानि instead of the following तानि।

तिस्रः । पुनर्मामैत्विति च तिस्रः[1] । स्वयमातृण्णादि समानमुत्तरꣳ सावित्रेण । स्वयमातृण्णा लोकंपृणायैता आपः पञ्च चितयो भवन्ति । प्रतिदिशं चितीः[2] पुष्करपर्णादिभिः प्रच्छादनं । लोकं पृणयैव द्वितीयामन्याः प्रथमचितिवच्च पुष्करपर्णादय । उत्तरतो[3] लोकंपृणयापवर्गो । दीर्घदारुभिमेध्यं[4] कृत्वा पृष्टो दिवीति पुरीषव्यूहनमन्त्येष्टके[5] शतरुद्रीयहोमो । ऽनुयाजꣳसमान्ते ऽग्निप्रणयनꣳ । ह्रियमाणायां[6] वैश्रवणयज्ञो ब्राह्मणेन[7] व्याख्यातो ऽन्नकामस्य सर्वकामस्य[8] वा पर्वणिपर्वणि वैश्रवणयज्ञः । सोत्तरवेदिषु क्रतुषु चिन्वीतेति यथाब्राह्मणं[9] । तस्यैतद्भूतमिति यथाब्राह्मणं संमितास्व[10] व्रतसमुच्चया[10] । आपो न बीभत्सा यथाब्राह्मणमेककामः[11]

---

१ चतस्रः M ; चतिस्रः the other MSS.

२ चितिं H चितिः U.

३ उत्तर Be Ben.

४ °मेध्यं M.

५ °मंत्येष्टकोर्ध्वं MUH.

६ Uncertain reading; ह्रयमाणायां U Be BU; ह्रियमाणायां M; ह्रीयमाणायां Ben.

७ Thus Sāyaṇa (comm. on Taitt. Ār.); ब्राह्मण MUH; ब्राह्मणे Be Ben; B om. the word.

८ सर्व° M.

९ चेतव्य ins. M.

१० Uncertain reading; HU read as given in the text; संमितं व्रतसमुच्चय B; समभितव व्रतसमुच्चय Be Ben; संमितव्रतसमुच्चय M.

११ यथाब्राह्मणमेककामः Be Ben; यथाब्राह्मणकामः HBUM.

Digitized by Google

सर्वकामो वा । आपो[१] वा इदꣳ सर्वमिति ब्राह्मणं[२] विज्ञायते ब्रह्म वा आपो यदाप[३] उपधीयन्ते ब्रह्म[४] वै[४] तदात्मन्धत्ते ब्रह्मणः सायुज्यꣳ सलोकतामाप्नोति य एतमग्निं[५] चिनुत इति । संतिष्ठत आरुणकेतुकः संतिष्ठत आरुणकेतुकः । ॥ १० ॥ अष्टमः ॥[६]

॥ इत्यत्येकोनविꣳशः प्रश्नः ॥

१ वापो UBH वा आपो Be.

२ om. M.

३ Thus MU (pr. m.); यदप all the other MSS.

४ ब्रह्मैव M.

५ Be Ben ins. चिन्ता ।

६ Adhyāya numbers for this praśna are found only in M.; the MSS. agree all in designing this praśna as काठकसूत्रम् or काठकम् ।

Digitized by Google

CORRIGENDA.

Page	20,	l. 8,	*read*	तत्रः	*instead of*	तत्र
,,	70,	l. 12	,,	०धारयत्य०	,,	०धारयत्व०
,,	96,	l. 10	,,	षोडशतया	,,	०तयं
,,	187,	l. 4	,,	अवी०	,,	अम्रो०
,,	200,	l. 1	,,	उवैवैष[1]	,,	उ[1]वैवैष[1]
,,	226,	l. 5	,,	सुवर्णमये०		
,,	336,	note १	,,	०च्चरि०		

Digitized by Google

Nyāyavārtika, Fasc. 2-6 @ /10/ each	Rs.	3	2
Nityācārapaddhati, Fasc. 1–7 @ /10/ each		4	6
Nityācārapradīpa, Vol. I, Fasc. 1-8, Vol. II, Fasc. 1-3 @ /10/ each	Rs.	6	14
Nyāyabindutīkā, Fasc. 1 @ /10/ each		0	10
*Nyāya Kusumāñjali Prakaraṇa, Vol. II, Fasc. 1-3 @ /10/ each ...		1	14
Nyayasarah		2	0
Padumāwati, Fasc. 1-6 @ 2/ each		12	0
Prākrita-Paingalam, Fasc. 1–7 @ /10/ each		4	6
Prākṛta Lakṣaṇam, Fasc. 1 @ /1/8 each		1	8
Parāçara Smṛti, Vol. I, Fasc. 1-8, Vol. II, Fasc. 1-6; Vol. III, Fasc. 1-6 @ /10/ each		12	8
Parāçara, Institutes of (English) @ 1/- each		1	0
Parīkṣamukha Sutram		1	0
Prabandhacintāmaṇi English) Fasc. 1-3 @ 1/4/ each		3	12
Rasarnavam, Fasc. 1-3		3	12
Ravisiddhanta Manjari, Fasc. 1		0	10
Saddarśana-Samuccaya, Fasc. 1-2 @ /10/ each		1	4
Samaraicca Kaha, Fasc. 1-4, @ /10/ each		2	8
Sāṃkhya Sūtra Vṛtti, Fasc. 1–4 @ /10/ each		2	8
Ditto (English) Fasc. 1-3 @ 1/- each		3	0
Six Buddhist Nyaya Tracts		0	10
Srāddha Kriyā Kaumudī, Fasc. 1-6 @ /10/ each		3	12
Suçruta Saṁhitā, (Eng.) Fasc. 1 @ 1/- each		1	0
Suddhi Kaumudī, Fasc. 1-4 @ /10/ each		2	8
Sundaranandam Kavyam		1	0
Suryya Siddhanta, Fasc. 1-2 @ 1-4 each		2	8
Syainika Sastra		1	0
*Taittreya Brahmana, Fasc., 11-25 @ /10/ each		9	6
*Taittirīya Saṁhitā, Fasc. 27-45 @ /10/ each		11	14
*Tāṇḍya Brāhmaṇa, Fasc. 10–19 @ /10/ each		6	4
Tantra Vārtika (English) Fasc. 1-10 @ /1/4		12	8
Tattva Cintāmaṇi, Vol. I, Fasc. 1-9; Vol. II, Fasc. 1-10; Vol. III, Fasc. 1-2; Vol. IV, Fasc. 1; Vol. V, Fasc. 1-5; Part IV, Vol. II, Fasc. 1-12 @ /10/ each		24	6
Tattva Cintamani Didhiti Vivriti, Vol. I, Fasc. 1-4; Vol. II, Fasc. 1, @ /10/ each		3	2
Tattva Cintamani Didhiti Prakas, Fasc. 1-4, @ /10/ each		2	8
Tattvārthādhigama Sutram, Fasc. 1-3 @ /10/		1	14
Tirthacintamoni, Fasc. 1-3, @ /10/ each		1	14
Trikāṇḍa-Maṇḍanam, Fasc. 1-3 @ /10/		1	14
Tul'si Satsai, Fasc. 1-5 @ /10/		3	2
*Upamita-bhava-prapañca-kathā, Fasc. 1-2, 5-13 @ /10/ each ...		6	14
Uvāsagadasāo, (Text and English) Fasc. 1-6 @ 1/-		6	0
Vallāla Carita, Fasc. 1 @ /10/		0	10
Varṣa Kriyā Kaumudī, Fasc. 1-6 @ /10/		3	12
*Vāyu Purāṇa, Vol. I, Fasc. 3-6; Vol. II, Fasc. 1-7; @ /10/ each ...		6	14
Vidhāna Pārijāta, Fasc. 1-8; Vol. II, Fasc. 1 @ /10/		5	10
Ditto Vol. II, Fasc. 2-4, @ 1/4		3	12
Vivādaratnākara, Fasc. 1-7 @ /10/ each		4	6
Vṛhat Svayambhū Purāṇa, Fasc. 1-6 @ /10/		3	12
Yogaśāstra, Fasc. 1-3		3	12

Tibetan Series.

Amarakosah	2	0
Bauddhastotrasangraha, Vol. I	2	0
A Lower Ladakhi version of Kesarsaga, Fasc. 1-4, @ 1/- each ...	4	0
Nyayabindu of Dharmakirti, Fasc. 1	1	0
Pag-Sam S'hi Tin, Fasc. 1-4 @ 1/- each	4	0
Rtogs brjod dpag hkhri S'iñ (Tib. & Sans. Avadāna Kalpalatā) Vol. I, Fasc. 1-9; Vol. II, Fasc. 1-9 @ 1/- each	18	0
Sher-Phyin, Vol. I, Fasc. 1-5; Vol. II, Fasc. 1-3; Vol. III, Fasc. 1-6 @ 1/ each	14	0

Arabic and Persian Series.

Al-Muqaddasi (English) Vol. I, Fasc. 1-4 @ 1/-	4	0
Āīn-i-Akbarī, Fasc, 1-22 @ 1/8/ each	33	0
Ditto (English) Vol. I, Fasc. 1-7, Vol. II, Fasc. 1-5, Vol. III, Fasc. 1-5, Index to Vol. II, @ 2/- each	36	0
Akbarnāmah, with Index, Fasc. 1-37 @ 1/8/ each ...	55	8
Akbarnāmah, English Vol. I, Fasc. 1-8; Vol. II, Fasc. 1-7; Vol. III, Fasc. 1-2, @ 1/4/ each	21	4
Arabic Bibliography, by Dr. A Sprenger @ /10/	0	10
Conquest of Syria, Fasc. 1-9 @ /10/ each	5	10
Catalogue of Arabic Books and Manuscripts 1-2 @ 1/- each ...	2	0

Digitized by Google

Asiatic Society of Bengal, Fasc. 1-3 @ 1/- each ... Rs. 3

Dictionary of Arabic Technical Terms, and Appendix Fasc. 1-21 @ 1/8/ each 31

Faras Nama, Fasc. 2 1

Farnang-i-Rashidi, Fasc. 1-14 @ 1/8/ each 21

Fihrist-i-Tusi, or Ṭūsy's list of Shy'ah Books, Fasc. 1-4 @ 1/- each 4

Hadiqatu'L, Haqiqat, (Text & Eng.) 3

History of Gujarat 1

Haft Āsmān, History of the Persian Masnawi, Fasc. 1 @ /12/ each ... 0

History of the Caliphs, (English) Fasc. 1-6 @ 1/4/ each 7

Iqālnamah-i-Jahāngīrī, Fasc. 1-3 @ /10/ each 1

Iṣābah, with Supplement, 51 Fasc. @ 1/- each 51

Ma'āṣir-i-Raḥīmī, Part I, Fasc. 1-2 @ 2 each 4

Maāṣir-ul-Umarā, Vol. I, Fasc. 1-9; Vol. II, Fasc. 1-9; Vol. III, 1-10; Index to Vol. I, Fasc. 10-11; Index to Vol. II, Fasc. 10-12; Index to Vol. III, Fasc. 11-12 @ /1/ each ... 35

Ditto (Eng.) Vol. I, Fasc. 1-2, @ 1/4/ each ... 2

Marhamu 'L-Ilali 'L-Mu'Dila, Fasc. 1-2 2

Muntakhabu-t-Tawarikh, Fasc. 1-15 @ 10/ each 9

Ditto (English), Vol. I, Fasc. 1-7; Vol. II, Fasc. 1-5 and 3 Indexes; Vol. III, Fasc. 1 @ 1/- each 16

Muntakhabu-l-Lubāb, Fasc. 1-19 @ /10/ each... 11

Ditto Part 3, Fasc. 1-2 @ 1/- each 2

Nukhbatu-l-Fikr, Fasc. 1 0

Nisāmī's Khiradnāmah-i-Iskandari, Fasc. 1-2 @ /12 each ... 1

Persian and Turki Divans of Bayran Khan, Khan Khanan ... 1

Qawaninu 's-Sayyad of Khuda Yar Khan 'Abbasi, edited in the original Persian with English notes by Lieut.-Col. D. C. Phillott ... 5

Riyāzu-s-Salātīn, Fasc. 1-5 @ /10/ each 3

Ditto (English) Fasc. 1-5 @ 1/- 5

Tadhkira-i-Khushnavisān 1

Tubaquat-i-Nasiri (English), Fasc. 1-14 @ 1/- each 14

Ditto Index 1

Tārīkh-i-Fīrūz Shāhi of Ẓiyāu-d-dīn Barni, Fasc. 1-7 @ /10/ each . 4

Tārīkh-i-Fīrūzshāhi, of Shams-i-Sirāj Aif, Fasc. 1-6 @ /10/ each ... 3

Ten Ancient Arabic Poems, Fasc. 1-2 @ 1/8/ each .. 3

The Mabani 'L Lughat: A Grammar of the Turki Language in Persian 1

Tuzuk-i-Jahāngīrī (Eng.) Fasc. 1 @ 1/- 1

Wis o Rāmīn, Fasc. 1-5 @ /10/ each 3

Ẓafarnāmah, Vol. I, Fasc. 1-9, Vol. II, Fasc. 1-8 @ /10/ each ... 10

ASIATIC SOCIETY'S PUBLICATIONS.

1. ASIATIC RESEARCHES. Vols. XIX and XX @ 10/- each 20
2. PROCEEDINGS of the Asiatic Society from 1875 to 1904 @ /8/ per No.
3. JOURNAL of the Asiatic Society for 1875 (8), 1871 (7), 1872 (8), 1873 (8), 1874 (8), 1875 (7), 1876 (7), 1877 (8), 1878 (8), 1879 (7), 1880 (8), 1881 (7), 1882 (6), 1883 (5), 1884 (6), 1885 (6), 1886 (8), 1887 (7), 1888 (7), 1889 (10), 1890 (11), 1891 (7), 1892 (8), 1893 (11), 1894 (8), 1895 (7), 1896 (8), 1897 (8), 1898 (8), 1899 (8), 1900 (7), 1901 (7), 1902 (9), 1903 (8), 1904 (16) @ 1/8 per No. to Members and @ 2/- per No. to Non-Members.

N.B.—The figures enclosed in brackets give the number of Nos. in each Volume.

4. Journal and Proceedings, N.S., 1905, to date (Nos. 1-4 of 1905 are out of stock), @ 1-8 per No. to Members and Rs. 2 per No. to Non-Members.
5. Memoirs, 1905, to date. Price varies from number to number. Discount of 25°/ₒ to Members.
6. Centenary Review of the Researches of the Society from 1784-1883 3
7. Catalogue of the Library of the Asiatic Society, Bengal, 1910 ... 8
8. Moore and Hewitson's Descriptions of New Indian Lepidoptera, Parts I-III, with 8 coloured Plates, 4to, @ 6/- each 18
9. Kaçmīraçabdāmṛta, Parts I and II @ 1/8/ 3
10. Persian Translation of Haji Baba of Ispahan, by Haji Shaikh Ahmad-i-Kirmasi, and edited with notes by Major D. C. Phillott. ... 10

Notice of Sanskrit Manuscripts, Fasc. 1-35 @ 1/- each 35

Nepalese Buddhist Sanskrit Literature, by Dr. R. L. Mitra ... 5

N.B.—All Cheques, Money Orders, &c., must be made payable to the "Treasurer Asiatic Society," only.

Digitized by Google

31-10-11.

BIBLIOTHECA INDICA:

A

COLLECTION OF ORIENTAL WORKS

PUBLISHED BY THE

ASIATIC SOCIETY OF BENGAL.

NEW SERIES, No. 1379.

बौधायन श्रौतसूत्रम् ।

BAUDHĀYANA ŚRAUTA SŪTRAM

A SANSKRIT WORK ON THE VEDIC LITERATURE.

LIBRARY
JUN 22 19[illegible]
UNIVERSITY OF CALIF
BERKELEY

EDITED BY

DR. W. CALAND OF UT[illegible]T.

VOL. III. FASCICULUS I.

CALCUTTA:

PRINTED AT THE BAPTIST MISSION PRESS,
AND PUBLISHED BY THE
ASIATIC SOCIETY, 1, PARK STREET.
1914.

Digitized by Google

AT THE LIBRARY OF THE

ASIATIC SOCIETY OF BENGAL,

No. 1, PARK STREET, CALCUTTA,

AND OBTAINABLE FROM

The Society's Agents—

MR. BERNARD QUARITCH, 11, *Grafton Street, New Bond Street, London,*
AND MR. OTTO HARRASSOWITZ, BOOKSELLER, *Leipzig, Germany.*

*Complete copies of those works marked with an asterisk * cannot be supplied—*
of the Fasciculi being out of stock.

BIBLIOTHECA INDICA.

Sanskrit Series.

Advaitachintā Kaustubha, Fasc. 1–3 @ /10/ each ... Rs. 1
Aitarēya Brāhmaṇa, Vol. I, Fasc. 1–5; Vol. II, Fasc. 1–5; Vol. III, Fasc. 1–5, Vol. IV, Fasc. 1–8 @ /10/ each 14
Aitareyalocana 2
Amarakosha, Fasc. 1-2 4
Anumana Didhiti Prasarini, Fasc. 1-3 @ /10/ 1
Aṣṭasāhasrikā Prajñāpāramitā, Fasc. 1–6 @ /10/ each ... 3
Ātmatattvaviveka, Fasc. I 0
Açvavaidyaka, Fasc. 1–5 @ /10/ each 3
Avadāna Kalpalatā, (Sans. and Tibetan) Vol. I, Fasc. 1–11. Vol. II, Fasc. 1–11 @ 1/ each 22
Bālam Bhaṭṭī, Vol. I, Fasc. 1–2, Vol. II, Fasc. 1, @ /10/ each ... 1
Baudhāyana Srauta Sūtra, Fasc. 1–3; Vol. II, Fasc. 1–5; Vol. III, Fasc. 1, @ /10/ each 5
Bhasavritty 0
Bhāṭṭa Dīpikā, Vol. I, Fasc. 1–6; Vol. II, Fasc. 1–2 @ /10/ each ... 5
Bauddhastotrasangraha 2
Bṛhaddevatā, Fasc. 1–4 @ /10/ each 2
Bṛhaddharma Purāṇa, Fasc. 1–6 @ /10/ each 3
Bodhicaryāvatāra of Çāntideva, Fasc. 1–6 @ /10/ each ... 3
Çri Çantinatha Charita, Fasc. 1–3 1
Çatadūṣaṇī, Fasc. 1–2 @ /10/ each 1
Catalogue of Sanskrit Books and MSS., Fasc. 1–4 @ 2/ each ... 8
*Çatapatha Brāhmaṇa, Vol. I, Fasc. 1–7; Vol. II, Fasc. 1–5; Vol. III, Fasc. 1–7; Vol. V, Fasc. 1–4 @ /10/ each ... 14
1. ASIAT Ditto Vol. VI, Fasc. 1–3 @ 1/4/ each 3
2. PROCEEDitto Vol. VII, Fasc. 1–5 @ /10/ 3
3. JOURNAL itto Vol. IX, Fasc. 1–2 1
(8), 1874 [illegible]ikā-prajñāpāramitā, Part I, Fasc. 1–18 @ /10/ each ... 11
1881 (7), [illegible] Chintām[illegible], Vol. II, Fasc. 1–25; Vol. III, Part I, Fasc.
1888 (7), [illegible] 1–18, [illegible] II, Fasc. 1–10; Vol. IV, Fasc. 1–6 @ /10/ each 26
(8), 1895 Ditto [illegible]8), 1 Vol. IV, Fasc. 7, @ 1/4/ each ... 1
(7), 1[illegible] Ditto [illegible](8), Vol. IV, Fasc. 8–10 @ /10/ 1
@ Śvartika (Er[illegible] Fasc. 1–7 @ 1/4/ each 8
N.B.[illegible]uta Sūtra [illegible]ayana, Vol. I, Fasc. 1–7; Vol. II, Fasc. 1–4;
4. J[illegible] Vol. III, Fasc. 1–4; Vol. 4, Fasc. 1 @ /10/ each ... 10
Çrī Bhashyam, Fasc. 1–3 @ /10/ each 1
Dāna Kriyā Kaumudi, Fasc. 1–2 @ /10/ each 1
5. Gadadhara Paddhati Kalasara, Vol. I, Fasc. [illegible] @ /10/ each ... 4
Ditto Ācarasāra, Vol. II, Fasc. 1–4 3
6. Gobhilīya Gṛhya Sūtra, Vol. I, @ /10/ each 3
Ditto Vol. II, Fasc. 1–2 @ 1/4 /each 2
Ditto (Appendix) Gobhila Parisista 2
Gobhilīya Gṛhya Sūtra, Grihya Sangraha 0
Haralata 1
Karmapradiph, Fasc. 1 1
Kāla Viveka, Fasc. 1–7 @ /10/ each 4
Katantra, Fasc. 1–6 @ /12/ each 4
Kavi Kalpa Lata, Fasc. 1 0
Kavindravacana Samuccayah 2
Karma Purana, Fasc. 1—9 @ /10/ each 5
Kiranavali, Fasc. 1–3, @ /10/ 1
Madana Pārijāta, Fasc. 1–11 @ /10/ each 6
Mahā-bhāṣya-pradipodyota, Vol. I, Fasc. 1–9; Vol. II, Fasc. 1–12; Vol. III, Fasc. 1–10 @ /10/ each 19
Ditto Vol. IV, Fasc. 1–3 @ 1/4 each ... ...

Digitized by Google

THE

BAUDHĀYANA ŚRAUTA SŪTRA

BELONGING TO THE

TAITTIRĪYA SAṂHITĀ

EDITED BY

DR. W. CALAND,

Professor of Sanskrit at the University of Utrecht.

VOLUME III.

CALCUTTA:

PRINTED AT THE BAPTIST MISSION PRESS,

AND PUBLISHED BY THE

ASIATIC SOCIETY, 1, PARK STREET.

1913.

Digitized by Google

Digitized by Google

INDEX.

Preface.				
Dvaidhasūtra	.. Praśnas XX–XXIII.			
darśapurṇamāsau	.. Praśna XX,		1–15	(Adhy. 1–5).
agnyādheyam	.. ,,	,,	16–18	(,, 6).
punarādheyam	.. ,,	,,	19	
agnihotram	.. ,,	,,	20	
piṇḍapitṛyajñaḥ	.. ,,	,,	21	(,, 7).
āgrayaṇam	.. ,,	,,	22	
agnyupasthānam, etc.	,,	,,	23, 24	(,, 8).
paśubandhaḥ	.. ,,	,,	25–31	(,, 9, 10).
cāturmāsyāni	.. ,,	XXI,	1–6	(,, 1, 2).
agniṣṭomaḥ	.. ,,	,,	7–26	(,, 3–10).
agnicayanam	.. ,,	XXII,	1–12	(,, 1–6).
vājapeyaḥ	.. ,,	,,	13–15	(,, 7).
rājasūyaḥ	.. ,,	,,	16–21	(,, 8–10).
kāmyeṣṭayaḥ	.. ,,	XXIII,	1–4	(,, 1, 2).
aupānuvākyam	.. ,,	,,	5–8	(,, 3, 4).
dvādaśāhaḥ	.. ,,	,,	9–11	(,, 5, 6).
ahīnāḥ ..	.. ,,	,,	12, 13	(,, 7)
atirātraḥ	.. ,,	,,	13	
ekādaśinī ..				
punaścitiḥ ..				
kuṇḍapāyinām iṣṭiḥ ..	,,	,,	14, 15	(,, 8).
kāmyāś citayaḥ ..				
sautrāmaṇī	.. ,,	,,	16	(,, 9).
ayanāni ..	.. ,,	,,	17	
ekāhāḥ ..	.. ,,	,,	18, 19	(,, 10).
Karmāntasūtra	.. Praśnas XXIV–XXVI.			
paribhāṣāḥ	.. Praśna XXIV,		1–11	(,, 1–6).
agnyādheyam	.. ,,	,,	12–17	(,, 7–9).
punarādheyam	.. ,,	,,	18, 19	(,, 10).
darśapūrṇamāsau	.. ,,	,,	20–29	(,, 11–15).
agnihotram	.. ,,	,,	30, 31	(,, 16).
piṇḍapitṛyajñaḥ	.. ,,	,,	32	
āgrayaṇam	.. ,,	,,	33	(,, 17).
agnyupasthānam, etc.	,,	,,	33	
paśubandhaḥ	.. ,,	,,	34–37	(,, 18, 19).
kāmyāḥ paśavaḥ	.. ,,	,,	38, 39	(,, 20).
cāturmāsyāni	.. ,,	XXV,	1–3	(,, 1, 2).
agniṣṭomaḥ	.. ,,	,,	4–26	(,, 3–16).
agnicayanam	. ,,	,,	27–32	(,, 17–19).
vājapeyaḥ	.. ,,	,,	33–34	(,, 20).

Digitized by Google

rājasūyaḥ ..	Praśna XXVI,		1–3	(Adhy. 1, 2).
iṣṭikalpaḥ ..	,,	,,	4–6	(,, 3, 4).
aupānuvākyam ..	,,	,,	7–9	(,, 5, 6).
aśvamedhaḥ ..	,,	,,	10–11	(,, 7).
dvādaśāhaḥ ..	,,	,,	12–17	(,, 8–11).
ahīnāḥ	,,	,,	18–21	(,, 12, 13).
Maāṣir-ul-Umarā, Vol. I, Fasc. 1-9; Vol. II, Fasc. 1-9; Vol. III, 1-10; Index to Vol. I, Fasc. 10-11; Index to Vol. II, Fasc. 10-12; Index to Vol. III, Fasc. 11-12 @ /1/ each ...

Ditto (Eng.) Vol. I, Fasc. 1-6, @ 1/4/ each ...

Memoirs of Tahmasp ... ...

Marhamu 'L-Ilali 'L-Mu'Dila, Fasc. 1-3 ... ...

Muntakhabu-t-Tawarikh, Fasc. 1-15 @ 10/ each ... ...

Ditto (English), Vol. I, Fasc. 1-7; Vol. II, Fasc. 1-5 and 3 Indexes; Vol. III, Fasc. 2 @ 1/- each ... ...

Muntakhabu-l-Lubāb, Fasc. 1-19 @ /10/ each... ... ...

Ditto Part 3, Fasc. 1-4 @ 1/- each ... ...

Persian and Turki Divans of Bayran Khan, Khan Khanan ...

Qawaninu 's-Sayyad of Khuda Yar Khan 'Abbasi, edited in the original Persian with English notes ... ...

Riyāzu-s-Salāṭīn, Fasc. 1-5 @ /10/ each ... ...

Riyāzu-s-Salāṭīn, (English) Fasc. 1-5 @ 1/- ... ...

Shah Alam Nama, Fasc. 1-2 ... ...

Tadhkira-i-Khushnavisān ... ...

Tabaquat-i-Nasiri (English), Fasc. 1-14 and Index @ 1/- each ...

Tārīkh-i-Firūz Shāhi of Ẓiyāu-d-din Barni, Fasc. 1-7 @ /10/ each ...

Tārīkh-i-Firūzshāhi, of Shams-i-Sirāj Aif, Fasc. 1-6 @ /10/ each ...

Ten Ancient Arabic Poems, Fasc. 1-2 @ 1/8/ each ... ...

The Mabani 'L Lughat: A Grammar of the Turki Language in Persian

Tuzuk-i-Jahāngiri (Eng.) Fasc. 1 @ 1/- ... .

Wis o Rāmīn, Fasc. 1-5 @ /10/ each ... .

Ẓafarnāmah, Vol. I, Fasc. 1-9, Vol. II, Fasc. 1-8 @ /10/ each ...

ASIATIC SOCIETY'S PUBLICATIONS.

1 ASIATIC RESEARCHES. Vol. XX @ 10/- each ... ...

2. PROCEEDINGS of the Asiatic Society from 1875 to 1899 (1900 to 1904 are out of stock) @ /8/ per No.

3 JOURNAL of the Asiatic Society for 1875 (7), 1876 (7), 1877 (8), 1878 (8), 1879 (7), 1880 (8), 1881 (7), 1882 (6), 1883 (5), 1884 (6), 1885 (6), 1886 (8), 1887 (7), 1888 (7), 1889 (10), 1890 (11), 1891 (7), 1892 (8), 1893 (11), 1894 (8), 1895 (7), 1896 (8), 1897 (8), 1898 (8), 1899 (8), 1900 (7), 1901 (7), 1902 (9), 1903 (8), 1904 (16) @ 1/8 per No. to Members and @ 2/- per No. to Non-Members.

N.B.—*The figures enclosed in brackets give the number of Nos. in each ye*

4 Journal and Proceedings, N.S., (Nos. 1–4 of 1905 are out of stock), 1905—1912 @ 1-8 per No. to Members and Rs. 2 per No. to Non-Members.

5. Memoirs, Vol. I (21), Vol. II (11), Vol. III (6), Vol. IV (1). Price varies from number to number. Discount of 25°/₀ to Members.

6. Centenary Review of the Researches of the Society from 1784-1883

7. Catalogue of the Library of the Asiatic Society, Bengal, 1910 ...

8 Moore and Hewitson's Descriptions of New Indian Lepidoptera, Parts I-III, with 8 coloured Plates, 4to, @ 6/- each ... ...

9 Kaçmīraçabdāmṛta, Parts I and II @ 1/8/ ... ...

10. Persian Translation of Haji Baba of Ispahan, by Haji Shaikh Ahmad-i-Kirmasi, and edited with notes ... ...

N.B.—All Cheques, Money Orders, &c., must be made payable to the "T Asiatic Society," only.

Digitized by Google

1-1-14.

BIBLIOTHECA INDICA:
A
COLLECTION OF ORIENTAL WORKS

PUBLISHED BY THE
ASIATIC SOCIETY OF BENGAL
NEW SERIES, No. 1415.

बौधायन श्रौतसूत्रम् ।

BAUDHĀYANA ŚRAUTA SŪTRAM

A SANSKRIT WORK ON THE VEDIC LITERATURE.

MAIN/UGC-B

LIBRARY
JUN 22 1919
UNIVERSITY OF CALIFORNIA

EDITED BY
DR. W. CALAND OF UTRECHT.

VOL. III. FASCICULUS II.

CALCUTTA:
PRINTED AT THE BAPTIST MISSION PRESS,
AND PUBLISHED BY THE
ASIATIC SOCIETY, 1, PARK STREET.
1917.

Digitized by Google

LIST OF BOOKS FOR SALE

AT THE LIBRARY OF THE

ASIATIC SOCIETY OF BENGA

No. 1, PARK STREET, CALCUTTA,

AND OBTAINABLE FROM

The Society's Agent—

MR. BERNARD QUARITCH, 11, *Grafton Street, New Bond Street, Lo*

*Complete copies of those works marked with an asterisk * cannot be suppli of the Fasciculi being out of stock.*

BIBLIOTHECA INDICA.

Sanskrit Series.

Açvavaidyaka, Fasc. 1–5 @ -/10/- each .. .. ..
Advaita Brahma Siddhi (Text), Fasc. 1–4 @ -/10/- each .. ..
Advaitachintā Kaustubha, Fasc. 1–3 @ -/10/- each .. ..
Agni Purana (Text), Fasc. 1–14 @ -/10/- each .. .. ..
*Aitareya Aranyaka of Rig-Veda (Text), 2–4 @ -/10/- each .. ..
Aitarēya Brāhmaṇa, Vol. I, Fasc. 1–5; Vol. II, Fasc. 1–5; Vol. III, Fasc. 1–5, Vol. IV, Fasc. 1–8 @ -/1 /- each.. .. ..
Aitareyalocana .. ..
Amarakosha, Fasc. 1–2 .. ..
*Anu Bhasyam (Text), Fasc. 2–5 @ -/10/- each .. .. ..
Anumana Didhiti Prasarini, Fasc. 1–3 @ -/10/- each .. ..
*Aphorisms of Sandilya (English), Fasc. 1 @ 1/- .. ..
Aṣṭasāhasrikā Prajñāpāramitā, Fasc. 1–6 @ -/10/- each .. ..
Atharvana Upanishads (Text), Fasc. 1–5 @ -/10/- each .. ..
Ātmatattvaviveka, Fasc. 1–2 .. ..
Avadāna Kalpalatā (Sans. and Tibetan), Vol. I, Fasc. 1–11, Vol. II, Fasc. 1–11 @ 1/- each .. ..
Bālam Bhaṭṭī, Vol. I, Fasc. 1–2, Vol. II, Fasc. 1 @ -/10/- each ..
Bardic and Historical Survey of Rajputana. (A Descriptive Catalogue of Bardic and Historical Manuscripts. Sec. I, Prose Chronicles, Part I) .. ..
Bauddhastotrasangraha .. ..
Baudhāyana Śrauta Sūtra, Fasc. 1–3; Vol. II, Fasc. 1–5; Vol. III, Fasc. 1 @ -/10/- each .. ..
Bhamati (Text), Fasc. 1–8 @ - 10/- each .. .. ..
Bhasavritty .. ..
Bhāṭṭa Dīpikā, Vol. I, Fasc. 1–6; Vol. II, Fasc. 1–2 @ -/10/- each ..
Bodhicaryāvatāra of Çāntideva, Fasc. 1–7 @ -10- each .. ..
Brahma Sutras (English), Fasc. 1 @ 1/- .. .. ..
Bṛhaddevatā, Fasc. 1–4 @ -/10/- each .. .. ..
Bṛhaddharma Purāṇa, Fasc. 1–6 @ -/10/- each .. .. ..
Çatadūṣaṇī, Fasc. 1–2 @ -/10/- each .. ..
Catalogue of Sanskrit Books and MSS., Fasc. 1–4 @ 2/- each ..
*Çatapatha Brāhmaṇa, Vol. I, Fasc. 1–7; Vol. II, Fasc. 1–5; Vol. III, Fasc. 1–7; Vol. V, Fasc. 1–5 @ -/10/- each ..
Ditto Vol. VI, Fasc. 1–3 @ 1/4/- each .. ..
Ditto Vol. VII, Fasc. 1–5 @ -/10/- .. ..
Ditto Vol. IX, Fasc. 1–2 .. .. ..
Çatasahasrikā-prajñāpāramitā, Part I, Fasc. 1–18, Part II, Fasc. 1 @ -/10/- each .. ..
*Caturvarga Chintāmaṇi, Vol. II, Fasc. 1–25; Vol. III, Part I, Fasc. 1–18, Part II, Fasc. 1–10; Vol. IV, Fasc. 1–6 @ -/10/- eac
Ditto Vol. IV, Fasc. 7 @ 1/4/- each .. ..
Ditto Vol. IV, Fasc. 8–10 @ -/10/- .. ..
*Chandah Sutra (Text), Fasc. 1–3 @ -/10/- each .. .. ..
Çlokavartika (English), Fasc. 1–7 @ 1/4/- each .. .. ..
*Çranta Sutra of Apastamba (Text), Fasc. 2–17 @ -/10/- each ..
*Çranta Sutra of Çānkhāyana, Vol. I, Fasc. 1–7; Vol. II, Fasc. 1–4; Vol. III, Fasc. 1–4; Vol. IV, Fasc. 1 @ -/10/- each .. ..
Cri Bhashyam (Text), Fasc. 1–3 @ -/10/- each .. .. ..

Digitized by Google

पृथगेवैतत्[१]संधिं संमृशेदिति शालीकिर्''थैनमेकाकृत्यैव संमृशेदित्यौपमन्यवः ' ॥

कृष्णाजिनस्याभिसर्पण इति ॥ सूत्रं शालीकेर्''थो ह स्माह बौधायनः पूर्वं वोत्तरं वार्धं विसृजीयात्तृतीयेन मध्यदेशं गच्छेदिति ' ॥

आख्यातं ग्रन्थिकरणम् ' ॥

अथास्य प्रदक्षिणमुष्णीषेण शिरो वेष्टयतीति ॥ सूत्रं बौधायनस्य '' वाससैव संप्रच्छन्नः स्यादिति शालीकिः ' ॥

कृष्णविषाणायाः प्रदान इति ॥ सूत्रं शालीकेर्''थो ह स्माह बौधायनः समस्तेनैवास्मै मन्त्रेण कृष्णविषाणां प्रयच्छेत्तू'ष्णीं वेदान्तमुद्धन्यात्तू'ष्णीं केशान्तमुपस्पृशेदिति ' ॥

दण्डस्य प्रदान इति ॥ सूत्रमाचार्ययोर्''थो ह स्माहौपमन्यवः समस्तेनैवास्मै मन्त्रेण दण्डं प्रयच्छेत्सूपस्था देवः वनस्पतिरूर्ध्वो[२] मा पाह्योदृच इति[३] ' ॥

अथैनं यजमानस्यान्वारम्भं वाचयतीति ॥ सूत्रं शालीकेर्''थो ह स्माह बौधायनो मष्टिकरणाः खल्वेते मन्त्रा दृष्टा भवन्ति

---

१ Thus corrected in accordance with the vivaraṇa, which runs [illegible] (*sic*) पृथगेतरेण ; प्रथमेनैवैतं G. (sec. m.) ; पृथगेनैवैतं Bu ; पृथगेवैन H D C.

२ Thus Be ; before ऊर्ध्वो H ins. इति ; D U G C abbreviate the mantra, giving only the first and the last words.

३ Thus Be ; C D U G H Bu add यजमानः प्रतितिष्ठतीति, apparently reminiscence of the text proper (Vol. I., 161, 12).

Digitized by Google

स्वाहा यज्ञं मनसा स्वाहा द्यावापृथिवीभ्याꣳ स्वाहोरोरन्त-
रिक्षात्स्वाहा यज्ञं वातादारभ इति ॥

I. 161. 13. मुष्टिकरण इति ॥ वाचोयमसंयुक्तं[१] मुष्टिकरणꣳ स्यादि-
बौधायन " आवान्तरदीक्षायै विसर्गादिति शालीकिः ॥

I. 161. 14. आवेदन इति ॥ यथावर्णमावेदयेदिति बौधायनो
ऽदीक्षिष्टायं ब्राह्मण इत्येव ब्रूयादिति शालीकिः ॥

I. 162. 14. व्रतदोहन इति ॥ सूचं बौधायनस्त्वौपरदारिकमेव
यजमानव्रतꣳ स्यादिति शालीकिः ॥ ६ ॥

I. 163. 8. यजुषोरनुषङ्ग इति ॥ आ कृष्णाजिनप्राशनादनुषज्येत-
मिति[३] बौधायन " आवान्तरदीक्षायै विसर्गादिति शाली-
किर् दक्षिणानयनादित्यौपमन्यवः[४] ॥

I. 163. 11. संवेशनयजुषीति[५] ॥ सूचꣳ शालीकेर्यो ह स्माह बौध-
यनो ऽग्ने त्वꣳ सु जागृहीत्येव संविशेद्भूतयिष्यञ्जप आपामेहे-
धियं मनामह इति ॥

I. 164. 12. अथ सनीहाराग्प्रहिणोतीति[६] ॥ अन्यथोपशृद्रयोरि-

---

१ Thus G (sec. m.) and the vivaraṇa; वाचोयमसं॰ Be H (pr. m.); वाचंयमसं॰ D C; वाचोयम्यसं॰ Bu.

२ ॰पराहा U D H Be C; cp. XXI. 19 init.

३ ॰यजेतामिति H Bu G U D C; ॰यजेदिति Be.

४ Thus Be, the vivaraṇa and Keś.; दक्षिणाहरणादि॰ H (sec. m.) U D C; दक्षिणावहनादि॰ G (pr. m.).

५ यजुषोरिति H, यजुषी इति U D C.

६ सनौ॰ Be; सनि॰ Bu G; संनि॰ D U C; सञ्च॰ H.

Digitized by Google

बौधायनो ऽन्वचोपैरिति[1] शालीकिः सर्वान्यज्ञाविहुय इत्यौपमन्यवः ॥

संवेशनयजुःप्रवृह्ययजुःप्रयाणयजुःपर्यायणयजुरिति[2] ॥ अनुपङ्क्तीष्वेतानि[3] भवन्तीति बौधायनः सकृत्कृतान्येवैतान्यह्ने[4] वा रात्रये वा स्युरिति शालीकिः ॥

दक्षिणानां प्रतिग्रह[5] इति ॥ स ह स्माह बौधायनो यस्य कस्य च जातस्य मन्त्रेण प्रतिगृह्णीयात्पुनरप्यागतं[6] मन्त्रेणैव प्रतिगृह्णीयादित्यथो ह स्माह शालीकिर्यस्य कस्य च जातस्य मन्त्रेण प्रतिगृह्णीयात्प्रतिगृहीतमेव तस्य स्यादागन्त्ववास्यात[7] ऊर्ध्वं मन्त्रेणैव प्रतिगृह्णीयादिति ॥

अविज्ञातार्थे दान[8] इति ॥ पूर्वः कल्पो बौधायनस्योत्तरः शालीकेः ॥

---

१ न्वचानप्रेरिति U D C H; on the instrumental cp. Speyer Sanskrit Syntax § 107.

२ •पर्याय• instead of •परियाय• all.

३ Thus Bu U G (sec. m.) and the vivaraṇa; अनुपंक्तीष्वेतानि G (pr. m.); अनुपंक्तास्वेतानि Be; D C corrupt.

४ सकृत् twice U Be.

५ प्रतिग्रह G and U (sec. m.) and the vivaraṇa; •ग्रहण G (pr. m.) U (sec. m.) and the other MSS.

६ Thus H G (pr. m.) U D C; •गामतं G (sec. m.); •यांमतं Bu; ग्यागतं Be.

७ Reading, meaning and interpunction doubtful; स्यादागंतवेवास्यात G (sec. m.); स्यादांमलेवास्यात G (pr. m.); स्यादागवेवास्यात Be; स्यादंयलेवास्यात U; •दंयलेवास्यात D; स्यादंताले• C.

८ विदान U D Be C; the passage is missing in H.

I. 165. 10. प्रयाण इति ॥ पूर्वः कल्पः शालीकेरुत्तरो बौधायनस्य

I. 165. 12. अथ यद्येनं यान्तं प्रतनवेलोपाधिगच्छतीति ॥ मथित्वाग्नि
ष्विहृत्य प्रतपेदिति बौधायन ॥ उत्तरतोऽरणी निधा[१]
दक्षिणतः परिश्रित्य प्रतपेदिति शालीकिः ॥

I. 165 14. अथ यद्यपर्याणा अप उपाधिगच्छतीति ॥ सूत्रं शाली
केरन्यो ह स्माह बौधायनो यद्येवापर्याणा अप उपाधिगच्छे
त्स्वपेद्देवीरापो अपां नपाद्य ऊर्मिर्हविष्य इन्द्रियावान्म
त्तमस्तान्वो[२] गच्छामीति । सौम्योष्टावनाद्दीत । तेषामेक
मुदकान्ते निदध्यात्तं वो मावक्रमिषमित्यथान्यं छ्वंसयन्नु
वेदच्छिन्नं तन्तुमित्यथान्यमुदकान्ते निदध्यात्पृथिव्या
गेषमिति । सं वा गाहते सं वा तरति । सेतुमेव कृत्वा
तीति ब्राह्मणम् ॥ १० ॥ चतुर्थः ॥

I. 166. 11. रोहिते चर्मणीति ॥ सूत्रं बौधायनस्यान्यरोहितं स्यादि
शालीकिः ॥

I. 166. 12. अंशुपयणे हिरण्य इति ॥ कुर्यादिति बौधायनो ॥
कुर्यादिति शालीकिः ॥

I. 167. 2. देवयजनस्याध्यवसान इति ॥ सूत्रमाचार्ययोरन्यो
स्माहौपमन्यवः पुरस्तादेवैतन्निविष्यगतेषु देवयजनमध्यव
दिज्ञायते सा वा इयं सर्वैव वेदिरिति ॥

I. 167. 4. III. 20. 9. (?). व्याख्यातं प्रायणीयस्य निर्वपणम् ॥

---

१ After निधाय U Be ins. तथा, C D तथ ।

२ गान्वो G D C Be, the vivaraṇa; गंवो H U; Bu defecti

Digitized by Google

प्रायणीयस्य श्रपण इति ॥ पयसि श्रपयेदिति बौधायनो ऽप्स्विति शालीकिः ॥

प्रायणीयस्यासादन इति ॥ पङ्क्तोचासादयेदिति बौधायनस्तूष्णीमिति शालीकिः ॥

प्रायणीयस्य चर्याया इति ॥ उपांशु चरेदिति बौधायन उच्चैरिति शालीकिः ॥

आदित्यस्योदीक्षण इति ॥ हिरण्यमन्तर्धायादित्यमुदीक्षये-दिति बौधायनो ऽनन्तर्धायैवेति शालीकिः ॥

सोमक्रयण्या अतिवित्सन इति ॥ सदसः काले ऽतिवित्सये-दिति बौधायन उपरवकाल इति शालीकिः ॥

सोमक्रयण्यै पदस्यानुनिक्रमण[1] इति ॥ अतिक्रान्तायै पृष्ठ्याकालं दक्षिणस्य पूर्वपदस्यानुनिक्रामेदिति[1] बौधायनो महावेदिमेवातिक्रान्तायै यस्यैव[2] कस्य[2] चेति[2] शालीकिः ॥

सोमक्रयण्यै पदस्य परिलेखन इति ॥ स्फ्यं शालीके-र्चो ह स्माह बौधायन स्फ्येन च कृष्णविषाणया च पदं परिलिखेदन्यतरतः कृष्णविषाणा स्यादिति ॥ ११ ॥

उदपात्रस्योपनिनयन इति ॥ प्रदक्षिणमुपनिनयेदिति बौधायनो यथोपपादमिति शालीकिः ॥

---

१ °नुनिक्र° all (C D only °नुनिष्क्र°); this reading (given by Tr) is also to be restored VI. 12: 169. 16, see TS. VI. 1. 8. 1.

२ यस्यैव कस्यै चेति Bu G. (sec. m.); यस्यै कस्य चेति Be; यकस्य चेति C H D G (pr. m.).

Digitized by Google

I. 171. 1. राज्ञ उपस्थान इति ॥ स ह स्माह बौधायन उपव
नामेयमोषधिर्भवति[1] ' तां दूतीं कुर्वीतैष ते गायत्रो भा
इति मे सोमाय ब्रूतादेष ते त्रैष्टुभो भाग इति मे सोमा
ब्रूतादेष ते जागतो भाग इति मे सोमाय ब्रूताच्छन्दोमाना
साम्राज्यं गच्छेति मे सोमाय ब्रूतादित्य"थो[2] ह स्मा
शालीकिः प्रत्यक्षः खल्वयꣳ राजा भवति प्रत्यक्षवदेवोपति
तैष ते गायत्रो भाग एष ते त्रैष्टुभो भाग एष ते जागत
भागश्छन्दोमानाꣳ साम्राज्यं गच्छेति ' ॥

I. 171. 9. राज्ञो मान इति ॥ सूत्रं बौधायनस्य " निगदेनैवैताम्
पञ्च कृत्वो मिमीतेति[3] शालीकिः ' ॥

I. 172. 5. राज्ञः पणन[4] इति ॥ सूत्रं बौधायनस्य " गवा
क्रीणानीत्येव ब्रूयादिति शालीकिः ' ॥

I. 172. 8. अजाया उपनिग्रहण इति ॥ सूत्रं बौधायनस्यानुपनि
गृह्णन्नेवाजां मन्त्रं जपेदिति शालीकिः ' ॥

I. 197. 1. मैत्रावरुणस्य दण्डप्रदान इति ॥ सूत्रमाचार्ययोर्"वो

---

१ Instead of उपवा नामेय॰ H C D U read उपस्थाना ना
वोषधिर्भ॰ G (sec. m.), वोषधीर्भ॰ H Bu C D U (pr. m.); वोष
Be U (sec. m.).

२ The mantras are given partially abbreviated in the MS

३ मिमीते इति or मिमीत इति MSS.

४ Thus Bu G (sec. m.) and the vivaraṇa; पण Be H C I
(pr. m.).

आहौपमन्यवः सोमविक्रयिणमुदकुम्भेनोपहत्यैव[1] मैत्रावरुणाय दण्डं प्रयच्छेदिति । ॥

राज्ञः प्रत्यानहन इति ॥ अन्तर्लोम्ना चर्मणा प्रत्यानह्येदिति बौधायन ॥ ऊर्ध्वग्रीवेण बहिर्लोम्नेति शालीकिः । ॥

ईषाया अन्वारम्भ इति ॥ सूत्रं बौधायनस्थानन्वारभ्यैवेषां प्रत्यङ् द्रवन्मन्त्रं जपेदिति शालीकिः । ॥

राज्ञः परिवहण इति ॥ प्रदक्षिणं परिवहेदिति बौधायनो ॥ यथोपपादमिति शालीकिः । ॥

राज्ञः प्रत्युपस्थान इति ॥ स ह स्माह बौधायनो ग्नि-भिश्चारणीभ्यां च राजासन्द्या च राजानं प्रत्युपतिष्ठेतेत्य॥थो ह स्माह शालीकिरन्येन च कर्णगृहीतेनोल्मुकेन[2] च[2] राजासन्द्या च राजानं प्रत्युपतिष्ठेत । सो ऽग्नीषोमीयः पशुः स्थालोहः[3] स्थात्तूपरः स्थात्साण्डः स्थाच्छ्मश्रुमान्स्थात्पीवान्स्थादिति[4] विज्ञायते । ॥ १२ ॥

---

१ सोमक्रयणम् instead of सोमविक्रयिणम् G (sec. m.); सोमक्रयिणम् U D H C.—॰भेनोपहृत्या॰ Bu G (sec. m.); ॰भेनोपप्रहृत्या॰ C D H (sec. m.). ॰भेनोमहृत्या H (pr. m.).

२ ॰हीतेन सोमयोन U D H C; ॰हीतेन सोल्मुकेन G.

३ लोहः Bu G and the vivaraṇa; सोमशः H D U C.

४ श्मश्रुमान् G Bu, viv., fails in H U; D Be are defective.—पीवान् Bu U (pr. m.), viv.; पीनवान् Be U (sec. m.); पीतनवा H; D C defective; fails in G (sec. m., first hand invisible). N. B. nomin. पीवान् as Mahābh., not पीवा ।

Digitized by Google

आतिथ्यस्य बर्हिषः संस्कार इति ॥ असिदादानप्रभृती-न्मन्त्रान्साधयेदिति बौधायनः " ध्रुवप्रभृतीनिति शालीकिः " संभरणप्रभृतीनित्यौपमन्यवः ' ॥

I. 174. 12. आतिथ्यस्य निर्वपण इति ॥ सूत्रं शालीकेर्"चो ह स्माह बौधायन उभौ विमुच्य राजानं प्रपाद्यातिथ्यं निर्वपेदिति ' ॥

I. 175. 14. राज्ञः परिचर्याया इति ॥ सूत्रं शालिकेर्"चो ह स्माह बौधायन उच्चैव राजानं परिचरेद्दूचार्घ्यमुपनिगृह्णीयादिति ' ॥

I. 175. 17. अर्हण इति ॥ यथागतमर्हयेदिति बौधायनो " राजान-मर्हयित्वर्त्विजो[१] ऽर्हयेदिति शालीकिः ' ॥

I. 175. 19. आतिथ्यस्य करण इति ॥ पुरोडाशस्य गौस्य स्यातामिति बौधायनः " पुरोडाश एवेति शालीकिः ' ॥

I. 176. 10. आज्यग्रहाणां ग्रहण इति ॥ चतुर्गृहीतानि वा पञ्च-गृहीतानि वा स्युरिति बौधायनः " पञ्चगृहीतान्येवेति शालीकिः ' ॥

I. 176. 18. आतिथ्यस्यासादन इति ॥ चतुर्होत्रासादयेदिति बौधा-यनस्"तूष्णीमिति शालीकिः ' ॥

I. 176. 19. आतिथ्यस्य चर्याया इति ॥ उपांशु चरेदिति बौधा-यन " उच्चैरिति शालीकिः ' ॥

I. 177. 19. तानूनप्त्रस्य भक्षण इति ॥ सूत्रं शालीकेर्"चो ह स्माह

---

१ यथागतम० instead of राजानम० G U; C D and H a
defective.

Digitized by Google

बौधायनो निगुप्तमेवैनं[1] निधापयित्वा व्रतकाले व्रतेन सह भक्षयेदिति । ॥

औपसदस्य बर्हिषः संस्कार इति ॥ अभिदादानप्रभृतीन्मन्त्रान्साधयेदिति बौधायनः ॥ शुल्वप्रभृतीनिति शालीकिः ॥ संभरणप्रभृतीनित्यौपमन्यवः । ॥

उपसदां मन्त्रामन्त्र इति ॥ मन्त्रवत्यः स्युरिति बौधायन॥ स्तूष्णीका इति शालीकिर्यत्पर्याव्यं[2] तत्तूष्णीकं[2] स्यादथेतरन्मन्त्रवत्स्यादित्यौपमन्यवः[2] ॥ सर्वमेवैतत्कर्मावृता कुर्यादित्यौपमन्यवीपुत्रः । ॥

आहुतीनां होम इति ॥ सूत्रं बौधायनस्य ॥ प्राचीरेवैता आहुतीः संस्थापयेदिति शालीकिः । ॥

उपसदां[3] होम इति ॥ सूत्रं बौधायनस्य ॥ नत्याक्रम्यैवोपसदो[4] जुहुयादिति शालीकिः । ॥

स्रुचां परिप्लावन इति ॥ अहोरात्रं परिप्लवीरन्निति बौधायनो ॥ ऽपरेवेति शालीकिः ॥ कर्मणःकर्मणः प्रयुञ्जीतेत्यौपमन्यवः । ॥ १३ ॥ पञ्चमः ॥

---

1 निगुप्त° Bu G and U (sec. m.), the viv.; गुगुप्त° Be U (pr. m.) ... (pr. m.) H D C.

2 Thus G (sec. m.) only, the vivaraṇa of the text proper, and Keś. (पर्याव्यम् = प्रधानम् Viv.). All the other MSS. are more or less corrupt.

3 Thus Bu H G D C; °सदो Be U.

4 Thus Bu H U G (pr. m.) D C; °सदां G (sec. m.), °सदं Be.

Digitized by Google

I. 182. 13. स्रुवयजुषो हरण इति ॥ सूत्रं बौधायनस्यौपरवकाला-
दप्याग्नीध्रो हरेदिति शालीकिः ' ॥

I. 183. 1; III. 57. 4. आख्यातं चात्वालस्य परिलेखनम् ॥

III. 57. 7. आख्यातं लोकाग्नीनाꣳ हरणम् ॥

I. 215. 5 (?). स्फ्यविघनानामुपस्थान इति ॥ सूत्रꣳ शालीकेर्वो ह ९
स्माह बौधायनोऽग्निवत्युत्तरं परिग्राहं परिगृह्य योयुपिला
तिर्यञ्चꣳ स्फ्यꣳ स्तब्ध्वा यजमानमुत्करे स्फ्यविघनानुपस्था-
पयेदिति ' ॥

अग्नीषोमीयस्य बर्हिषः सꣳस्कार इति ॥ असिदादान-
प्रभृतीन्मन्त्रान्साधयेदिति बौधायनः '' शुल्बप्रभृतीनिति १०
शालीकिः '' संभरणप्रभृतीनित्यौपमन्यवः ' ॥

अग्नीषोमीयस्य पशोरनुसंप्रख्याया इति ॥ अनुसंप्रजेदिति
बौधायनो '' नानुसंप्रजेदिति शालीकिः ' ॥

I. 183. 18. इध्माबर्हिषोरुपसादन[1] इति ॥ सूत्रमाचार्ययोर्वो ह
स्माहौपमन्यवोऽप्येवास्मा आग्नीध्रायेध्माबर्हिराहरेत्तदादाय ११
प्राङ्क्यात्कुशहस्तस्य[2] पृष्ठ्याकाशं प्राङ् तृणान्गच्छेदिति[3] ' ॥

---

१ °रुपकल्पन the vivaraṇa.

२ Thus G (sec. m.) Be; प्रांदीयात्कुश° Bu: प्राक्त्यात्कुश° C'; प्राक्त्यात्कुश° U G (pr. m.); प्राक्त्यात्कु° H; प्राक्त्यकुश° D C.

३ Thus G C U C'; गोगच्छे° Bu; खावगच्छे° H; वृत्तावगच्छे° Be, तृणांनागच्छे° D.

Digitized by Google

हविर्धानयोरभ्यावर्तन[1] इति ॥ काष्ठानि वा तृणानि वान्तर्धायाभ्यावर्तयेदिति[1] बौधायनो '' ऽनन्तर्धायैवेति[2] शालीकिः ' ॥

हविर्धानयोः प्रोक्षण इति ॥ तूष्णीं संस्कृताभिरद्भिः प्रोक्षेदिति बौधायनः '' कमण्डलुभिरिति[3] शालीकिः ' ॥

वर्त्मनोरभिहोम इति ॥ सूत्रमौपमन्यवीपुत्रस्यापो ह स्माह बौधायनो दक्षिणस्य हविर्धानस्य वर्तनिमभिजुहुयात्सर्वां[4] अक्षधुर उपाञ्ज्यात्सर्वतस्य परिमृशेदित्य''थो ह स्माह शालीकिः सर्वा एव वर्तनीरभिजुहुयात्सर्वा अक्षधुर उपाञ्ज्यात्सर्वतस्य परिमृशेदिति ' ॥

मेथ्योर्निहनन इति ॥ स ह स्माह बौधायनो दक्षिणस्य हविर्धानस्य दक्षिणतो मेथीं निहन्यादुत्तरस्य दक्षिणत इति '' दक्षिणतश्चोत्तरतश्चेति शालीकि''र्मध्य इत्यौपमन्यवः ' ॥

दार्वाह्वनां परिषीवण[5] इति ॥ सर्वान्दार्वाह्वनमन्त्रेण परिषीव्येदिति बौधायनः '' पूर्वौपूर्वाविति शालीकि''र्दक्षिणौदक्षिणावित्यौपमन्यवः ' ॥ १४ ॥

---

१ •आवपर्तये• G (sec. m.) and the vivaraṇa; this might, after all, be the correct reading also VI. 24: 184. 3. (आभ्यववर्तयन्ति).

२ Thus G (sec. m.) C′; •नान्तर्धा• the other MSS.

३ कमंडलूभि• G (sec. m.), cp. Pāṇ. IV. 1. 71.

४ Emended; वर्तन्यामभि• H Be G U D C′; वर्तन्या अभि Bu.

५ Thus C D H G (pr. m.); •पिवण Be C′; •वयण Bu G (sec. m.) and the vivaraṇa.

Digitized by Google

I. 189. 1. औदुम्बर्या अभिहोम इति ॥ सूत्रमौपमन्यवीपुत्रस्तो ह स्माह बौधायन एवमेव जुहुदन्तर्धाय[1] हिरण्यमभिजुहुयादित्युभयोरेव विशाखयोर्हिरण्ये[2] निधायाभिजुहुयादिति शालीकिः ॥

I. 197. 8. वसतीवरीणां ग्रहण इति ॥ सूत्रं शालीकेर्वो ह स्माह बौधायन उभयतःशुक्रा आदित्यवतीर्वसतीवरीर्गृह्णीयात्ताः शुक्रास्ताभिराप्याययेत्ताभिरभिषुणुयादिति[3] धिष्णियाद्युप वसतीवरीर्गृह्णीयादित्यौपमन्यवः ॥

I. 190. 18. उपरवाणां परिलेखन इति ॥ त्रिस्त्रिरेकैकं परिलिखेदिति बौधायनः सकृत्सकृदिति शालीकिः ॥

I. 191. 7. उपरवपांसूनां हरण इति ॥ सूत्रं शालीकेर्वो ह स्माह बौधायनो यजमानस्याधस्पदमुपोप्योत्करं इडोपस्पृशेदिति[4] ॥

I. 192. 1. उपरवाणां प्रोक्षण इति ॥ त्रिस्त्रिरेकैकं प्रोक्षेदिति बौधायनः सकृत्सकृदिति शालीकिस्तस्मिन्नपो ऽवनयेत्तस्मिन्यवान्प्रस्कन्दयेदित्येवमेवैतत्त्रिविधं कर्म कुर्यादित्यौपमन्यवः सर्वमेवैतत्कर्मावृता कुर्यादित्यौपमन्यवीपुत्रः ॥

---

१ °हृदन्तर्धाय G (sec. m.); rightly?

२ Thus Bu G, the viv. and Keś; °ण्यं Be H U D C C′.

३ °ताभिरेवाप्या° G (sec. m.).

४ Thus Bu C′ U C D G (sec. m.); डलो° H; ड्लो° Be.

Digitized by Google

धिष्णियानां निवपन इति ॥ स ह स्माह बौधायनो वेद्यन्त आग्नीध्रीयं निवपेद्वेद्यन्ते मार्जालीयं। धिष्णियान्युपोदीचीनसꣳस्थतां[१] कुर्यादित्य॥थो[१] ह स्माह शालीकिरन्तर्वेद्याग्नीध्रीयं निवपेदन्तर्वेदि मार्जालीयं। धिष्णियान्युप्य[१]न[१]पोदीचीनसꣳस्थतां[१] कुर्यादिति। ॥

वेद्यै स्तरण इति ॥ सूत्रꣳ शालीके॥र्थो ह स्माह बौधायनस्त्रयो दक्षिणतस्त्रय उत्तरतो मध्ये सप्तमः पृष्ठ्याकालं[२] प्राञ्च स्तृणन्तो गच्छेयुरिति॥ पुरस्तादेवैनां प्रत्यञ्च स्तृणन्तोऽभ्यवक्रामेयुरित्यौपमन्यवः। ॥

अग्नीषोमीयस्याज्यानां ग्रहणे सादन इति ॥ सूत्रं बौधायनस्य॥ पत्नीशाल एवाग्नीषोमीयस्याज्यानि गृहीत्वात्तानि खरे सादयेदिति शालिकिः। ॥

समन्वानयन इति ॥ सूत्रं बौधायनस्य॥ नाद्रियेतेति शालीकिः। ॥

---

१ Thus here and l. 5 G (sec. m.); °संस्थां Be C′; °संस्थितां Bu °संस्थिताङ्कुर्या° U H D C G (pr. m.).—Instead of धिष्णियान् H U D here and l. 4 धिष्णियं।

२ Thus C D C′ G (sec. m.) Bu; न्युप्यानयोपोचीनसं° Be; न्युपोदीचीनसं° H.

३ Between पृष्ठ्या and कालं Bu G and U (sec. m.) ins. °स्तरण°, Be C D C′ Keś. omit the word; in H this dvaidham is missing.—°कालं U G D Keś. and cp. XXI. 14: 94. 16; °काले Bu C′, कालें Be.

Digitized by Google

I. 212. 14. यजमानस्योपवेशन इति ॥ यथा सदस्येवमुपविशेदिति बौधायनो ॥ यथा दर्शपूर्णमासयोरेवमिति शालीकिः' ॥

I. 212. 19. अथोद्गात्रे वा प्रस्तोत्रे वा बर्हिषी प्रयच्छतीति ॥ पूर्वः कल्पो बौधायनस्योत्तरः शालीकेः' ॥

I. 212. 19. स्रक्त्यामयोरुपस्तरणमसि मिथुनस्य प्रजात्या इति वा तूष्णीं वेति । पूर्वः कल्पः शालीकेरुत्तरो बौधायनस्य ॥

I. 213. 5. पञ्चम्यां प्रस्तुतायां वाचयतीति ॥ सूचं बौधायनस्य ॥ यस्यामेव कस्यां चिद्वाचयेदिति शालीकिः' ॥

I. 213. 16. सप्तहोतुर्होम इति ॥ सूचं बौधायनस्यानुसवनमेव सप्तहोतारं जुहुयादिति शालीकिः' ॥

I 213. 19. धिष्ण्यानां विहरण इति ॥ स ह स्माह बौधायन आग्नीध्रीयादङ्गारानादाय[1] तत आग्नीध्रीये प्रस्कन्दयेद्यथानुपूर्वमितरेषु' धिष्ण्येष्वनुविहृत्योदीचीनसंस्थतां[2] कुर्यादित्यथो ह स्माह शालीकिराग्नीध्रीयादङ्गारानादाय तत आग्नीध्रीये प्रस्कन्दयेद्यथानुपूर्वमितरेषु' धिष्ण्येष्वनुविहृत्य न चोदीचीनसंस्थतां[3] कुर्यादिति' ॥

---

१ ०ग्नीध्र० and ०ग्नीध्रीय० the MSS. promiscue; the vivaraṇa and Keś. always ०ग्नीध्रीय० ।

२ Thus G D C U (pr. m.) संस्थितान् U (sec. m.), ०संस्थानां H; ०संस्थां Bu; Be C′ defective.

३ Thus U (sec. m.) D C C′; ०संस्थातं G (sec. m.); ०संस्थानं Bu; संस्थानां H Be U (pr. m.) G (pr. m.).

Digitized by Google

1. धिष्ण्यानां व्याघारण इति ॥ पूर्वः कल्पो बौधायनस्योत्तरः शालीकेः ॥

स्वरग्रनस्योत्पादन इति ॥ यूपः स्वरग्रनमुत्पादयेदिति बौधायनः ॥ पशुरिति शालीकिस् ॥ तृणमित्यौपमन्यवो ॥ देवतेत्यौपमन्यवीपुत्रः । ॥ १८ ॥ सप्तमः ॥

6. सर्पण इति ॥ सूत्रं बौधायनस्य । औपरदारिक[1] एव यजमानः स्यादिति शालीकिः । ॥

तार्तीयसवनिकेषूक्थ्यविग्रहेष्विति ॥ स ह स्माह बौधायनः प्रसर्पेदेव तार्तीयसवनिकेभ्य उक्थ्यविग्रहेभ्यः षोडशिने[2] रात्रिपर्यायेभ्यो राथंतराय संधय इति ॥ अथो ह स्माह शालीकिस्तृतीयसवनातिवृद्धिरेवैषा[3] भवति । यदेव तृतीयसवने प्रसर्पेत्तत्प्रसृप्तमेव[4] तेषाꣳ[4] स्यादिति ॥ प्रातःसवन एव सर्वेभ्यः सवनेभ्यः संप्रसर्पेदित्यौपमन्यवः । ॥

13. आमिक्षार्थे मन्त्रामन्त्र इति ॥ मन्त्रवती च स्यात्सर्वाणि च सवनान्यनुसमियादिति[5] बौधायनस् ॥ तूष्णीका च स्यात्स-

---

१ ०परादारि० U D Ċ H Be C′; cp. XXI. 9: 86. 7.

२ ०शिने G Be; ०शिनि Bu H U C D C′.

३ ०वातिवृद्धि० Be G (sec. m.); ०वांतवृद्धि० C D U; ०नंतवृद्धि० H G (pr. m.); वाभिवृद्धि० Bu C′ and the vivaraṇa.

४ ०मेवैतेषु G (sec. m.); ०मेषां H.

५ ०नुसमीया० MSS.

Digitized by Google

वींषि च सवनान्यनुषमियादिति[1] शालीकिर्मन्त्रवती च स्यात्प्रातःसवने चैवैषा स्यादित्यौपमन्यवः ॥

I. 217. 11. सवनीयानामुद्वासन इति ॥ सूत्रं बौधायनस्य नानापात्रीष्वेव[2] सवनीयानुद्वासयेदिति शालीकिः ॥

I. 217. 16. प्रातः प्रातःसावस्येति ॥ सूत्रं बौधायनस्य प्रातःसावस्येत्येव ब्रूयादिति शालीकिः ॥

सवनीयानामनुसंहरण इति ॥ अनुसंहरेदिति बौधायनो नानुसंहरेदिति शालीकिः ॥

I. 218 8. प्रतिनिर्ग्राह्याणां[3] ग्रहण इति ॥ सूत्रं बौधायनस्य द्विदेवत्येभ्य एव प्रतिनिर्ग्राह्यान्निगृह्णीयादिति[4] शालीकिः ॥

I. 218. 13. आघार इति ॥ सूत्रं बौधायनस्य ग्रहादेवैतमाघारमाघारयेदिति शालीकिर्द्रोणकलशात्परिप्लुना पात्रेणेत्यौपमन्यवो यजुरेवैतज्जपेन्नैतमाघारमाघारयेदित्याञ्जीगविः[5] ॥

---

१ ॰नुषमीया॰ MSS.

२ Thus Be C′ and the viv., ॰पात्रेषु Bu G U D C Keś. ; ॰पात्रीष्वेव

३ ॰निर्ग्रा Be C′ H U D C G (pr. m.); निग्रा॰ Bu G (sec. m.) a… the vivaraṇa.

४ निर्ग्राह्यान्निगृह्णी॰ G (sec. m.) but the *r* effaced, Be H C D U; ॰निग्राह्यांनिगृह्णी॰ Bu; ॰नर्ग्राह्यान्निगृह्णी॰ C′; ॰निग्राह्याग्निगृह्णी॰ Keś.: read probably (with Keś.) ॰निर्ग्राह्याग्निगृह्णीयादिति ।

५ Thus G (sec m.); ॰न्नैवमाघार॰ Be H U C D; ॰न्नेजमाघारये॰ C′ ॰न्नैतमाघारये॰ G (pr. m.) Keś.; ॰रेवयदेवैतमाघारमा॰ Bu.

Digitized by Google

संस्रावस्यापिधान इति ॥ सूत्रं बौधायनस्य " यावानेव[१] संस्रावः स्यात्तमपिदध्यादिति शालीकिः ' ॥

चमसानामायातन[२] इति ॥ अग्रेण स्रुचः[३] प्राच[३] आयातयेदिति बौधायनो " जघनेन स्रुच उदीच आयातयेदिति शालीकिः ' ॥ १९ ॥

पश्वोः संधान इति ॥ अरत्नी च पशू च संदध्यातामिति बौधायनो " पशावेवेति शालीकिः ' ॥

शुक्रवतो मन्थिवत इति ॥ सूत्रं बौधायनस्य " मन्थिवत इत्येव ब्रूयादिति शालीकिः ' ॥

मन्थिसंस्रावस्य होम इति ॥ सूत्रꣳ शालीकेर्"थो ह स्माह बौधायन आहवनीयादेवोदीचो ऽङ्गारान्निर्वर्त्य तेषु मन्थिनः[४] संस्रावं[४] जुहुयादिति ' ॥

होतृकचमसानाꣳ[५] होम इति ॥ स ह स्माह बौधायनः शुक्रामन्थिभ्यामेनान्सह संजुहुयाद्विरभ्युन्नीतानित्य"थो ह स्माह शालीकिर्नैनाञ्छुक्रामन्थिभ्याꣳ सह संजुहुयाद्विरेवाभ्युन्नीतानिति ' ॥

---

१ यावानथ U D C; यावामेव Be; याषानथ H.

२ °मायतन MSS. and the vivaraṇa.

३ Thus G (sec. m.) Bu; स्रुच उदीच H U C; स्रुच only, Be D C′.

४ मंथिसंस्रा° G (sec. m.).

५ Thus G (sec. m.) and C′ only; होतृचमसानां the other MSS. and the vivaraṇa.

Digitized by Google

I. 223. 17. द्विदेवत्यानां भक्षण इति ॥ सूत्रं बौधायनस्य ॥ प्राक्पूपनिधाद्ध्रं द्विदेवत्यान्भक्षयेदिति शालीकि॥दीर्घभक्षेवैनान्भक्षयेदित्यौपमन्यवः[१]।॥

I. 224. 7. अथैतानि द्विदेवत्यपात्राण्यतिरिक्तानि करोतीति ॥ सूत्रं बौधायनस्य ॥ सोमेनैवैतान्यतिरिक्तानि स्युरिति शालीकिः।॥

I. 224 10. अथैनानि दक्षिणस्य हविर्धानस्योत्तरस्यां वर्तन्यां सादयतीति ॥ सूत्रं बौधायनस्याधस्तादेवैनान्युपवृत्यस्य[२] सादयेदिति[१] शालीकिः।॥

वाचि वाचं दधामीति[३] वा तूष्णीं वेति ॥ पूर्वः कल्पो बौधायनस्योत्तरः शालीकेः।॥

होतृचमसानां प्रतिभक्षण इति ॥ प्रतिभक्षयेदिति बौधायनो ॥ न प्रतिभक्षयेदिति शालीकिः।॥

I. 229. 6. प्रत्यभिमर्शन इति ॥ सूत्रम् शालीकेर्॥चो ह स्माह बौधायनो भक्षयन्नेव[४] भक्षाणां पारे प्रत्यभिमृशेतेति।॥

---

१ दीर्घभक्षवेनै॰ MSS., only C′ भक्षवैना॰; cp. XXV. 20.

२ Uncertain; ॰न्युपवृत्यस्यासाद॰ G (sec. m.); all the other MSS. ॰नुपवृत्य सासाद॰ The vivaraṇa: अधस्तादेव दक्षिणस्योपवृत्यस्य श्रोत्र- समीपे; could उपवृत्यस्य be the correct reading?

३ Thus Bu C D G U C′; दधामीति H Be. In the text proper no vikalpa of the kind here mentioned, is found; neither is the yajus to be traced in any text. Perhaps this dvaidham is to be taken together with the foregoing one.

४ Thus G (sec. m.) and the vivaraṇa; भक्षंनेव Bu; भक्षयेन Be U D G (pr. m.) C C′.

Digitized by Google

ऐन्द्राग्नस्य ग्रहण इति ॥ सूत्रमाचार्ययोर्॥ भो ह स्माह दीर्घवात्स्यो मुख्येनैनं पात्रेण गृह्णीयादिति । ॥

नाराशंसानामनुप्रकम्पन इति ॥ अनुप्रकम्पयेरन्निति बौधायनो ॥ नानुप्रकम्पयेरन्निति शालीकिर्॥ नैनानुपोक्षेरंश्चनेत्यौपमन्यवः । ॥ २० ॥ अष्टमः ॥

माध्यंदिनीये ऽभिषव इति ॥ नवकृत्वोनवकृत्वो ऽभिषुत्य निग्राभमुपेयुरिति बौधायनो ॥ ऽपरिमितमिति शालीकिः । ॥[1]

मरुत्वतीययोर्ग्रहण इति ॥ सूत्रं शालीकेर्॥ भो ह स्माह बौधायन उपरिष्टादेवाग्रयणाद्गृह्णीयादिति । शालङ्कायनो होष भवतीति । ॥

अष्टम्यां प्रस्तुतायां वाचयतीति ॥ सूत्रं बौधायनस्य ॥ यस्यामेव कस्यां चिद्वाचयेदिति शालीकिः । ॥

दधिघर्मस्य ग्रहण इति ॥ सूत्रं बौधायनस्य । ग्रीष्म एवं गृह्णीयादिति शालीकिः ॥ परिश्रित्योभयतः शान्तिं कृत्वा-ग्रीष्म एवेत्यौपमन्यवः । ॥

दधिघर्मस्य चर्याया इति ॥ उपांशु चरेदिति बौधायन ॥ उच्चैरिति शालीकिः । ॥

दधिघर्मस्य भक्षण इति ॥ सूत्रं शालीकेर्॥ भो ह स्माह

---

१ After this dvaidham G U D H C ins. प्रातःसवन एवैषा स्यादित्यौपमन्यवः सवनीयानुद्रावन इति सूत्रं बौ० स्म नानापात्रेष्वेव सवनीयानुद्रावयेदिति शा० कि: । cp. XXI. 19: 104. 3.

Digitized by Google

बौधायनो ऽवभ्रभक्षणेनैवेतरे भक्षयेयुर्यजमान एव प्रत्यक्षं भक्षयेदरण्ये[१] ऽनुवाक्येन[१] मन्त्रेणेति ॥

I. 240. 20. दक्षिणानामत्याकरण[२] इति ॥ सूत्रं शालीकेश्चो ह स्माह बौधायन एकामेव दक्षिणां दक्षिणापथेनात्याकुर्यादिते-तरा[३] यथावकाशं गच्छेयुरिति ॥

संचर[४] इति ॥ नीतासु दक्षिणासु[५] यथार्थं संचरेरन्निति बौधायनो नासंस्थिते सोमे ऽध्वर्युः प्रत्यङ् सदो ऽतीयादिति शालीकिः ॥

I. 259 7. कृष्णविषाणायाः प्रासन इति ॥ सूत्रं बौधायनस्य नीतासु दक्षिणासु चात्वाले कृष्णविषाणां प्रास्येदिति शालीकिः ॥

I. 241. 9. आत्रेयस्य संवदन[६] इति ॥ सूत्रं शालीकेश्चो ह स्माह बौधायनस्त्रिरेवाव्यतिषजन्पृच्छेत्क[७] आत्रेयः क आत्रेय इति ॥ २१ ॥

---

१ Thus G U (pr. m.), viv., Keś.; ॰क्येनानुवा॰ Be U (sec. m.); ॰क्येनवा॰ Bu H D C, ॰क्येवानुवा॰ C′.

२ Thus Be C′ Bu and the vivaraṇa (one copy) ॰त्याक्रमय U H G D C and the vivaraṇa (another copy).

३ ॰कुर्याद॰ Be Bu C′; ॰क्रामयेद॰ U H G D C.

४ संचरच Bu.

५ Between दक्षिणासु and यथार्थं the MSS. exc. Be C′ and Keś; ins. चात्वाले, clearly interpolated from the following dvaidham.

६ Thus Bu C′ G (sec. m.), the vivaraṇa; संवादन Be H C U D G (pr. m.).

७ Thus Bu Be G C′; त्रिरेवव्यति॰ H U D C.

Digitized by Google

दक्षिणानां दान इति ॥ स ह स्माह बौधायनो महर्त्विग्भ्य एना[1] दद्यान्न होत्रकाननुसंचरेरन्निति " न च होत्रकाननुसंचरेरन्न च सदस्याय दद्यान्न ह्येतस्यानुख्या विज्ञायत इति शालीकिः ' ॥

मरुत्वतीययोर्होम इति ॥ स ह स्माह बौधायनो यमेवाध्वर्युर्जुहुयात्स वषट्कृतानुवषट्कृतः स्यादथेतरो ऽननुवषट्कृतः[2] स्यादित्यु'भावेवाननुवषट्कृतौ[3] स्यातामिति शालीकिरु"भावेवानुवषट्कृतौ स्यातामित्यौपमन्यवः ' ॥

तृतीयस्य मरुत्वतीयस्य ग्रहण इति ॥ सूत्रमाचार्ययोर्"यो ह स्माह दीर्घवात्स्यो मुख्येनैनं पात्रेण गृह्णीयादिति " ॥

नाराशंसानामनुप्रकम्पन इति ॥ अनुप्रकम्पयेरन्निति बौधायनो " नानुप्रकम्पयेरन्निति शालीकि"र्नैनानुपोषच्छेरंस्नेत्यौपमन्यवः ' ॥

सौम्यस्य मन्त्रामन्त्र इति ॥ मन्त्रवान्स्यादिति बौधायन"स्तूष्णीक इति शालीकिः " सौम्य एव मन्त्रवान्स्यात्तूष्णीक एककपाल इत्यौपमन्यवः ' ॥

तार्तीयसवनिके ऽभिषव इति ॥ सूत्रं बौधायनस्य " यदाप्याययति तेनांशुमदित्येव ब्रूयादिति शालीकिः ' ॥

---

१ एना Bu G; एनां H Be C′ U D C; एव the vivaraṇa.

२ Emended; नानुव॰ or नानव॰ MSS.

३ Thus Be C′ U; ॰भावेवानु॰ H D C; ॰भावेव वषट्कृतानुवषट्कृतौ G (sec. m.).

I. 245. 19. आदित्यग्रहस्य ग्रहण इति ॥ सूत्रꣳ शालीकेर्''चो ह स्माह बौधायनः पुरस्तादेनमभिषवाद्गृह्णीयात्तूष्णीꣳ[1] घृतात्स्रुवमवनयेदिति ' ॥

I. 246. 12. आदित्यग्रहस्योद्वाहनन इति ॥ अर्धर्चश उद्वाहन्यादिति बौधायन '' ऋचर्चेति शालीकिः ' ॥

I. 247. 11. मैत्रावरुणस्य श्रयण[2] आशिरो[2] ऽवनयन[2] इति ॥ सूत्रꣳ शालीकेर्''चो ह स्माह बौधायनः श्रीणीयादेव मैत्रावरुणं पयसाशिरमवनयेदिति ' ॥

I. 248. 5. नवम्यां प्रस्तुतायां वाचयतीति ॥ सूत्रं बौधायनस्य ' यस्यामेव कस्यांचिद्वाचयेदिति शालीकिः ' ॥

I. 249. 17, 250. 6. होत्रकाणाꣳ[3] संतर्पण इति ॥ सूत्रꣳ शालीकेर्''चो ह स्माह बौधायनो ऽनुसवनमेव होत्राः[4] संतर्पयेदिति '' पञ्च प्रातःसवने षण्माध्यंदिने सवने सप्त तृतीयसवन इत्यौपमन्यवः ' ॥

I. 251. 1. औपासनेष्विति ॥ स ह स्माह बौधायनो ऽनुसंख्यौपासनाननुमन्त्रयेत चमसेभ्यश्च पुरोडाशशकलानुपास्येच्च दैव

---

१ पुरस्तादेवाभि॰ G (sec. m.); पुरस्तादेवमभि॰ D C H.

२ Emended; श्रयणाशिरोवनयन Bu G and the vivaraṇa; श्रयणाशिरयोरवनयन H U D C; श्रयणीशिरोवनयन Be C′.

३ होत्रकाणां Be G (sec. m.) C′, the vivaraṇa; होत्राणां Bu; होत्र- G (pr. m.); होत्रणां H U D C.

४ होत्राः Bu G (sec. m.); होत्रकान् Be C′ H U D C G (pr. m.).

Digitized by Google

षड्ढोतारं व्याचक्षीतेत्य॥यो ह स्माह शालीकिरनुसंख्यायैवौपासनाननुमन्त्रयेत पार्श्वतश्चमसेभ्यः[1] पुरोडाशशकलानुपास्येदुपरिष्टाच्च षड्ढोतारं व्याचक्षीतेति । ॥ २२ ॥ नवमः ॥

सावित्रस्य ग्रहणे सादन इति ॥ सूत्रं बौधायनस्य । सजुष्टं परिमृज्य सादयेदिति शालीकिः । ॥

तदन्यतो-मदं प्रतिगृह्णातीति ॥ सूत्रं बौधायनस्य॥ मदामोद[2] इवेत्येव[3] प्रतिगृह्णीयादिति शालीकिः । ॥

नाराशंसानामनुप्रकम्पन इति ॥ अनुप्रकम्पयेरन्निति बौधायनो । नानुप्रकम्पयेरन्निति शालीकि॥र्नैनानुपोक्षेरंश्चनेत्यौपमन्यवः । ॥

सौम्यस्य चर्याया इति ॥ उपांशु चरेदिति बौधायन॥ उच्चैरिति शालीकिः । ॥

सौम्यस्य परीज्याया इति ॥ स ह स्माह बौधायनो यदि चैव[2] समस्तौ यदि च विहृतावग्नाविष्णू उपांश्वेव स्याता-मिति॥ समस्तावुपांशु विहृतावुच्चैरिति शालीकिः । ॥

तार्तीयसवनिकानां धिष्णियानां विहरण इति ॥ सूत्रं शालीके॥र्यो ह स्माह बौधायनश्चरित्वा वाचरित्वा वा सौम्येनाङ्गारैश्चतुर्धिष्णियान्विहरेदिति । ॥

---

1 पार्श्वतः om. Be C'.

2 मोदइवेत्येव G (sec. m.) only.

3 इव om. Be Bu D U (pr. m.).

Digitized by Google

I. 254. 6. पात्नीवतस्य भक्षण इति ॥ सूत्रं बौधायनस्य दध्ना वा पयसा वा पात्नीवतꣳ श्रीणीयादिति शालीकिर्धिष्णियानां व्याघारणशेषेणाज्येन पात्नीवतꣳ श्रीणीयादित्यौपमन्यवः ॥

I. 254. 14. पत्न्या उद्गानयन इति ॥ सूत्रं बौधायनस्याचैवासीतापो-च्छिष्टीयाश्च इति शालीकिः ॥

I. 255. 14. तदुभयतो-मदं[1] प्रतिगृणातीति ॥ सूत्रं बौधायनस्य मोदा मोद[2] इवेत्येव[2] प्रतिगृणीयादिति शालीकिः ॥

I. 255. 17. ध्रुवस्य प्रच्यावन इति ॥ सूत्रं बौधायनस्य सर्व एवैषो ऽवनयनमन्त्रः स्यादिति शालीकिः ॥ २३ ॥

I. 256. 14. चमसानामायातन[3] इति ॥ पूर्वः कल्पो बौधायनस्योत्तरः शालीकेः ॥

I. 256. 15. तेषु त्रीꣳस्त्रीꣳश्च दूर्वास्तम्बान्प्रास्यत्येकैकं च दर्भपुञ्जील-मिति ॥ सूत्रं बौधायनस्याद्भिरेवैते दर्भाः[4] स्युरिति शालीकिः ॥

I. 256. 21. औपयजेष्विति ॥ सूत्रꣳ शालीकेरन्यो ह स्माह बौधायन आग्नीध्रादग्नीषोमीयस्य[5] च सवनीयस्य चाङ्गारानाहरे-च्छामित्राच्चैवावहणे वपाया इति ॥

---

१ ॰मदं all, against VIII, 15 : 255. 14.

२ मोदेवेत्य॰ G D C C′.

३ ॰मायतन all exc. C.

४ ? दर्भा Bu C′, दर्भाः G (sec. m.), दर्भा Be, H U D C omit the word altogether. The vivaraṇa has: अद्भिरेव बाध्यो दर्भशीषा इति।

५ Thus, and comp. vol. I l.c., H G U (pr. m.) C D, the vivaraṇa; ॰ग्नीध्रीया॰ Be C′ U (sec. m.) Bu Keś.

Digitized by Google

मिन्द्राहुत्योर्होम इति ॥ सूत्रमाचार्ययोर्''चो ह स्माहौपमन्यवः पुरस्ताच्चिन्द्राहुती जुहुयाच्चिन्द्राहुती हुत्वा हारियोजनं ग्रहं गृह्णीयादिति ' ॥

शाकलैश्चर्याया इति ॥ सूत्रꣳ शालीकेर्''चो ह स्माह बौधायनो यावन्त्येनाꣳसि कृतान्यभिविजानीयात्तेषामवयजनमधीत्यभ्यादध्यादिति ' ॥

आदित्यस्योपस्थान इति ॥ सूत्रं बौधायनस्याहवनीयमेवैतेन यजुषोपतिष्ठेरन्निति शालीकिः ' ॥

कृष्णविषाणायाः प्रासन इति ॥ पूर्वः कल्पो बौधायनस्योत्तरः शालीकेः ॥

अवभृथ इति ॥ सूत्रमाचार्ययोर्''चो ह स्माहौपमन्यवो ऽप्स्वेवैनꣳ[1] स्थण्डिले कुम्भमिश्रं प्ररोप्य स्थालीभिश्च यावोवायव्येन चावभृथमवेयादिति ' ॥

यावोवायव्यस्य प्रप्लावन इति ॥ सूत्रं बौधायनस्य'' प्रचाल्योदाहरेयुरिति शालीकिः ' ॥ प्रचाल्यैवैता स्थालीरुदाहरेयुस्तान्येतानि देविकाहवीꣳषि अपयेयुरिति बौधायनः'' प्रप्लावयेयुरेवेति[2] शालीकिः ' ॥ २५ ॥

कृष्णाजिनस्य प्रप्लावन इति ॥ सूत्रꣳ शालीकेर्''चो ह स्माह बौधायनः कृष्णाजिनमुन्मुच्याद्भिरभ्युक्ष्य पुनाय वान्ते-

---

१ चैवैनं Bu G D C; चैवैन H U (pr. m.); चैवैतत् U (sec. m.), तत् Be C′.

२ एव only in G (sec. m.).

Digitized by Google

वासिने वा दद्यात्स्रुचोपधानं[1] वैनत्कुर्वीतापि वैनेन पुनर्दीक्षितापि वैनेन पुनर्यजेतेति । ॥

I. 262. 6. उदयनीयस्य बर्हिषः सꣳस्कार इति ॥ असिदादानप्रभृतीन्मन्त्रान्साधयेदिति बौधायनः ॥ शुल्बप्रभृतीनिति शालीकिः ॥ संभरणप्रभृतीनित्यौपमन्यवः । ॥

ib. उदयनीयस्य निर्वपण इति ॥ स्रुचि वावधाय[2] चामकाषꣳ स्थाल्यां[3] वा सचामकाषायां[4] निर्वपेदिति[4] ॥ पूर्वः कल्पो बौधायनस्योत्तरः शालीकेः । ॥

I. 262. 9. उदयनीयस्य श्रपण इति ॥ पयसि श्रपयेदिति बौधायनो ॥ ऽप्स्विति शालीकिः । ॥

चरोरनुपरिहरण इति ॥ अनुपरिहरेदिति बौधायनो ॥ नानुपरिहरेदिति शालीकिः । ॥

उदयनीयस्यासादन इति ॥ यजुषासादयेदिति बौधायनस्तू॥ष्णीमिति शालीकिः । ॥

उदयनीयस्य चर्याया इति ॥ सूत्रं बौधायनस्याहवनीय ॥ एवोदयनीयेन चरेदिति शालीकिः । ॥

I. 263. 2, 5. अनूबन्ध्यस्य[5] करण इति ॥ सूत्रं बौधायनस्य ॥ मैत्रावरु-

---

१ स्रुचोपधानं all the MSS.; स्रुवोप॰ Keś.; स्रुचां निधानार्थे स्मृतिः the vivaraṇa.

२ वांतर्धाय H D G U C C′.

३ स्थाल्या G (sec. m.) Be C′.

४ ॰काषयेति G (sec. m.); ॰काषयैदिति C′.

५ अनू॰ G (sec. m.) C′ and the vivaraṇa; अनु॰ the other MSS.

Digitized by Google

आमिक्षया[१] यजेतेति शालीकिरथो ″ ह स्माहौपमन्यवो ऽजं[२] पशुमप्यालभेतै′कादशप्रयाजं त्वेव तन्त्रꣳ संतिष्ठापयिषेदिति ′ ॥

वपानां परिहोम इति ॥ तां तां परिजुहुयादिति बौधायन ″ आदितस्त्वन्ततस्त्वेति शालीकिः ′ ॥

हृदयशूलानामुद्वासन इति ॥ एकैकश उद्वासयेदिति बौधायनः ″ सर्वान्सहेति[३] शालीकिः ′ ॥ २५ ॥

उत्खण[४] इति ॥ सर्वाङ्गोपशूनुत्खणयेदिति बौधायनो ″ ऽन्यचर्मभाक्च वशायै चेति शालीकिः ′ ॥

5. आमिक्षायै मन्त्रामन्त्र इति ॥ मन्त्रवती स्यादिति बौधायनस्तू″ष्णीकेति शालीकिः ′ ॥ .

6. मैत्रावरुणे परिधिष्विति ॥ सूचꣳ शालीकेर″थो ह स्माह बौधायनः पूर्वे स्थूणे सदसो वा हविर्धानयोर्वा भित्त्वा वैदलकान्परिधीन्मैत्रावरुणे[५] कुर्यादिति ′ ॥

---

१ वा ins. G.

२ अ Bu.

३ सर्वाणि instead of सर्वान् some of the MSS.; some omit सह।

४ Thus G (sec. m.) and the vivaraṇa of our passage, उत्किर a copy of the vivaraṇa of the text proper; उत्कुर Bu; उत्करण Be C′ U (sec. m.); उत्खनन C D H U (pr. m.) G (pr. m.) and a copy of the vivaraṇa of the text proper.

५ वै(बै)दलकान् all (and thus also the Karmānta, XXV. 26), exc. G (sec. m.), which has वैदलान्।

Digitized by Google

II. 4. 12. द्यावापृथिव्योः समीक्षण इति ॥ उभे षट्कृत्वः समीक्षेतेति बौधायनस्त्रिरेवेति शालीकिः ॥ प्राच्यां दिशि संधिमीक्षमाण एतं मन्त्रं जपेदित्यौपमन्यवः ॥

II. 4. 16. अपो रशने अभ्यवहरन्त्यपि वाद्भिरभ्युक्ष्य मुञ्चन्त इति ॥ पूर्वः कल्पो बौधायनस्योत्तरः शालीकेः ॥ १ ॥

II. 5. 11. उखानां करण इति ॥ स ह स्माह बौधायनोऽषाढामप्येतस्यै याजुष्यै पादमात्रीं[1] कुर्याद्यावन्मात्रीं चाद्यामिष्टकां मृत्तिकायामपिसृजेदेवमस्य[2] सर्वोऽग्निर्याजुषो भवतीत्यर्थकामेवोखां मन्त्रेण कुर्यात्तूष्णीमितरे इति शालीकिः ॥

सर्वासु भिक्षासु प्रत्यय इति ॥ स ह स्माह बौधायनः ससावित्रं मन्त्रकर्माभ्यावर्तयेदिति[3] ॥ यदन्यत्सावित्रेभ्य इति शालीकिः ॥

II. 6. 4. अथादत्त एकविंशतिं वृष्णो अश्वस्य शकृत्पिण्डानभिमग्निं पचनमिति ॥ सूत्रं बौधायनस्य ॥ यस्यैव कस्य चाश्वस्याददीतेति शालीकिः ॥

II. 6. 5. उखानां धूपन इति ॥ सूत्रं बौधायनस्यापरिमितैर्मन्त्रैर्धूपयेदिति शालीकिः ॥

---

१ पाद° B U and G (sec. m.) Bu; पद° Be C′ U and G (pr. m.).

२ °इष्टकायामृत्ति° B G (sec. m.); the vivaraṇa: सर्वेष्टकायाचां (चा the Ms.) मृदि, the Ms.: सर्वेष्टकायायां (या the Ms.) मृत्तिकायाम्।

३ Thus G, U (sec. m.) and the Ms.; मंत्रकर्मा° B; मंत्रकर्मभ्यावर्त° Bu; कर्माभ्यावर्त° Be C′.

Digitized by Google

उखानां प्रवृञ्जन इति ॥ सूत्रं बौधायनस्य" कामेवोखां मन्त्रेण प्रवृञ्ज्यात्तूष्णीमितरे इति शालीकिः ' ॥

ताः प्राचीर्वोदीचीर्वायातयतीति ॥ पूर्वः कल्पो बौधायनस्योत्तरः शालीकेः ' ॥

पचन इति ॥ स ह स्माह बौधायन उखा ऋषभाण्डमण्ड-लोष्टका बार्हस्पत्यं महावीरं लोकंपृणा इत्येतद्गार्हपत्यात्पचे-द्वंधेतरद्ग्रामाग्नेरिति " यत्किं चेष्टकोक्तं ग्रामाग्निना तत्पचेद्-विहृतं गार्हपत्यादिति शालीकिः ' ॥

पञ्चशीर्षाणां करण इति ॥ प्रत्यक्षाणि वा मार्त्तिकानि वा स्युरिति बौधायनः " प्रत्यक्षाण्येवेति शालीकि"र्हिरण्मया-नीत्यौपमन्यवो " वायव्यग्निरपि वैताम्मन्त्राञ्जिगदेदित्यौप-मन्यवीपुत्रः ' ॥

6. चिरपक्वैः पर्णशाखया परिकर्षतीति ॥ सूत्रं बौधाय-नस्यानुपरिकीर्यैव साधान्यमगाथाभिः परिगायेदिति शालीकिः ' ॥

7. आधार इति ॥ उभाभ्यां मन्त्राभ्यामेतमाधारमाधार-येदिति बौधायनो " हिरण्यगर्भः समवर्तताग्र इत्येतयैवैतमा-धारमाधारयेदिति शालीकिः ' ॥ २ ॥ प्रथमः ॥

अनिष्टप्रथमसोमस्याध्वरदीक्षाहुतीनाꣳ होम इति ॥ अध्वरदीक्षाहुतीर्हुत्वाग्निका जुहुयादिति बौधायन " आग्निका एवेति शालीकिः ' ॥

2. वैराजीषु दीक्षास्विति ॥ स ह स्माह बौधायनो मासं-

Digitized by Google

वत्सरꣳ सौम्यैराग्नीध्रीयाः कुर्वीत । काममꣳ संवत्सरꣳ सौम्यैराग्नीध्रीयाः कुर्वीत । संवत्सरं वा अप्येकाहिकं[1] कुर्वीतैकाहिकस्यैवाग्निरिति[2] शालीकिः । ॥

II. 13. 7. काम्यस्यान्ववधान[3] इति ॥ जाते काम्यमन्ववदध्यादिति[4] बौधायनः ॥ पुरस्तादेवेति शालीकिः । ॥

II. 13. 18. औदुम्बरीणाꣳ समिधामभ्याधान इति ॥ सूचं शालीके-र्॥चो ह स्माह बौधायन एकामेव समिधं पञ्चर्चेनाभ्याद-ध्यात्तदेव राचोघ्नꣳ स्यादिति । ॥

II. 15. 14. अन्नपतीयायै समिधोऽभ्याधान इति ॥ सूचꣳ शालीके-र्॥चो ह स्माह बौधायनोऽन्नपतीयां प्रतिसमेधनीयां वैष्ण-वीमित्येता अभ्यादध्यादिति । ॥

II. 16. 2. वात्सप्रविष्णुक्रमयोः संनिपात इति ॥ अहरहः संनिपातये-दिति बौधायन ॥ आदितस्त्वान्ततश्चेति शालीकिः । ॥

उख्य उद्वाते प्रायश्चित्तकरण[5] इति ॥ स ह स्माह बौधा-

---

१ Thus G U C′ and the Ms.; अप्येकाहिकं B Bu; अप्येकाहं Be.

२ According to the vivaraṇa of this dvaidham, given in Ms., the इति, which is missing in all the MSS., ought to be inserted before ऐकाहिकस्यै॰ ।

३ Thus U (sec. m.) C′; ॰स्याभ्याधान the other MSS.

४ Thus B Be C′ Bu G (sec. m.) U (sec. m.); ॰न्वादध्या॰ G (pr. m.) and the Ms.

५ प्रायश्चित्तस्य करण G (sec. m.) U.

Digitized by Google

यन्तः प्रवृज्य परिहायार्काङ्कतिभिरभिजुहुयादथैतरत्कर्मावृता कुर्यादित्यु॥चो ह स्माह शालीकिः प्रवृज्य परिहायार्काङ्कतिभिरभिजुहुयान्न चैतरत्कर्मावृता कुर्यादिति । ॥

प्रयाण इति ॥ स ह स्माह बौधायन उभयेन प्रयायाद्ध्वरिकेण चाग्निकेन चेत्य॥ग्निकेनैवेति शालीकिः । ॥

अथ यद्यपर्याणा[१] अप उपाधिगच्छतीति ॥ सूत्रꣳ शालीकेरु॥चो ह स्माह बौधायनो यद्येवापर्याणा अप उपाधिगच्छेत्तद्भस्म प्रवेशयेन्न च विगर्भां तां कुर्याद्यावन्मात्रं चादाय प्रत्यवदध्यात्प्रसव्य भस्मना योनिमित्यथेतरत्स्थालीषु वा यतेषु वानुनिधापयेदिति । ॥

देवयजनस्याध्यवसान इति ॥ स ह स्माह बौधायन उभयेनाध्यवस्येदाध्वरिकेण चाग्निकेन चेत्य॥ग्निकेनैवेति शालीकिः । ॥ ३ ॥

संभाराणां निवपन इति ॥ सूत्रꣳ शालीकेरु॥चो ह स्माह बौधायनो भस्म चैवोषाꣳश्च मन्त्रेण निवपेत्तू।ष्णीमितरौ संभाराविति । ॥

गार्हपत्यचिताविति ॥ सूत्रꣳ शालीकेरु॥चो ह स्माह बौधायनोऽग्निग्रहणꣳ स्वयंचितिꣳ श्वेतकृष्णयोरभिमर्शनमधिद्रवणमवद्रवणमिति[२] सर्वमेवैतत्कर्मावृता कुर्यादिति । ॥

---

१ Thus here and infra all.

२ Thus Be C′ and cp. XXIII. 15; •धिद्रवणावद्रवण इति B •धिद्रवणावद्रवणे इति U (sec. m.) Ms; •धिद्रवणमिति Bu G U (pr. m.).

Digitized by Google

साहस्रं चिन्वीत प्रथमं चिन्वानः पञ्चचितीकं चेति ॥ स ह स्माह बौधायनः समाप्यैतांश्चतुर्थं चिन्वानो जानुदघ्नं चात ऊर्ध्वं प्रत्याददीत पञ्चचितीकं चेत्यथो ह स्माह शालीकिः समाप्यैतांश्चतुर्थं चिन्वानो ग्रीवदघ्नं चैवात ऊर्ध्वं प्रत्याददीतैकचितीकं चेति ॥

वात्सप्रविष्णुक्रमयोः संनिपात इति ॥ स ह स्माह बौधायनो यद्यह[1] वात्सप्रमुपवसथे संपद्येत वात्सप्रेणोपस्थाय संनिवपेताथ यदि विष्णुक्रमा उपवसथे संपद्येरन्विष्णुक्रमैः क्रमित्वा वात्सप्रेणोपस्थाय संनिवापेन प्रक्रामेदित्यथो ह स्माह शालीकिर्यद्यह[2] वात्सप्रमुपवसथे संपद्येत वात्सप्रेणोपस्थाय श्वो भूते संनिवपेताथ यदि विष्णुक्रमा उपवसथे संपद्येरन्विष्णुक्रमैः क्रमित्वा वात्सप्रेणोपस्थाय श्वो भूते संनिवापेनैव प्रक्रामेदिति ॥

II. 20. 3. तस्यामन्यचावेक्षमाणो दधिद्रप्साग्प्रास्यत्यमुं ते शुचि दधामीति वा तूष्णीं वेति ॥ पूर्वः कल्पो बौधायनस्योत्तरः शालीकेः ॥

II. 20. 5. अथैनां सिकताभिः पूरयित्वा दर्भोपरिष्टात्संप्रच्छाद्येति ॥ सूत्रं बौधायनस्य सिकताभिरेवैनां[2] पूरयित्वोत्तरे शालाखण्डे निदध्यादिति शालीकिः ॥

---

१ Thus Bu U G (sec. m.) Be C′; यद्दिह B G (pr. m.); यदि Ms.
२ ॰रेवैनां Bu Be C′; ॰रेवैनाः B G U Ms.

Digitized by Google

ग्निकस्याददान इति ॥ मन्त्रेणाददीतेति बौधायनस्तूष्णी-मिति शालीकिः ॥

नैर्ऋतीनामुपस्थान[1] इति ॥ कुर्वीतात्र तयादेवतमुद्दोहवे[2] इति[2] बौधायनो न कुर्वीतेति शालीकिः ॥

उदपात्रस्योपनिनयन इति ॥ प्रदक्षिणमुपनिनयेदिति बौधायनो यथोपपादमिति शालीकिः ॥

गार्हपत्यस्योपस्थान इति । सूत्रं बौधायनस्त्वाहवनीय-मेवैतेन यजुषोपतिष्ठेरन्निति शालीकिः ॥ ४ ॥ द्वितीयः ॥

स्तम्बयजुषो हरण इति ॥ सूत्रं बौधायनस्त्वपरवकाशा-दप्यग्नीध्रो हरेदिति शालीकिः ॥

आख्यातं चात्वालस्य परिलेखनम् ॥

आख्यातं लोकाग्नीनाꣳ हरणम् ॥

आख्यातꣳ स्पयविघनानामुपस्थानम् ॥

कार्ष्णाजिनीनामुपमोचन इति ॥ पूर्वः कल्पो बौधायन-
५ स्योत्तरः शालीकेः ॥

वज्रिणीनामुपधान इति ॥ सूत्रꣳ शालीकेरथो ह स्माह बौधायनो ऽग्रेण यूपावटीयꣳ शङ्कुं तिष्ठन्धनुरधिज्यं कृत्वा प्राञ्चं बाणं प्रविध्येत्तमनुद्रुत्याश्मानमुपदध्यादेवं दक्षिणत एवं पश्चादेवमुत्तरत इति ॥

---

१ ०मुपधान most of the MSS.

२ Thus B G; ०द्दोहवे इति Bu; ०दोहस इति Be; ०द्दोहसाविति U sec. m.), Ms.; C′ uncertain.

Digitized by Google

II. 23. 2. ऐन्द्रिया[१] उपधाय इति ॥ सूत्रं बौधायनस्य " पुच्छ ऐन्द्रीमुपदध्यादिति शालीकिः ' ॥

II. 23. 8. उदपात्रस्योपनिनय इति ॥ प्रदक्षिणमुपनिनयेदिति बौधायनो " यथोपपादमिति शालीकिः ' ॥

ib. दर्भस्तम्बस्योपधाय इति ॥ वाक्या समुद्र उपदध्यादिति वा तूष्णीं वेति ॥ पूर्वः कल्पो बौधायनस्योत्तरः शालीकेः ' ॥

II. 23. 10. दूर्वेष्टकाया उपधाय इति ॥ स ह स्माह बौधायनो दूर्वया वा सहोपदध्याद्दूर्वा[२] वैवेति[२] " मन्त्रदूर्वैवैषा स्यादिति शालीकिः ' ॥

II. 23. 13. औदुम्बरं युगलाङ्गलमिति ॥ सूत्रं बौधायनस्य " दक्षिणत उत्तरतो वा प्रत्यञ्चमेवैनत्कुर्यादिति[३] शालीकिः ॥ पुरस्ता एवैतद्युगलाङ्गलं पुरस्तादाददते ऽध्वर्युः पश्चादिति बौधायनः " प्रत्यञ्चमेवैतत्संयुज्य कर्षेदिति शालीकिः ' ॥

II. 24. 1. कर्षण इति ॥ संप्रत्याहारं[४] कर्षेदिति बौधायन " आवाजम[५] इति शालीकिः ॥ ५ ॥

१ Thus Be G (pr. m.); ऐन्द्र्या Bu B G (sec. m.); ऐन्द्रियायु° Bu.

२ Thus C′; दूर्वावैवेति B Be G; चैवेति U (sec. m.); वेति U (pr. m.).

३ Thus C′ the Viv. and Ms. °दक्षा° the other MSS.—°मेवैतत्कु° G Ms., °मेवैनेकु° Be C′.

४ Thus Be C′; संप्रत्यचारं Bu G; संप्रत्यमाचारं U, प्रत्यचारं B, संप्रत्याहृत्याहृत्य the Viv.

५ Thus B G U and the Viv.; अवाजम Bu, आवाज Be C′. Meaning uncertain.

Digitized by Google

गोयुगानामनुमन्त्रण इति ॥ तत्तद्देवानुमन्त्रयेदिति बौधायनः॥ सर्वाणि सहेति शालीकिः ।॥

सर्वौषधस्य वपन इति ॥ अर्धमर्धशो वपेदिति बौधायन॥ चतुर्धेति शालीकिः ।॥

इतरमितरञ्च विपरिहरतीतरमितरच्चेति ॥ सूत्रं बौधायनस्योद्दान एवैतां दिशमभिसंपादयेदिति शालीकि॥र्यजुषा यजुर्विपरिहरेदित्यौपमन्यवः ।॥

स दर्भपुञ्जीलानि पयःप्रोक्षे ऽवधाय तैः प्रोक्षत्यग्नीन्यो ऽग्निभ्यो जुष्टान्प्रोक्षामीति वा तूष्णीं वेति ॥ पूर्वः कल्पो बौधायनस्योत्तरः शालीके: ।॥

कुम्भेष्टकानामुपधान इति ॥ सूत्रं बौधायनस्य॥ पक्षपुच्छेष्वेवैना[१] उपदध्यादिति[१] शालीकिः ।॥

नानामन्त्रासु दिक्षो भजमानास्विति ॥ तथादेवतेनानुक्रम्य पारे सूददोहसः कुर्वीतेति बौधायनस्॥तामेवेष्टकां परिनिस्तिष्ठेदिति शालीकिः ।॥

इष्टकागणानामुपधान इति ॥ तथादेवतेनानुक्रम्य पारे सूददोहसः कुर्वीतेति बौधाय॥नस्तंतमेवेष्टकागणं परिनिस्तिष्ठेदिति शालीकिः ।॥

अभिमर्शे ऽभिहोम इति ॥ सूत्रमाचार्ययोर॥चो ह स्माहो-

---

१ Thus B G U (sec. m.); °पुच्छेष्वेतानुप° Bu; °पुच्छेष्वेता उप° Be C.

Digitized by Google

पमन्यव: पुरस्तादभिमर्शाभिहोमाभ्यां तथादेवतमुद्दोहस:[1] कुर्वीतेति ॥

II. 28. 15. सर्पशिरस[2] उपधान इति ॥ पूर्वः कल्पो बौधायनस्योत्तरः शालीकेः ॥

II. 30. 10. औदुम्बरं योनूखलमुसलमिति ॥ सूत्रं बौधायनस्य दार्वद्वयमेवैनत्कुर्यादिति[3] शालीकिः ॥ ६ ॥

II. 30. 11. सर्वौषधस्यावहनन इति ॥ मन्त्रेणावहन्यादिति बौधायनस्तूष्णीमिति शालीकिः ॥

II. 30. 17. उख्यानामुपधान इति ॥ सूत्रं बौधायनस्यैकामेवोखां मन्त्रेणोपदध्यात्तूष्णीमितरे इति शालीकिः ॥

II. 31. 13. पञ्चशीर्षाणामुपधान इति ॥ मध्य उपदध्यादिति बौधायनो ऽन्तेषु तस्य व्युदूह्योपदध्यादिति शालीकिः ॥

अथर्वशिरस उपधान इति ॥ पुरस्तात्सर्वतोमुखस्येव स्वयमातृण्णायाश्च नवर्चमथर्वशिर उपदध्यादिति बौधायनो नाथर्वशिर इति शालीकिः ॥

II. 33. 12. सर्वतोभद्रस्योपधान इति ॥ सूत्रं बौधायनस्यानुदिश्यमेव[4] गायत्रीरुपदध्यादिति शालीकिः ॥

---

१ Thus all the MSS.; ॰द्दोहसौ Ms.

२ ॰शिर MSS. exc. C′.

३ ॰द्वयं॰ MSS. exc. U C′ and Ms.; ॰मेवैतं MSS. exc. U.

४ Thus Be C′ U (sec. m.) and the Viv.; the other MSS. om. एव।

Digitized by Google

अश्वानामुपधान इति ॥ सूत्रं बौधायनस्य विज्ञातेष्वेवाश्वेष्वश्वान्युपदध्यादिति शालीकिः ॥

ऋषभस्योपधान इति ॥ सूत्रꣳ शालीकेरथो ह स्माह बौधायन ईषत्प्रत्यवहृतमिरिणमेनमुपदध्याद्यथर्षभो[1] वाग्नितुमुपतिष्ठतीति[2] ॥

अतीतानामिष्टकागणानामुपधान इति ॥ आधिमुपदध्यादिति[3] बौधायनश्चित्यन्त इति शालीकिः ॥

व्रतप्रदान इति ॥ मध्यंदिने व्रतं प्रयच्छेदिति बौधायनश्चित्यन्त इति शालीकिः ॥ ७ ॥ तृतीयः ॥

१० पुरीषचितेरुपधान इति ॥ सूत्रं बौधायनस्य पूर्वेद्युरेव पुरीषचितिं परिनिस्तिष्ठेदिति शालीकिः ॥

अश्वावभितस्तिष्ठेतां कृष्ण उत्तरः[4] श्वेतो दक्षिण[5] इति ॥ अश्वाभ्यां तिष्ठद्भ्यां घासमाहारयेदिति बौधायनः कालेकाल एवैनावुदानयेयुरिति शालीकिः ॥

११ वालखिल्यानामुपधान इति ॥ उपरिष्टाद्वालखिल्या उपदध्यादिति बौधायनः पार्श्वत इति शालीकिः ॥

---

१ Thus (प्रत्यवहृत॰) U G (pr. m.) C′ and Ms.; ॰प्रत्यवहत॰ Bu; प्रत्यमवहृत॰ Be G (sec. m.), प्रत्यमवहत॰ B.

२ Thus G and Ms.; वाग्नितमुप॰ or वाग्नितामुप॰ the other MSS.

३ Thus B G U (sec. m.), Ms. and the Viv.; चधि॰ Bu. चदि॰ Be C′ U (pr. m.).

४ उत्तरत G C and the Viv.

५ दक्षिणत B G.

Digitized by Google

II. 41. 1. सृष्टीनामायातन[1] इति ॥ अपेण स्वयमातृणामुदीचीरेना आयातयेदोत्तरस्मात्पक्षसंधेः सर्वतो[2] वेति[2] ॥ पूर्वः कल्पो बौधायनस्योत्तरः शालीकेः । ॥

II. 41. 5. व्युष्टीनामुपधान इति ॥ सूचन्ँ शालीकेर्नो ह स्माह बौधायनः पुरस्तादेनाः प्रतीचीरुपदध्यात्पुरस्ताद्धि प्रतीची १
राचिन्व्युच्छतीति । ॥

II. 42. 18. तासां पुरीषवतीं मध्य उपदधातीति ॥ स ह स्माह बौधायनः पुरीषेण वा सहोपदध्यात्पुरीषं[2] वैवेति[3] । मन्त्र-पुरीषैवैषा स्यादिति शालीकिः । ॥

II. 42. 20. वैराजानामुपधान इति ॥ पूर्वः कल्पो बौधायनस्योत्तरः १०
शालीकेः । ॥

II. 43. 9. याज्ञसेनीनामुपधान इति ॥ पूर्वः कल्पः शालीकेरुत्तरो बौधायनस्य ॥

II. 43. 21. हुतेष्टकानामुपधान इति ॥ स ह स्माह बौधायनो हुतेन वा सहोपदध्याद्धुतेन वाभ्यज्येति ॥ मन्त्रहुता एवैताः स्युरिति ११
शालीकि॥र्हुतपिण्डानेवाभ्योपदध्यादित्यौपमन्यवः । ॥

---

१ Thus C′ (sec. m.), Ms., the Viv. (one copy); °मायतनं the other MSS.

२ Thus Ms. and the Viv.; सर्वत इति वेति Bu B G U (pr. m.): सर्वत एवेति U (sec. m.) Bc C′.

३ Thus G; °पंचैवेति B Be Bu; पंचेतिवेति U, °पंचैवचैवेति C′. °पमेववेति the Ms.

Digitized by Google

इष्टकानामावपस्थान इति ॥ अन्तरेण ज्योतिष्मतीश्च भूतेष्टकाश्चैतदिष्टकानामावपस्थानं भवतीति ॥ स ह स्माह बौधायनः सर्वेभ्यनयजुः प्रबुद्धयजुः प्रयाणयजुरपर्याण्ययजुः सामिधेनीराप्रीरतीताᳲश्चेष्टकागणानन्योपदध्यादित्यथो[१] ह स्माह शालीकिर्नानिष्टकं मन्त्रमिष्टकावदापादयेदतीतानेवेष्टकागणानन्योपदध्यादिति[२] ॥

पौर्णमास्या उपधान इति ॥ सूत्रं बौधायनस्योत्तर एवाᳲसे पौर्णमासीमुपदध्यादिति शालीकिः ॥

नक्षत्रेष्टकानामुपधान इति ॥ सूत्रᳲ शालीकेरथो ह स्माह बौधायनः प्रतितारकं चावेष्टका उपदध्यात्तनतन च रोचयेदिति ॥

सर्वतोमुखस्योपधान इति ॥ सूत्रᳲ शालीकेरथो ह स्माह बौधायनो व्यवेतं[३] खल्विदं कृष्णस्याभिमर्शनेन[४] भवति सर्वतोमुखमुपधास्यञ्छृतमश्वमभिमृशेदिति ॥

वर्धनेष्विति ॥ सूत्रᳲ शालीकेरथो ह स्माह बौधायनो

---

१ Before चयोपदध्या॰ Bu Be C′ G (pr. m.) U (sec. m.) ins. इतरेव or इतरद् here and l. 6; B G (sec. m.) and the Ms. om. these words.

२ ॰पादयेदितिता॰ some.

३ व्यवेतं Be U (sec. m.) Ms. (= व्यवहितं); व्यपेतं B G, व्यवेतं C′ व्यपोवेतं Bu.

४ ॰मर्शनं the Ms.

Digitized by Google

यावन्ति वर्धनानि समाने ऽहनि संनिपतेयुः सर्वेषां पारे तथादेवतमुद्दोहयः कुर्वीतेति । ॥ ८ ॥ चतुर्थः ॥

II. 47. 9. अथ प्रोचणीषु हिरण्यमस्काग्प्रत्यस्यत्यूर्ध्वं[१] चिभ्यो ऽपरिमितानिति सहस्रमिति प्रोक्तं ॥ पूर्वः कल्पो बौधायनस्योत्तरः शालीकेः । ॥

II. 48. 9. प्रातस्तृतीयस्य होम इति ॥ सूत्रमाचार्ययोः ॥ पूर्वस्मिन्वानीके जुहुयादिति गौतमः । ॥

II. 49. 8. नमस्कारैरुपस्थान इति ॥ स ह स्माह बौधायनः सधनुष्क एवोपतिष्ठेतोत्तरस्या एव दिश आवृत्यैतेनैव यथेतमेत्य पश्चात्प्राङ् तिष्ठन्नूर्ध्वामुपतिष्ठेतेत्य॥न्यो[१] ह स्माह शालीकिर्दत्त्वैव धनुरुपतिष्ठेतैतस्यै चैव दिश आवृत्यैतेनैव यथेतमेत्य पश्चात्प्राङ् तिष्ठन्नूर्ध्वामुपतिष्ठेतेति[२] । ॥

II. 49. 15. परिषिच्यमाने यजमानं वाचयतीति ॥ सूत्रꣳ शालीकेर॥न्यो ह स्माह बौधायनः परिषिच्यपरिषिच्यैवाश्मनि कुम्भं निदध्याद।श्मꣳस्ते क्षुदमुं ते शुगृच्छत्वित्यभिनिर्दिशन्नेवं दिश्यादिति । ॥

II. 50. 3 विकर्षेण इति ॥ अर्धर्चशो विकर्षेदिति बौधायन ॥ उपर्चेति शालीकिः । ॥

---

१ वाचयति instead of प्रत्यस्यति Be C′.

२ Thus (ऊर्ध्वाम्) Be C and the Viv.; ऊर्ध्वम् all the other MSS. and the Ms.

Digitized by Google

स्वयमातृण्णायै व्याघारण इति ॥ सूत्रं बौधायनस्याग्निं चतुरश्रामेनां व्याघारयेदिति शालीकिः ॥

वैश्वानरमारुतानां मन्त्रामन्त्र इति ॥ मन्त्रवन्तः स्युरिति बौधायनस्तूष्णीका इति शालीकिर्वैश्वानर एव मन्त्रवान्स्यात्तूष्णीका मारुता इत्यौपमन्यवः ॥

आनीकवतस्य होम इति ॥ सूत्रं बौधायनस्याहवनीय एवानीकवतं जुहुयादिति शालीकिः ॥

अथैनꣳ संचितमाज्यप्रोक्षेण प्रोक्षतीति ॥ सूत्रꣳ शालीकेरन्यो ह स्माह बौधायनो मन्त्रानुदिशं चैनं प्रोक्षन्मन्त्रानुलोकं चेति ॥

इध्मस्य निधान इति ॥ स ह स्माह बौधायन उभयेनेध्मं निदध्यादाध्वरिकेण चाग्निकेन चेत्याग्निकेनैवेति शालीकिः ॥ ९ ॥

शाकलैः परिधान इति ॥ आहवनीयं परिदध्यादिति बौधायनः पुच्छमेवेति शालीकिः ॥

स्रुवाहुत्योः करण इति ॥ कुर्यादिति बौधायनो न कुर्यादिति शालीकिः ॥

पूर्णाहुत्यै[1] करण इति ॥ कुर्यादिति बौधायनो न कुर्यादिति शालीकिः ॥

अथ शुक्रमनसा दिशो ध्यायेदिति[2] ॥ दिग्भ्यो ऽश्मग्नि-

---

[1] Thus Ms. only; पूर्णाहुत्योः the MSS.; पर्णाहुतिकरण the Viv.

[2] इति om. all exc. Ms.

Digitized by Google

मभि[1]संभराणीति वा तूष्णीं वेति ॥ पूर्वः कल्पो बौधायन-
स्योत्तरः शालीकेः ' ॥

II. 56. 8. प्रवेकस्यायातन[2] इति ॥ पूर्वः कल्पः शालीकेरुत्तरो
बौधायनस्य ॥

II. 56. 10. तस्मिंश्चतुर उपस्तृणान आहेति ॥ सूचं बौधायनस्य "
नोपस्तृणीतेति शालीकिः ' ॥

II. 56. 12. प्रवेकस्यानुप्रहरण इति ॥ अनुप्रहरेदिति बौधायनो "
नानुप्रहरेदिति शालीकिः ' ॥

II. 56. 13. ब्रह्मौदनस्य श्रपण इति ॥ अन्वाधेयवच्छ्रपयेदिति बौधा-
यन " एतस्मिन्नेवेति शालीकिः ' ॥

II. 56. 14. ब्रह्मौदनस्य प्राशन इति ॥ उत्तरे श्रोण्यन्ते प्राश्नीयुरिति
बौधायनः " पुच्छमेवाभित इति शालीकिः ' ॥

II. 57. 4. वातनामानां होम इति ॥ सूचं बौधायनस्य " वात-
मप्यञ्जलिना जुहुयादिति शालीकिः " कृष्णाजिनपुटेन
जुहुयादित्यौपमन्यवः ' ॥

II. 57. 9. शाकलानामनुप्रहरण इति ॥ अनुप्रहरेदिति बौधायनो "
नानुप्रहरेदिति शालीकिः ' ॥ १० ॥ पञ्चमः ॥

II. 57. 12. अग्निधिष्ण्यानामुपधान इति ॥ सूचं बौधायनस्य " सर्वा
एव याजुषीरुपदध्यादिति शालीकिः ' ॥

---

१ The two akṣaras सम effaced in G.

२ ॰यतन MSS. exc. Be C′.

Digitized by Google

नानाबीजानां निर्वपण इति ॥ निर्वपणेनानुसमेत्य[१] अभिमृशेदिति[२] बौधायनस्तन्त्रदेव हविः परिमिमिक्षेदिति शालीकिः ॥

तेषां व्रीहिष्वेव हविष्कृतमुद्वादयत्युपोप्तेष्वन्ते यवानिति ॥ सूत्रं शालीकेरथो ह स्माह बौधायन आवपनप्रभृति यवेषु मन्त्रकर्माभ्यावर्तेत तन्त्रं तु हविष्कृत्[२] स्यादिति ॥

आज्यनिनयन इति ॥ जघनेन गार्हपत्यमाज्येभ्यो निनयेदिति बौधायनोऽग्रेणातिहार्येति शालीकिरग्रेण वा जघनेन वेत्यौपमन्यवः ॥

सचरुपशुपुरोडाशा[३] एवेतरेषां हविषामिडा अवद्येद्भ्यर्धादिति[४] सपशुपुरोडाशानां वेति ॥ पूर्वः कल्पो बौधायनस्योत्तरः शालीकेः ॥

अत्याक्रमण इति ॥ सूत्रं बौधायनस्य सह स्विष्टकृताऽत्याक्रामेदिति[५] शालीकिः ॥

अभिषेक इति ॥ सूत्रमाचार्ययोरथो ह स्माहौपमन्यवः

---

१ ॰समेत्याभिमृशेदिति U (sec. m.).

२ Thus G (sec. m.) Bu Be C′ Ms; ॰कृत B G (pr. m.) U; cp. XI. 4: 75. 7, XXI. 16: 99. 16.

३ ॰पशु॰ om. B G U (pr. m.) the Viv.— ॰डाश B Bu G U (pr. m.) the Viv.; ॰डाशा Be C′ U (sec. m.).

४ Thus (and cp. II. 71. 5) B G B; ॰द्व्यर्धादिति Be C′ ॰द्व्यर्धेदिति Bu.

५ Thus U (pr. m.) C′, the Viv.; स्विष्टकृतमत्या॰ the other MSS.

Digitized by Google

पुरस्तात्तिष्ठन्तो यावदाघातेनाभिषिञ्चेयाथ कृष्णाजिनं न स्रक्तौ[1] न पार्थानि भवन्ति कुशानेव संस्तीर्य तेष्वेनमभिषिञ्चेदिति ' ॥

II. 58. 18; 59. 8. योगे विमोक इति ॥ अहरहर्युञ्ज्यादहरहर्विमुञ्चेदिति बौधायनो " ऽहरहर्युञ्ज्यादन्ते विमुञ्चेदिति शालीकिर्" आदित एव युञ्ज्यादन्ते विमुञ्चेदित्यौपमन्यवः ' ॥

II. 59. 11. ऋतुकरण इति ॥ सूत्रं बौधायनस्य " यथाऋत्वेवास्य ऋतुकरणानि कुर्यादिति शालीकिः ' ॥

II. 59. 13. ऐकादशिनानां[2] पशूनामुपाकरण इति ॥ सूत्रं बौधायनस्यै" कयूप एवैकादशिनान्पशूनुपाकुर्यादिति शालीकिः '
॥ ११ ॥

II. 59. 17. वपानां परिहोम इति ॥ तांतां परिजुहुयादिति बौधायन " आदितस्त्वान्ततस्त्वेति शालीकिः ' ॥

II. 60. 3. अम्वत्यावघ्रापण इति ॥ सूत्रं बौधायनस्य " माध्यंदिन एव सवने ऽभ्यवघ्रापयेदिति शालीकिः ' ॥

पशूनामासादन इति ॥ पशुंपशुं पश्चाद्धोतासादयेदिति बौधायनो " मुख्यमेवेति शालीकिः ' ॥

हृदयशूलानामुद्वासन इति ॥ एकैकश उद्वासयेदिति बौधायनः " सर्वान्सहेति शालीकिः ' ॥

---

१ Thus Be C′ U (sec. m.); चक्का' the other MSS.

२ C′ and the Viv. एका॰ ।

Digitized by Google

आमिचायै मन्त्रामन्त्र इति ॥ मन्त्रवती च स्यादश्वद्रागीया चेति बौधायनस्तूष्णीका च स्यादश्वद्रागीया चेति शालीकिर्मन्त्रवती च स्यान्मन्त्रहरया चैनया निरूढया यजेतेत्यौपमन्यवः ॥

देविकाहविर्षां करण इति ॥ कुर्यादिति बौधायनो न कुर्यादिति शालीकिः ॥ १२ ॥ षष्ठः ॥

अथातो वाजपेयं व्याख्यास्यामः ॥

चिन्वीत वाजपेयेऽग्निमिति बौधायनो न चिन्वीतेति शालीकिः ॥

औदुम्बरं रथचक्रं सप्तदशारमिति ॥ सूनं बौधायनस्य द्वार्ध्वमेवैनत्कुर्यादिति[1] शालीकिः ॥

खादिरौ विद्वर्वौ[2] वभ्रैर्व्यूतावुपकल्पयत[3] इति ॥ सूनं बौधायनस्य वस्ताजिनं चैवाचोपकल्पयीत शतमानं च हिरण्यमिति शालीकिः ॥

स यो ऽयस्य जघन्यायाः पुरस्तादाषाढ्यो पौर्णमास्यै दीक्षत इति ॥ सूनं बौधायनस्य शरदि वाजपेयेन यजेतेति शालीकिः ॥

---

१ °र्ध्व° G (sec. m.).— °मेवैनत् G (pr. m.) U, °मेवैतद् the other MSS.

२ Thus G and the Viv.; विद्वर्वि Bu, विद्रूवौ B, विद्रूवौं U, विद्वर्वौ Be, विद्वर्वौं C′ (pr. m.), विद्वर्वौं (sec. m.).

३ Thus G, वर्यैव्यू° Be, वभ्रैव्यू° C′, वंभैव्यू° Bu, वाभ्रैव्यू° U, वभ्रव्यू° B, वभ्रैव्यू° the Viv. (one copy), वभ्रैरु° (another).

Digitized by Google

II. 64. 4; 65. 10. सावित्राणाꣳ होम इति ॥ पूर्वः कल्पो बौधायनस्योत्तरः शालीकेः ॥

II. 64. 12. वाजपेयिकायै सुरायै संधान इति ॥ सूत्रमाचार्ययोर्"नो ह स्माहौपमन्यवो यत्रैव सुरा स्यात्तत आहारयेदिति' ॥

II. 65. 4. सो ऽरत्निमात्रे ऽरत्निमात्रे वा विगृह्णाति धनुर्वेष्टीर्वा प्रवेष्टयतीति ॥ पूर्वः कल्पो बौधायनस्योत्तरः शालीकेः ॥

II. 65. 5. गौधूमं[1] यवाममिति ॥ सूत्रं बौधायनस्य "गोधूमपिष्टानामपि कुर्यादिति शालीकिः' ॥

II. 66. 2. दुन्दुभीनामासञ्जन इति ॥ सूत्रं द्वैधमेवैतद्भवति ॥

II. 66. 14. क्रतुकरण इति ॥ सूत्रꣳ शालीकेर्"नो ह स्माह बौधायनो ऽतिरात्रमप्यन्य क्रतुमुपेयात्समानपक्षे येनꣳ संतिष्ठापयिषेदिति[2] ॥ १३ ॥

II. 66. 16. पञ्चैन्द्रानतिग्राह्यान्गृह्णातीति ॥ सूत्रं बौधायनस्य "सर्व एवैते[3] सोपयामा[4] गृहीतव्या[4] भवन्तीति शालीकिः' ॥

II. 67. 10. सुराग्रहाणां ग्रहण इति ॥ सूत्रं बौधायनस्य "सजुष्टान्परिमृज्य[5] सादयेदिति शालीकिः' ॥

---

१ Thus G and the Viv. (one copy), गौधमं Bu; गोधूमं the other MSS.

२ Thus Be C′ U (sec. m.); संस्थिपतिष्येदिति B G; सस्थिपयिष्येदिति Bu.

३ Thus G C′; एवैने U, एवैतैः B Be; Bu defective.

४ सोपयामस्थरो॰ U.

५ Thus Be C′; सयजुष्टा॰ Bu U, सयजुष्का॰ B G.

Digitized by Google

द्विरश्रेषि¹ वा त्रिरश्रेषि¹ वोदीष आयातयतीति ॥ पूर्वः कल्पो बौधायनस्योत्तरः शालीकेः ॥

षड्रशना आदाय यूपमभिप्रेयादिति बौधायनः " पञ्च रशना आदाय यूपमभिप्रेयादिति शालीकिस्तिस्रो रशना आदाय यूपमभिप्रेयादित्यौपमन्यव " एकामेव रशनामादाय यूपमभिप्रेयादित्यौपमन्यवीपुत्रो " ऽग्नीषोमीयरशनायामेव नियुञ्ज्यादित्याश्मीगविः ' ॥

वाजपेयिकानां पशूनामुपाकरण इति ॥ ऐकादशिनानुपाकृत्य² वाजपेयिकानुपाकुर्यादिति बौधायनो " वाजपेयिकानेव नैवैकादशिनानिति शालीकिः ' ॥

प्राजापत्यानामुपाकरण इति ॥ एकैकश उपाकुर्यादिति बौधायनः " सर्वान्सहेति शालीकिः ' ॥

वपानां परिहोम इति ॥ तांतां परिजुहुयादिति बौधायन " आदितश्चान्ततश्चेति शालीकिः ' ॥

हृदयशूलानामुद्वासन इति ॥ एकैकश उद्वासयेदिति बौधायनः " सर्वान्सहेति शालीकिः ' ॥

रथानामभियोजन इति ॥ सूत्रं शालीकेर्यो ह स्माह बौधायनो य एवैष समवक्षेपणो मन्त्रस्तं प्रथममभियोजनानां कुर्यादथ तूष्णीमश्वान्समवक्षिपेदिति ' ॥

काष्ठागमन इति ॥ स ह स्माह बौधायनः प्रदक्षिण-

---

१ द्विःश्रे॰ and त्रिःश्रे॰ G (sec. m.).

२ एका॰ the Viv.

Digitized by Google

माहृत्यैतां[१] काष्ठां गच्छेयुरथामुतो ऽपपर्यैरावर्तेरन्नित्यौ व आह शालीकिरपपर्यैराहृत्यैतां[१] काष्ठां गच्छेयुरथामुतः प्रदक्षिणमावर्तेरन्निति । ॥ १४ ॥

II. 79. 14. अथ यजमानं तार्प्यं परिधापयतीति ॥ सूत्रं बौधायन-क्षौमे एवैते यजमानं परिधापयेदिति शालीकिः । ॥ १

II. 80. 2. श्रित्या आयातन[२] इति ॥ पूर्वः कल्पो बौधायनस्योत्तरः शालीकेः ॥

II. 80. 5. तां दृग्भिः कल्पै[३] रोहतीति[३] ॥ सूत्रं बौधायनस्यैतैरेव मन्त्रैः प्रत्यवरोहेदिति शालीकिः । ॥

II. 81. 2. ' अथास्मै प्रत्यवरोहणत[४] आसन्दीं निदधातीति[५] ॥ सूत्रं १० बौधायनस्य ॥ वस्ताजिनं चैवास्याच[६] प्रत्यवरोहेद्यजमानं[७] च हिरण्यमिति शालीकिः । ॥

---

१ Thus both times C′ only; °हृत्येतः both times G and B the second time; हृत्येत B the first time; all the MSS. (exc. C′) °त°, not त्यै° ।

२ Thus B G, आयतन the Viv., आतत Bu, आयाम Be C′.

३ Thus G U C′ (sec. m.) and the Viv.; °ल्पोरोह° Bu, °ल्पैरारोह° B Be.

४ Thus only the Viv., प्रत्यवरोहत the MSS.

५ Thus the Viv., निनिधोतीति Be, निधोतीति C′, प्रत्यवदधातीति B Bu G U.

६ Thus B U G; चैवास्यच Bu; च only Be C; चास seems superfluous.

७ Before यजमानं B Bu U G ins. इति ।

अथैनमेतयाऽऽसन्द्या सह आवहन्त्या वा अजतीति[१] ॥ पूर्वः कल्पो बौधायनस्योत्तरः शालीकेः ॥

अतिग्राह्याणां भक्षण इति ॥ पूर्वः कल्पः शालीकेरुत्तरो बौधायनस्य ॥

.५ प्राजापत्यानां भक्षण इति ॥ पूर्वः कल्पः शालीकेरुत्तरो बौधायनस्य ॥

शुद्वतीयेष्विति ॥ द्वे द्वे अथ शुद्वतीये उपयच्छोपयजे-दिति बौधायनो'' ऽपच्छेदमिति शालीकिः'' समस्तान्येवैता-न्यनुप्रहृत्य सर्वैर्मन्त्रैरनुमन्त्रयेतेत्यौपमन्यवः' ॥ १५ ॥ सप्तमः ॥

1.१० अथातो राजसूयं व्याख्यास्यामः ॥

चिन्वीत राजसूये ऽग्निमिति बौधायनो'' न चिन्वीतेति शालीकिः' ॥

9. पुनरभ्युप्य पिष्टानि कृत्वाऽऽहारयेदिति बौधायनस्'' तथा-भ्युप्तान्येवैतानि[२] स्युरिति शालीकिः' ॥

0.१२ नैर्ऋतस्य मन्त्रामन्त्र इति ॥ मन्त्रवान्स्यादिति बौधायन-स्'' तूष्णीक इति शालीकिः' ॥

.2. एकोल्मुकस्य हरण इति ॥ अन्वाहार्यपचनाद्धरेदिति बौधायनो' ग्रामाग्नेरिति शालीकिः' ॥

1. नैर्ऋतस्य होम इति ॥ सूत्रं बौधायनस्य'' विसङ्खिका-काष्ठाभ्यामेनं परिगृह्य जुहुयादिति शालीकिः' ॥

---

१ अजतीति G B, हविनीति Bu; U Be C′ corrupt.

२ Thus G; °भ्युप्यान्ये° U, °भ्युपन्ये° B, °यप्तान्ये° Be C′.

Digitized by Google

II. 86. 3. दक्षिणानां दान इति ॥ अहरहर्दद्यादिति बौधायन'' आदितस्त्वाम्नातस्येति शालीकिः' ॥

II. 86. 3. उदपात्रस्योपनिनयन इति ॥ प्रदक्षिणमुपनिनयेदिति बौधायनो'' यथोपपादमिति शालीकिः' ॥

II. 86. 5. स्वाहा नमो य इदं चकारेति ॥ सूत्रं बौधायनस्यान्त-मध्यच स्वाहाकारं परिणयेदिति शालीकिः' ॥

II. 87. 1. संततीनामनुप्रयोग इति ॥ स ह स्माह बौधायनो यदह-रिष्ट्या वा पशुना वा यजेतापि तदहः संतती[1] प्रयुञ्जीतेत्य''थो ह स्माह शालीकिरहरहराश्रावणार्थे खल्वेते दृष्टे भवतो' यदहरिष्ट्या वा पशुना वा यजेत न तदहः संतती प्रयुञ्जीतेति' ॥

ib. चातुर्मास्यानामनुप्रयोग इति ॥ स ह स्माह बौधायनो यदहश्चातुर्मास्यानि प्रयुञ्जीतापि तदहः संतती प्रयुञ्जीतेत्य''थो ह स्माह शालीकिरहरहराश्रावणार्थे खल्वेते दृष्टे भवतो' यदहश्चातुर्मास्यानि प्रयुञ्जीत न तदहः संतती प्रयुञ्जीतेति' ॥

II. 88. 17. व्याख्यातं पञ्चेध्मीयस्य करणम्' ॥ १६ ॥

II. 89. 3. अथोपवेषेणाङ्गारान्समूहतीति ॥ सूत्रꣳ शालीकेर''थो ह स्माह बौधायनस्तूष्णीमङ्गारान्समूह्याथैनान्स्रुवाहुतिभिरभिजु-हुयादग्नये[2] रक्षोघ्ने स्वाहेति पञ्चभिर्'च प्रष्टिवाहिनꣳ रथं दद्यादिति' ॥

---

१ Here and infra some of the MSS. read संततीः (संततो).

२ जुहुतो॰ Be U C', जुहुत्वा॰ Bu.

Digitized by Google

अपामार्गसक्तूनाꣳ होम इति ॥ सूत्रꣳ शालीकेरन्यो ह स्माह बौधायनः समस्तेनैवास्मै मन्त्रेणापामार्गसक्तूञ्जुहुयात्तूष्णीꣳ स्रुवमनुप्रहरेत्तूष्णीमुपोत्तिष्ठेदिति[1] । ॥

देविकाहविषां करण इति ॥ सूत्रं बौधायनस्य सोमꣳसोममनुवर्तेरन्निति शालीकिर्न देविकाहविर्भिर्यजेदित्याश्मीगविः । ॥

अग्निभिः प्रत्यवसान इति ॥ अजस्रैः प्रत्यवस्येदिति बौधायनो ऽरण्योः समारोह्येति शालीकिः । ॥

पयसः समावेचन इति ॥ हृतौ वा विनाडे[2] वा समाविञ्चेदिति बौधायनो नवायां कुम्भ्यामिति शालीकिः । ॥

स्वयंकृतेष्विति ॥ सूत्रꣳ शालीकेरन्यो ह स्माह बौधायनो गोन्यासप्रमृदितानां[3] कुशानां बर्हिः संनह्येत्स्वयंपतितानां काष्ठानामिध्मं । यदेव वेद्यै रूपꣳ सा वेदिर्हृतिं वा विनाडं[4] वा रथ आधाय परिवहेद्यत्तच्च नवनीतमुत्पौदेत्तदाज्यꣳ स्यादिति । ॥

मैत्रावरुणस्यात्यस्य निर्वपण इति ॥ समानचतुर्मुष्टी स्याता-

---

१ ॰मुपोत्तिष्ठेदिति G U C′, ॰मुपतिष्ठेदिति B Bu Be; probably II. 89. 12 उपोत्तिष्ठति is the correct reading.

२ विनाडे G U C′. विनाळे the other MSS. and the Viv.

३ Thus Be C′ and comp. the Viv.: गवां नियतगमनेन शातितानां कुशानां; गोन्यायप्रमृ॰ G B Bu, गेन्यायप्रमृ॰ U.

४ विनाडं or विनाळं MSS.

Digitized by Google

मिति बौधायनो ॥ नानाचतुर्मुष्टी स्यातामिति शालीकिः ।

॥ १७ ॥ अष्टमः ॥

II. 94. 2. रोहिते चर्मणीति ॥ सूत्रं बौधायनस्य । अरोहितꣳ स्यादिति शालीकिः । ॥

सोमक्रयणेषूपैते[१] नित्याः शते स्युरिति बौधायन ॥ एत १
एव शततमाः स्युरिति शालीकिः । ॥

II. 94. 8. वसतीवरीणां ग्रहण इति ॥ सूत्रं बौधायनस्य ॥ सारस्वतीरप्यच वसतीवरीर्गृह्णीयादिति शालीकिः । ॥

II. 94. 18. आग्नेयस्यैन्द्राग्न उपालम्भ्यो भवतीति ॥ सूत्रं बौधायनस्यै॥न्द्राग्न एव सवनीयः स्यादिति शालीकिः । ॥ १०

पात्राणां करण इति ॥ यथानिर्भेदं पात्राणि कारयेदिति बौधायनः ॥ प्राकृतान्येवैतानि स्युरिति शालीकिः । ॥

II. 98. 1. सारस्वतीनामभिहोम इति ॥ सूत्रꣳ शालीकेर्॥न्यो ह स्माह बौधायनो याभ्यामेतदृग्भ्यां वहन्तीरभिजुहुयात्ताभ्यां पदेपदे जुहुयादथ तूष्णीꣳ सारस्वतीरभिजुहुयादिति । ॥ ११

II. 98. 7. अभिषेचनीयानां ग्रहाणां ग्रहण इति ॥ सूत्रमाचार्ययोर्॥न्यो ह स्माहौपमन्यवः पुरस्तात्सदसो ऽभिषेचनीयान्गृह्णीयादिति । ॥

II. 99. 16; 102. 9. धनुषः प्रदान इति ॥ पूर्वः कल्पो बौधायनस्योत्तरः शालीकेः ॥ १०

---

१ Thus B G U (pr. m.), ०षूपश्चिते Be C′ U (sec. m.), ०क्रयेण Bn.

Digitized by Google

मारुतस्यैकविꣳशतिकपालस्य कपालोपधान इति ॥ ऐष्टिकैरुपधाय गणैरुपदध्यादिति बौधायनो गणैरेवेति शालीकिः ॥

आभिचार्ये मन्त्रामन्त्र इति ॥ मन्त्रवती स्यादिति बौधायनस्तूष्णीकेति शालीकिः ॥ १८ ॥

क्रौञ्चस्य स्थान इति ॥ अन्तर्वेदि तिष्ठेदिति बौधायनो बहिर्वेदीति शालीकिः ॥

मणीनां करण इति ॥ औदुम्बर औदुम्बरेण लौहेन प्रच्छन्नः स्यादिति बौधायन औदुम्बर एवेति शालीकिः ॥

१० तस्मिन्नह संग्रहीता रथवाहने रथमादधातीति ॥ सूतं बौधायनस्स्थातृणामेवैकः[1] संग्रहीता स्यादिति शालीकिः ॥

स्फ्यस्य प्रदान इति ॥ सूतꣳ शालीकेरपो ह स्माह बौधायनो यजमानस्यैवैकस्य मन्त्रेण संप्रयच्छेत्तूष्णीमितरे संप्रयच्छेरन्निति[2] ॥

११ अक्षाणां करण इति ॥ सौवर्णाः स्युरिति बौधायनो राजता इति शालीकिर्नागदन्ता[3] इत्यौपमन्यवो वैभीतका इत्यौपमन्यवीपुत्रः ॥

अथास्मै पञ्चाक्षानपच्छिद्य प्रयच्छतीति ॥ सूतꣳ शाली-

---

१ Thus G; °स्थातृणामे° C′, °स्थापात्रणामे° U, °स्य यथातथामे° B Be; in Bu this dvandva is missing.

२ °च्छेरंन्निति G U C′.

३ Thus G B Bu U; °दंता Be C′.

Digitized by Google

केर''चो ह स्माह बौधायनो येनास्यानुपपन्नꣳ स्यात्तं तथापि-
सूजेह्निग्नो ऽभ्ययꣳ राजाभूदिति ' ॥

II. 111. 8. अथ विषुवति दर्भस्तम्बे जुहोतीति ॥ सूत्रं बौधायनस्य '' यत्रैव दर्भस्तम्बः स्यात्तद्गच्छेदिति[1] शालीकिः '

॥ १९ ॥ नवमः ॥

II. 111. 14. अग्नीनाꣳ हरण इति ॥ अजस्रान्हरेदिति बौधायनो ' ऽरण्योः समारोह्येति शालीकिः ' ॥

ib. वेद्यै करण इति ॥ सूत्रं बौधायनस्य '' पूर्वापूर्वा वेदिर्भवतीति शालीकिः ' ॥

II. 112. 10. अथैनं तीर्थादानीय पवयित्वा पुष्करस्रजिनमुदानीयेति ॥ स ह स्माह बौधायन उभयानि पुष्कराणि कुर्यात्सौवर्णानि च नादेयानि चेति '' नादेयान्येवेति शालीकिः ' ॥

II. 112. 13. निदधत्यस्मा एतद्धविरुच्छिष्टं व्रतभाजनमिति ॥ सूत्रं बौधायनस्य '' नात्र हविरुच्छिष्टं व्रतभाजनं निदध्यादिति '' शालीकिः ' ॥

II. 112. 17. सोमक्रयणेषूपैते[2] नित्याः स्युरिति बौधायन '' एत एव स्युरिति शालीकिः ' ॥

---

१ तच instead of तत् Be C′.

२ Thus B G U (pr. m.); ॰षुपंते Bu; ॰षूपश्रिते Be C′ U (sec. m.).

Digitized by Google

औपसदाꣳ[१] हविषां मन्त्रामन्त्र इति ॥ मन्त्रवन्ति[२] स्युरिति बौधायनस्॥ तूष्णीकानीति[३] शालीकिः । ॥

आग्नेयस्य प्राजापत्यस्तूपर उपालम्भ्यो भवतीति ॥ सूचं बौधायनस्य ॥ प्राजापत्य एव सवनीयः स्यादिति शालीकिः । ॥

भार्गवो होता भवतीति ॥ आर्दित एव भार्गवꣳ होतारं वृणीतेति बौधायनो ॥ दशपेय एव भार्गवो होता स्यादिति शालीकिः । ॥

शतं ब्राह्मणाः पिबन्तीति[४] ॥ यजमान[५] एकशततमः स्यादिति बौधायनो ॥ यजमान एव शततमः स्यादिति शालीकिः । ॥

7. दक्षिणानां दान इति ॥ एता एव ब्राह्मणाभिविहिता[६] दक्षिणा दद्यादिति बौधायन ॥ एतन्मुखꣳ सहस्रमिति शालीकिः । ॥ २० ॥

1. तेषामुत्थानेष्विति ॥ गच्छेयुरावभृथादिति बौधायनो ॥ ऽग्निष्टोमान्ता इति शालीकि॥ र्ध्रुवान्ता इत्यौपमन्यवः । ॥

8. हविषोहविष इष्ट्वा बार्हस्पत्यमभिघारयतीति ॥ बार्ह-

१ Thus G B and the Viv.; उपसदि U, चोपसदानां C', चौपसदी Bu; Be defective.

२ °वंत MSS.

३ Thus G and U (pr. m.); तूष्णीका इति B G (sec. m.), तूष्णीकेति C', तूष्णीकामिति Bu.

४ cp. T Br. I. 8. 2. 2.

५. Before यजमान G B ins. यो, U ये ।

६ °भिहिता Be C'.

Digitized by Google

स्वत्यश्चापोह्य[1] बार्हस्पत्यमभिघारयेदिति बौधायन॥ इत-रेषामेव हविषां न बार्हस्पत्यस्येति शालीकिः।॥

II. 115. 13. उच्चैरादित्याया आश्रावयत्युपांशु[2] मारुत्या इति ॥ आदित्याश्रावणप्रभृत्युपांश्वयेतरदुच्चैरिति[3] बौधायन॥ आ मारुत्याश्रावणप्रभृत्युपांश्वयेतरदुच्चैरिति शालीकिः॥ सर्वैवो-च्चैरादित्या सर्वोपांशु मारुतीत्यौपमन्यवः।॥

II. 115. 15. अत्यदूतेष्विति ॥ सूक्तं बौधायनस्यैमं[4] ते[4] ऽस्यौ[4] प्राश्नीयो-दित्येव ब्रूयादिति शालीकिः।॥

II. 117. 14. द्विराश इति ॥ सूक्तं बौधायनस्य॥ यजनीये[5] ऽहन्पूर्व-महर्भवत्युत्तरस्मिन्नुत्तरमिति शालीकिः।॥

II. 118. 5. देविकाहविषां करण इति ॥ कुर्यादिति बौधा-यनो॥ न कुर्यादिति शालीकिर्न कुर्यादिति शालीकिः[6]।

॥ २१ ॥ दशमः ॥

॥ इति द्वाविंशः प्रश्नः ॥

---

१ Thus G and the Viv.; °श्चापोह्या B, श्चपिह्य U. C′ Be corrupt. Bu defective.

२ Thus G, all the other MSS. more or less corrupt.

३ Here and infra all the MSS. इतर instead of इतरद् ।

४ Emended; °सामांवेशो Be C′ U (sec. m.), °सामंवेशो Bu, °सामंवेशे G, °सामंवशे B; cp. XXIII. 2 and T Br. I. 8. 3. 4: हूतान्वसिषतोति ।

५ Thus all.

६ In the MSS. no repetition of the final words.

अथात इष्टिकल्पं व्याख्यास्यामः ॥

स ह स्माह बौधायनः पञ्चदशसामिधेनीकाः कुर्वीताग्ना-
वाज्यभागावुच्चैर्देवता इत्यथो ह स्माह शालीकिः सप्तदश-
सामिधेनीकाः कुर्वीतर्धन्वन्तावाज्यभागावुपांशु देवता इति ॥
९ याजमानस्य करण इति ॥ संस्थितमिष्टिपथे[1] याजमानं
कुर्यादिति बौधायनः कुर्याद्यथावकाशं याजमानमिति
शालीकिः ॥

अग्नये पथिकृते पुरोडाशमष्टाकपालं निर्वपेद्यो दर्शपूर्ण-
मासयाजी सन्नमावास्यां वा पौर्णमासीं वातिपादयेदिति ॥
१० स ह स्माह बौधायनः पाथिकृतं निरुप्य वैश्वानरं द्वादशकपा-
लमनुनिर्वपेद्यातिपन्नां प्रतियजेदित्यथो ह स्माह शालीकिः
पाथिकृतं निरुप्य वैश्वानरं द्वादशकपालꣳ समानतन्त्रमनुनिर्व-
पेन्न चातिपन्नां प्रतियजेदित्यन्यतरेणैव सहातिपन्नां प्रति-
यजेदित्यौपमन्यवो ऽथो ह स्माहाञ्जौगविर्वि वा एतस्य
११ यज्ञश्छिद्यते यस्य तन्त्रे प्रतते ऽन्यत्तन्त्रं[2] प्रतायते । य एवैषो[3]
ऽच्युत[3] आग्नेयो ऽष्टाकपालस्तमेव पौर्णमास्यां वामावास्यायां
वा पाथिकृतं कुर्यान्न चातिपन्नां प्रतियजेदिति ॥

अग्नये व्रतपतये पुरोडाशमष्टाकपालं निर्वपेदाहि-

---

१ °स्थितमिष्टिपथे G, °स्थितमिष्टिपथे B, °स्थितिमिष्टिपथे U, स्थितिमिष्टपथे Bu, °स्थितमिष्टपथे Be C′.

२ न्यतंत्रं MSS.

३ Thus C′, एवैषोच्युत U, एवैषोच्यत B G Be, एवैषाच्यूत Bu.

Digitized by Google

ताग्निः सममत्यमिव चरेदिति ॥ आधानप्रभृत्येवैतदुक्तं भव-
तीति बौधायनो ॥ ऽभ्याहितेषु चैवोपसमाहितेषु चाग्निष्विति
शालीकिः । ॥

II. 121. 9. अग्नये रक्षोघ्ने पुरोडाशमष्टाकपालं निर्वपेद्यꣳ रक्षाꣳसि
सचेरन्निति ॥ हुत्वाग्निहोत्रमिष्टिꣳ सꣳस्थापयेदिति बौधा- ९
यनः ॥ सꣳस्थितायामिष्टावग्निहोत्रं जुहुयादिति शालीकिः । ॥

II. 121. 17. अग्नये रुद्रवते पुरोडाशमष्टाकपालं निर्वपेदभिचर-
न्निति ॥ स ह स्माह बौधायनो लोहितोष्णीषा लोहित-
वाससश्चर्त्विजः प्रचरेयुरिति ॥ याज्यापुरोऽनुवाक्याभ्यामेवैतदुक्तं
भवतीति शालीकिः । ॥ १०

II. 121. 18. अग्नये सुरभिमते पुरोडाशमष्टाकपालं निर्वपेद्यस्य गावो
वा पुरुषा वा प्रमीयेरन्यो वा बिभीयादिति ॥ स ह स्माह
बौधायनः प्रोक्षणीषु च गन्धानावपेयुर्गन्धवन्तश्चर्त्विजः प्रच-
रेयुरिति ॥ याज्यापुरोऽनुवाक्याभ्यामेवैतदुक्तं भवतीति
शालीकिः । ॥ ११

II. 122. 7. अग्नये कामाय पुरोडाशमष्टाकपालं निर्वपेद्यं कामो नोप-
नमेदिति ॥ स ह स्माह बौधायनो या तत्राम्नाता स्यात्तां चेन्नि-
र्वपतः कामो न समृध्येताथैवं[१] कुर्यादित्येषैव सार्वकामिकी
स्यादिति शालीकिः ॥ कामेकाम एषा[२] स्यादित्यौपमन्यवः । ॥

II 124. 1. अग्नये ज्योतिष्मते पुरोडाशमष्टाकपालं निर्वपेद्यस्याग्नि-

---

१ ०थैवं G U Be; थेमं B C'. ०थेवं Bn.

२ एषा G. एवैषा U, all the other MSS. एष।

Digitized by Google

यद्भूतो ऽस्तते ऽग्निहोत्र उद्द्रावेदिति ॥ सूत्रं शालीकेरथो ह स्माह बौधायनो मन्थनमधिमन्थनमुपथमिन्धनमित्येतान्मन्त्रा-न्निगदेदिति । ॥

वैश्वानरं द्वादशकपालं निर्वपेत्पुत्रे जात इति ॥ स ह स्माह बौधायन उत्थितायां निर्दशायां वैश्वानरं द्वादश-कपालं निर्वपेत्संस्नातस्य च कुमारं प्रवेशयेदिति ॥ जात-मेव विदित्वेति शालीकिर्न च संस्नातस्य कुमारं प्रवेशये-दित्य॥न्यत्र पर्वणीत्यौपमन्यवः[१] । ॥ १ ॥

2. विपर्यस्तहविषीति ॥ मारुतः[२] प्रथमं मन्त्रकर्म[३] लभेतेति बौधायनो ॥ ऽवदानत इति शालीकिः ॥ प्रदानत इत्यौप-मन्यवस्ता॥तुष्प्रात्स्यादित्यौपमन्यवीपुत्रः । ॥

9. वैश्वानरं द्वादशकपालं निर्वपेदायतनं गत्वेति ॥ यथैव यतिष्यमाणः स्यात्तदायतनं । तद्गत्वा वैश्वानरं द्वादशकपालं निर्वपेदिति बौधायनः ॥ सर्वानेवैताग्निष्विति शालीकिः । ॥

3. यथा रज्ज्वोत्तमां गामाजेदिति ॥ सूत्रं बौधायनस्ये॥मां ते ऽसौ पाहीयौदित्येव[४] ब्रूयादिति शालीकिः । ॥

---

१ The words after प्रवेशयेदिति only in C′ and U (sec. m.); Be has of them only औपमन्यवो; the other MSS. omit the opinion of Aupamanyava.

२ मारुतं Bu.

३ तंत्रं Be C′ (pr. m.).

४ Thus C′ U (sec. m.); प्रदीयौ॰ the other MSS.; cp. XXII. 21 and XIII. 10: 126. 5.

Digitized by Google

II. 127. 10. बत्सज्ञानपीत्रे संनह्येदिति ॥ सूत्रं बौधायनस्य " बत्स-ज्ञानामप्येव बर्हिः संनद्धं भवतीति शालीकिः ।॥

II. 128. 7. आग्नावैष्णवमेकादशकपालं निर्वपेदभिचरन्निति ॥ सूत्रं बौधायनस्य " प्रत्यभिचरन्तमेव विदित्वेति शालीकिः ।॥

ib. सारस्वतमाज्यमिति ॥ मन्त्रनिगममेतद्भूतञ्च[1] स्यादिति बौधायनस्तु"व्यौकमिति शालीकिः । कालेकाल एवैनद्भुवाव्याहृतीयादित्यौपमन्यवः[2] ।॥

II. 128. 17. अध्वरकल्पायामिति ॥ स ह स्माह बौधायन इत्यन्तं प्रथमं तन्त्रं कुर्यादेवं द्वितीयं तृतीयेन सहावभृथं वर्तयेदित्यथो ह स्माह शालीकिरा प्रणीतात्प्रथमस्य[3] तन्त्रस्य परिशाययेदेव[4] द्वितीयमेवं[5] तृतीयं[5] । तृतीयेन सहावभृथं वर्तयेदिति " सपूर्वपात्रविमुक्तमा[6] इत्यौपमन्यवः[6] ।॥

II. 129. 7. यो ब्रह्मवर्चसकामः स्यात्तस्मा एतञ्च सोमारौद्रं चरुं

१ तंचविवत्स° B G; तंचेविवत्स° U, तंचंविकपत° Bu: संचभिवत्स° Be, संचविवत्स° C′.

२ भुवाव्याहृत्य° G U (sec. m.); भुवाव्याव्याहृत्य° B U (pr. m.): भुवाव्यंस्य° Be C′; भवास्य° Bu.

३ Thus Be C′ U; प्रणीताप्र° B G (pr. m.), प्रणीतात् प्र° G (sec. m); Bu defective.

४ Thus G B; कुर्यादेवं U Be C′; Bu defective.

५ एवं तृतीयं om. B G.

६ °आत्मादित्यौ° C′ U (sec. m.).

Digitized by Google

तिष्यापूर्णमासे निर्वपेदिति ॥ उपवसथीये ऽहन्निर्वपेदिति बौधायनो ॥ यजनीये ऽहनीति शालीकिः । ॥

आज्यं प्रोक्षणमाज्येन मार्जयन्त इति ॥ उदकुम्भ आज्यस्रुवं प्रत्यस्येदिति बौधायनः । प्रोक्षणं चैव मार्जनं चाज्येन[1] कुर्यादथैतदद्भिः कुर्यादिति शालीकिर्यत्किं चाद्भिः कार्यꣳ स्यात्सर्वं तदाज्येन कुर्यादित्यौपमन्यवः । ॥

यदि बिभीयाद्दुश्चर्मा भविष्यामीति सोमापौष्णं चरुं निर्वपेदिति ॥ विज्ञातेषु रूपेषु निर्वपेदिति बौधायनः ॥ पुरस्तादेव ग्रहमाण इति शालीकिः । ॥

अर्धेष्विति ॥ सꣳस्थितायामिष्टामर्धानभ्यादध्यादिति बौधायनो ॥ ऽत्रैव परिश्रयीरन्निति शालीकिः । ॥ २ ॥ प्रथमः ॥

विपर्यस्तहविषीति ॥ मारुतः प्रथमं मन्त्रकर्म लभेतेति बौधायनो ॥ ऽवदानत इति शालीकिः ॥ प्रदानत इत्यौपमन्यवर्धातुष्प्राश्नादित्यौपमन्यवीपुत्रः । ॥

मारुतीष्वाꣳ होता यजतीति ॥ स ह स्माह बौधायन आदित एव होता मरुत आवाहयेदनुवाचयतो ऽध्वर्युरिति ॥ याज्यापुरोऽनुवाक्याभ्यामेवैतदुक्तं भवतीति शालीकिः । ॥

आदित्येभ्यो भुवद्वद्भ्यश्चरुं निर्वपेद्भूतिकाम इति ॥ सूत्रꣳ शालीकेर्नो ह स्माह बौधायनः सर्वाः सपदाः सर्वाः सविषाः सर्वाः समयूखेषा इति ॥

पद्पाꣳसूनाꣳ हरण इति ॥ सूत्रꣳ शालीकेर्नो ह

---

१ चैवाज्येन B Be.

आह बौधायनः समस्तेनैवास्य[1] मन्त्रेण पद्याꣳसूनुत्तर-वर्ग्ये[2] आवपेदथ तूष्णीमुरस्यनुनिनयेदिति । ॥

II. 133. 16. अतꣳ सुवर्णानि कृष्णलानि भवन्तीति ॥ सूनं बौधा-यनस्योपन्नतान्येवैतानि[3] स्युरिति शालीकिः परिहारये-दैषामिति[4] । ॥

II. 134. 3. चत्वारि चत्वारि कृष्णलान्यवद्यति चतुरवत्तस्याप्त्या इति ॥ स ह स्माह बौधायनो यान्यवत्तानि स्युर्जुहुयादेव तान्यथ यानि भक्षार्थानि स्युस्तद्ग्रहवत्प्रहीतान्येव[5] तानि स्युरथेतराणि समावपन्तो विभजेरन्नित्यथो ह स्माह शालीकिर्यान्यवत्तानि स्युर्जुहुयादेव तान्यथ यानि भक्षार्थानि स्युस्तद्ग्रहवत्प्रहीतान्येव[5] तानि स्युरथेतराणि प्राशित्रहरण ओप्य ब्रह्मणे परिहारये-दिति । ॥

II. 137. 21. यः पापयक्ष्मगृहीतः स्यात्तस्मा एतमादित्यं चरुममा-वास्यायां निर्वपेदिति ॥ उपवसथीये ऽहन्निर्वपेदिति[6] बौधा-यनो यजनीये ऽहन्निति[6] शालीकिः । ॥

---

१ ॰स्य Be C′ U (sec. m.), ॰स्ये Bu U (pr. m.), ॰स्मिन् G B.

२ Thus (and cp. vol. II, 104. 2) G, ॰वर्गे the other MSS.

३ बौधायनस्योपन्नता॰ G U, ॰नस्य बौपन्न॰ B, ॰धायनस्येत्याचमान॰ Be, ॰धायन्येत्याचमन्येवैतानि C′; but cp. the Viv.: उपन्नतेन तानि भवन्ति। अतएवैषि कनानि वाधिकानि वैति ।

४ Thus the Viv. (ब्रह्मणे to be understood). प्रतिहार॰ the MSS.

५ Thus G; स्युरवघ॰ the other MSS.

६ Instead of ऽहन् (thus B G Bu) the other MSS. हनि ।

Digitized by Google

सांवह्ये परिधिष्विति ॥ ऐष्टिकैः परिधाय पौरोडा-शिकैः परिदध्यादिति बौधायन॥ ऐष्टिकैरेवेति शालीकिः । ॥

आहुतीनाꣳ होम इति ॥ स्रुवꣳ शालीकेर॥न्यो ह स्माह बौधायन औदुम्बरैः पात्रैरेता आहुतीर्जुहुयाज्जुह्वा वैतानि पात्राण्येवानुप्रहरेदिति । ॥

आज्यस्यावेक्षण इति ॥ स्रुवं बौधायनस्य॥ यन्नवमैत्तन्नव-नीतमभवदित्येतैरेवाज्यमवेक्षितमुत्पुनुयादिति[1] शालीकिः । ॥ ३ ॥

यावतोऽश्वान्प्रतिगृह्णीयात्तावतो वारुणाꣳश्चतुष्कपाला-न्निर्वपेदेकातिरिक्तानिति ॥ स ह स्माह बौधायनो वैश्वानरे-णैकं[2] प्रतिगृह्णीयादेवं[3] द्वौ[4] । गणं[4] तु प्रतिगृह्य कुर्वीत[5] बहुषु[6] वारुणानेकातिरिक्तानित्य॥न्यो ह स्माह शालीकि-र्वैश्वानरेणैकं प्रतिगृह्णीयान्न तु द्वौ[7] । गणं[7] तु प्रतिगृह्य कुर्वीत न[8] तु द्वयोर्बहुषु वा वारुणानेकातिरिक्तानिति । ॥

---

1 पुनुयाद् again all.

2 About the correct reading and the meaning of this dvaidha I am uncertain; °णैकं B U Bu, °णैवैकं Be G, °णैक? C′.

3 एवं C′ U, एव the other MSS.

4 द्वौ गणे Be B G, दोगुणं C′, द्वागणं B, दोगुंणं U (sec. m.).

5 MSS. exc. Be C′ ins. तु. U (sec. m.) नतु ।

6 वा ins. Bu.

7 U again दोगुंणं; गणं the other MSS., गुणं C′.

8 न given by Be C′ U (sec. m.), not by B Bu G U (pr. m.).

Digitized by Google

II. 143. 2. आमिक्षायै मन्त्रामन्त्र इति ॥ मन्त्रवती स्यादिति बौधायनस्य ॥ अमन्त्रकेति शालीकिः । ॥

II. 143. 15. पुनः समूहति समूह्यावद्यतीति ॥ सूत्रं बौधायनस्य ॥ एतैरेव मन्त्रैः प्रतिसमूह्यावद्येदिति शालीकिः । ॥

II. 144. 7. पयस्विंष्टाकपालं पुरोडाशं निर्वपतीति ॥ सूत्रं बौधायनस्य ॥ संदिग्धपुरोडाश एवैष स्यादिति शालीकिः । ॥

II. 146. 3. (147. 17). वर्षाहृतस्याग्निहोम इति ॥ सूत्रं बौधायनस्य ॥ यथैव वर्षाहृतस्वः स्यात्तद्वद्येदिति शालीकिः । ॥

II. 148. 4. कृष्णाजिनस्यावधवन[1] इति ॥ अन्तर्वेदि तिष्ठन्कृष्णाजिनमवधुनुयादिति बौधायनो ॥ बहिर्वेदीति शालीकिः । ॥

II. 148. 6. अन्तःसवकारीयं करण इति ॥ कुर्यादिति बौधायनो ॥ न कुर्यादिति शालीकिः । ॥

II. 151. 1. संसर्गे[2] प्रायश्चित्तकरण इति ॥ सूत्रमाचार्ययोः ॥ यो ह स्माहौपमन्यवो यो नु खल्वाहवनीयो ऽत एवैष उद्धृतो भवति । आमयोर्निरन्वाहार्यपचनस्तं चत्त[3] नास्ति प्रायश्चित्तं । प्रशस्तो हि त्रयाग्निसंसर्ग इति । ॥

इतीत्था[4] इमा इष्टयो व्याख्याताः ॥ ४ ॥ द्वितीयः ॥

---

१ Thus G, °स्यावधवन U, °स्यावधाव Bu Be C′, °स्यावधव B, °स्यावधन the Viv.

२ संवर्गे B Bu G.

३ चत्ता Be C′.

४ इतीत्था B C′ Be.

अभिक्रामं जुहोतीति ॥ कियति नु खल्वेतद्धूतं भवतीति ॥ पञ्च प्रयाजा इति बौधायनो ॥ यत्प्राक् प्रयाजा इति शालीकिः ॥

यदि पशोरवदानं नश्येदाज्यस्य प्रत्याख्यायमवद्येदिति ॥ स ह स्माह बौधायनो यदि पशोरवदानं नश्येदेकं यदि द्वे आज्यस्य[1] प्रत्याख्यायमिष्ट्वा तत्कृत्वा[2] पुनर्यजेतेत्य॥थो ह स्माह शालीकिर्यदि पशोरवदानं नश्येदेकं यदि द्वे चाज्यस्य[1] प्रत्याख्यायमिष्ट्वा तत्कृत्वा[3] कृतमेव मन्येताथ यदि भूयो ऽथैवं कुर्यादिति ॥

असंस्रव इति ॥ यत्र क्षय नाव्या[4] वा[4] नदी[4] स्यादन्तरेणोदयन्वती[5] वासंस्रवस्तत्रेति बौधायनो ॥ यत्र कचन प्रब्रुया न संस्रव्येरसंस्रवस्तत्रेति शालीकि॥यत्र क्षयनान्तरेणोदयादसंस्रवस्तत्रेत्यौपमन्यवः[6] ॥ प्रक्षयोरेव जनपदयोरसं-

---

१ Some of the MSS. चाज्यस्य ।

२ न ins. B.

३ After कृत्वा G B ins. न पुनर्यजेत (or ॰तेति), but cp. infra XXIII. 8.

४ Thus G B (नावा नावी the Viv.); नावावा नदीव Bu U (pr. m.); नावावावनदी U (sec. m.); नावयावां नदी C′; नावायाया नदी Be.

५ Thus G and B (the latter only ॰ति); ॰रेणोदयन्वति Bu U; ॰रेणोदःस्वती Be C′ (pr. m.), ॰रेणोदायस्वती C′ (sec. m.). The Vivaraṇa: उदकयन्वतो (?) भावः यस्तो यावः। उदकयावती ।

६ Thus B G Bu U (pr. m.); क्षयनोदकमंतरेणेयाद॰ U (sec. m.); क्षयोदकमंतरेणेयाद॰ C′, ॰नोदकमंतरेणेयाद॰ Be; but in the Vivaraṇa there is no mention made of water; परस्परमकटायन्तरा गच्छेदिति ।

मनस्त्वेत्यौपमन्यवीपुत्रो ॥ नाविद्विषाणयोः सꣳस्रवो विद्यत इति छागलेयब्राह्मणं[1] भवतीत्याश्मौगविः । ॥

II. 157. 3 अभिभूतीनाꣳ होम इति ॥ आध्वरा हुत्वा याजाव-पिका[2] जुहुयादिति बौधायनः ॥ याजायपिका[2] एवेति शालीकिः । ॥

II. 162. 18. दीर्घप्रवृत्तेष्विति ॥ सूत्रꣳ शालीकेर्॥मो ह स्माह बौधा-यनो याभ्यामेतदृग्भ्यां[3] पूतभृदाधवनीययोर्जुहुयात्ताभ्यां[4] पदे-पदे जुहुयादथ तूष्णीꣳ सꣳस्रावमवनयेदिति । ॥

II. 167. 6. नित्ये ग्रहणे वैष्णवीमृचमनुवर्तयतीति ॥ सूत्रं बौधा-यनस्य ॥ पृषदाज्य एवैषानुवर्तयितव्या भवतीति शालीकिः । ॥

II. 169. 5. स उक्थमुक्थं वेव प्रतिगीर्यौक्थ्यग्रा इत्याह सवनꣳसवनं वेति ॥ पूर्वः कल्पो बौधायनस्योत्तरः शालीकेः । ॥

II. 171. 8 (172. 14). पृष्ठ्यषडहानां ग्रहण इति ॥ सूत्रꣳ शालीकेर्॥मो ह स्माह बौधायनो यत्र क्वचैतान्यहानि संगच्छेयुर्गृह्णीयादेव तत्र पृष्ठ्य-षडहानिति ॥ संवत्सर एवैते दृष्टा भवन्ति । संवत्सर एवैना-न्गृह्णीयादित्यौपमन्यवः[5] । ॥

---

१ Thus B G Be C'. °ब्रयंब्रा° Bu. °लेयाब्रा° U (pr. m.). °ब्रा° U (sec. m.). °लेयिब्रा° the Vivaraṇa.

२ याचा° the MSS.

३ Thus (and cp. infra p. 157, 8) G Bu U (pr. m.), °भ्यामेव° Be U (sec. m.), °भ्यामेयतद° B, यथामेवदृ° C'.

४ पूतभृताधवनीयेज्° U (sec. m.). पूतभृदाधवनीयेज्° G B U (pr. m.)

५ एवैनंगृ° all.

Digitized by Google

पृष्ठ्यग्रहाणां भक्षण इति ॥ स ह स्माह बौधायनो ऽनुषवनभक्षेण[1] चैवैनान्भक्षयेन्नित्येन चेति ॥ नित्येनैवेति शालीकिः ॥

अꣳशूनां प्रवृꣳहण[2] इति ॥ एकैकशः प्रवृꣳहेदिति[3] बौधायनः ॥ सर्वान्सहेति शालीकिः ॥ ५ ॥

आधवन[4] इति ॥ व्यतिषारमाधुनुयादिति बौधायनो ॥ यथाधविषमिति शालीकिर्मेक्षयेदित्यौपमन्यवः ॥

अꣳशोर्होम इति ॥ सूक्तं शालीकेर्यो ह स्माह बौधायनो याभ्यामेतदृग्भ्यामुपस्पृशेत्ताभ्यामेनं जुहुयादथ तूष्णीमुपस्पृशेदिति ॥

पृश्निग्रहाणां ग्रहण इति ॥ पूर्वः कल्पो बौधायनस्योत्तरः शालीकेः ॥

तेन कक्षमुपोषतीति ॥ सूक्तं बौधायनस्य ॥ अपूपेनैवाप्यन कक्षमुपोषेदिति शालीकिः ॥

ऋषभो गोषु जीर्यतीति ॥ सूक्तꣳ शालीकेर्यो ह स्माह बौधायनो यमप्यन्यं बहिस्तन्त्रात्पशुमालभेत तत्राप्येतानि कुर्यादुपाकरणीययोर्वपायां देवतास्विति ॥

---

१ नुषवणंभक्षेण B G U (pr. m.); नुषवनभक्षण Bu, नुषवनभक्षणेनैना॰ U (sec. m.) C′; Be corrupt.

२ Thus (cp. XIV. 12: 173. 7) B Bu G and the Viv., प्रवंहण Be, प्रवर्हण U C′.

३ प्रवर्हे॰ or प्रवर्हये॰ the MSS. exc. G.

४ आधावन Bu.

Digitized by Google

II. 178. 9. अष्टापद्यै गर्भस्य वपाहोम इति ॥ सूत्रं बौधायनस्य " न गर्भस्य वपाहोमं जुहुयादिति शालीकिर्न च गर्भस्य वपाहोमं जुहुयाच्चेत्तां न स्विष्टकृतमित्यौपमन्यवः ' ॥ ६ ॥ तृतीयः ॥

II. 179. 9. अजवशाया उपाकरण इति ॥ सूत्रं बौधायनस्य " वाय-
व्ययैवैनामुपाकुर्यादिति शालीकिरथो ह स्माह व्यावाम्बा- ९
त्यायनो यथाप्युपाकरण उपाकरणं कुर्वत एवमेवाप्युत्तरे
मन्त्रा कुर्वीरन्निति ' ॥

II. 180. 5. यदावभृथायामश्वो भवतीति ॥ स ह स्माह बौधायनो
यद्यहान्तश्चिता[१] अलक्ष्मा मेघाः स्युः संस्थापयेदेवाथ चेदलक्ष्माः
स्युरथैवं कुर्यादित्यथो ह स्माह शालीकिर्यद्यह नादित्य- १०
मन्तर्दध्युः[२] संस्थापयेदेवाथ चेदेनमन्तर्दध्युरथैवं[३] कुर्या-
दिति " नावभृथायामसंस्थापनं[४] विद्यत इति गौतमः ' ॥

II. 180. 17. जयेष्विति ॥ पूर्वः कल्पो बौधायनस्योत्तरः शालीकेः " ॥

II. 181. 15, 16. अभ्यातानेष्विति ॥ पूर्वः कल्पः शालीकेरुत्तरो बौधायन-
स्याथो ह स्माहौपमन्यवोऽभ्यातानान्त्रयायाद्भुत इति स्रुवा- ११
हुतीरेवैता जुहुयाद्गृह्णीयुश्च दर्शपूर्णमासावभ्यातानान्त्रयायाद्-
भुत इति ' ॥

---

१ ? यद्यहान्ताश्चिता Be C', यद्यहांतश्चिता B G U, यदिहांतश्चिता Bu.

२ Thus U, यद्यहर्नादित्य B G Be C', यद्यहनादित्य° Bu.

३ Thus Be C' U (sec. m.); अथैवं om. B Bu G U (pr. m.).
°चेदेवंकुर्य° C'.

४ नावभृथा° G U.— °थासंस्थापनं Bu, but the Viv. has असंस्थापनम् ।

Digitized by Google

अग्न्यापरिधिष्विति[1] ॥ अग्न्यैव अग्न्यापरिधीन्कुर्यादिति[2] बौधायनः ॥ प्राकृता एवैताः[3] स्युरिति शालीकिः । ॥

द्विःस्वाहाकारꣳ राष्ट्रभृतो जुहोतीति ॥ विग्राहं जुहुयादिति बौधायन ॥ द्वे द्वे स्रुवाहुती इति शालीकिः । ॥

अधिदेवने जुहोति रथमुखे जुहोति रथनाभ्यां[4] जुहोतीति ॥ सूत्रं बौधायनस्य ॥ तदग्नीन्येवैतानि[5] स्युरिति शालीकिः । ॥

नैयग्रोध औदुम्बर आश्वत्थः प्लाक्ष इतीध्मो भवतीति ॥ सूत्रं बौधायनस्य ॥ पृथगेवैतानीध्मान्यभ्याध्य पृथगभ्यादध्यादिति शालीकिः । ॥

यदाह क्रूरं तेन वषट्करोतीति ॥ सूत्रꣳ शालीकेर् ॥ यो ह स्माह बौधायन उदश्वित्वारमिश्रमर्कपर्णेन[6] सह[7] जुहुयाज्जुहोति वा कडिति वा वषट्कुर्यादिति । ॥

---

१ Thus Bu C′ and the Viv.; अग्न्याः प॰ the other MSS.

२ Conjecturally (Viv.: अग्नीष्टकस्य अग्न्याकाराः); अग्न्यायै अग्न्याग्परि॰ B G U, अग्न्यैव अग्न्याग्परि॰ Bu; अग्न्यायै परि॰ Be C′.

३ एवैता all.

४ नाभ्यां Bu U C′.

५ Thus C′ U (sec. m.); ॰तदग्नित्येव Be; ॰तदग्न्येवै॰ B Bu G U (pr. m.). The Viv.: एव (r. एत) इग्नौन्ये (r. न्ये) व । एवेध्मेव चोक्ताः । नाग्न्यग्निचयनचेति ।

६ Emended; उदश्वित्वा॰ Be, उदश्विदनत्वा॰ C′, कुदश्वत्वा॰ B G, दश्वि- तेवा॰ Bu, उश्विदत्वा॰ U.

७ om. Be C′.

Digitized by Google

II. 187. 8. प्रसव इति ॥ स ह स्माह बौधायन उभयेन प्रसुवीयादाशिष्ठीयाभिश्च सावित्रेण चेति '' सावित्रेणैवेति शालीकिः ' ॥ ७ ॥

II. 187. 16 sqq. अतिक्रामेष्विति[1] ॥ पूर्वः कल्पो बौधायनस्योत्तरः शालीकेः ॥

II. 188. 10 sqq. अतीमोक्षेष्विति[2] ॥ पूर्वः कल्पः शालीकेरुत्तरो बौधायनस्य ॥

II. 191. 2. प्राणग्रहाणां ग्रहण इति ॥ सूत्रं बौधायनस्य '' संवत्सर एवैते गृह्या भवन्ति ' संवत्सर एवैनान्गृह्णीयादिति शालीकिः ' ॥

II. 192. 10. तां दुग्ध्वा ब्राह्मणाय दद्याद्यस्याश्नं नाद्यादिति ॥ सूत्रꣳ शालीकेर''थो ह स्माह बौधायनः प्राक् चेदभिश्रावयै[3] निषीदेदथैवं कुर्यादिति ' ॥

II. 195. 3. यस्याहवनीये ऽनुद्वाते गार्हपत्य उद्वायेदिति ॥ सूत्रꣳ शालीकेर''थो ह स्माह बौधायनः समस्तमेतमग्निꣳ सते सद्य दक्षिणेन विहारं पर्याहृत्य गार्हपत्यस्यायतनाद्भस्मोद्वाप्य मृत्पिण्डेन परिलिप्य न्युप्योपसमाधाय ज्वलन्तमाहवनीयमुद्धृत्याहवनीयस्यायतनाद्भस्मोद्वाप्य मृत्पिण्डेन परिलिप्य न्युप्योपसमाधाय समिद्वत्याहवनीये षट् स्रुवाहुतीर्जुहुयाद्बुध्यस्वाग्ने

१ Thus G (sec. m.) and the Viv.; •क्रामे• the other MSS. Vol. II. 187. 15 is to be corrected ऽतिक्रामावा• ।

२ ऽती• Be C′ and the Viv., ऽति• the other MSS.

३ Thus B G and the Viv., प्राक्चेत्प्रश्रावये Bu, प्राक्चेदभिश्रावयै O, प्राक्चभिश्रावये U.

Digitized by Google

त्वमग्ने सप्रथा असि मनो ज्योतिर्जुषतां तन्तुं तन्वन्तु त्वं चित्रमिति । ॥

i. अतिरिक्तसोमेष्विति ॥ पूर्वः कल्पो बौधायनस्योत्तरः शालीकेः ॥

.३ ध्रुवे परिक्षीणे प्रायश्चित्तकरण इति ॥ स ह स्माह बौधायनः प्राक् चेदवभृथाच्छन्दोगवकृपेषु लभेरनभ्यावर्तयेयु स्तुतशस्त्राणि समुत्कृत्य पुनर्यजेतेत्यथो ह स्माह शालीकिः प्राक् चेदवभृथाच्छन्दोगवकृपेषु लभेरनभ्यावर्तयेयु स्तुतशस्त्राणि समुत्कृत्य कृतमेव मन्येतेति । ॥

३.१० अन्तां ग्रहण इति ॥ सूत्रं बौधायनस्य ॥ यदेवानन्तरमहः स्यात्तस्मिन्मैत्रावरुणायाग्न्याग्रहोऽष्टग्रीरन्निति शालीकिः । ॥

3. यूपे विरूढे प्रायश्चित्तकरण इति ॥ सूत्रं बौधायनस्य ॥-न्तस्त्वमेव यूपे विरूढे प्रायश्चित्तं कुर्यादिति शालीकिः । ॥

1. यस्य सोम उपदस्येत्सुवर्णं हिरण्यं द्वेधा विच्छिद्यर्जीषे
११ ऽन्यदाधुनुयाज्जुहुयादन्यदिति ॥ सूत्रं बौधायनस्य ॥ अहिरण्या एवास्यात ऊर्ध्वं सुत्यासमया क्षयेरनभ्युन्नयेरन्निति[१] शालीकिः । ॥

9. आदारसोमेष्विति ॥ सूत्रं बौधायनस्यादारसोमेनैवाप्यन्यमागमयेरन्निति[२] शालीकिः । ॥

---

१ Corrected; अभ्युन्नियेरन्निति B G Bu U (pr. m.), ॰अभ्युपनयेरन्निति or ॰रन्निति Be C′ U (sec. m.).

२ Thus B G; ॰नवाप्यन्यमाग॰ Bu, नैवाप्योन्यमाग॰ Be C′ U (sec. m.).

Digitized by Google

II. 203. 4. चाग्निःष्विति ॥[1] चाग्निषो ऽनुवर्तेरन्निति बौधायन ॥ एता[2] एवाग्निषः स्युरिति शालीकिः । ॥ ८ ॥ चतुर्थः ।

II. 245. 1 sqq. अथातो द्वादशाहं व्याख्यास्यामः ॥

II. 247. 4. चिन्वीत द्वादशाहे ऽग्निमिति बौधायनो । न चिन्वीतेति शालीकिः । ॥

चतिधाम्न[3] इति ॥ स ह स्माह बौधायनो गृहपतिरेवारण्योः[4] समारोपयेदेतदतिधाम्नस्य रूपं भवतीत्य॥थो ह स्माह शालीकिः पृथगेवारणीषु समारोपयेरन्गृहपतेरेव प्रथमस्य मथित्वा ज्वलत्सु ज्वलतो ऽपि[5] विसृजेरन्नित्येतदतिधाम्नस्य[5] रूपं भवतीति । ॥

II. 245. 7. संनिवाप[6] इति ॥ स ह स्माह बौधायनः संनिवत्स्यन्तो ऽग्नये ब्रह्मण्वते पुरोडाशमष्टाकपालं निर्वपेयुरग्नये क्षत्रवते ऽग्नये क्षत्रभृत इत्य॥थो ह स्माह शालीकिरग्निसंयोजनी[7] स्वकेष्टिभि-

---

१ Before चाग्निषो U has (rightly?) चाशौचेव (r? चाग्निःष्वेव,) C' reads; चाशौचेवाशौचित्वाग्निषो।

२ Thus B U C', the Viv.; एत the other MSS.

३ Thus U (sec. m.) and C' originally; चतिधाम the other MSS.

४ Thus G B, गृहपतेरेवा० Bu Be C', गृहपतिना० U.

५ Thus B Bu G, ०तोपिविसृ० Be, ज्वलत्सुज्वलतोपिविसृ० U (sec. m.).

६ Thus B G and cp. XXVI. 12; संनिवापन U (sec. m.) C' Be, संनिधाप Bu.

७ Thus B Be; ०यजना Bu G U C'.

Digitized by Google

वति । यथैवाग्निं चेष्यमाणः स्यात्तथैनां निर्वपेदिति ॥ प्राजापत्यं[1] पशुपुरोडाशमनुवर्तयेतेत्यौपमन्यवः[2] । ॥

पवन इति ॥ एकैकस्य एवैनाम्पवयित्वैकैकस्य उद्गानयेयुरिति बौधायनः ॥ सकृदेवैनाम्पवयित्वैकैकस्य उद्गानयेयुरिति शालीकिः ॥ सकृदेवैनाम्पवयित्वा सर्वांस्तथोद्गानयेयुरित्यौपमन्यवः । ।

आर्षेयवरण इति ॥ स ह स्माह बौधायनो ये केचन समानगोत्रा अव्यवेता अन्यथागोत्राः[3] स्युरेकस्यार्षेयस्य[4] वरण[4] एव तेषां वरणं स्यादित्यथो ह स्माह शालीकिर्यदि चैव व्यवेता यदि[5] वाव्यवेताः[5] समानगोत्रा एकस्यार्षेयवरण[6] एव तेषां वरणं स्यादिति । ॥

व्रतधुक्ष्विति ॥ समानत्र समावच्छो विभजेरन्निति बौधायनः ॥ पृथगेवैषां[7] व्रतदुघः स्युरिति शालीकिः । ॥

---

१ प्राजापत्यस्य the MSS.

२ Thus U (sec. m.), ॰नुवर्तयेत्यौ॰ B G U Be, ॰नुनिर्वपेतेत्यौ॰ C′, ॰नुवर्तेतत्यौ॰ Bu.

३ ? अन्यथागोत्रा Be, अन्यथोगोत्रा C′, अन्यथागोत्राणा Bu, अन्यथा गोत्राणा U, अन्येव गोत्रा G B; अन्यथागोत्राः the Viv. (one copy), अन्यथागोत्राः (another copy).

४ स्युरेक आर्षेयसंवरण C′, स्युरेक आर्षेयताः समानगोत्रा एकार्षेयं वरण Be.

५ Only in C′ B and U (sec. m.).

६ ॰र्षेयसंवरण or वरण U Be C′. On the whole difficult passage cp. Âp. XXI. 3. 4.

७ एव om. G and the Viv.

Digitized by Google

II. 247. 1. षष्ठ्यामुपसद्युत्तरवेदिं संनिवपन्तीति सूत्रमाश्मरथ्योरपि[१] वैकादश्यामिति विधिः[२]। ॥

II. 247. 7. वसतीवरीणामभिग्रहण[३] इति ॥ सूत्रं शालीकेरित्यो ह स्माह बौधायनो यदि शालिमेषः कलशः स्यात्तस्मिन्नेवानयेयुर्वै सर्वत्र एव लेपः समवनीतः स्यादथैवं[४] कुर्यादिति शालीकिः। ॥

II. 247. 12. सो ऽच[५] वैव[५] यज्ञस्य पुनरालम्भं जपति यज्ञायज्ञीयस्य वा स्तोत्रे शंयुवाके वेति ॥ पूर्वः कल्पो बौधायनस्योत्तरः शालीकिः। ॥

II. 248. 1. विवर्तयन्ति परिधीननुप्रहरति[६] प्रस्तरमिति ॥ सूत्रं बौधायनस्यानुप्रहरेदेवाथ प्रस्तरपरिधीनिति शालीकिः। ॥ ९ ॥

II. 248. 5. निमीलयाध्वर्युरुपांशु[७] जुहोतीति। सूत्रं बौधायनस्यानन्वीक्षमाण एव जुहुयादिति शालीकिः। ॥

---

१ Before चपि Be ins. यथोक्तमाशोपमन्यवो, C' यथो॰ वो, U यथोक्तमाह बोधायनो। cp. XXVI. 12.

२ Thus B G; ॰मिति वाधिः Bu; मिति नाभिः U, ॰मिवत्कं Be C'.

३ Thus the Viv. and cp. XXVI. 12; ॰मद्दिग्रहण Be C', ॰विधिग्रहण the other MSS.

४ Thus Be G, ॰इत्येव C', ॰इत्यवैवं Bu B U.

५ Thus B U G Bu the Viv. (one copy); चेव Be C' the Viv. (another copy).

६ ॰हरति Be G Bu U; ॰हरंति Be C'.

७ Read ॰पांशुं?

Digitized by Google

ग्निभ्यैद्युपाकरण इति ॥ स ह स्माह बौधायन उभयेनो-पाकुर्याद्धविर्भ्यां च ग्निभ्यैश्चेति ॥ ग्निभ्यैरेवेति शालीकिः । ॥

न्यूङ्खन इति ॥ विराजां[1] वा प्रतिपत्सु न्यूङ्खयति[2] शस्त्रे[3] वेति[3] ॥ पूर्वः कल्पो बौधायनस्योत्तरः शालीकेः ॥

निर्मथ्यस्य मन्त्रामन्त्र इति ॥ मन्त्रवान्स्यादिति बौधायनस्तू ॥ ष्णीक इति शालीकिः । ॥

दाक्षिणानाꣳ होम इति ॥ स ह स्माह बौधायनो जुहुयादेवाहुतीर्जपेत्प्रत्ययमन्त्रानित्य ॥ थो ह स्माह शालीकिर्जुहुयादेवाहुतीर्न तु[4] प्रत्ययमन्त्राञ्जपेदिति ॥ ये केच दक्षिणायुक्ता मन्त्राः स्युर्नैवैनानाद्रियेतेत्यौपमन्यवः । ॥ १० ॥

पञ्चमः ॥

अविवाक्य इति ॥ अविवाक्यमेतदहर्भवतीति बौधायनो ॥ विब्रूयादेवेति[5] शालीकिः । ॥

वपामुद्धरण इति ॥ सूत्रं बौधायनस्य ॥ यथाप्रकृतिमेवाध्वर्युः कुर्या । च्छन्दोगवद्बह्वृचा एव प्रतिकुर्वीरन्निति[6] शालीकिः । ॥

---

१ विराजां G C′, विराजा Be Bu, विरजां U, विवजां B.

२ °र्यति all exc. C′.

३ सर्वैर्वेति all.

४ Found in Be C′ U G (sec. m.), the other MSS. om.

५ Thus corrected; विब्रू° B G, तिब्रू° Bu, नुब्रू° Be C′ U (sec. m.), विर्ब्रू° U (pr. m.).

६ प्रतिविकु° B G U (pr. m.).

Digitized by Google

II. 255. 13. सर्पण इति ॥ कृष्णाजिनान्तैः सर्पन्त उत्तरेण हविर्धान-मुपस्पृशेयुरिति बौधायनो । नोपस्पृशेयुरिति शालीकिः । ॥

II. 257. 4 sqq. आग्रयणाग्रेष्विति ॥ वाचंयमो ऽध्वर्युः पूर्वाम्महस्तान् गृह्णीयादिति[1] बौधायनो ॥ विसृष्टवागिति शालीकिः । ॥

स[2] शुक्रं गृहीत्वा धारयति यावदितरौ ग्रहौ गृह्णातीति ॥ सूत्रं बौधायनस्य ॥ यंयं गृह्णीयात्तंतं परिमृज्य सादयेदिति शालीकिः । ॥

महाधानेष्वनुसंग्राह्या[3] इति ॥ अनुसंग्रजेदिति बौधायनो ॥ नानुसंग्रजेदिति शालीकिः । ॥

II. 258. 1. पशुकल्पेष्विति ॥ सर्वे कल्पा बौधायनस्य ॥ आग्नपशून्सेवा-हीनराचिसत्राणि भवन्तीति शालीकिः । ॥

II. 261. 2. तेषां यानि समहाव्रतानि तानि साग्निचित्यान्यथेत-राण्यौत्तरवेदिकानि स्युरिति बौधायन ॥ ऐकाहिकस्त्वेवाग्नि-रिति शालीकिः । ॥

II. 262. 12. आचीयेष्विति[4] ॥ अभिजिद्विषुवान्विश्वजिद्ग्रममहर्महा-

---

१ मरुच्छानाम्न° B.

२ स given only by U (sec. m.) C′ and the Viv.

३ Thus B G (sec. m.) C′ (sec. m.) U; आग्नोअपाधानेषु° Be, मरुस्थानेषु° Bu; the Viv.: महा वाधीयन्ते इष्विति।

४ Thus (heteroclitic locative? from चाचीयत्) Be C′ U (cp. Ap. XXIII. 9. 6 चाच्यग्नि); चाचीयेष्विति B G the Viv.; चाचीयेष्विति Bu.

Digitized by Google

सतमित्येतान्यावीयन्ति[1]भवन्तीति बौधायनो" यान्यन्यानि पृष्ठ्याभिप्लवेभ्य इति शालीकिर्यानि यान्यानि पृष्ठ्याभिप्लवेभ्यो दशमाच्चाह्न इत्यौपमन्यवः" प्रायणीयारम्भणीयावभिजिद्विषुवान्विश्वजिद्दशममहर्महाव्रतमुदयनीयो ऽतिरात्र इत्येतान्यष्टावावीयन्ति[2] भवन्तीति गौतमः' ॥

पशुकल्पेष्विति ॥ सर्वे कल्पा बौधायनस्यै"कादशिनपशून्येव सांवत्सरिकाणि सत्त्राणि भवन्तीति शालीकिः' ॥

वाणः सततन्तुर्भवतीति ॥ सूत्रं बौधायनस्य" वीणैवैषा[3] तन्त्रीभिः[4] सततमा[5] स्यादिति शालीकिः' ॥

अहर्गणे मासाप्रतिकानाꣳ[6]शिल्पानां करण इति ॥ कुर्यादिति बौधायनो" न कुर्यादिति शालीकिः' ॥

अहर्गणे शिल्पानामनुप्रवपण इति ॥ अनुप्रवपेरन्निति बौधायनो" नानुप्रवपेरन्निति शालीकिः' ॥ ११ ॥ षष्ठः ॥

---

१ ॰तान्यचीयंती Bu, ॰तान्यावीयानि B G; the other MSS. wholly corrupt; cp. XXVI. 17.

२ ॰ष्टावविचयंति U, ॰ष्टावचीया Be, ॰ष्टावचीव C′, ॰ष्टावचीयानि B G, ॰ष्टावाविवीती Bu.

३ वाचैवैषा C′, वीणैवैषां Be, U (sec. m.), वीणैवैषां G, वीणैवेषां Bu B, वीणेवेषा U (pr. m.).

४ Thus G U C′; तंत्राभिः Bu, वीभिः Be, तंचभिः B.

५ Uncertain; सततमा B Bu G U (pr. m.) C′ (sec. m.); सततंतु Be U (sec. m.), सततंतुर C′ (pr. m.).

६ Thus B G Be, मसा॰ or मस॰ Bu U C′ and the Viv.

Digitized by Google

II. 269. 10. द्विरात्र इति ॥ सूत्रं बौधायनस्य" यजनीये ऽहन्पूर्वमभवत्युत्तरस्मिन्नुत्तरमिति शालीकिः' ॥

II. 270. 5. तस्मिन्नुन्नतो वेदद्यामन इति भवन्तीति ॥ उपवेते[१]नित्याः सहस्रे स्युरिति बौधायन" एत[२] एव[२] सहस्रतमाः[३] स्युरिति शालीकिः' ॥

II. 271. 10. द्रोणकलशस्यात्रप्रापण इति ॥ अन्तःपरिध्यवप्रापयेदिति बौधायनो" बहिःपरिधीति शालीकिः' ॥

II. 272. 3. रूपाणाꣳ होम इति ॥ सूत्रं बौधायनस्या'श्वमेधिकान्यप्यत्र[४] रूपाणि जुहुयादिति शालीकिः' ॥

II. 274. 1. उद्यत्स्तोमेष्विति ॥ पूर्वः कल्पो बौधायनस्योत्तरः शालीकेः' ॥

II. 274. 9. औपसदानां पुरोडाशानां मन्त्रामन्त्र इति ॥ मन्त्रवन्तः स्युरिति बौधायन"स्तूष्णीका इति शालीकिराग्नेया एककपालाः स्रुवाहुत्या चैनान्सह सकृज्जुहुयादित्यौपमन्यवः' ॥

II. 275. 8. द्वयोर्गा उपकल्पयन्त इति ॥ सूत्रं बौधायनस्या" अप्यत्रोपकल्पयेरन्निति[५] शालीकिः' ॥

---

१ Thus G B; उपवेतेति Bu, उपेवे U, उतवैते Be, चतवेते C′.

२ Thus B G U (pr. m.) एता एव Be C′ U (sec. m.), एतमेव Bu.

३ सहस्रतमा MSS.; omitted by Be C′ (pr. m.).

४ Uncertain and partially emended; °नस्याश्वमेधिकस्यायच C′. °नस्य चाश्वमेधिकस्यायच Be U; °नस्य चाश्वमेधिकायनस्य चाश्वमेधिकान्यपत्र B G, °नस्याश्वमेधिकायनस्याश्वमेधिकान्यप्यत्र Bu.

५ °कल्पयेर° C′; अत्र om. Be.

Digitized by Google

उलूखलबुध्नो यूपो भवतीति ॥ सर्वाङ्कारान्कुर्यादिति[१] बौधायनः॥ प्रोक्ष्यैनमुच्छ्रयेदिति शालीकिः॥ प्रोक्ष्योपास्य[२] यूपशकलमुच्छ्रयेदित्यौपमन्यवः। ॥

पांसूनामनुसंहरण इति ॥ धिष्णियेभ्य औदुम्बर्या अवटादुपरवेभ्य उत्करादुत्तरवेद्यै पांसूननुसंहरेदिति बौधायनो॥ नानुसंहरेदिति शालीकिः। ॥

अथ यदि दीक्षोपसत्सु प्रत्ययमापद्येरन्संप्रकीर्येदवसानीयाभिरिष्टिभिरिष्ट्वोत्तिष्ठेयुरिति[३] बौधायन॥ एकाहं[४] सुत्वोत्तिष्ठेयुरिति[४] शालीकिर्॥ नासंस्थाप्य पृष्ठ्यं षडहमुत्तिष्ठेयुरित्यौपमन्यवः। ॥ १२ ॥

तेषामुत्थानेष्विति ॥ गच्छेयुरावभृथादिति बौधायनो॥ ऽग्निष्टोमान्ता इति शालीकिर्॥ ध्रुवान्ता इत्यौपमन्यवः। ॥

अनकसप्तरात्रो[५] ऽतिरात्रः पृष्ठ्यः षडह इति बौधायनः॥ पृष्ठ्यः षडहो ऽतिरात्र इति शालीकिः। ॥

---

१ सर्वंकारान्कु॰ Be, सर्वाकारान्कु॰ C′, सर्वाङ्कामान्कु॰ B G U, सर्वारान्कु॰ Bu; the Viv.: सर्वाङ्कारान्। क्रियन्त इति काराः: कर्तव्याः संस्काराः।

२ Thus Be C′; प्रोक्ष्यौपास्य Bu, प्रोक्ष्यावास्य G, प्रोक्ष्यवास्य B, प्रोक्ष्यापायस्था U.

३ इष्टिभिर् found only in G U C′.

४ Thus G Bu and the Viv.; एकांसुत्वो॰ U, एकसुत्वो॰ B, एका एव सुत्वो॰ Be C′.

५ ॰रात्रो G Bu and the Viv.; ॰रात्रे B Be, ॰रात्रः C′ (omitting तिरात्रः).

Digitized by Google

II. 277. 14. दशरात्राय दीक्षिष्यमाणो दशहोतारꣳ हुत्वा दशरात्राय दीक्षत इति ॥ सूत्रं बौधायनस्य'' सप्तहोतारꣳ हुत्वा दशहोतारं जुहुयादिति शालीकिः'' ॥ इति नु ब्राह्मणवान् ॥

अथ गोवत्सदशरात्रो ऽतिरात्रः पृष्ठ्यः षडहो वाजपेयो महाव्रतं चातिरात्रस्याष्टमे[1]ऽह्नि[1]वाजपेयः[1] ॥ तत्र[1]देवसुवाꣳ हविषां करण इति ॥ कुर्यादिति बौधायनो'' न कुर्यादिति शालीकिस्त्व''यस्तिꣳशस्य पशुपुरोडाशमनुवर्तेरन्नित्यौपमन्यवः[2]' ॥

विलुप्यमाने पृष्ठ्ये षडहे शिल्पानां करण इति ॥ कुर्यादिति बौधायनो'' न कुर्यादिति शालीकिः' ॥

II. 281. 16. एकषष्टिरात्रे वैश्वकर्मणादित्ययोर्ग्रहण[3] इति ॥ उत्तरे त्रिꣳशद्रात्रे गृह्णीयादिति बौधायनः'' संवत्सर एवैतौ दृष्टौ भवतः' संवत्सर एवैनौ गृह्णीयादिति शालीकिः' ॥

II. 283. 2. औदुम्बरꣳ षोडशिपात्रमिति ॥ सूत्रं बौधायनस्य'' खादिरमेवेति शालीकिः' ॥

II. 283. 15 अतिरात्रपशूनामुपाकरण इति ॥ सूत्रं बौधायनस्य'' सारस्वतीमेवोपाकुर्यादिति शालीकिः' ॥

---

१ Thus U C′; °ष्टमो भवतीति वाजपेयश्च Bu; ष्टमेवाजपेयश्च B G Be.

२ °पशु° om. B Be G.

३ Thus G U C′ and the Viv.; चादित्यग्रहयोर्ग्रहण B Bu: °योरादित्य- ग्रहण Be.

षोडशिवतां चमसानां भक्षण इति ॥ व्यक्ताम्भक्षयेदिति[1] बौधायन॥ इन्द्रपीतानिति शालीकिः। ॥

रात्रिपर्यायेषु मुख्यानां चमसानामभिमर्शन इति ॥ सूत्रं शालीकेर॥न्यो ह स्माह बौधायन इन्द्राय त्वापिशर्वरायेत्येव मुख्यंमुख्यं चमसमभिमृशेदिति। ॥

आश्विनस्य मन्त्रामन्त्र इति ॥ मन्त्रवान्स्यादिति बौधायनस्य॥ श्लोक इति शालीकिः। ॥

आश्विनस्य चर्याया इति ॥ सूत्रं शालीकेर॥न्यो ह स्माह बौधायनः पुरस्तात्तिरोअह्नियानां[2] चमसानां चर्याया[3] अनुचाश्विनेन[3] चरेदिति। ॥

तिरोअह्नियानां[2] चमसानां भक्षण इति ॥ अनुष्टुप्छन्दसा भक्षयेदिति बौधायनो॥ जगतीछन्दसेति शालीकिः। ॥

गुदद्वतीयेष्विति ॥ एकादशधा कृत्वोपयष्टोपयजेदिति बौधायनो॥ ऽपच्छेदमिति शालीकिः॥ समस्तान्येवैनान्यनुप्रहृत्य सर्वैर्मन्त्रैरनुमन्त्रयेतेत्यौपमन्यवः। ॥ १३ ॥ सप्तमः ॥

एकादशिन्यै संप्रदान इति ॥ सूत्रं शालीकेर॥न्यो ह

---

1 Thus Bu Be C′ and the Viv.; सुव्यक्ताभ्भ॰ B G U.

2 Thus Bu and Viv.; ॰अह्न्यानां or ॰अह्निनां the other MSS.

3 Thus G only; चर्याया इत्यचाश्वि॰ C′ U (sec. m.), चर्यायानुचाश्वि॰ the other MSS.; चर्याया also the Vivarana.

Digitized by Google

स्माह बौधायन एकादशाग्नीषोमीया एकादश सवनीया एकादशानूबन्ध्या[१] इति । ॥

II. 292. 2. उपशयस्य मन्त्रामन्त्र इति ॥ लभेत ग्रामे नारण्य इति बौधायनो ॥ लभेतारण्ये न ग्राम इति शालीकि॥र्नैव ग्रामे नारण्य इत्यौपमन्यवः । ॥

II. 294. 16. उपशयस्योपासन इति ॥ सूचं बौधायन॥श्चैवोत्तरत[२] उपास्येदिति शालीकिः । ॥

II. 296. 4. पात्नीवतस्य परिलेखन इति ॥ शालामुखीयꣳ शङ्कुमभिपरिलिखेदिति बौधायन ॥ उत्तरत एकादशिन्यै पात्नीवतं मिनुयादिति शालीकिः । ॥

II. 296. 5. त्वाष्ट्रस्य मन्त्रामन्त्र इति ॥ मन्त्रवान्स्यादिति बौधायन॥स्तूष्णीक इति शालीकिः । ॥

II. 296. 6. त्वाष्ट्रस्योत्सर्ग इति ॥ सूचꣳ शालीकेर॥न्यो ह स्माह बौधायनो ऽभिपर्यग्निकृतमेनमन्तरेण चात्वालोत्करावुदङ्कुपनिष्क्रमय्याङ्गिरम्युत्सृज्य[३] यजमानस्याजास्वपिसृजेदिति । ॥

II. 296. 11. त्वाष्ट्रस्य चर्याया इति ॥ उपांशु चरेदिति बौधायन ॥ उच्चैरिति शालीकिः । ॥

II. 297. 4. पुनश्चिताविति ॥ सूचꣳ शालीकेर॥न्यो ह स्माह बौधा-

---

१ ॰शानुबंध्या MSS.

२ Thus G U and a citation in the Ms.; उत्तर the other MSS.

३ Thus B Be C′ G U (sec. m.); ॰निष्क्रमस्या॰ U (pr. m.), ॰निष्क्रमर्या॰ Bu; ॰निष्क्रमथ्या॰ a citation in the Ms.

Digitized by Google

यनो यमप्यग्निं चिन्वानो[1]ऽपजानीयात्तस्मिन्नुपरि[1] पुनश्चितिं चिनुयादुत्तरतश्च यूपाद्यूपं मिनुयादिति ' ॥

कौण्डपायिनीयाश्विष्टिष्विति ॥ अग्न्यन्वाधानप्रतिपत्का इडान्ताः संतिष्ठेरन्निति बौधायन '' आज्यभागप्रतिपत्का इडान्ता इति शालीकिः '' अपूर्णपात्रविष्णुक्रमा इत्यौपमन्यवः ' ॥

पिण्डपितृयज्ञस्य दान इति ॥ अहरहर्दद्यादिति बौधायन '' आदित अन्ततश्च मासस्येति शालीकिः ' ॥ १४ ॥

होतॄणां व्याख्यान इति ॥ अग्रहानृतेस्वाहाकारानित्येकम्'तेग्रहानन्तःस्वाहाकारानित्येकं[2] ' सर्वानित्येके ॥ पूर्वः कल्पो बौधायनस्योत्तरौ शालीकेः ' ॥

स पौर्णमासीषुपौर्णमासीषु शुक्लह्रादश्च कृत्वः संवत्सरे जुहुयादित्येतदेकम्'मावास्यापौर्णमासीष्वित्येतदेकं ' सर्वास्वित्येतदेकम् ॥ पूर्वः कल्पो बौधायनस्योत्तरौ[3] शालीकेः ' ॥

त्रयस्त्रिंशच्चिताविति[4] ॥ सूत्रं शालीकेर''न्यो ह

---

[1] Doubtful. G and the Viv. read as given in our text; चिन्वानोपजा॰ C′, चिन्वानेवजा॰ U; चिन्वानोपजा॰ the other MSS. We expect an optative derived from the root ज्या, cp. ज्यानानः XVII. 17: 297. 5. The Viv. periphrases by क्षीणः only.

[2] ॰नंतस्वाहाकारा॰ MSS., but cp. XX. 5: 5. 5.

[3] उभौ ins. B Be G (sec. m.).

[4] Thus C′, G U (sec. m.) the Viv. and a citation in the Ms.; ॰स्त्रिंशश्चिता॰ B Be, ॰स्त्रिंशाश्चिता॰ Bu.

Digitized by Google

स्माह बौधायनो ऽग्निग्रहणꣳ स्वयंचितिꣳ श्वेतच्छागयोरभिमर्शनमधिद्रवणमवद्रवणमिति[1] सर्वमेवैतत्कर्माहृता कुर्यादिति' ॥

II. 303. 5. अहरहश्चिताविति ॥ सूत्रꣳ शालीकेर्वो ह स्माह बौधायनो ऽग्निग्रहणꣳ स्वयंचितिꣳ श्वेतच्छागयोरभिमर्शनमधिद्रवणमवद्रवणमिति[1] सर्वमेवैतत्कर्माहृता कुर्यादिति' ॥

II. 307. 13. रथचक्रचितौ पुरीषस्योपधान इति ॥ पुरीषस्यान्तान्कुर्यादिति[2] बौधायन'' इष्टकास्वेव पुरीषस्यान्तं[3] गच्छेदिति[3] शालीकिः' ॥ १५ ॥ अष्टमः ॥

II. 310. 2. रोहिते चर्मणीति ॥ सूत्रं बौधायनस्योपरोहितꣳ स्यादिति शालीकिः' ॥

उभयनीतस्य करण इति ॥ उभे[4] ऋचौ[4] द्विरभ्यावर्तयेदिति बौधायनः'' सकृदेव ध्रुवन्निर्ब्रूयादिति[5] शालीकिः' ॥

---

१ Thus B G Be Bu and a citation in the Ms. (cp. also XXII. 4: 121. 18); C′ reads °मर्शनाधिद्रविचमि°, U. om. °मवद्रवण° ।

२ Thus G Be; पुरीषस्यांतस्यान्कुर्या° U, पुरीषस्यतस्यांतान्कुर्या° B, पुरीषस्योतत्कुर्या° C′; Bu defective.

३ Hesitatingly corrected; पुरीषस्यान्तद्गच्छे° G, पुरीषंस्यातयच्छे° Be, पुरीषंस्यान्तद्गच्छे° C′, पुरीषंस्यान्तद्गच्छे° U.

४ उभौ ऋचौ B G, उभयं ऋचौ Be C′, उभयौ ऋचौ Bu, उभवे ऋचौ U (sec. m.). The two ṛks are, according to the Viv.: वायुः पूतः... प्राङ् सोमः etc., and वायुः पूतः... प्रत्यङ् सोमः etc., T Br. II. 6. 2. 2-3.

५ ध्रुवन् om. Be C′ U G (pr. m.); ध्रुवन् नहिब्रू° Bu

Digitized by Google

प्राङ् सोमः प्रत्यङ् सोमः' प्रत्यङ् सोमः प्राङ् सोम[१] इति ॥ पूर्वः कल्पो बौधायनस्योत्तरः शालीकेः ॥

सौत्रामणिकायै सुरायै संधान इति ॥ सूत्रमाचार्ययोर्"न्यो ह स्माहौपमन्यवो यत्रैव सुरा स्यात्तत एवाहारयेदिति' ॥

सुराग्रहाणां ग्रहण इति ॥ सूत्रं बौधायनस्य" पयोग्रहा-नप्यत्र गृह्णीयादिति शालीकिः' ॥

ताम्रायनेन सुन्दष्टाम्प्राचो वोदीचो वायातयतीति ॥ पूर्वः कल्पो बौधायनस्योत्तरः शालीकेः ॥

सुरासोमस्य संचर इति ॥ दक्षिणेन हृत्वोत्तरेणावनये-दिति बौधायन" उत्तरेण हृत्वा दक्षिणेनावनयेदिति शालीकि"र्यत एवैनꣳ हरेत्तत एवैनमवनयेदित्यौपमन्यवः' ॥

पावमानीभिरुपस्थान इति ॥ पावमानीभिरुपस्थाय पितॄणां याज्यानुवाक्याभिरुपतिष्ठेरन्निति बौधायनः" पितॄणा-मेव याज्यानुवाक्याभिर्न पावमानीभिरिति शालीकिः' ॥

अवभृथ इति ॥ सूत्रमाचार्ययोर्"न्यो ह स्माहौपमन्यवः शूलैस मात्सरेण चावभृथमवेयादिति' ॥

आख्यातमुदकान्तस्य प्रत्यसनम्[२] ॥

आख्यातमाप्लवनम्[२] ॥

आख्यातꣳ समिधां करणम् ॥

---

१ Thus G only; प्राङ् सोमः प्रत्यङ् सोमः प्राङ् सोम B, प्रत्यङ् सोम प्राङ् सोम Be C′ U, प्राक्सोम Bu.

२ See remark on XXI. 3: 73. 5, 6.

Digitized by Google

II. 327. 15. वैमृधस्यानुनिर्वपण इति ॥ सूत्रं बौधायनस्य ॥ नानिष्ट्वा प्रथमसोमेनानुनिर्वपेदिति शालीकिः । ॥ १६ ॥

II. 328. 12. पौर्णमासीमेव यजेत भ्रातृव्यवान्नामावास्यामिति ॥ उभयत्र पौर्णमासहविर्भिर्यजेतेति[१] बौधायनो ॥ नामावास्यायां किंचन यज्ञरूपं कुर्यादिति शालीकिः ॥ पिण्डपितृयज्ञेन चरेदित्यौपमन्यवः । ॥

II. 328. 15. साकंप्रस्थायीयेन यजेत पशुकाम इति ॥ सूत्रꣳ शालीकेर्॥चो ह स्माह बौधायनः स्रुग्भ्यामेव पुरोडाशं जुहुयाच्चमसेन सांनाय्यमिति । ॥

II. 329. 11. नागतश्रीर्महेन्द्रं यजेत । त्रयो वै गतश्रियः शुश्रुवान्ग्रामणी राजन्यस्ते।षां महेन्द्रो देवतेति ॥ स यो ऽन्य एतेभ्यो महेन्द्रमियक्षेत[२] स संवत्सरमिन्द्रमिष्ट्वा महेन्द्रेज्यां[३] लभेतेति बौधायनो ॥ ऽत एत्रापि संवत्सरमिन्द्रमिष्ट्वा महेन्द्रेज्यां[३] लभेतेति शालीकिः । ॥

II. 329. 16. संवत्सरमिन्द्रं यजेत । संवत्सरꣳ हि व्रतं नातीति ॥ सूत्रꣳ शालीकेर्॥चो ह स्माह बौधायनो यस्याममावास्याया-

---

१ Thus B Bu, पौर्णमासी॰ Be U G; C′ injured.

२ Thus (इयक्षेत and cp. XVII. 49: 329. 13: इयक्ष्येत) the Vivarana only; महेन्द्रं यियक्षेत G (sec. m.) B; महेंद्रमियक्ष्येत Bu, ॰द्रंयजेत Be C′, ॰द्रं यजेत U (pr. m.).

३ Thus B Bu G C′; महेंद्रयाज्यां Be U.

Digitized by Google

मादित इन्द्रं यष्टुं प्रक्रामेत्संवत्सरे[1] पर्यवेते तस्यां महेन्द्रं यजेत ' सो ऽत ऊर्ध्वं महेन्द्रयाज्येव स्यादित्य"न्यो ह स्माशौपमन्यवो ऽभ्यारूढः खल्वस्यैव[2] संवत्सरो भवति यस्याममावास्यायामादित इन्द्रं यष्टुं प्रक्रामेत्संवत्सरे[1] पर्यवेते या ततः पूर्वामावास्या स्यात्तस्यां[3] महेन्द्रं यजेत ' सो ऽत ऊर्ध्वं महेन्द्रयाज्येव स्यादिति ' ॥

7. दाक्षायणयज्ञेन सुवर्गकामो यजेत ' पूर्णमासे संनयेन्मावास्यामिक्षयामावास्यायां[4] यजेतेति ॥ सूत्रं बौधायनस्य " वैमृधमप्यत्रानुनिर्वपेदिति शालीकिः ' ॥

8,१० सांनाय्यस्य भक्षण इति ॥ सूत्रऽ्ँ शालीकेर"न्यो ह स्माह बौधायनो यजमान एवैतमर्धमासमनुनिधाय सांनाय्यं भक्षयेदिति ' ॥

1. आमिक्षायै मन्त्रामन्त्र इति ॥ मन्त्रवती स्यादिति बौधायनस्तू"ष्णीकेति शालीकेः ' ॥

6,११ 3. इडादधे चतुष्क उपाऽ्ँश्युयाजस्य करण इति ॥ कुर्यादिति बौधायनो " न कुर्यादिति शालीकिः ' ॥ १७ ॥

नवमः ॥

1. बृहस्पतिसवे दाक्षिणानां होम इति ॥ अनुसवनं दाक्षिणानि

---

१ Thus (प्रक्रामेत्) C′ U and a citation by Sāyaṇa; प्रक्रामेत G (sec. m.), प्रक्रमेत् Bu Be, प्रक्रमेत B G (sec. m.).

२ Thus U C′, खल्वस्यै B, खल्वेवंस्यैव Bu, खल्वस्य G; Be is defective.

३ स्यात् given only by Sāyaṇa in his citation.

४ वा ins. Be B U.

Digitized by Google

जुहुयादिति बौधायनो माध्यंदिन एव सवने दाक्षिणानि जुहुयाद्दामीत्येवेतरयोः[1] सवनयोर्ब्रूयादिति शालीकिः। ॥

II. 346. 8. हिरण्येन घृतमुत्पुनातीति ॥ मन्त्रनिगममेतद्‌ घृतꣳ स्यादिति बौधायनस्य॥ तूष्णीकमिति[2] शालीकिः। ॥

II. 349. 6. अनुद्धृते[3] वेद्यै दक्षिणत आहवनीयस्य हुत स्तोचं प्रत्यभिषिञ्चतीति ॥ सूक्तं बौधायनस्य॥ कृष्णाजिनमध्यचाकृत्वाभिषिञ्चेदिति शालीकिः। ॥

II. 350. 2. माषैः पूर्णं कमण्डलुमिति ॥ सौवर्णः सौवर्णैर्माषैः पूर्णः स्यादिति बौधायनो॥ मार्त्तिक[4] एव धान्यमाषैरिति शालीकिः। ॥

II. 354. 16. सप्तदश मारुतीः पृश्नीर्वत्सतरीरालभत इति ॥ पृथगेवासां मनोताः स्युः पृथक्‌ पशुपुरोडाश इति बौधायनः॥ पृथगेवासां मनोता स्युरेकः पशुपुरोडाश इति शालीकिरेकैवासां मनोता स्यादेकः पशुपुरोडाश इत्यौपमन्यवः। ॥

II. 356. 3.
II. 358. 9. अग्निष्टुतीन्द्रस्तुतीति ॥ सूक्तं बौधायनस्य॥ यथाप्रकृतिमेवाध्वर्युः कुर्याच्छन्दोगवकृषा एव प्रतिविकुर्वीरन्निति शालीकिः। ॥

II. 360. 10. अतिरिक्तस्तोत्रेष्विति ॥ पूर्वः कल्पो बौधायनस्योत्तरः शालीकेः ॥

---

१ Thus B G Bu and the Viv.; इद्दामी॰ Be U C′.

२ Thus G B; तूष्णीक इति B, तूष्णीमिति Be C′ U.

३ Thus the Viv.; ॰हृते U G, ॰भृते Be C′, ॰हृत B.

४ मार्त्तिक G U C′ Be and Viv.; चार्त्तिक B, चातीक Bu.

Digitized by Google

3, धनुष: प्रदान इति ॥ पूर्व: कल्प: शालीकेरुत्तरो बौधायनस्य ॥

एकाहानामन्त इति ॥ सूत्रं बौधायनस्य । मृत्युसवान्त इति शालीकि: । ॥

3. सिद्धयत्यस्मा एतद्धविरुच्छिष्टं शतभाजनमिति[1] ॥ सूत्रं बौधायनस्य ॥ नात्र हविरुच्छिष्टं शतभाजनं[1] सिद्ध्यादिति शालीकि: । ॥

4.
1. अथास्याङ्ग संक्रियामनुक्रियां परिक्रियामतिक्रियां प्रवर्ग्यस्य करण इति ॥ कुर्यादिति बौधायनो ॥ न कुर्यादिति शालीकि: । ॥

0. ग्रावाणसो ऽधिषवणे फलके पुरस्तादस्य इषणाविति ॥ सूत्रं बौधायनस्य ॥ ग्रावाणसो ऽप्यचारणी कुर्यादिति शालीकि: । ॥

2. स यं कं च[2] पशुं गृह्णात्येवमेवैनं गृह्णाति । यद्ु किं च पात्रं सादयत्येवमेवैनत्सादयतीति ॥ सूत्रं बौधायनस्य ॥ यंयं पशुं गृह्णीयात्तंतं परिमृज्य सादयेदिति शालीकि: । ॥

8, श्वेतमश्वं ददाति । श्वेतां वडवां ददात्यश्वमश्वितं ददाति ।
;
4; गर्भिणीं वडवां वशामीं ददात्यनडुहं[3] ददाति । चय-

---

१ Thus B Bu G (sec. m.); ॰भोजन॰ Be C′ U G (pr. m.).

२ चन G (sec. m.) and the Viv., चनं B.

३ Thus C′ only (sec. m.), all the other MSS. corrupt (॰त्वनडुहं-चर्म ददाति; ॰त्वनडुहं ददाति, ॰त्वनडुहं ददाति चर्म ददाति).

Digitized by Google

II. 379. 11; 382. 11; 388. 9; 406. 8, 9. स्त्रिङ्घ्रतं निष्कान्ददाति[१] ' सोमचमसं ददाति ' हिरण्मयं चमसं ददाति ' राशिकृतं[२] धान्यं ददाति ' मरायकृतं धान्यं ददातीति[३] ॥ एतानि च नित्यानि च दद्यादिति बौधायन " एतान्येवेति शालीकिः[४] ' ॥ १८ ॥

[५]अथातः सर्वतोमुखं व्याख्यास्यामः ॥

चिन्वीत सर्वतोमुखेऽग्निमिति बौधायनो " न चिन्वीतेति शालीकिर्"श्चो ह स्माह मौद्गल्यः पूर्वस्मिन्नेवाग्निश्चय इतरेषु साविचाः स्यु"रित्येतदपि न कुर्यादित्याश्मीगविः ' ॥

अरण्योः समारोपण[६] इति ॥ सूत्रमाचार्ययोर्"श्चो ह स्माह गौतमो गृहपतिरेव प्रथममरण्योः[७] समारोपयेत[८] इतरे यज इति ' ॥

---

१ सिक्थं ददाति MSS., but cp. XVIII. 38: 388. 9.

२ Thus Be C' Bu U, राशी° B G (sec. m.).

३ इति found in C' only.

४ The words एतान्येवेति शालीकिः are repeated in Be Bu U W C indicating the end of a praśna.

५ This kaṇḍikā is not found in Be C' Bu W U; in U it is giv on a loose page. The text of this, doubtless later added, chapt is given according to B G (where it is given secunda manu), complete citation in Keśavasvāmins prayogasāra (K) and a diff (I) in a MS. belonging to the India Office (Catologue by Eggeli Vol. I, p. 87). The Vivaraṇa of this chapter is missing equally

६ °रोपय G B.

७ प्रथमम् om. K.

८ °रोपयीत G B, °रोपयंत K.

Digitized by Google

शालीकिर्वाजपेये द्वादशाहे सत्त्रे ताण्डिनामयन उद्भिदि वलभिदीति तस्य स्यादित्येवमेव पृश्निग्रहैः प्राणग्रहैरिति[1] ' ॥

षोडशिग्रहाणां[2] ग्रहण इति ॥ सूत्रं बौधायनस्यानुसवनं गृह्णीयुरिति शालीकिः ' ॥

अतिग्राह्याणाᳲ होम इति ॥ सूत्रं बौधायनस्य[3] " माहेन्द्रस्यानुवषट्कारमुपजुहुयुरिति शालीकिः[4] ' ॥

षोडशिन स्तोत्रमुपाकरोतीति ॥ सूत्रं बौधायनस्य " येन केन चिदिति शालीकिः ' ॥

हृदयशूलानामुद्वासन इति ॥ एकैकश उद्वासयेदिति बौधायनः " सर्वान्सहेति शालीकिः ' ॥

अवभृथ इति ॥ सूत्रं बौधायनस्य[5] " प्राञ्च एवावभृथमवेयुरिति[6] शालीकिः[7] ' ॥

---

१ The reconstruction of the text of this dvaidha is wholly uncertain. I have given the reading presented by B which, however, has उद्भिद्वलभिदिति and adds शालीकिः at the end. Thus also G. U K I have तांडिनामयने ॥ तांडियामयन, indicating the beginning of a new kaṇḍikā; moreover the following words run thus in U: उद्दिद्वलभिदित्येवमेव श्ञि॰ in K: उद्दिदि वलभिदिमित्येवमेव पृ॰, in I: उद्भिदि वलभिदि सभ्येदितिपुञ्जिविमतिसाध्यामित्येवमेव पृ॰ ।

२ षोडशिनां प्र॰ B G.

३ शालीकिर् U K I.

४ चोपमन्यवः U K I.

५ शालीकेः U K I.

६ Thus G, ॰भृथमभ्यवेयु॰ U K I, ॰भृथमवेति B.

७ गौतमो U K I.

Digitized by Google

मरण्योः समारोपण[1] इति ॥ सूत्रमाचार्ययोर्नो[2] ह स्माह गौतमो[3] गृहपतिरेवारण्योः समारोपयेत्तत[4] इतर इति[5] ॥ १९ ॥ दशमः ॥

॥ इति त्रयोविंशः प्रश्नः ॥

१ Thus K I, समारोपय U, समारोप्य B G.

२ सूत्रं प्राशीकेरनो U K I.

३ बोधायनो U K I.

४ ०रोपये० B G.

५ Thus B G, तत इतरे यथार्थं मवेयुर्मेचयः U K I.

Digitized by Google

कर्मान्तसूत्रम् ॥

पञ्चतयेन कल्पमवेक्षेत छन्दसा ब्राह्मणेन प्रत्ययेन न्यायेन सꣳस्थावग्रेनेति । छन्दसेति यद्वोचाम यथाम्नायप्रणिधीदं पूर्वमिदमुत्तरमित्यथापि मन्त्र एव स्वयं कर्म प्रब्रूते । कर्मानुवादो भवति । यथैतद्भवति प्रेयमगाद्धिषणा बर्हिरच्छोर्वन्तरिक्षमन्विहि देवस्य त्वा सवितुः प्रसवे ऽश्विनोर्बाहुभ्यां पूष्णो हस्ताभ्यामग्नये जुष्टं निर्वपामीति । यच्छन्दसा न शक्नुयात्कल्पयितुं ब्राह्मणेन तच्चिकल्पयिषेद्ब्राह्मणमु हैवैनाम्नानप्रज्ञातान्विदधातीदमनेन करोतीदमनेनेति । यथैतद्भवतीषे त्वोर्जे त्वेति शाखामाच्छिनत्ति वायव स्थोपायव स्थेति वत्सानपाकरोतीत्यथाप्यमन्त्राणि कर्माणि विदधाति । यथैतद्भवत्यष्टासु प्रक्रमेषु ब्राह्मणो ऽग्निमादधीतैकादशसु राजन्यो द्वादशसु वैश्य इत्येवं व्यवस्थावर्णसंयोगादथो एतत्प्रत्ययेनेति छन्दोगबह्वृचाध्वर्युप्रत्ययेनेति । अथो एतन्न्यायेनेति प्राकृते तन्त्रे प्राकृतं[1] न्यायमनधिगच्छन्नान्यायं प्रतीयादयमिहार्हताꣳ समारभ्य इति । अथो एतत्सꣳस्थावग्रेनेति सोमे ऽपवृत्त आदाराꣳश्च फाल्गुनानि चाभिषुणुयादिति । चतुष्टयेन मन्त्रा वर्तन्ते स्तुत्या निर्देशेनाशिषा नैव स्तुत्या नाशिषा न निर्देशेनेति चतुर्थमथेमे पञ्च हविराकारा ओषधं पयः पशुः सोम आज्यमिति । ॥१॥

तेषां पृथक्पृथग्धर्माः पृथगधिकरणानि । यथाधिकरणं

---

१ प्राकृत all exc. D.

Digitized by Google

मग्ना दृष्टास्तांश्च मिथः संवादयेन्नादेयाद्येनयेन्[1] यजुर्भिः संसिध्येत्तेनतेन तत्कुर्यात्तत्तस्याधिकरणमुक्तान्यधिकरणानि यज्ञ इति। किमुपज्ञो यज्ञः श्रद्धोपज्ञो मानुष[2] इति। क उ खलु यज्ञ इति। पुरुष इति। का उ खलु देवता दीक्षेति। वागिति। का उ खलु पथ्या स्वस्तिरिति। [3]वागेवेति। का उ खल्वेकाक्षरा गायत्रीति। वागेवेति। क उ खलु यज्ञस्यारम्भः का प्रतिष्ठेति। विज्ञायते[4] स्वाहा यज्ञं मनसा स्वाहा द्यावापृथिवीभ्याꣳ स्वाहोरोरन्तरिक्षात्स्वाहा यज्ञं वातादारभ इति। वात एव यज्ञस्यारम्भो वातः प्रतिष्ठेति। ॥ २ ॥ प्रथमः ॥ १

कथमु खल्वेतज्जानीयादिदं तन्त्रमयमावाप इत्यन्वाधानप्रभृति तन्त्रमाज्यभागाभ्यामन्यदौषधात्तस्मिंस्तन्त्रे सत्यावापस्थानानि भवन्ति यथैतद्धेनूनां दोहनं कपालानामुपधानꣳ स्तम्बयजुषो हरणमाज्यग्रहा[5] इति यच्च किंचाभिनिवपत्यूर्ध्वं-

---

१ Thus H Ben G U D C Vt, Vc, the Viv. (one copy); संवादये... Be, the Viv. (another copy). The meaning, according to Vc., o... न मिथः संवादयेत् is: न विब्रवीत्।

२ Thus C U H G (pr. m.) Vt Vc and the Viv.; मांसव Be... Be, मांसविक G (sec. m.), पांसव D.

३ वा ins. G U (pr. m.) H.

४ In TS. I. 2, 2, 3.

५ ०यहा Be G U, ०याहा Ben D (sec. m.), ०याहाः H, यहय D (p... m.), ०यह C, याह Vt.

Digitized by Google

माज्यभागाभ्यामेव मध्यत आवापो भवति यस्मिन्नेतद्धवीꣳष्योप्यन्ते तस्मिन्नेवावापजानि[१] तन्त्रस्थानं[२] भजन्ते यथैतदाग्नेयं यजमानभागब्रह्मभागौ स्विष्टकृच्चेडा चेत्येवदानत आवापो भवति तन्त्रं तु प्रदानतः । क उ खलु तन्त्रमावापभूयं गच्छत्यावापो वा तन्त्रभूयमिति । मैत्राबार्हस्पत्ये ऽप्यन्यस्मिꣳस्तन्त्रस्तु ह निर्वपणतो भवत्यावाप उ प्रदानतो । ऽथ वारुणीषु[३] च संज्ञानीष्ट्यां[४] चावापो ह निर्वपणतो भवति तन्त्रं तु प्रदानतो । ऽनूयाजप्रभृति तन्त्रमा समिष्टयजुषो होमात्किंदेवत्या उ खल्वनूयाजा भवन्तीत्याग्नेया इत्येव ब्रूयाद्विज्ञायते तं देवा आहुतीभिरनूयाजेष्वन्वविन्दन्यदनूयाजान्यजत्यग्निमेव तत्समिन्द्ध इत्यृतुदेवता उ खलु प्रयाजा भवन्तीति । ॥ ३ ॥

द्वितीयः ॥

कियत्यः पाकयज्ञसꣳस्थाः कियत्यो हविर्यज्ञसꣳस्थाः कियत्यः सोमसꣳस्था इति । हुतः प्रहुत आहुतः शूलगवो बलिहरणं प्रत्यवरोहणमष्टकाहोम इति सप्त पाकयज्ञसꣳस्था इत्यपरिमिता उ हैके ब्रुवते । यत्र किं चान्यत्र विहाराद्धूयते सर्वास्ताः पाकयज्ञसꣳस्था इत्यथ हविर्यज्ञसꣳस्था अग्न्याधेय-

---

१ एव om. H G U (pr. m.) C ;— ०जानीति G (sec. m.) U (pr. m.)

२ Ben Be ins. पंच ।

३ Thus (sc. इष्टिषु) D and C only; वारुणेषु the other MSS.

४ Thus Ben C and Vc.; संज्ञानीतूष्णीं D; the other MSS. and the Viv. (one copy) and Vt. संज्ञान्येष्ट्यां; संज्ञानेष्ट्यां the Viv. (another copy).

Digitized by Google

मग्निहोत्रं दर्शपूर्णमासावाग्रयणं चातुर्मास्यानि दाक्षायणयज्ञः कौण्डपायिन्य[1] इति । सौत्रामणिमु हैके ब्रुवते । ऽथ सोमसंस्था । अग्निष्टोमो ऽत्यग्निष्टोम उक्थ्यः षोडशी वाजपेयो ऽतिरात्रो ऽप्तोर्याम इति सप्त सोमसंस्था । यदग्निष्टोमस्य क्रतुकरणं तदत्यग्निष्टोमस्य । यदुक्थ्यस्य तत् षोडशिवाजपेययोर्यदतिरात्रस्य तदप्तोर्यामस्येति । सप्तानां सोमसंस्थानां द्वे सत्त्राणि न गच्छतो वाजपेयश्चाप्तोर्यामश्चेति । ॥ ४ ॥

कथमु खल्वेतज्जानीयादियं पूर्वा ततिरियमुत्तरेति । या प्रकृतिः सा पूर्वा ततिरथ यद्विदधाति सोत्तरा ततिरग्न्याधेयं पूर्वा ततिः पुनराधेयमुत्तरा ततिर्दर्शपूर्णमासाविष्टीनां पूर्वा ततिः सर्वाः काम्या इष्टय उत्तरा ततिरैन्द्राग्नो निरूढपशुबन्धानां पूर्वा ततिः सर्वे काम्याः पशव उत्तरा ततिर्ज्योतिष्टोमः सोमानां पूर्वा ततिः सर्वे सोमा उत्तरा ततिः । श्येनचिदग्नीनां पूर्वा ततिः सर्वे काम्या अग्नय उत्तरा ततिर्द्विरात्रो ऽहीनानां पूर्वा ततिः सर्वे ऽहीना उत्तरा ततिर्द्वादशाहो ऽहर्गणानां पूर्वा ततिः सर्वे ऽहर्गणा उत्तरा ततिर्गवामयनं सांवत्सरिकाणां सत्त्राणां पूर्वा ततिः सर्वाणि सांवत्सरिकाणि सत्त्राण्युत्तरा ततिः । कियन्ति नु खलु गवामयनानि भवन्तीति । विज्ञायते[2] यथैतस्यापि पृष्ठमुत्तमे

१ कुंडपायिन्य Be, कौण्डपायिनम् the Viv. (one copy), कौण्डपायिनिस D.
२ om. M Ben U (pr. m.) D C Vt,

Digitized by Google

मासि सकृत्पृष्ठान्युपेयुर्द्वयमाद्यं तृतीयꣳ । सप्त ग्राम्या ओषधयः सप्तारण्याः । सप्त ग्राम्याः पशवः सप्तारण्याः । सप्त छन्दाꣳसि चतुरुत्तराणीति । सप्त ग्राम्या ओषधयस्तिलमाषव्रीहियवाः प्रियङ्गवो ऽणवो गोधूमाः सप्तमे । कुलत्थानु[1] हैके ब्रुवते । सप्तारण्याः श्यामाकाश्च नीवाराश्च जर्तिलाश्च गवीधुकाश्च गार्मुताश्च वास्त्वानि[2] च वेणुयवाश्च सप्तमे । कुरुविन्दानु हैके ब्रुवते । सप्त ग्राम्याः पशवो गोअश्वमजाविकं पुरुषश्च गर्दभश्चोष्ट्रश्च सप्तमे । ऽश्वतरमु हैके ब्रुवते । सप्तारण्या द्विखुराश्च श्वापदानि च पक्षिणश्च सरीसृपाणि च हस्ती च मर्कटश्च नादेया सप्तमे । सप्त छन्दाꣳसि चतुरुत्तराणीति गायत्र्युष्णिगनुष्टुब्[3] बृहती पङ्क्तिस्त्रिष्टुब्जगतीति । ॥ ५ ॥ तृतीयः ॥

अथेदं त्रयं भवति कर्माभ्यावर्ति देवताभ्यावर्ति संख्याभ्यावर्तीति । सावित्रं नु खल्विदं कर्माभ्यावर्ति भवत्यथ देवताभ्यावर्ति ध्रुवाज्यं द्रोणकलशः सर्वपृष्ठेत्यथ[4] संख्याभ्यावर्ति त्रिः पृच्छति शृतꣳ हवी३ः शमितरित्यथापि राज्ञो मानं । क उ खलु मन्त्रमन्तरितं कल्पयेत्स्थानाद्वा स्थानं प्रजिज्ञासीताभिरूप्येण[5] वा प्रौहेण वेति । स्थानात्स्थानमिति यद्वोचाम

१ Thus M Be Ben; कुलित्थानु H G (sec. m.) U D C, कुलुत्थानु Vt.

२ वास्त्वानि G (sec. m.), वास्तानि D C. According to the Viv. वास्तुकम् (Chenopodium) is meant.

३ ०ष्टुभ् M only.

४ i.e. सर्वपृष्ठाख्या काम्येष्टिः (Vc), cp. TS. II. 3, 7, 1.

५ प्रजिज्ञासीत U, ०सित Vt Vc Ben.

Digitized by Google

यो ऽनन्तरो मन्त्र आम्नातः स्यात्तेनैनꣳ सह कल्पयेत्पूर्वकालेन
वोत्तरकालेन वेति । यथो एतदाभिरूप्येणेति यथैतद्भवत्या-
प्यायानः सुवीर्यꣳ रायस्पोषꣳ स्वश्वियम् । बृहस्पतिना राया
स्वगाकृतो मह्यं यजमानाय तिष्ठेति । यथो एतत्प्रौढेणेत्यग्नि-
कल्पः खल्वयमिष्टकाभूयान्समाम्नातस्तंच[1] यो मन्त्रो ऽन्तरितः ९
स्यादिष्टकाभूयमेनमापादयेत् । ॥ ६ ॥

अथायमश्वमेध आहुतिभूयान्समाम्नातस्तंच यो मन्त्रो
ऽन्तरितः स्यादाहुतिभूयमेनमापादयेन्नाप्रक्रान्तं प्रक्रमयेत्
प्रक्रान्तं कर्म तूष्णीं कर्मणाभिपूरयिषेदिति । नाप्रक्रान्तमिति
यद्वोषाम बर्हिर्लवनः खल्वयꣳ ह्रस्वो मन्त्र आम्नातो भवति १०
दीर्घमु कर्म । न कर्मणो हेतोर्मन्त्रो ऽभिनिवर्तेताथायं पश्वो-
र्विशसनो ह्रस्वो मन्त्र आम्नातो भवति दीर्घमु कर्म । न
कर्मणो हेतोर्मन्त्रो ऽभिनिवर्तेताथास्याꣳ स्वयमातृण्णायां दीर्घो
ह मन्त्र आम्नातो भवति ह्रस्वमु कर्म । न कर्मणो हेतोर्मन्त्रो
विरम्येद्यथो[2] एतत्त्रियजुषा सकृत्तूष्णीमिति । लोकाग्नीꣳश्च ११
तेषामुपश्रुत्य स्तम्बयजुश्चेति । यथो एतत्पश्वङ्गत्लो यजुषा

---

१ अयम् given by Ben D C U (pr. m.) Vt, om. by H Be G U (sec. m).—On इष्टकाभूयान् V comments : इष्टकाभिर्भूयान् बहुलः इष्टकोपधानप्रचुर इति यावत् ।

२ Thus Be G U Vt Vc, विरम्येतयथो Ben C D, विरम्येत यथो H; V. comments : न विरम्येत् न विरमेत् विकरणव्यत्ययश्छान्दसः ।

Digitized by Google

पञ्चकृत्वस्तूष्णीमिति राम्नस्तेषां मानमुपश्रुत्येति । [1]यथो एतन्मन्त्रयजुषा सकृत्तूष्णीमिति राम्न एव[2] तेषां[2] मानमुपश्रुत्येति[1] । यथो एतच्चतुरो मुष्टीन्व्रीहीणां निर्वपतीति द्वौ देवतायै स्विष्टकृते तृतीय इडायै चतुर्थ इति सर्व एवैतेषां ब्राह्मणवन्तः । ॥ ७ ॥ चतुर्थः ॥

अथात आदेशकारितानि व्याख्यास्यामो । ऽनादिष्टो ऽग्निरपि तु यथैतद्भवत्यधिदेवने जुहोति रथमुखे जुहोति रथनाभ्यां जुहोति चतुष्पथे जुहोति वर्त्मनोर्जुहोत्याश्वने जुहोति पदे जुहोत्यजायां जुहोत्यजस्य दक्षिणे कर्णे जुहोत्यश्वस्य दक्षिणे शृङ्गे जुहोति ब्राह्मणस्य दक्षिणे हस्ते जुहोति दर्भस्तम्बे जुहोत्यप्सु जुहोत्यौदुम्बर्यां जुहोति वल्मीकवपायां जुहोत्यौपासने जुहोत्युत्तपनीये जुहोति शामित्रे जुहोत्याग्नीध्रीये जुहोत्यन्वाहार्यपचने जुहोति गार्हपत्ये जुहोतीत्यनादिष्ट[4] आहवनीय एव होतव्यमनादिष्टो ऽध्वर्युरपि तु यथैतद्भवत्युन्नेता जुहोति प्रतिप्रस्थाता जुहोतीत्यनादिष्टे[4] ऽध्वर्युणैव होतव्यमनादिष्टं पात्रमपि तु यथैतद्भवत्यञ्जलिना जुहोति

१...१ This clause is found in D U Be G (sec. m.) only; it is commented upon by Bhavasvāmin.

२ Thus D; एवैषां U Be G; some of the MSS. here and supra instead of उपश्रुत्य read उपश्रित्य, which is perhaps the preferable reading, but cp. Vc: उपश्रुत्य समीपे श्रुतिं कृत्वा ।

३ इति supplied by me.

४ इति found in G only.

Digitized by Google

शूर्पेण जुहोति कृष्णाजिनपुटेन जुहोति मध्यमेन पर्णेन जुहोत्युत्तमेन पर्णेन जुहोत्यर्कपर्णेन जुहोति पर्णमयेन स्रुवेण जुहोत्यौदुम्बरेण स्रुवेण जुहोत्यङ्गुष्ठाभ्यां जुहोति विसꣳसिकाकाण्डाभ्यां जुहोति गोमृगकण्ठेन जुहोत्यश्वशफेन जुहोत्ययस्मयेन कमण्डलुना जुहोतीत्यनादिष्टे[1] स्रुचैव होतव्यमनादिष्टा समिदादेशादेव समिधं जानीयादिध्मायते नासमित्के जुहुयायदसमित्के[2] जुहुयाद्यथाजिह्वे ऽन्नं दध्यात्तादृक्तत्स्यात्समिद्वत्येव होतव्यमनादिष्ट उपसमाधायैव होतव्यम् ' ॥ ८ ॥

अथातो ऽवदानकल्पमनुक्रमयति चतुरवत्तं भवतीत्यनादिष्ट उपस्त्यैव होतव्यमनादिष्टꣳ हविरादेशादेवाज्यव्रीहियवेभ्यो जानीयादपि तु नु खलु क्षिप्रसꣳस्कारतममाज्यं ब्रुवते ' ऽनादिष्टः पशुरादेशादेवान्यमजाज्जानीयादेकाग्नाद्यदभिहारं तन्त्रꣳ स्यात्तदभिहारं कुर्यादग्न्यभिहारौ दर्शपूर्णमासौ ' सोम इन्द्राभिहारः ' सावित्रमौषधस्य निर्वपणं दृष्टं भवति ' किꣳ[3] स्वित्सांनाय्यस्य पशो रात्र इति ' दोहनꣳ सांनाय्यस्योपाकरणं पशोर्यदुपाꣳशुसवनमभि मिमीते तद्रात्रः ' प्रज्ञातमन्येषाꣳ हविषां पर्यग्निकरणं ' किꣳ स्विद्रात्र इति ' यदेवादो वसतीवरीः परिहरति तद्रात्र इति ' ॥ ९ ॥

पञ्चमः ॥

---

१ इति missing in G H U D.

२ Thus U Ben G D C; जुहुयायदस॰ Vt, ॰यायदिस॰ Be, ॰यायस॰ [illegible]

३ Thus Be, the Viv. and V.; किम D C, किमु H Ben G U D.

Digitized by Google

अथातः पुरोडाशान्व्याख्यास्यामः । सर्व एवाग्नेया अष्टाकपाला अन्यत्र पौनराधेयिकात्सर्व एवैन्द्राग्ना एकादशकपाला अन्यत्रापवर्गाच्च शुनासीरीयाच्च । सर्व एवैन्द्रा एकादशकपाला अन्यत्र शुनासीरीयात्सर्व एवाग्नीषोमीया एकादशकपाला अन्यत्र श्यामाकात्सर्व एव पशुपुरोडाशा एकादशकपाला अन्यत्र वायव्याद्यद्देवत्यः पशुस्तद्देवत्यः पशुपुरोडाशो ऽन्यत्र वायव्याद्भवति । सर्व एवाग्नावैष्णवा एकादशकपाला अन्यत्राध्वरकल्पायै । तत्रैवाष्टाकपालश्[1] द्वादशकपालश्च भवतः । सर्व एव सावित्रा द्वादशकपाला अन्यत्राश्वमेधिकेभ्यस्तत्रैवाष्टाकपालश्चैकादशकपालश्च भवतः सावित्रो ऽष्टाकपाल इति च । सर्व एव मारुताः सप्तकपाला अन्यत्राश्वमेधिकानां चातुर्मास्यपशूनां पशुपुरोडाशेभ्यो मारुताच्चैकविंशतिकपालादन्यत्र राजसूयिकात्पञ्चशारदीयानां च पशूनां पशुपुरोडाशेभ्यः । किमनुख्यानि नु[2] खलु ते[3] विलेख्यानि कपालानि भवन्तीति । विज्ञायते[4] वैश्वानरं द्वादशकपालं मृगाखरे भूमिकपालं निर्वपेदित्येतदनुख्यानि भवन्तीत्यथ पूर्वसंख्याः । पञ्चप्रयाजश्च

---

१ Thus C Ben U (pr. m.); °कपालौ H Be G U (sec. m.).

२ नु H D C V, तु Ben Be G U.

३ om. H G (sec. m.), found in Ben Be U D C G (pr. m.) V. According to Vo it stands for नाभि. Is the word to be cancelled? The Vivarana makes no mention of it.

४ Cp. T Br. III, 9, 17, 3.

Digitized by Google

नवप्रयाजस्यैकादशप्रयाजस्येति । प्रयाजाः पूर्वसंस्थाः । पर्यग्निकरणं पश्वोरुपांश्वभिषवो ऽग्निष्टोमे गवामयने चतुर्विंशमहस्तदपि विज्ञायते तस्य त्रीणि च शतानि षष्टिश्च स्तोत्रीयास्तावतीः संवत्सरस्य रात्रय इति । ॥ १० ॥

अथ राजयज्ञा । राजसूयो ऽश्वमेधः पुरुषमेधः सर्वमेधः । सोमसवः पृथिसवो[1] मृत्युसवः कामान्नयज्ञः शुनस्कर्णयज्ञ इति चाथादितिदेवता । अग्न्याधेये त्वेव प्रथमश्चरुश्चातुर्मास्येषु द्वितीयः । प्रायणीयोदयनीययोरग्निदीक्षणीयायां । त्रयो राजसूये रत्निमानेषु[2] च प्रायुजेषु चादित्यां मल्हां गर्भिणीमालभत इति चैक इष्टिकल्प । एको व्रात्यस्तोमे । चत्वारो ऽश्वमेधे ऽदित्यै विष्णुपत्न्यै चरुरदित्यै हंससाचिरदित्यै त्रयो रोहितैतास्तिस्रो मेष्य आदित्या । द्वौ सौत्रामण्यामादित्याविर्वशा । षष्ठो ऽष्टादश इति च । त्रीणि तन्त्राणि यज्ञमन्वायत्तानि भवन्ति पञ्चप्रयाजं नवप्रयाजमेकादशप्रयाजमिति । पञ्चप्रयाजेन दर्शपूर्णमासौ काम्या इष्टय इति वर्तन्ते । नवप्रयाजेन चातुर्मास्यान्येकादशप्रयाजेन पशुः सोम इति । सविमानि सर्वकल्पे सर्वाभिप्रायिकाणि भवन्ति । यथैतदग्न्याधेय-

---

१ पृथिवीसवो or पृथिविसवो all, cp. XVIII 6.

२ Thus H Ben D C V, रत्निनेषु G Be U the Viv. (one copy), रत्निनिषु the Viv. (another copy). Read probably रत्निनीषु (sc. इष्टिषु).

मग्निहोत्रं दर्शपूर्णमासौ चातुर्मास्यानि पशुः सोम इति । तदपि विज्ञायते ऽथ यदस्याग्निमुद्धरति सहस्रं तेन कामदुघा[1] अवरुन्द्धे[1] । ऽथ यदग्निहोत्रं जुहोति सहस्रं तेन । षा वै वैश्वदेवस्य मात्रै । तद्वा एतेषामवमम् । तो ऽतो वा उत्तराणि श्रेयाꣳसि भवन्ति[2] । सर्वांल्लोकान्पशुबन्धयाज्यभिजयत्येकस्मै[3] वै कामायान्ये यज्ञक्रतव आलभ्यन्ते । सर्वेभ्यः कामेभ्यः पशुः सोम इति । ॥ ११ ॥ षष्ठः ॥

अग्नीनाधास्यमानः प्रज्ञमात्मानं कुर्वीत । येनास्याकुशलꣳ[4] स्यात्तेन कुशलं कुर्वीत । यान्यृणान्युत्थितकालानि स्युस्तानि व्यवहरेदनुज्ञापयीत वाप्यग्न्याधेय एवर्त्विजां वरणं प्रथममुदाहरामस्तस्य चेत्पूर्वपुरुषैर्वृताः स्युस्तानेव नातिवृणीताव्यवच्छिन्नाश्चेत्कौलेनाध्ययनेन मानुषेण शीलवृत्ताभ्याꣳ स्युरिति । किंगत उ खल्वतिवरणं वावरणं वा भवतीति । स्वयमचारी-

---

१ Thus Be G (sec. m.), ०दुघोवरु० U D C H V, दुघावरु० Ben G (pr. m.).

२ भवंतीति C Ben.

३ After ०जयति Be and G (sec. m.) ins. इति ।

४ Thus (and cp. XXV. 4 init.) U G D C Be and the Viv. (one copy). येनास्य कुशलं H Ben V and the Viv. (another copy). The Vivaraṇa runs: येनास्याकुशलं स्यात् धमादिना तेन साम्यं कुर्वीत, the Bhāṣya of Veṅkateśvara: येनास्य कुशलं स्यात् येन संभारो नास्ति तं संपादयेदित्यर्थः ।

Digitized by Google

दभ्रमंस्खाद्याध्वमयाजयत्साद्दितं[1] कर्म तदु हाखित[1]
इत्येतेषामेकस्मिन्नतिवरणं वावरणं वा भवतीति । तांस्त्वे-
ह्वृणीताव्यापन्नाङ्गानेव वृणीत । कं नु खल्वेषां प्रथमं
वृणीत । यो ऽस्य संस्तुततमः[2] स्यात्तं प्रथमं वृणीत ।
तेन सचिवेनान्यान्भिलप्सेत । यद्यु वै यथाज्येष्ठं ब्रह्माणं प्रथमं
वृणीताथ होतारमथोद्गातारमथाध्वर्युं । ब्रह्माणो वानन्तर-
मध्वर्युं । पूर्वं वोत्तरं वा यथाक्रमं चेत्स्यात्सृष्टेन धनेनर्त्विजः
प्रतिसंवसीत । चौष्यधिकरणान्यृत्विजां विनापि[3] यज्ञे[3]

---

१ Thus (अभ्रमंस्खात्) all. I guess this word to be a corruptio
from an original अभ्रमंस्ख । The commentaries find the word
'sickness' in it. V.: आभिमुख्येन रोगवत् बाधकत्वेन खिन्नः । The Viv
आत्मानं (var. अप्रोनं) जिघांसति । अम रोगे । आभिमुख्येन रोगभूत (va
रोगहत) खिदति । अभ्रमंस्खा इति धेड् खिदः (var. धेड्षः) रोगत्वेन खिदः ।
आद्दितं all the MSS. exc. Be (आतं), G (sec. m. ओदं) and U
(अन्कुखितं); कुत्सितं, however, seems to be the periphrase of o
word in the commentaries; V.: आद्दितं कुत्सितं कर्म वैनाभिचारत्वमा
Perhaps the original reading of our passage has been: येनमा
दभ्रमंस्खाचाध्वमयाजयसत्साद्दितं कर्म तदु आखिवेति । आखित 3rd si
root aor. med. from आखिदते । Moreover instead of the impf. अ
जयत् we expect an aorist.

२ संस्तुततमः D and U (sec. m.).

३ Thus (विनापि यज्ञे) all (also Vt, Vc). exc. C, which has वि
विपक्षे; the correct reading (see the Viv. and the Bhāṣya:
भिक्षामि) seems to be either विना विपक्षे (see the reading of C)
विनापीयक्षे (इयक्षे for regular इयक्षे, cp. the remark on XXIII, 1
176, 12).

Digitized by Google

ऽप्याग्निषि[1] भार्यामक्रषीति । को नु खल्वृत्विजु धर्म इति । य आचार्य इति । कथमर्हेण इति । ॥ १२ ॥

आगमन्नागम इत्येकमृतुमुखमृतुमुख इत्येकं संवत्सरस्य पार इत्येकं । यज्ञाधिगम इत्येतदपरं । को नु खल्वृत्विजां धर्म इति । न न्यस्तमार्त्विज्यं कुर्यान्नानुध्यातं । नावक्रीतो याजयेन्नाहृतो याजयेन्नातिवृत्तो याजयेन्नानूद्देश्यं[2] याजयेन्नीतदक्षिणं[3] याजयेन्नापरपक्षे याजयेन्नार्तं याजयेन्न मृतं याजयेन्न चिकित्सिनं याजयेन्न परिक्षातिक्रान्तं[4] याजयेन्नाम्नगं

---

१ Thus Be G and U (sec. m.) and both copies of the Viv.; ऋषिषि U H Ben, Vt. Vc; C corrupt; the Viv.: राजकुलचोरादिभिः कृतसर्वस्वो ऽस्मि, the Bhāṣya: राजाद्युपद्रवादिना हृतसर्वस्वो ऽस्मि ॥ On चक्राषिषि for original चक्राषिषि cp. Indog. Forsch. XVIII. 421, M.S.L. XIV. 192. See also infra XXIV. 18 : 202. 2.

२ Thus G Ben U D G (pr. m.) Vt, and cp. T Br. III. 11. 8. 8 with the remark of Sāyaṇa a. h. l.; नुद्देश्यं Be, the Viv. (one copy); °नुद्देश्यं G (sec. m.) C, the Viv. (another copy); नूद्देश्यं H. The Viv.: ऋत्विजां यज्ञे ऽन्यत्रै चोद्दिश्य करोति; the Bhāṣya: अन्यस्य कुल-मुद्दिश्य स्वयमस्वतन्त्रः सन्यो यजति तम् ।

३ Thus (as S'āṅkh. śrs. V. 1. 10) G C, the Viv.; नीचदक्षिणं (as Āśv. gṛhs. I. 23. 20) the other MSS. The Bhāṣya (दक्षिणानयनानन्तरं यस्य कस्य चिदृत्विजो ऽनुपपत्तौ सत्यां तस्यार्त्विज्यं न कुर्यादित्यर्थः) and the Vivaraṇa (दक्षिणादानोत्तरकालम्) derive नीत from नयति; it is rather the partic. from न्येति; cp. नीतस्य XVIII 41 : 393. 7

४ परिक्षा° Be Ben C D V.

Digitized by Google

याजयेन्नान्तजं[1] याजयेन्नानूचानं याजयेदपि वैतेषां[2] तं
याजयेद्यः कपालान्युपहन्यादकृत्तिप्रेक्षे वर्तमाने । तदपि ह्यायत्तं
विज्ञायते ऽवर्त्या शुन आन्त्राणि पेचे न देवेषु विविदे
मर्डितारम् । अपश्यं जायाममहीयमानामधा मे श्येनो
मध्वाजभारेति । नैतेषामयाज्यः कश्चनदक्षिण इति । ॥ १३
॥ सप्तमः ॥

I. 53. 3. ऊषाश्च सिकताश्चेति । ये भस्मरा इवोषाः सुखागारा-
I. 53. 4. रयेदारण्यस्य वराहस्य विहतादाहारयेदारण्यस्याखोरुत्करादा-
हारयेद्यो ऽनुपदासी सूदः स्यात्तत आहारयेत्सूदे ऽविद्यमाने
I. 53. 6. कुलीरसुषिरादाहारयेदग्निहते ऽविद्यमाने शीतहतमाहा-
I. 53. 7. रयेदातपहतं वा । पिचियश्चाश्वत्थश्चेति । येन ग्रामो वा नगरं
I. 53. 9. वा नदी वा तीर्थं वा स्नायते तत आहारयेदश्वं पूर्ववाह-
मिति । युवानमित्येवेदमुक्तं भवति । चीन्हिरण्यमस्कानिति[3] ।
षड्डिमान्कारयेत्सौवर्णां[3] उपासनार्थां[4] राजता अतिप्रदानार्थां ।

---

१ Thus Be, नान्तजं G D C. Viv., Vt; ताक्षजं H; Ben. om. th…
word; the Bhāṣya: पूर्वोक्त (sc. श्वेच्छ) हैमजातम् । शूद्रस्त्रियामुत्पन्नमित्…

२ Thus H Be U (sec. m.) the Viv.; चैवेषां Ben G C U (pr. m…
and Vc. (अपि च अपि वेतार्थः) ।

३ Uncertain reading. H G U (sec. m.) Be (only °मस्कोनिति…
and U (sec., only मस्काकानिति) read as given in the text; चीन्हि…
मस्का (मस्का D C) न्कारयेत्सौ° Ben D C; षड्डिरण्यमस्कान्कारयेत्सौ° V…
Are we to correct: षड्डिरण्यमस्कानिति । चीष्टौनिमान्कारयेत् ?

४ Thus Ben C H D G (pr. m.) Vt; चौपास° Be G (sec. m…
the Vivaraṇa.

Digitized by Google

उभौ मानुषेणालङ्कारेणालङ्कृतौ भवतो ऽहतवाससाविति । सर्व एवान्यो मानुषो ऽलङ्कारो ऽन्यत्र गन्धादार्द्रार्थायैवैतदुदाहरन्ति । स्रजस्तु हैके प्रतिषेधयन्ति । ॥ १४ ॥

ताः संवत्सरे पुरस्तादादध्यादिति । त्र्यहे षडहे द्वादशाहे वा । संवत्सरे ऽपर्यवेत उदायति कथं तत्र कुर्यादिति । पुनरेव ब्रह्मौदनꣳ समुत्थापयेद्वा समिधामभ्याधानात्तं न केशश्मश्रु वापयीत । पुरस्तात्त्वेवैतत्संवत्सरꣳ[१] संचयीत । प्रायश्चित्तार्थ एष उक्तो[२] भवति । स यावत्कृत्व उदायेदेवमेव कुर्यात्पर्यवेते सोपनमेदेवमेव कुर्यादुपनमत्युपवसथगविप्रभृति कर्म तायते । द्विब्रह्मौदनस्तु[३] हैके ब्रुवत उच्छेषणीयो हेतरः[४] सान्त्वकरण उत्तरो । ऽथ संभारेषूपानिवपन्यदद्चन्द्रमसि कृष्णं तन्मनसा ध्यायेत्तदपीहेति । सामानि चेत्प्रत्यधीयीत योनीर्निगदेदपि वा व्याहृतीभिरपि वा हिंकारेण । प्रणीतालोकेन रथचक्रं प्रवर्तयेत्तस्य चेदादधानस्य पुरस्ताच्चन्द्रमा दृश्येत कथं तत्र कुर्यादिति । यः कर्मान्त आरब्धः स्यात्तं परिनिष्ठाप्य कर्मान्तेनोपरमेच्छ्वो भूते परिनिस्तिष्ठेदित्यथ चेदिमे ऽभ्याहिते

१ Thus Be G; •त्वेवैतत्संवत्सरं U (sec. m.); एतत् (एतत्) not found in Ben U (pr. m.) D C Vt.; in H the whole passage is left out.

२ Found in G Be U (sec. m.) only.

३ Thus G Be U Ben; द्विर्ब्र॰ H G D C, the Viv.

४ Thus Be U (sec. m.) the Viv.; चेतरः Ben H G C U (pr. m.) Vt; चितरः D.

Digitized by Google

दृश्येत कथं तत्र कुर्यादिति । पूर्णाहुत्यन्तं कर्म कृत्वा कर्मान्ते-
नोपरमेच्छ्वो भूते परिनिस्तिष्ठेदिति । ॥ १५ ॥ अष्टमः ॥

I. 53. 13. अथात ऋतुनक्षत्राणामेव मीमांसा । ऋतूनेवाग्रे व्याख्या-
स्यामो ऽथ छन्दांसीति । वसन्ते ब्राह्मणो ऽग्निमादधीत ग्रीष्मे
राजन्यः शरदि वैश्यो वर्षासु रथकार इति । सर्वेषां त्वेव
वसन्त आधानं सर्वेषां रोहिण्यां । यथावर्णं त्वेव छन्दां-
स्यपि तु नु खलु कामनियुक्तान्यग्न्याधेयानि भवन्ति । यथै-
तद्भवति कृत्तिकास्वग्निमादधीत रोहिण्यामग्निमादधीत पुनर्व-
स्वोरग्निमादधीत पूर्वयोः फल्गुन्योरुत्तरयोः फल्गुन्योश्चित्राया-
I. 53. 16. मिति । सद्यस्कालान्येतानि भवन्ति[1] । ग्रीष्मे राजन्यः शरदि
वैश्य इति नैते सद्यस्काले भवतो । ऽथात आर्तिजान्यग्न्या-
धेयानि व्याख्यास्यामो । विपक्ष आपूर्यमाणपक्षे विपक्षे ऽपक्षी-
यमाणपक्ष इति । विपक्ष आपूर्यमाणपक्ष आदधानो यावान-
क्षावकाशः[2] स्यात्तमभिविदधीत । पौर्णमास्यां तु[3] सद्यस्कालं ।
विपक्षे ऽपक्षीयमाणपक्ष आदधानो[4] नाक्षावकाशः[4] काङ्क्षणाय
विद्यते । सर्वमेवैतदहः सद्यस्कालं कुर्याच्चतुर्होतारं सारस्वतौ
होमावन्वारम्भेष्टिमिति । ॥ १६ ॥

---

१ भवंतीति Be.

२ Thus G Be H U (sec. m.), the other MSS. and the Viv. om
यच ।

३ Found in Be U (sec. m.) only.

४ चादधीत यावानचावकाशः U (sec. m.) only. Are we to read चादध
with Vc ?

Digitized by Google

अथ पौर्णमासवैमृधाभ्यामिष्ट्वामावास्यामेव ततः काङ्क्षेदथ चेदमावास्यायाꣳ सद्यस्कालममावास्यान्तमथ सारस्वतौ होमौ जुहुदृचैवर्चमुपसंदध्यादेवं पूर्णदर्व । एवं वास्तोष्पतीये । कथमु खलु पूर्णाहुतिं जुहुयादग्नये पृथिव्यै वायवेऽन्तरिक्षाय सूर्याय दिवे वरुणायाग्नः स्वाहेति जुहुयादथेदं तूष्णीमग्निहोत्रमग्निसꣳस्कारार्थं दृष्टं भवति । तदाज्येनैव जुहुयाद्वाचीनमवमृज्योर्ध्वमुन्मार्ष्टुभे एवैते सायंप्रातरग्निहोत्रे प्रतिजुहुन्नन्यत चौपवसथिकायै रात्रेः । सामिधेनीरनुवक्ष्यन्दशहोतारं व्याख्याय व्याहृतीरुक्त्वाथ[1] हिंकुर्यादथानुब्रूयादेतदत्रानुपूर्व्य[2] भवति । कथमु खल्वग्न्याधेये सोम इति । पूर्णाहुत्यन्तं कर्म कृत्वा शालामध्यवस्येद्दीक्षणीयामाग्नेयोऽष्टाकपालोऽनुवर्तेत प्रायणीयामैन्द्राग्नस्यादित्यस्य[3] चरुरातिथ्यामग्नये[3] पवमानाय पुरोडाशोऽष्टाकपालोऽग्नीषोमीयस्य पशुपुरोडाशमग्नये पावकायाग्नये शुचये प्रातःसवनीयानन्वारम्भेष्टिरपि वा सर्वाण्येवाग्न्याधेयिकानि हवीꣳषि परिनिष्ठाप्य शालामध्यवस्येदुदवसानीयामन्वारम्भेष्टिरिति[4] । ॥ १७ ॥ नवमः ॥

---

१ अथ om Be.

२ ॰पूर्वं H.

३ Thus G U (sec. m.) and cp. XX, 19 : 20, 24; ॰मैन्द्राग्नस्यादित्यस्य॰ U Vt. ॰मैन्द्राग्न्यदित्यस्य॰ Be.

४ Thus Be only (sc. अनुवर्तेत), cp. the Viv.: उदवसानीयानन्तरमन्वारम्भेष्टिः । All the other MSS. and V: उदवसानीयायामन्वा॰ ।

Digitized by Google

I. 69. 1. अथेदं पुनराधेयं । किंनु खलु पुनराधेयं भवतीत्यग्नीनाधाय पापीयानभूवमप्यास्थिषि[1] पुत्रो मे मृत[2] इत्येतस्मिंस्त्वेवैतत्संवत्सरे दृष्टं भवति । कस्मिंनु खल्वेनत्काले
I. 69. 6. समुत्थापयेदिति । या आषाढ्याः पौर्णमास्याः पुरस्तादमावास्या[3] भवति या सकृत्संवत्सरस्य पुनर्वसुभ्याꣳ संपद्यते तस्यामादधीतेति । तस्या उपवसथे ऽरण्योरग्नीन्समारोप्योद्वसाय[4] मथित्वाग्नीन्विहृत्योद्वासयन्त्येवाग्नीन्समारोप्य[5] गच्छेत्पुनरेतदग्न्यगारꣳ[6] संस्कारयेदन्यद्वा नवं कारयेत्पुनरेतानि यज्ञ-
I. 70. 16. पात्राणि संलेखयेदन्यानि वा नवानि कारयेत्पुनर्निष्कृतो रथो दक्षिणेति पुनःसंस्कृत एवैष उक्तो भवति । पुनरुत्स्यूतं

---

१ Thus again (and cp. XXIV, 12 : 197, 1) Ben Be G, the Viv. and Vc (twice); अध्यासिषि H U Vt and Rudradatta on Āp. V, 26. 3. D and C are defective. Here Bhavasvāmin remarks: अध्यासिषि अध्यासिष्मः (Var. अध्यास्मःसषि)। यमरमनमातां सक् चेति (Pāṇ. VII, 2, 73). स आगमा अध्यासिषीति भवितव्यं। वर्णव्यत्ययेन सकारस्य थकारः स्यात्। चोरो ऽसि धनमरीरादिना ।

२ Thus all; probably the original reading was: पुत्रो मे ऽमृतेति ।

३ Instead of पुरस्तात् G H Be उपरिष्टात् ।

४ Thus Be Viv.: ०समारोप्यो० H Ben C Vt.

५ Instead of उद्वासयन्त्ये० one copy of the Viv. and Vt: उद्वासयिन्ये०, another copy of the Viv.: उद्वासये० ।— The reading ०ग्नीन्समारोप is uncertain: thus read H G U C D, ०ग्नीनुपरोप Be, ०ग्नीरोप Ben, ०ग्नीनवरोप Vt (pr. m.), ०ग्नीनवरोप Vt (sec. m.) Vc. The Viv. gives the periphrase: तत्रैवाग्नीनुत्सृज्य, cp. Āp. V, 27, 3.

६ Thus Ben U (pr. m.) Vt, पुनरेवाग्न्य० G H Be U (sec. m.).

Digitized by Google

वाय इति पुनःसंस्कृतमेवैतदुक्तं[1] भवति । पुनरुत्सृष्टो ऽनड्वानित्यवगीर्णगव एवैष उक्तो भवत्यथेमान्युपांशुधर्माणि भवन्ति यथैतदग्न्याधेयं पुनराधेयं पितृयज्ञो दीक्षणीया प्रायणीयातिथ्योपसदः प्रातरनुवाकः पत्नीसंयाजा[2] अवभृथ उदयनीयोदवसानीया चितिप्रणयनीयं त्वाष्ट्रो यूपविरोहणीयो ऽष्टापदी[3] गर्भवती[4] च[4] । सहकारिप्रत्यया[5] भवन्ति[5] । यथो एतद्बौधायनस्य कल्पं वेदयन्ते ॥ १८ ॥

सर्पराज्ञिया[6] ऋग्भिर्गार्हपत्यमादधातीत्यपोद्धृत्य घर्मशिर एतस्य स्थाने सर्पराज्ञीरावपेदित्येनोपस्थाय पौनराधेयिकेनोपतिष्ठेत । विद्भुमत ऊर्ध्वमीजानस्य पुनरादधानस्य संनये३त्[7] संनये३दिति[7] । संनयेदित्येक आहुरथ हैक आहुर्न संनयेदिति । शरीरसंस्पर्शी ह यज्ञो भवति यदेव[8] पुनर्य-

---

१ उक्तं supplied by me.

२ Thus Ben U (pr. m.) D C, °याजाः अवभृ° Vc, °याजोवभृ° G H Be U (sec. m.).

३ ष्टापदी G and U (sec. m.) Be.

४ Thus D C U (pr. m.) Vt; गर्भ इति G and U (sec. m.) Be; गर्भवती इति च Ben, गर्भवति च H.

५ °कारी U (sec. m.) D.— °प्रत्ययाद्भव° (°यात् भव°) Vt Vc. and Be; the word occurs also II. 2 : 35, 16.

६ Thus G U D C Ben V; °राज्ञीया Be, सार्पराज्ञिया H.

७ Plutimark only in Ben U Vt.

८ Thus Ben U D V; यदेव G H, यदेत Be, यद्देव C.

Digitized by Google

I. 70. 12. अेताय संनयेच्छताक्षरा भवन्तीत्यक्षरपङ्क्तय[1] एतास्तस्य एकैका
I. 71. 12. पञ्चविंशत्यक्षरा । तच्छतमथेदं तृतीयाधेयं[2] । कतरत्तु
खल्विदमुपिनिश्रयतीत्यग्न्याधेयं वा पुनराधेयं वेत्यग्न्याधेय-
I. 72. 1. मित्येव ब्रूयादथापवृताग्नेर्नष्टारणीकस्य च[3] ब्रह्मौदनेनैव प्रति-
पद्यते । सिद्धमग्न्याधेयम् । ॥ १९ ॥ दशमः ॥

I. 1. 4. अथेमौ दर्शपूर्णमासौ पौर्णमास्युपक्रमावमावास्यासंस्था-
वाचार्या[4] ब्रुवते । तयोदाहरन्त्यूर्ध्वं मध्यरात्रात्पौर्णमास्यां
चन्द्रमाः पूर्यते । स एतं चापररात्रं पूर्णो भवति सर्वं चाह-
रुत्तरस्याश्च रात्रेरा मध्यरात्रादथामावास्याया[5] उपवसथीये
ऽहन्यूर्ध्वं मध्यंदिनाच्चन्द्रमसमादित्यो लभते । स एतं चापरात्रं
लब्धो भवति सर्वां च रात्रिमुत्तरस्य चाह्न आ मध्यंदिनादेतꣳ
सन्धिमभि[6]यजेतेति । रात्रिर्हं पौर्णमास्याꣳ संधेया भवत्य-
हरमावास्यायां । द्वे पौर्णमास्यौ द्वे अमावास्ये । पूर्वांपूर्वां पौर्ण-
मासीमुत्तरामुत्तराममावास्यां । या पूर्वा पौर्णमासी सानुमति-

---

१ ॰पंक्तय H Be G Vc; ॰पंक्तया Ben Vt, ॰पंक्तय U C, पक्तय D; cp. TS. I, 5, 2, 1; the four akṣarapaṅktis are TS. IV, 4, 4, w-z.

२ Thus G Be Ben the Viv. (and thus is to be read also III, 3: 71, 17 instead of तृतीय चाधान); तृतीयमग्न्याधेयं H U D C V.

३ Found in Ben D G U C only.

४ Thus U G D C Be V and the Viv.; पौर्णमासोप॰ H Ben, see also Pitṛmedhasūtra I, 1 : 16.

५ चय found in Be G (sec. m.) U and the Viv.

६ ॰मभितो G and U (sec. m.).

Digitized by Google

योत्तरा सा राका या पूर्वामावास्या सा सिनीवाली योत्तरा सा कुहूर्गायत्री वा अनुमतिस्त्रिष्टुब्राकेति पौर्णमास्यै नामधेये जगती सिनीवाल्यनुष्टुप् कुहूरित्यमावास्यायै नामधेये । ॥ २० ॥

अथायं चन्द्रमाः षोडशकलस्तस्य[1] पञ्चदशभिः[1] पक्षो[1]ऽभिविहितो[1] भवति । षोडशी त्वियं कला बहुधा विप्रविष्टा ब्राह्मणेष्वप्स्वोषधीषु वनस्पतिषु पशुष्विति । स यदेतानि यज्ञे क्रियन्ते तेनैषा संभ्रियते । ऽथोपवसथस्थानानि चतुर्दशी पञ्चदशी षोडशी । न तु त्रयोदशी सप्तदशी भवतः । सो ऽयमाहिताग्निरुपवसथीये ऽहन्पुरा प्रातरग्निहोत्रात्पिञ्जूलानुप-सादयेदन्वाधानार्थान्व्रतोपायनीयं[2] पाचयीत । तस्याशितौ भवतः । सर्पिर्मिश्रं दधिमिश्रमक्षारलवणमपिशितं[3] । सर्वमेवै-तदहः[4] कौशीधान्यं[5] वर्जयेदन्यत्र तिलेभ्यस्तस्य ब्राह्मणं प्रति-

---

१ Thus Be H, G and U (sec. m.); ०कलः स षोडशभिर्दंपक्षोभिवि० D C; ०कलः शभिर्दंपक्षोभिवि० Ben; ०कलः स पंचदशभिर्दंपक्षोभिर्वि० Vt; Vc: शुक्लपक्षे स चन्द्रमाः पञ्चदशभिः पक्षोभिस्तिथिभिः प्रतिपदादितिपौर्णमासीपर्यन्तैः विहतः कल्पितो भवति ।

२ Thus (पिंजूलान्) U H D C and a citation by Sāyaṇa; पिंजूलान् Be Vt Vc, पिंजूलानि the Viv., पिञ्जूलान् Ben G. Sāyaṇa: कुशकाण्डविशेषान्, Veṅkaṭeśvara: कुशकाण्डानि, Bhavasvāmin: काण्डानि कुशानि ।

३ Thus (अक्षारलवणम्) Be D and a citation by Sāyaṇa; ०क्षारलवण० H, ०क्षारमलवण० G U C, Vt, Vc.

४ Thus H G Be U (sec. m.) and a cit. by Sāyaṇa; एव om. Ben D C V.

५ Thus (and cp. II. 20 : 67, 1) G Ben, कोशी(शि)० D C U H V Be and a citation by Sāyaṇa.

Digitized by Google

पाद्याश्नीयान्नैतदहः शूद्रायोच्छिष्टं दद्यात्पत्न्या एवैतदहरुच्छिष्टं दद्यान्नाधस्ताच्छयीत न स्त्रियमुपेयात्कामं त्वेवोपरि शयीत स्त्रियं त्वेव नोपेयाद्व्रतचारी त्वेव स्यात्स यदि केशश्मश्रु वापयिष्यमाणः स्यात्केशश्मश्रु वापयित्वा लोमानि संहृत्य नखानि निकृन्तयीत । स्नायादभ्यञ्जीताञ्जीत । दीक्षायै रूपं कुर्वीता-
I. 1. 5; III. 3. 4. थैनमन्वादध्यादुपस्थं कृत्वा गार्हपत्यमूर्ध्वज्ञुरन्वाहार्यपचनं प्रह्व
माहवनीयं तिष्ठन्दशमौं निगदेदिति । ॥ २१ ॥ एकादशः ।

अन्वाहिताश्चेदग्नय उद्वायेयुः सवनीयं गार्हपत्यस्याहवनीय उद्वाते भस्मोद्वाप्य शकृत्पिण्डेन परिलिप्य ज्वलन्तमाहवनीयमुद्धृत्य न्युप्योपसमाधाय पुनराधाय व्याहृतीभिरुपतिष्ठेताथ यद्यन्वाहार्यपचन[1] उद्वायेदेवमेवैनं हरेदनार्ता ह्येषा देवता यदन्वाहार्यपचन इति । पुनराधाय व्याहृतीभिरुपतिष्ठेताथ
II. 193. 17 sqq. यस्याग्निमनुद्धृतं सूर्यो ऽभ्यस्तमियादभ्युदियाद्वा यथासूत्रं[2]
वा कुर्यादपि वा संतनौ[3] जुहुयान्मनो ज्योतिर्जुषतां त्रयस्त्रिंशत्तन्तव इत्येते स्रुवाहुती हुत्वा व्याहृतीभिरुपतिष्ठेताथाभ्यस्तमिते वारुणीं स्रुवाहुतिं हुत्वा व्याहृतीभिरुपतिष्ठेताथाभ्युदिते मैत्रीं स्रुवाहुतिं हुत्वा व्याहृतीभिरुपतिष्ठेत । व्याहृतीभिरेवान्वाहार्यपचनमथारण्योरग्निषु समारूढेष्वात्मनि

१ यदन्वा॰ Ben H, यद्यन्वा॰ B G U, यद् om. C.

२ See XIV, 24 : 193, 19 sqq.

३ Thus (cp. III, 14 : 84, 9) Be G D U; संततिं H, संततौ संतति Ben.

Digitized by Google

वाध्वगते न प्रायश्चित्तमाचार्या ब्रुवते । तचोदाहरन्ति काममात्मनि समारूढेष्वरण्योरुपावरोह्य मन्थेदपि वामात्यं विहृत्य[१] तस्मिन्नुपावरोह्य जुहुयादथारण्योः समारूढेषु मथित्वाग्नीन्विहृत्य जुहुयादपि वामात्यं विहृत्याग्नीनन्तरारणी[२] निधाय जुहुयात् ॥ २२ ॥

यथा राजविप्रामेवं[३] निर्मन्थ्यो वृथाग्नेस्तत्सिद्धमेके[४] ब्रुवते । यावति कृष्णमृग उपविशेत्तावदवरार्ध्यो[५]ऽध्वगतो[५] विहारो । ऽग्नीनन्वादध्याद्व्रतमुपेयाद्व्रतोपेतस्य पर्णशाखामाच्छेद्यादेतदथा-

---

१ Ben H U D मथित्वा instead of विहृत्य; विहृत्य मथित्वा Be; G om. pr. m. विहृत्य, sec. m. मथित्वा ।

२ Thus H Be G D U (sec. m.); Ben U (pr. m.) ins. मथित्वा before विहृत्य ।— वंतरारणी Be G U, वंतराणि Ben H, वंतराणी D. In C this whole passage runs as follows: अपि वामात्यं मथित्वा तस्मिन्नुपावरोह्य जुहुयादथारण्योः समारूढेषु मथित्वाग्नीन्विहृत्य जुहुयादपि वामात्यं मथित्वा विहृत्याग्नीनन्तराणी निधाय जुहुयात् ॥ २२ ॥ Cp. also Rudr. on Āp. IX. 3. 3.

३ राजा॰ Ben C and one copy of the Viv.; this seems to be the better reading.

४ Thus Ben D U (pr. m.) C and the Viv.; तच सिद्ध॰ Be H G U (sec. m.). About the meaning of these words I am uncertain.

५ Uncertain reading. G as given in our text; ॰वरार्ध्योऽध्वगतो H; ॰वरार्ध्योऽध्वगतो U; ॰परार्ध्योऽध्वगते C; ॰पराद्ध्योऽध्वंगते Ben; ॰वरार्ध्योऽध्वंगतो Be; ॰परार्ध्योऽध्वंगतो D. The Vivaraṇa runs: तावदवरार्ध्यो जघन्यावस्थानतश्चो न (one copy om. न) भवति अर्ध्वं द्वादशाह विक्रमेष्वित्याचार्यैर्विहरण- (॰विहार another copy) भूमिक्रमः ।

Digitized by Google

नुपूर्व्यं भवत्यथेमानि[1] त्रीणि पलाशजातानि भवन्ति स्वल्पको लोमशको व्रततिरिति । लोमशकस्यैवैषा[2] छेत्तव्या भवति । यावन्मात्रे गौर्निकर्षेत[3] न[3] तत[3] ऊर्ध्वं छिन्द्यादुपशयात ऊर्ध्वं स्यात्सं यद्यु हाग्निहोत्रोच्छेषणात्प्रमाद्येत्तत्पुनरेवाग्निहोत्रं[4] जुहुयादथेमाः सांनाय्यदुहः षड्वमाः[5] समाम्नाता भवन्ति । तासां तिस्र एव स्युः प्रथमां वोत्तमां वा चतुर्विगृह्णीयादथ चेद्द्वे एव स्यातामितरेतरां त्रिस्त्रिर्विगृह्णीयादथ

I. 5. 5. चेदेकैव स्यात्तामेव षट्कृत्वो विगृह्णीयादित्युह्य वागनन्वारभ्योत्तरा[6] दोहयेदित्यपरिमितानामेवैतदुक्तं[7] भवतीति । ॥२३॥

द्वादशः ॥

I. 6. 2. द्वादश द्वन्द्वानि दर्शपूर्णमासयोस्तानि संपाद्यानीति । स्फ्यश्च कपालानि चेति पञ्च । वत्सं चोपावसृजत्युखां चाधिश्रयतीति सप्त । तानि द्वादशामावास्यायामेवैतत्संभवत[8]

---

१ Only Be has इति after भवति ।

२ Thus U (sec. m.) and a citation by Sāyaṇa; एव om. D Be C H G; एवैषा om. Ben.

३ Equally uncertain. निकर्षेवेनतत U (sec. m.), निकर्षवे न तत a citation by Sāyaṇa; निकषवेतत G D, निकषेततत Ben, निकर्षवेत C, निकर्षवेतत Be U (pr. m.), निकषेतत H.

४ Thus G U; प्रमाद्येतपु॰ Ben C D, प्रमाद्येत्पु॰ Be, प्रमाद्येत्पु॰ the other MSS. The Viv. om. तत्, as also Rudr. on Āp. I. 11. 1.

५ षड्वराः D C and a cit. by Sāyaṇa.

६ After गृह्णीयात् G and U (pr. m.) ins. त्रिर्नन्वेव त्रिरूर्ध्वोव ।

७ दोहयत्य॰ instead of दोहयेदित्य॰ Be G U; दोहयितादित्य॰ C.

८ एव om G and U (sec. m.), H Be.

Digitized by Google

उपपद्यते नासंनयतो । ऽथेयं दार्शपौर्णमासिकी[1] वेदिर्यजमानमात्री भवत्यपरिमिता वा । यथासन्नानि हवींꣳषि संभवेदेवं तिरश्ची । प्राची वेद्यꣳसावुन्नयत्याहवनीयस्य परिगृहीत्यै । प्रतीची श्रोणी निर्हरति गार्हपत्यस्य परिगृहीत्यै । पुरस्तादꣳहीयसी पश्चात्प्रथीयसी मध्ये संनततरा भवतीत्येवमिव[2] हि योषेति । तस्यै वदतीयतीं खनति[3] प्रजापतिना यजमानमुखेन संमितामा प्रतिष्ठायै खनतीति । द्व्यङ्गुलं खेयेत्येकेषां । त्र्यङ्गुलं खेयेत्येकेषां । चतुरङ्गुलं खेयेत्येकेषाꣳ । सीतामात्रीत्येकेषाꣳ । रथवर्त्ममात्रीत्येकेषां । यावत्पार्ष्ण्यै स्वेतमित्येकेषामेतदेव सदन्येषामनुनिक्रान्ततरं भवति । नैतामात्रा अतिखनेद् । दक्षिणतो वर्षीयसीं करोति । पुरीषवतीं करोति । प्राचीमुदीचीं प्रवणां निखिष्ठन्ती । तीयन्तं[4] गृह्णातीति प्रस्तरस्य वदति । ॥ २४ ॥

संनखमात्रो ग्रहीतव्य इत्येकेषां । विग्राहको[5] ग्रहीतव्य

---

१ दर्शपूर्णमा॰ G, दर्शपौर्णमा॰ Be; cp. V. 5: 133. 13.

२ इति found in H G U only.

३ G Ben H and a citation by Sāyaṇa ins. इति, but cp. TS. II. 6. 4. 2, TBr. III. 2. 9. 10.

४ Thus Ben U (pr. m.) and a citation by Sāyaṇa; निखिष्ठतीतीयंतं D H C, निखिष्ठवेतीयंतं U (sec. m.) G Be.

५ Thus H U (pr. m.) and Sāyaṇa (twice, in a citation); विषाहको Ben, विग्राहुको Be G U (sec. m.), the Viv.; C D om. this passage. Sāyaṇa (and Bhavasvāmin) remarks: विग्राहकः विग्रहप्रदेशः छेदनप्रदेशो मूलमित्यर्थः, Bhav. adds: सर्वेच मूलत एवोक्ता ।

Digitized by Google

इत्येकेषाꣳ। स्रुग्दण्डमात्रो गृहीतव्य इत्येकेषाꣳ। स्रुवदण्डमात्रो
गृहीतव्य इत्येकेषामुर्वस्थिमात्रो[1] गृहीतव्य इत्येकेषामङ्गुष्ठपर्वणा[2]
संमितो[2] गृहीतव्य इत्येकेषामपरिमितो गृहीतव्य इत्येकेषा-
मियतीर्भवन्तीति समिधां वदति। प्रादेशमात्रीरेवैता उक्ता
भवन्त्यनेन संमिताः कार्या इत्याहुरनेन ह्यपे प्रजापतिः प्रजा १
I. 6. 11. असृजतेति। किंदेवत्ये उ खलु पवित्रे किंपूते भवत इति।
वैष्णवी वायुपूते इत्येव ब्रूयादनखच्छिन्ने स्यातां। प्रणीताः
प्रणयन्नथापः प्रणयामीति पृथिवीं मनसा ध्यायेत्समान्येतानि
कुर्यात्प्रणीता आहवनीयं ब्रह्माणमिध्माबर्हिरिति यज्ञस्य शिर
I. 8. 18. इत्येतदाचक्षते। किंप्रोक्षिता उ खलु प्रोक्षण्यो भवन्तीति। १०
विज्ञायते ब्रह्मवादिनो वदन्त्यद्भिर्हवीꣳषि प्रौक्षीः केनाप
I. 9. 11. इति। ब्रह्मणेति। ब्रह्मप्रोक्षिता एव भवन्ति। हविष्कृदेहीति
ब्राह्मणस्य वदति हविष्कृदागहीति राजन्यस्य हविष्कृदाद्रवेति
वैश्यस्य। हविष्कृदेहीति पर्जन्य एवैष उक्तो भवत्यथाप्युदा-
I. 9. 12. हरन्ति हविःसꣳस्कारीमेवैतदाहेति[3]। दृषदुपले दृषारवेणोच्चैः ११
समाहन्तीति। विज्ञायते ब्राह्मणमुच्चैः समाहन्तवा आर

---

१ Thus (उर्वस्थि, not ऊर्वस्थि) all. Sāyaṇa remarks: छान्दसो ह्रस्वः।

२ Thus Sāyaṇa (cit.), °पर्वणामात्रो Ben, °पर्वट्संमितो Be G, °पर्व-संमितो U G (sec. m.), °पर्वसंमितो H. Sāyaṇa comments: अंगुष्ठस्य यत् पर्व पर्वणा संमितः अंगुष्ठपर्वपरिमाण इत्यर्थः।

३ Thus Ben Sāy., °हंस्कारामे° D C, °संस्कारिमे° U (pr. m.), °संस्का-रिणमे° Be H G U (sec. m.). Sāyaṇa remarks: हविःसंस्कारिणस्य पुर्वं हविष्कृतं इति संस्कारीमिति छान्दसः।

Digitized by Google

विजित्यै । यावन्तो ऽस्य भ्रातृव्या यज्ञायुधानामुद्वदतामुपशृण्वन्ति ते [1]पराभवन्तीति । द्विर्द्विर्दृषदि[1] सकृत्सकृदुपलायां[2] । नवकृत्वः संपादयतीति विज्ञायते । ॥ २५ ॥ त्रयोदशः ॥

अपाग्ने ऽग्निमामादं जहीति । को नु खल्वामाद्भवतीत्यपराग्निरेवैष उक्तो भवति । निष्क्रव्यादꣳ सेधेत्यादहनाग्निरेवैष उक्तो भवत्या देवयजं वहेत्याहवनीय एवैष उक्तो भवति । को[3] नु[3] खलु कव्यवाहन इत्यन्वाहार्यपचन इत्येव ब्रूयाद्विज्ञायते यदग्ने कव्यवाहन पितॄन्यक्ष्यृतावृध इति । कुतो नु खलु पिष्टानि संवपेत्कृष्णाजिनादित्येव ब्रूयात्संवपन्पिष्टानि वाचं यच्छति । तामविद्वन्तः[4] श्रपयतेत्येव वाचं विसृजते । यो विदग्धः स नैर्ऋतो यो ऽशृतः स रौद्रो यः शृतः स सदेव इति । साधुशृतꣳ श्रपयतीत्येवेदमुक्तं भवति । सं ब्रह्मणा पृच्यस्वेति । विज्ञायते वाग्वै ब्रह्म[5] वाचैवैनमेतत्संपृणक्ति । क उ खलु हविः पृक्तꣳ[6] श्रप्यत इति । यद्देवैतद्दाप्येभ्यो[7] निनयत्येकताय स्वाहा द्विताय स्वाहा त्रिताय

१ U (sec. m.) ins. सर्वे but cp. TBr. III. 2. 5. 9.

२ द्विः and सकृत् once H Sāy.; सकृत् once G.

३ Thus Ben C D U (pr. m.), Sāyaṇa; क नु H, का नु Be U (sec. m.), का G.

४ With the visarga Ben G U D C Sāy., without Be H; I. 10: 13. 9 is to be corrected accordingly.

५ ब्रह्मा H Be G U (sec. m.).

६ श्रतं G D C U (sec. m.), Sāyaṇa (cit.).

७ Thus Ben U (pr. m.), Sāyaṇa (twice); यद्देवतद्दाप्ये° D C, यद्देवैनमाप्ये° Be U (sec. m.), यद्देवैनमाप्ये° G H.

Digitized by Google

स्वाहेति । को नु खल्वेकतः को द्वितः कस्त्रित इति । पिता
पितामहः प्रपितामह इत्येके । पृथिव्यन्तरिक्षं द्यौरित्येके ।
ऽग्निरादित्यो वैद्युत इत्येके । ॥ २६ ॥

अग्नेस्त्रयो ज्यायांसो भ्रातर आसन्नित्येक[1] । त एव
एतन्नामधेया[2] बभूवुरित्येके । ते देवा आप्त्यानसृजतेत्याप्त्य-
नामधेया[3] देवा भवन्ति । क उ खलु पौर्णमास्यां पितृभ्यो
I. 19. 19. दीयत इति । यदेवैतत्क्रोशोऽग्निर्नयतीति[4] । किमभिघारितं
I. 87. 2. नु खल्वाज्यं भवतीति । सत्याभिघारितमित्येव ब्रूयाद्विज्ञायते
I. 87. 4. सत्येन त्वाभिघारयामि तस्य ते भक्षीयेति[5] । पञ्चानां त्वा
वातानां यन्त्राय धर्त्राय गृह्णामीत्यनुदिशं वाता । विश्वव्यात
एवैषां पञ्चमो भवति । पञ्चानां त्वर्तूनां यन्त्राय धर्त्राय
गृह्णामीति हेमन्तशिशिरावेव समासं गच्छतः । पञ्चानां त्वा
दिशां यन्त्राय धर्त्राय गृह्णामीतीयमेवासावूर्ध्वा दिक् पञ्चमी
भवति । पञ्चानां त्वा पञ्चजनानां यन्त्राय धर्त्राय गृह्णामीति
देवा मनुष्या असुरा राक्षसा । गन्धर्वा एवैषां[6] पञ्चमा
भवन्ति । चरोस्त्वा पञ्चबिलस्य यन्त्राय धर्त्राय गृह्णामीत्यय-

---

१ Thus (•त्येके) C only, •त्येवे all the other MSS. and cit. by Sā

२ एवंनाम• Ben C D; त एवैतन्नाम• Be.

३ Thus G H Be U (sec. m.), •त्याप्त्यानाम• Ben D C U (pr. m
Sāyaṇa.

४ Thus G U D C and cit. Sāyaṇa यद्देवै• Ben, यदेवैत• Be.

५ इति om. G.

६ Thus Ben U D C, एषां H Be G, एवैषां a cit. by Sāyaṇa.

Digitized by Google

मेवैष आकाशसहः पञ्चबिलो भवति । दिशो ऽस्य पञ्च बिलानि भवन्ति वायुर्मेक्षणमित्यथाप्युदाहरन्ति संवत्सर एवापि चरुः पञ्चबिलो भवत्यृतवो ऽस्य बिलानि भवन्ति वायुर्मेक्षणमिति । ॥ २७ ॥ चतुर्दशः ॥

अथाध्वर्योश्च होतुश्च प्रपदनमन्तरेण वेद्युत्करौ प्रागावृत्तो[1] ऽध्वर्युः प्रपद्यते प्रत्यगावृत्तो होताध्वर्युरनन्तरो ऽग्नेः स्यादार्षेयमसंप्रजानानस्य प्रवरं ब्रूहीति मनुष्वद्भरतवन्मनुवदित्येव ब्रूयाद्विज्ञायते मानव्यो हि प्रजा इति ब्राह्मणं । पुरोहितप्रवरो[2] वा[2] राज्ञो । ऽथाप्रज्ञातबन्धुराचार्यामुष्यायणमनुब्रवीताचार्यप्रवरमु[3] हैव[3] प्रवृणीताथ होतारं प्रवरयेत्यथ यथा दैवतमभिवर्धयेद्ध्रा स्विष्टकृतं व्यतिषज्यैवाङ्गुली[4] अवद्येदङ्गुष्ठपर्वमात्राणि[4] दैवतान्यवदानानि भवन्ति ज्यायांसि सौविष्टकृतान्यैडानि च । चतुर्धाकरणानि[5] ब्रह्म[5] प्रतिष्ठेति[5] । कृत्वा

---

१ प्राकाद॰ G U.

२ Thus Be U (pr. m.) Sāyaṇa; ॰प्रवरोव C D, ॰प्रवरेण (omitting वा) H Be G (sec. m.) U (sec. m.). Is राजा to be read ?

३ याप्रज्ञात॰ G (sec. m.) D C U, the Viv. and Sāyaṇa; यप्रज्ञात॰ Be Ben H G (pr. m.).— ॰बंधोरा॰ C and Sāyaṇa.— ॰ब्रवीत॰ all (Sāyaṇa alone ॰ब्रुवीत), cp. Āp. XXIV. 10. 17.— ॰प्रवरमुहैव C D and Sāyaṇa; ॰प्रवरमुहवै G (sec. m.) U (pr. m.), ॰प्रवरमुवै Ben, ॰प्रवरमनुवैव Be U H; cp. Āp. l. c.

४ Thus G U D C and Sāyaṇa; ॰वांगुली चाव॰ H Ben, वांगुलीरव॰ Be. The Viv. also has the dual.

५ These words are effaced in G.

Digitized by Google

I. 26. 8. स्विष्टकृतꣳ स्रुवमद्भिः पूरयित्वान्तःपरिधि निनयेद्वैश्वानरे
हविरिदं जुहोमीति । किमु खल्वसमुदितं[1] भवतीति प्राणा-
नूयाजिकात्संप्रैषादित्येव ब्रूयात् । ॥ २८ ॥

किंदक्षिणमग्निहोत्रं दर्शपूर्णमासौ काम्या इष्टयः पशुबन्ध
इत्यु । पदोहदक्षिणमग्निहोत्रमित्येके । शरावदक्षिणमग्निहोत्र-
मित्येके । यत्सायं जुहोति रात्रिमेव तेन दक्षिणां कुरुते ।
यत्प्रातरहरेव तेन दक्षिणं कुरुते । यत्ततो ददाति सा
दक्षिणेति । यदहोरात्रयोर्ददातीत्येवेदमुक्तं भवत्यथ दर्शपूर्ण-
मासयोरन्वाहार्यश्च पुरोडाशस्य च[2] चतुर्धाकरणं । विज्ञायते[3]
दक्षिणैवास्यैषाथो यज्ञस्यैव छिद्रमपिदधातीति । यथैवादः[4] ।
सौम्ये ऽध्वर आदेशमृत्विग्भ्यो दक्षिणा नीयन्त एवमेवापि
II. 120. 4. दक्षिणं पुरोडाशं चतुर्धा कृत्वा बर्हिषदं करोति । वासोदक्षिणाः
काम्या इष्टयो या[5] अनादिष्टदक्षिणा[5] । गोदक्षिणः पशुबन्धो ।
III. 32. 10. नित्यो ऽन्वाहार्यो । यथो एतच्छालीकेः कथं वेदयन्ते पत्नी-
संयाजेषु सर्व एवोत्तरेण गार्हपत्यं परिक्रामेयुरित्यनभ्यावृत्त्यै-[1]
वाच पत्नीकरणहोमो होतव्यो भवत्यथ हैके राकां च सिनी-
वालीं च कुहूं चानुमतिं च पत्नीहोमं च नारिष्ठौ च होमौ

---

१ •हितानि H U G (pr. m.) Ben, •हिता C.

२ Given by U (pr. m.) only and by Sāyaṇa in a citation.

३ See TS. I. 7. 3. 1.

४ यथैवम Ben, यथापि Be.

५ Thus Ben G (sec. m.), याथानादि० H U D C G (pr. m.), इत्-
यनादि० Be; cp. XIII. 1: 120. 4.

Digitized by Google

पुरस्ताद्गृहपतेरुपजुहोति सं पत्नी पत्या सुकृतेन गच्छतां यज्ञस्य युक्तौ धुर्यावभूताम् । संजानानौ विजहतामरातीर्दिवि ज्योतिरजरमारभेताꣳ स्वाहा ॥ इमा ते तनुवो यज्ञ यज्ञियास्ताः प्रीणातु यजमानो घृतेन । नारिष्ठयोः प्रशिषमीडमानो देवानां दैव्ये ऽपि यजमानो ऽमृतो ऽभूत्स्वाहा ॥ यं वां देवा अकल्पयन्नूर्जो भागꣳ शतक्रतू । एतद्वां तेन प्रीणानि तेन तृप्यतमꣳहहौ स्वाहेति ॥ २९ ॥ पञ्चदशः ॥

अथेदमग्निहोत्रꣳ सायमुपक्रमं प्रातरपवर्गमाचार्या ब्रुवते तत्रोदाहरन्ति ज्योतिषी इमे संनिपतिते भवत आदित्यस्य चाग्नेश्च ते न व्यवेयात्सायमाहवनीयमुद्धरन्पुरस्तात्प्रत्यङ्मुखो निवपेत्प्रातराहवनीयमुद्धरन्पश्चात्प्राङ्मुखो निवपेत्सायमग्निहोत्रꣳ होष्यन्नपरेण परीत्य जुहुयात्प्रातरग्निहोत्रꣳ होष्यन्नपरेण परीत्य जुहुयादेवमस्यैते ज्योतिषी अव्यवेते भवतो ऽथायमुद्धरणमन्त्रो वाचा त्वा होत्रा प्राणेनोद्गात्रा चक्षुषाध्वर्युणा मनसा ब्रह्मणा श्रोत्रेणाग्नीधैतैस्त्वा पञ्चभिर्दैव्यैर्ऋत्विग्भिरुद्धरामि भूर्भुवः सुवरुद्ध्रियमाण उद्धर पाप्मानो मा यदविद्वान्यच्च विद्वाꣳश्चकार । अह्ना यदेनः कृतमस्ति पापꣳ सर्वस्मान्मोद्धृतो मुञ्च तस्मादिति सायꣳ रात्रिया यदेनः कृतमस्ति पापꣳ सर्वस्मान्मोद्धृतो मुञ्च तस्मादिति प्रातरग्निं निदधात्यमृताहुतिममृतायां जुहोम्यग्निं पृथिव्याममृतस्य जित्यै । तयानन्तं[1]

[1] Corrected; तेना॰ MSS.

Digitized by Google

काममितो जयेम प्रजापतिर्यं प्रथमो जिगायाग्निमग्नौ वैश्वानरे ऽमृतं जुहोमि स्वाहेति सायꣳ सूर्यमग्नौ वैश्वानरे ऽमृतं जुहोमि स्वाहेति प्रातरेतद्ध[1] वा अग्नेरग्निहोत्रं पयोहोत्र-
I. 73. 7. मितरद्धोष्यन्यथाहितमग्नीन्परिषिञ्चेद्धुत्वाहवनीयमेवैकं परिषिञ्चेद्धोष्यꣳश्चैव हुत्वा चाहवनीयमेवैकं परिषिञ्चन्नेव परिषिञ्चेदित्येतदपरमथेदं परोक्षोपस्थानं भवतीहैव सन्तस्तत्र सतो वो अग्नयः प्राणेन वाचा मनसा बिभर्मि । तिरो मा सन्त-
I. 77. 6. मायुर्मा प्रहासीर्ज्योतिषा वो वैश्वानरेणोपतिष्ठ इत्यथेमाꣳ समिधं प्रवसतस्तूष्णीमभ्यादध्यात्प्रवसन्याजमानं[2] कुरुते ॥३०॥

अथेमꣳ समस्तहोमं यायावरधर्मेण विद्यमानमाचार्या ब्रुवते तत्रोदाहरन्ति यायावरा ह वै नामर्षय आसꣳस्ते ऽध्वन्यश्राम्यꣳस्ते[3] समस्तमजुहवुस्तस्माद्यायावरधर्मेणाध्वनि[4] समस्तꣳ होतव्यं तस्यानिमित्तो[5] होमः सर्वेणानेन वा निमीलनेन वोपसमाधानेन वान्तर्दध्याच्च शूद्रगव्या[6] अग्निहोत्रं

१ ह ins. Be G (sec. m.); C om. ह (प्रातरेतद्धा)।

२ प्रवत्स्यन्या° G (sec. m.) and the Viv.

३ Thus Ben H U D G (pr. m.), अध्विन्य° (i.e. अध्वन्य°?) Be G (sec. m.). Instead of अश्राम्यन् Be अशाम्यन्।

४ °णाध्विनि Be G (sec. m.).

५ Uncertain; °स्यानिमित्तो Be C D U G (pr. m.), °स्यविमित्तो G (sec. m.), °स्यानिमितो Ben H.

६ Conjecturally; °द्रगवाचा च° H G (pr. m.) U (sec. m.), °द्रग-वाचा च° Ben D C U (pr. m.), °द्रगवाग्नि° Be G (sec. m). Probably we have here the genit. (dative) of °गवी, cp. उपवसथगवी, ब्रह्मगवी।

Digitized by Google

जुहुयान्नाहितायै न मृतवत्सायै न वशायै न वाहिन्यै[१] न वान्यायै न वान्यवत्सायै नानुदेश्यप्रतिगृहीतायै[२] नानुस्तरणी-प्रतिगृहीतायै[३] । नैकस्यै दुग्धेन बहवो जुहुयुर्न बह्वीनामेवैको[४] । दुग्धं लभमानस्योपसादनप्रभृति स्कन्नानुमन्त्रणं भवति । दीप्यमानेष्वहूयमानेषु[५] यावन्त्यग्निहोत्राण्यभ्यतिक्रान्तानि[६] स्युस्तानि प्रतिसंख्याय प्रतिजुहुयात् । यद्यनस्तमिते जुहुयात्पुनरेवास्तमिते जुहुयादथ यदि महारात्रे जुहुयात्पुनरेवौषसं जुहुयादिति । ॥ ३१ ॥ षोडशः ॥

कथमु खलु जीवपितुः पिण्डदानं भवतीति । येभ्य एव पिता ददाति तेभ्यः पुत्रो ददाति । द्वाभ्यां जीवपिता ददात्येकस्मै जीवपितामहो ददाति । न जीवन्तमतिदद्या-दित्येके । पितृव्यस्य चेत्सगोत्रस्य दायमुपयच्छेत[७] कथं तत्र पिण्डदानं भवतीति । यस्मिन्काले पित्रे पिण्डं ददाति

---

१ Emended; वशान्यायै Be G Ben U, चान्यायै H D, वारळायै C.

२ I am uncertain if we are to read here also चनूदेश्य (cp. XXIV. 13 : 197. 6); नानुदेश्य° Be Ben C D, °नानुद्देश्य° G U, नानुदेश्य° H; चनुदेश्य one copy of the Viv., चनूदेश्य another.

३ These words found in Ben D C U only; they are mentioned in the Vivaraṇa.

४ एव effaced in G.

५ Thus Be H G; °मानेष्ववहूय° D C, °मानेषुहूय° Ben U; cp. Rudradatta on Āp. IX. 8. 5.

६ चपि om. Ben U (pr. m.) C.

७ यच्छेत G (sec. m.) only; cp. XX. 10 : 23. 12.

Digitized by Google

तस्मिन्काले ऽस्य पिण्डं निपृणुयादथ चेदसगोत्रस्य दायमुपयच्छेत्[१] कथं तत्र पिण्डदानं भवतीति । तेभ्यो दत्त्वा प्रतिवेशं बर्हि स्तीर्त्वा बर्हिःप्रभृति पिण्डं दद्यादपि वागार एव स्थालीपाकᳪ श्रपयित्वा बर्हिःप्रभृत्येव पिण्डं दद्यात्कथमु खलु पुत्रिकापुत्रस्य पिण्डदानं भवतीत्येतत्ते ऽमुष्मै तत मम पितामह ये च त्वामन्वेतत्ते ऽमुष्मै पितामह मम प्रपितामह ये च त्वामन्वेतत्ते ऽमुष्मै प्रपितामह मम प्रप्रपितामह[२] ये च त्वामन्विति । प्रविदानकल्पेन वा दद्यात्स्वधा पितृभ्यः पृथिवीषद्भ्यः स्वधा पितृभ्यो ऽन्तरिक्षसद्भ्यः स्वधा पितृभ्यो दिविषद्भ्य इति । पितुस्तत्पितामहस्य प्रपितामहस्येति नामानि न जानीयात्कथं तत्र पिण्डदानं भवतीति । प्रविदानकल्पेन वा दद्यादपि वैतत्ते तत ये च त्वामन्वेतत्ते पितामह ये च त्वामन्वेतत्ते प्रपितामह ये च त्वामन्वित्युत्तर आयुषि लोम
I. 81. 2. छिन्दीतेति । कस्मिन्नु खल्वेतत्काले छेत्तव्यं भवतीत्यूर्ध्वᳪ षट्षष्टिभ्यश्च[३] वर्षेभ्यो ऽष्टाभ्यश्च मासेभ्य इत्येतस्मिन्नेवैतत्काले छेत्तव्यं भवतीति[४] । कथमु खल्वनाहिताग्नेः पिण्डपितृयज्ञो भवतीत्यनिध्मᳪ स्थालीपाकᳪ श्रपयित्वाग्निमुपसमाधाय

---

१ यच्छेत G (sec. m.) only; cp. XX. 10: 23. 12.

२ Thus G (sec. m.) only; all the other MSS. om. the first. प्र।

३ Thus Ben C U (pr. m.); षड्षष्टिभ्य D, षट्षष्टिभ्यो H G U (sec. m.), षष्टिभ्यो Be.

४ Thus Ben D C U (pr. m.); भवति om. H Be G U (sec. m.).

Digitized by Google

संपरिस्तीर्याहुतीर्हुत्वा दक्षिणेनाग्निं दक्षिणाग्रं बर्हिः स्तीर्त्वा बर्हिःप्रभृति पिण्डं दद्यादपि वागार एव स्थालीपाकꣳ श्रपयित्वा बर्हिःप्रभृत्येव पिण्डं दद्याद्यज्ञोपवीत्येव प्राजापत्ययर्चैतमग्निमुपतिष्ठेतेति ॥ ३२ ॥

यथो एतद्बौधायनस्य कल्पं वेदयन्ते हविष्कृता वाचं विसृज्याज्यानीर्जुहुयात्कस्मिन्नु खल्वेनाः काले जुहुयादिति प्रस्कन्दनान्तं कर्म कृत्वैतस्मिन्नेनाः काले जुहुयात्कथमु खल्वनाहिताग्नेराग्रयणं भवतीत्यनिरुप्तꣳ स्थालीपाकꣳ श्रपयित्वाग्निमुपसमाधाय संपरिस्तीर्याघारावाघार्याज्यभागाविष्ट्वाग्रयणदेवताभ्यः स्विष्टकृच्चतुर्थीभ्यो जुहुयात्कामं[1] पुरस्तात्स्विष्टकृतोऽज्यानीरुपजुहुयात्तस्यैतेनैव मन्त्रेण प्राश्नीयाद्भद्रान्नः श्रेयः समनैष्ट देवा इत्यपि वा श्रुतवतो ब्राह्मणस्य हुतोच्छेषणाक्षिपेत समानः प्राशनमन्त्रः कथमु खल्वन्तर्विराजं बर्हिर्विराजमन्तर्बहिर्विराजमिति जानीयाच्चित्येनोपस्थाय विराजकर्मैरुपतिष्ठेत प्रोष्य[2] पुनरागम्य[3] विराजकर्मैरुपस्थाय नित्येनैवोपतिष्ठेतैतेनैव[4] बहिर्विराजमुक्तमन्तर्बहिर्विराजं चेति सोऽधः संवेशमाꣳसाश्नस्युपायी प्रवसति विपरीतनामधेय एष

---

१ Thus G (sec. m.) only; काम Be, कर्म, D, कसुं C, कर्म U, कर्म Ben, कथं H.

२ Thus G, पोष्य Be D, प्रोष्यन् Ben C U, प्राप्य H.

३ °गत्य G and U (sec. m.).

४ चापि instead of the last एव Ben D C U (pr. m.).

I. 86. 5. भवति । स खिद्यपेदं प्रायश्चित्तं मध्ये[1] पतितमाश्विनो द्विक-
पालस्तमन्तमेव[2] परिणये । दीक्षणीयायां चेत्स्नयेत्प्रायणीयामनु-
वर्तेत । प्रायणीयायां चेत्स्नयेदातिथ्यामनुवर्तेतातिथ्यायां चेत्स-
न्नयेदग्नीषोमीयस्य पशुपुरोडाशमुत्तरमुत्तरं[3] तन्त्रमनुवर्ती[3]
स्यादथ चेदग्निर्दीक्षणीयायां नश्येत्कस्मिन्नु खल्वेनं काले
निर्वपेदिति । दीक्षाहुतीर्हुत्वैतस्मिन्नेनं काले निर्वपेदपि वा
III. 54. 4. प्रागौद्ग्रहणाद्यथो एतद्बौधायनस्य कल्पं वेदयन्ते प्रवसतः
प्रस्तरेणैवास्य सह यजमानभागमनुप्रहरेद्ध्रुवायै वाज्येन पर्यु-
पस्तीर्य[4] जुह्वामवधाय जुहुयात्प्रस्तरभूयं यजमानभागो गच्छ-
तीति प्रवसतः प्रस्तरेणैवास्य सह यजमानभागमनुप्रहरेदिति ।

॥ ३३ ॥ सप्तदशः ॥

III. 55. 4. अथायं पशुः सोपवसथस्तस्य कः कर्मण उपक्रमो भवती-
त्यंजस्तैरग्निभिरुदवसाय षड्ढोतारं[5] हुत्वा यूपाहुतिं हुत्वा
यूपं सयजुषं कृत्वा[5] वेदिं विमाय व्रतोपायनीयमशित्वाग्नी-
नन्वादध्याद्व्रतमुपेयादिध्माबर्हिः संनह्योपवसेदथ प्रातराग्नेयेना-
ष्टाकपालेन यजेतेति नु बौधायनस्य कल्पो । नाग्नीनन्वा-

१ मध्य H Be G U D C.

२ Thus (॰स्तमंतमेव) G H U (sec. m.), ॰स्तंतमेव C, ॰स्तमततमेव Be, ॰स्ततमेव Ben U (pr. m.) D.

३ Thus Ben U (pr. m.) D C; ॰मुत्तरमुत्तरं तचेममनु॰ Be U (sec. m.), ॰मुत्तरं तचेममनु॰ H G (pr. m.), ॰मुत्तरं तंचमनु॰ G (sec. m.).

४ वा ins. G Be U (sec. m.) H, not Ben D C.

५ The words षड्ढोतारं unto कृत्वा are given by G (sec. m.) after उपेयात् (l. 15).

Digitized by Google

दध्याज्यं व्रतमुपेयात्पाणी संमृशीत । परिस्तृणीयात्पात्राणि निर्णिज्य सꣳसादयेद्ब्रह्माणं दक्षिणत उपवेशयेत्तूष्णीं[1] । प्रणीते त्वौत्तरवेदिके मन्त्रेणोपविशेत्प्रोक्षणीः सꣳस्कृत्य पात्राणि प्रोक्षेदाज्यं निरुप्याधिश्रित्य पर्यग्नि कृत्वा स्फ्यहस्तः प्राङेत्य साम्नयजुर्हरैस्त्रिक्रमत ऊर्ध्वमथ ग्रालीकेररण्योरग्नीन्समारोह्योदवसाय मथित्वाग्नीन्विहृत्यैवमेव[2] षड्ढोतारꣳ हुत्वा यूपाहुतिꣳ हुत्वा यूपꣳ सयजुषं कृत्वा वेदिं विमायाग्नीन्त्वाद्ध्याद्व्रतमुपेयाद्दिशावर्हिः संनह्येत्पाणी संमृशीत । परिस्तृणीयात्पात्राणि निर्णिज्य सꣳसादयेद्ब्रह्माणं दक्षिणत उपवेशयेत्तूष्णीं । प्रणीते त्वौत्तरवेदिके[3] मन्त्रेणोपविशेत्प्रोक्षणीः सꣳस्कृत्य पात्राणि प्रोक्षेदाज्यं निरुप्याधिश्रित्य पर्यग्नि कृत्वा गार्हपत्य आज्यं विलाप्योत्पूय स्रुचि चतुर्गृहीतं गृहीत्वा समिद्वत्याहवनीये पूर्णाहुतिꣳ हुत्वा स्फ्यहस्तः प्राङेत्य साम्नयजुर्हरैस्त्रिक्रमत ऊर्ध्वम् । ॥ ३४ ॥

स्फ्यो यूपो भवतीति । कथमु खल्वस्य स्वरधिमन्थने[4] यूपशकले[4] इति[4] भवन्तीत्येतस्यैवावतच्छृणुयादपि वान्यस्य

---

१ Thus Ben C D U (pr. m.), तूष्णीं G Be H U (sec. m.).

२ After विहृत्य G ins. (on the margin): षड्ढोतारं हुत्वा यूपं सयजुषं कृत्वा वेदिं विमाय व्रतोपायनीयमग्नियाग्नीन्त्वाद्ध्याद्व्रतमुपेयाद्दिशावर्हिः संनह्योप-नयेत् ।

३ त्वेवौत्त° Be.

४ Not wholly certain; °संधनेयूपशकल इति Ben U C D G (pr. m.), °संधनयूपशकले इति H G (sec. m.); °संधनेयूपशकलमिति H. The Vivaraṇa, although not clear, gives °मन्थने as *viṣayasaptamī*. It seems more probable we have here a dual.

Digitized by Google

तज्जातीयस्य वृक्षस्य कुर्यादेषपाल एष भवति । प्रोक्षणप्रभृति मन्त्रान्याधयेद्वा परिव्ययणात्तृतीयवेलायां परिव्ययेदेवमुपरसंमितायां । पञ्चारत्निप्रभृतयः पाशुबन्धिका यूपा भवन्त्या नवारत्नेर्नवारत्निप्रभृतय आग्निष्टोमिका यूपा भवन्त्येकविंशत्यरत्नेस्त्र्यरत्निश्चतुररत्निर्वा निरूढपशुबन्धस्य पालाशो यूपः । किंनु खलु प्रवसतः पशुबन्धः सिध्यती३[1] न सिध्यती३[1] इति । सिध्यतीत्येक आहुरथ हैक आहुर्न सिध्यतीति । लोकाग्नीन्स्वान्त्विमान्द्वितीयमन्वाधेयं ब्रुवते । न[2] तु[2] खलु[2] प्रवसतः पशुबन्धः सिध्यतीति ॥ ३५ ॥ अष्टादशः ॥

कियन्नु खलु पशुबन्धे याजमानं भवतीति । व्रतोपायनव्रतविसर्जने[3] यज्ञस्य पुनरालम्भ । आप्यायनकाम्यस्तु हैके ब्रुवत उपप्रैषाश्रावणा इति । किंदेवत्यं[4] नु खल्विदं भवतीति । मृत्युदेवत्यमित्येव[4] ब्रूयादथेमाः पशुबन्धे षट् प्रोक्षण्यस्तासां ह[5] मन्त्रवत्यस्तिस्रस्तूष्णीका । यवमतीरिन्द्रघोषवतीः पशुप्रोक्षणीरिति तूष्णीकाः । पशुपुरोडाशीयप्रोक्षणीः पात्रप्रोक्षणीरिध्माबर्हिःप्रोक्षणीरिति मन्त्रसंस्कृताः । पशुबन्धे पेदा-

---

१ Pluti signs only in Ben C D U.

२ नतुखलु Be G, ननुखलु Ben, ननुखलु H, नखलु U C, न D.

३ व्रतोपायने Be (instead of ॰पायन॰) ।

४ Thus corrected (in accordance with the TS.) ; ॰दैवतं or दैवतं the MSS.

५ स्ति U (sec. m.).

Digitized by Google

ज्यभागावुदाग्निरीर्वत्कस्मिन्नु खल्वेनौ काले यजेदिति । स्वाहाकृतिप्रैषेण चरित्वा प्राश्नपायै । पुरस्तात्स्वाहाकृतयो वा अन्ये देवा उपरिष्टात्स्वाहाकृतयो ऽन्य इत्यादित्यस्यैवैते रश्मयः प्राचीनाश्च प्रतीचीनाश्च भवन्त्यथायं पशुपुरोडाशस्तस्य कः कर्मण उपक्रमो भवतीति । जघनेन गार्हपत्यꣳ स्फ्यं निदध्यात्स्फ्योपरि पात्रौ । पात्र्यां श्रीचीनावपेच्छूर्पादानप्रभृति कर्मान्तस्तायत आज्यनिनयनान्तो । जघनेन गार्हपत्यमाज्येभ्यो निनयेत्प्राचणीप्रैषेण पुरोडाशीयानि[1] पिष्टानि संयौयादेवꣳ[2] सवनीयानां । यथो एतद्बौधायनस्य कल्पं वेदयन्ते ॥ ३६ ॥

निरवदायैवास्य स्विष्टकृतमिडामवद्येत्कथमच चतुरवत्तं भवतीत्युपस्तीर्य पुरोडाशं द्वेधा कृत्वाभिधारयेदेवमस्य[3] चतुरवत्तं भवत्यथ हैक आचार्या एकादश धर्मान्पशुबन्ध उत्सादयन्त्यग्न्यन्वाधानं व्रतोपायनं पृष्ठ्यां प्रणीतां याजमानमाज्यभागौ प्राशित्रं यजमानभागमब्रह्मभागौ चतुर्धाकरणं विष्णुक्रमानिति । कियन्तु खलु पशुबन्धे दर्विहोमा इष्टा भवन्तीति ।
7. चत्वारो यूपाहुति स्तोक्या दिशांप्रतीच्यौपयज इति । किंदेवत्या उ खलु मनोता भवतीत्याग्नेयीत्येव ब्रूयात्किंदेवत्य उ खलु वनस्पतिर्भवतीति । वैष्णव इत्येव ब्रूयादिं ज्ञायते वैष्णवा वै वनस्पतय इत्यथाप्युदाहरन्ति यज्ञो वै विष्णुरित्यथायं

---

१ पुरो० Ben G (sec. m.), पौरो० the other MSS.

२ Thus U H Be G ; संयुयादेवं Be, संयुत्यादेवꣳ C.

३ ०मच Ben U (pr. m). D C.

Digitized by Google

पशुः सार्वत्रैष्टुभो भवत्येकादश प्रयाजा एकादशानूयाजा एकादशकपालः पशुपुरोडाश एकादशावदानान्येकादशोपयाजा इत्येवं पशुः सार्वत्रैष्टुभो भवति । यथो एतच्छालीकेः कल्प[1] वेदयन्ते ऽश्वस्योरश्मीन्समारोहयोदवस्येत्तं[2] चेत्तत्र चेष्टमानमादित्यो ऽभ्यस्तमियात्कथं तत्र प्रायश्चित्तं३ सिध्यती३[3] न सिध्यती३[3] इति । सिध्यतीत्येक आहुर्नेत्येक आहुर्न सिध्यतीति । यश्चाभिपरीत एष[4] आकाशो भवति । नैव सिध्यतीतीत्था[5] अयं पशुः सार्वत्रैष्टुभो व्याख्यातः । ॥ ३७ ॥

एकोनविंशः ॥

अथातः काम्यान्पशून्व्याख्यास्यामः । को नु खल्वेषामुपांशु भवतीति । य एवाश्वमेधिकाः प्राजापत्याः सावित्राः सारस्वताः पौष्णा याम्याः पितृदेवत्या द्यावापृथिव्या वायव्याः सौर्या वैश्वकर्मणा इति । गर्भिण्यो भवन्तीति कथमत्र प्रायश्चित्तं३ सिध्यती३ न सिध्यती३ इति । सिध्यतीत्येक आहुर्नेत्येक आहुर्न सिध्यतीत्येतत्समुद्दिश्य एता भवन्ति । नैव सिध्यतीत्यादित्यां मल्हां गर्भिणीमालभत इत्युषिनामधेयमेवैत-

---

१ The kalpa of S'āliki here alluded to I have not traced in our Dvaidhapraśnas ; the prāyaścitta is, according to the Vivaraṇa, the one treated of in XIV. 24 init.

२ Thus G (sec. m.) Be ; •समारं प्यो• the other MSS.

३ Pluti signs not given by all the MSS. here and infra.

४ एष om. H Ben C.

५ सिध्यतीतीत्था H, सिध्यतीतित्था (or त्था) or सिध्यतित्था the other MSS.

Digitized by Google

ह्वत्यपक्रदती[1] भवतीत्यहीनदतीत्येवेदमुक्तं भवत्यथेयं द्वयर्षभा संवत्सरमभि विहिता[2] । प्राजापत्य[3] एवैषां कद्रुर्दभ्रमो भवतीति[4] । कथमत्र ब्रह्मचर्यं सिध्यती३ न सिध्यती३ इति । सिध्यतीत्येक आहुरथ हैक आहुर्न सिध्यतीति । संतिष्ठते । नैव सिध्यतीति । पर्यारिणी भवतीति । परिहारसूरित्येक आहुरथ हैक आहुरनुजैवैषोक्ता भवति । वेहदित्येतामाचक्षते । ॥ ३८ ॥

सोमापौष्णं चैतमालभेतेति । त्रयाणामेवैष उक्तो भवत्यथाप्युदाहरन्ति यस्तिस्रो धयतीति । त्वाष्ट्रं वडवमालभेतेति । यमेवैतं पुमांसं सन्तमधिरोहति स वडवो । विषम आलभेतेति । देवयजनं[5] वा विषमं स्यादस्मिन्वा पशुमालभेतौषधीनां च सन्धावालभत इत्युदकान्त इत्येक आहुरथ हैक आहुः प्रावृषि वा शरदि वेति । यस्याश्विने शस्यमाने सूर्यो नाविर्भवति सौर्यं बहुरूपमालभेतेति । प्रायणीये चेदतिरात्रे न दृश्येतारम्भणीयस्याहुः सवनीयस्योपालभ्यं

---

१ Uncertain; इत्यपीनाम॰ Be, इत्युपिनाम॰ Ben C G D, इत्युपिम॰ H, इत्यहिनाम॰ U (pr. m.), इत्यहहिनाम॰ U (sec. m.). Read perhaps इत्यहीनामधेय॰ ?

२ Thus Ben C D G (pr. m.), विहिताः Be U H G (sec. m.).

३ Thus Ben C U D G (pr. m.), ॰पत्या Be H G (sec. m.).

४ इति only in Be.

५ Before देव॰ all the MSS. exc. Be ins. यद् or य ।

Digitized by Google

पात्राणि प्रथमं मन्त्रं लभन्त इति । प्रोक्षण[1] इत्येव[1] ब्रूयात्स ह हविर्भिः करम्भपात्राण्यभिपर्यग्नि कुर्यात् । किंदेवत्यानि नु खलु करम्भपात्राणि भवन्तीति । वारुणानीत्येव ब्रूयाद्विज्ञायते ऽन्यमेव[2] वरुणमवयजत इत्यस्तं प्रेत सुदानव इति म्हाग्नेचे-
III. 72. 1. तेत्येवेदमुक्तं भवति । तौ व्यतिषारं साम्नयजुषौ हरेयाता-
मितश्चामुतश्च[2] यन्तं[3] प्रतिप्रस्थाताध्वर्युं परिगृह्णीयात्सं[4]निरु-प्तस्य प्रतिप्रस्थातापो निःषिच्याध्वर्योराज्यस्य[5] वाचयेदथैनयो-रतिप्रणयनादादायाध्वर्युः स्वमिध्ममपक्रम्यैव तिष्ठति ॥ १ ॥

अथायं प्रतिप्रस्थातान्तरेणैवं[6] चाहवनीयं चोपातीत्य स्वमिध्ममाददीत । तावपसलैः[7] पर्यावृत्त्येध्मौ हरेयातामथा-मुतः[8] प्रदक्षिणमावृत्त्येध्मौ प्रतिष्ठाप्यैतेनैव यथेतमेत्य प्रतिनि-

---

१ Thus Be G (sec. m.), the Viv.; प्रोक्षणाप्रभृतीन्येव U G (sec. m.) Ben H, प्रोक्षणप्रभृत्येव D, प्रोक्षप्रभृत्येव C.

२ Thus all, cp. the Calcutta edition of TS, vol. II, p. 41. l. 5 from bottom (TBr. I. 6. 5. 4 ?).

३ °चायंतं Be G U (pr. m.).

४ Thus G U (sec. m.) and the Viv.; प्रतिसं° D C U (pr. m.) Be Ben; H om. the prepos.; cp. Āp. VIII. 5. 12.

५ °ध्वर्युरा° H Ben (pr. m.).—After आज्यस्य C D Be G U (pr. m.) ins. च, U (sec. m.) चार्थं।

६ Thus Ben H U (sec. m.) and the Vivaraṇa; °णाहवनीयेन Be G C U (pr. m.) D.

७ Thus G U C and the Viv., the other MSS. om. तौ।

८ परिहरेयाताम° U (sec. m.).

Digitized by Google

वेष्टयते प्रतिप्रस्थातान्तरेण वेदी प्राचीनमुपयमनीहारो[१] । ऽथेमा अध्वर्योः प्रोक्षणो दक्षिणेन प्रतिप्रस्थातारं परिगृह्यासादयेदेवमेताभिरनभिपरिहृतो भवत्यथेयं[२] माहती दक्षिणां वेदिं गच्छति सप्तमो[३] हविषामधिश्रीयते[३] । कथमेतयाव्यवेतानि भवन्तीति । प्रतिहृत्यैनामग्रेण दक्षिणेन[४] हवींष्यनभिघारितामुद्वासयेदथैनां पुनरधिश्रित्याभिघारितामुद्वास्यान्तर्वेद्यासादयेदेवमेतान्यव्यवेतानि भवन्त्यथायं प्रतिप्रस्थाता माहत्यै दैवतस्य सकृदेवानुवाचयेत्सकृदाश्रावयेदथान्यथाध्वर्योः कृतानुकारो भवतीति । तद्यदिहाश्रावयतीह[५] यजतीति तत्प्रतिप्रस्थाता कृतानुकार एव भवत्यथेदं माहत्ये मेक्षणमग्रेणौत्तरवेदिकमग्निं[६] परिगृह्यानुप्रहरेदथो[७] एतदौपमन्यवस्य

---

१ Thus G U C D, °यमनिहारो the other MSS.

२ इति after भवति ins. D U Ben C.

३ Uncertain reading and meaning, the Vivaraṇa of this ssage is missing. G (sec. m.) reads as given above; सप्तमाय विषामधिश्रि° Ben (pr. m.) C, सप्तम्या हविषामधिश्रि (or श्र)यते Be U ec. m.) Ben (sec. m.) G (pr. m.), सप्तयम्यविषधमिश्रयते H.

४ Instead of दक्षिणेन (thus G, Ben sec. m. Be) दक्षिणा U (sec. .), दक्षिणानि C Ben (pr. m.) U (pr. m.) H D.

५ Thus Ben (sec. m.) G (sec. m.), the last MS ins. इति also ter °श्रावयति) H (only °वयतिह) and the Viv. (reading यदी°) ; हाश्रा° Ben (sec. m.), तद्यदाश्रावयतीह Be, तद्यदिहाश्रावयतीति तत्तिप्रस्था° C.

६ °मेणौत्तर° Be H.

७ पर्याहृत्यानु° U (sec. m.).

Digitized by Google

कल्पं वेदयन्ते तुषैश्च निष्कासेन चावभृथमवेयादिति देवतं
प्रदाय स्विष्टकृतं प्रयच्छेत्तुषान्संप्रकीर्योदकान्तं प्रत्यस्येदित्युमत
I. 141. 18. ऊर्ध्वमथायं गृहमेधीय आज्यभागप्रतिपत्त्केडान्तः[1] संतिष्ठते ।
III. 74. 10. तत्र नास्ति प्राशित्रं । तूष्णीꣳ [2]समन्काञ्छाकलान्परिधीनग्ना-
I. 143. 18. वनुप्रहरेदभिवान्यायामविद्यमानायाꣳ संधिनीक्षीरं दोहये-
दिति । ॥ २ ॥ प्रथमः ॥

I. 143. 17. अथायं महापितृयज्ञस्तस्य कः कर्मण उपक्रमो भवतीति ।
बर्हिर्यजुषा कुर्याद्देवानां पितॄणां परिषूतमसि देवपितृबर्हिर्मा
त्वान्वङ्मा तिरश्चपर्वं ते राध्यासमित्यपहतो ऽरक्षः पृथिव्यै देव-
पितृयजन्या इत्यपहतो ऽरक्षः पृथिव्या अदेवपितृयजन इत्येव-
मेतेष्वधिकरणेषु कुर्याद्यच देवाश्च पितरश्च संनिगच्छेयुः ।
पाणी संमृशीत । परिस्तृणीयात्पात्राणि निर्णिज्य षड्सादये-
द्ब्रह्माणं दक्षिणत उपवेश्याचैवोत्तरत उदपात्रं निधाय जघनेन
गार्हपत्यꣳ स्फ्यं निदध्यात्स्फ्योपरि[3] पात्रौ । पात्र्यां व्रीहीना-
वपेच्छूर्पादानप्रभृति कर्मान्तस्तायत आप्यान्तो । जघनेन
I. 147. 4. गार्हपत्यमाप्येभ्यो निनयेद्दिपरिक्रामन्त्येत ऋत्विजो । ऽध्वर्यु-
रनन्तरो ऽग्नेः स्यादथ यजमानो ऽथ ब्रह्माथाग्नीध्रो । ऽपि

---

१ Thus G U D Ben C, °त्केडान्त Be, °त्केडांता H; read °प्रतिपत्त्य इडान्तः ?

२ Thus (and cp. XXI. 3 : 74. 10) Ben U H, °कका° D C. °शाखाका° G (sec. m.) Be.

३ निधाय instead of निदध्यात् Ben U (sec. m.).

Digitized by Google

वाग्नीध्र एवान्तरो ऽग्नेः स्यादथ यजमानो ऽथ ब्रह्माथाध्वर्यु-विपरिहरन्ति हवीꣳष्यग्रेण पुरोडाशं धाना जघनेन धानाः करम्भमित्येवं विपरिहृतानामेवैतेषाꣳ हविषामेकैकमुदास-येत् । क उ खलु चैयम्बका निरुप्यन्त इत्युदास्य हवीꣳषि रुद्रायाम्बिकायै जुष्टं निर्वपामीति यथा मन्त्रवन्तः । कायेति कायं निर्वपेत्कायानुब्रूहीत्यनुब्रूयात्कं यजेति यजेत् । क उ खलु चैयम्बकाणाꣳ सौविष्टकृतं भवतीति । यदेवातो मूत आस-जतीत्यसमुदित ऋषभं ददातीति[1] । महाहविषामेवैषो ऽसमु-दिते[2] दातव्यो भवति । सर्वमेव याजमानं पितृयज्ञ उत्सी-देत्यप्यन्वष्ट्ये सौम्ये ऽध्वरे ऽन्यत्र तथोत्पत्तिवचनात्सर्वं[3] एवाग्नि-र्यजमानो ऽग्निचये सर्वमेवाग्न्याधेयच्छन्दो[4] याजमानमन्या-धेये । ॥ ३ ॥ द्वितीयः ॥

अग्निष्टोमेन यक्ष्यमाणः प्रज्ञमात्मानं कुर्वीत । येनास्या-क्रमणꣳ[5] स्यात्तेन क्रमणं कुर्वीत । यान्यृणान्युत्थितकार्याणि सुक्तानि व्यवहरेदनुज्ञापयीत वा । स पुरस्तादेवोपकल्पयते

१ इति om. Ben H.

२ Emended; समुदितो MSS.

३ Thus U Ben C D H; न्यत्रचोत्पत्ति॰ G and the Viv.; न्यत्रचोत्प-पत्ति॰ Be.

४ Thus G U (sec. m.) and the Viv.; ॰धेयच्छंदसो H Ben D C, ॰धेयच्छंदसो Be.

५ Thus (and cp. XXIV. 12 : 195. 8) Be D U C, ॰आऽक्रमणं G. ॰वक्रमणं Ben H.

Digitized by Google

I. 156. 6. प्रभूतं तूणवꣳशं पश्चाज्ज्यꣳ स्याच्छमवं कुम्बं च कुरीरं चेति । विदृषसु ह कुम्बं भवति जालसु कुरीरं । द्वादशशतं दक्षिणानां । विज्ञायते छन्दोगब्राह्मणं वीरहा वा एष देवानां यः सोममभिषुणोतीति । शतेन वीरं निरवदयते । दशभिर्दश प्राणान्यैकादशी तयात्मानं । यैव द्वादशी सा दक्षिणेत्यथ[1] ह्येक एकविꣳशतिदक्षिणेन यजन्त एकविꣳशं यज्ञायज्ञियमिति वदन्तो ऽथ हैके सप्तगुना यजन्ते सोमक्रयण्यातिथिगव्यनूबन्ध्यास्वतस्रो[2] मध्यतस्तदपि दाशतये[3] विज्ञायते प्र सप्तगुमृतधीतिं सुमेधामिति । ॥ ४ ॥

156. 9. अथातो देवयजनकल्पः । स एतद्देवयजनकल्पं जोषयते पुरस्तादुदकमनूषरमनुपहितमविस्रग्दार्यनिरिणमसुषिरमभङ्गुरमवल्मीकं[4] बहुलौषधि[4] यत्रान्याअन्या ओषधयो व्यतिषक्ताः

---

१ दक्षिणेत्यथ Be Ben (sec. m.). On this passage cp. Pañc. br. XVI. 1. 12.

२ After ॰मध्य॰ G ins. (on the margin), ॰यंचेन, thus also the Vivaraṇa.

३ See Ṛgveda X. 47. 6.

४ ॰नुपहितम॰ Be G (sec. m), the Viv.; ॰नूपहितम॰ the other MSS.—॰विस्रग्दार्यनि॰ G and one copy of the Viv.; ॰विस्रग्दार्यनि॰ Ben and another copy of the Viv.; ॰विरंद्दार्यनि॰ U; these MSS. point to a reading अविस्र(स)ग्दारि; ॰विस्रग्दोर्यमवि॰ D, ॰वि(वि)स्रग्दोर्य(र्ये)मवल॰ Ben C H D; these MSS. point to a reading अविस्रग्दार्यम्. Both readings occur equally in Baudh. pitṛmedha I. 4: 7. 14 (cp. Hir. pi. sū. I. 1 : 33. 3). Gārgya Gopālayajvan comments: अविस्रग्दारि च विविधं दारणं प्रदरादिकं विदारणं च यत्र तदविस्रग्दार्यम् ।—बहुलौषधि G U D C, the Viv.; ॰धौ Be ॰धिकं Ben ॰धीकं H.

Digitized by Google

स्युः प्रागुदक्प्रवणं यथा चात्वालसारिणीरापः स्युर्नातिप्रवणं यस्मादन्यत्पुरस्तात्समन्तिकं देवयजनं न विन्देयुस्तदेतां प्राचीनवꣳशाꣳ शालां मापयन्ति। कृत्तिकाः स्विमाः प्राचीं दिशं न परिजहति[1]। तासाꣳ संदर्शनेन मापयेदित्येतदेकꣳ। श्रोणासंदर्शनेन मापयेदित्येतदेकं। चित्रास्वात्योरन्तरेणेत्येतदपरं। दिक्ष्वतीकाशा भवतीति[2]। द्वाभिरेवैषा[3] दिक्ष्वतीकाशा भवत्यथाप्युदाहरन्ति[4] वꣳशानामेवातीकाशान्कुर्यादिति। द्वौ स्तोमौ प्रातःसवनं वहत इति[5]। त्रिवृत्पञ्चदशौ प्रातःसवनं वहतः। पञ्चदशसप्तदशौ माध्यन्दिनꣳ सवनꣳ। सप्तदशैकविꣳशौ तृतीयसवनमेष एव सꣳचतुष्टोमो भवति। चत्वारो हि स्तोमा भवन्त्येष एव सन्द्वादशस्तोमो[6] भवति। द्वादश हि[7] स्तोत्राणि भवन्ति। यथो एतदौपमन्यवस्य कल्पं वेदयन्ते पुरस्तादेवैतस्मैविध्यगतेषु देवयजनमध्यवस्येदिज्ञायते सा वा इयꣳ सर्वैव वेदिरिति। ॥ ५ ॥ तृतीयः ॥

अथेममाग्नावैष्णवमेके प्रागप्युदीचायै ध्रुवत उपरिष्टाद्दा[8]।

---

१ MSS., exc. H. •जहंति (•आजहनंति Be).

२ भवंतीति MSS., but दिक्ष्वतीकाशा is adj., sc. शाला।

३ °वैषां MSS.

४ Thus (भवति) U only, भवंत्य• H, भवंतीत्य• all the other MSS.

५ See TS. VII. 1. 1. 1.

६ Thus C and the Viv., all the other MSS. unanimously •स्तोभो।

७ Om. G U D C.

८ Thus Be G U D Ben (sec. m.); उपरिष्टाद्दायं H Ben (pr.m.) and the Viv. one copy another, sec. m., originally reading उपरिष्टादयं; the Viv. explains यथा कल्पे।

Digitized by Google

क उ खलु दीक्षणीयायै बर्हिर्यजुषा कुर्यादिति व्युपनिधाय[1]
I. 159. 10. संभारान्प्राक् पाणिसंमर्शनाच्च यजमानं व्रतमुपनयति न पत्नीं
संनह्यतीत्यध्वरदीक्षायै व्रतं प्रणुदते । सर्वैवैषा व्रतोपायनीया
I. 159. 11. भवतीष्टिरयमु पत्नीसंनहनं । न यजमानभागं करोति न
ब्रह्मभागमित्याशीःसंयोजनावेवैतावुक्तौ[2] भवतः । किमुपक्रम-
माणो यज्ञमाशिषं वदेदित्यथापि सुभिक्षो व्रतोपायनीयस्य
भवतीति । कस्मै[3] किं सुभिक्षायावद्येद्यजमानभागस्य वक्-
त्वादन्नाद्ब्रह्मभाग उत्सीदति । संयुक्तौ ह्येतौ यजमानभागब्रह्म-
I. 159. 12. भागाविति । न बर्हिषदं पुरोडाशं करोति नान्वाहार्यं पच-
तीति । दक्षिणोक्तावेवैतावुक्तौ[4] भवतो ऽन्या उ खल्विह
ib. दक्षिणाः प्रतिख्याता भवन्ति । न पत्नीकरणहोमेन चरति
न समिष्टयजुर्जुहोतीत्यन्तपरिक्रमिणावेवैतावुक्तौ[5] भवतः ।
I. 159. 13. किमुपक्रममाणो यज्ञमन्तं परिणयेदिति । न पूर्णपात्रे यज-
मानं वाचयति न विष्णुक्रमान्क्रमत इत्यवभृथोक्तः खलु पूर्व-

---

१ Thus Be G (sec. m.) and the Viv. a. h. l. and as cited elsewhere; the prep. वि om. D U Ben H C.

२ Thus Be U (sec. m.) G (only °वैवै°); एव H U (pr. m.), °संयोजनाव--- D, °संयोजनावेवैताव° Ben and a citation by Sāyaṇa; °संयोजनावैमानाव° C.

३ The Viv. seems to read तस्मै ।

४ Thus Be G U (sec. m.) Ben (sec. m.) and the Viv.; दक्षिणो-कार्यावेवैताव° Ben and U (pr. m.), दक्षिणैकायो एवैताव° D, दक्षिणैकार्यौ एवैताव° C, तवमयोक्ताद्दक्षिणैकार्यावेवैताव° H.

५ °क्रमणावे° D C, °क्रामिणावे° Be.

Digitized by Google

पाणो भवत्यन्वः स्विष्टावभृथः प्रतिख्यातो भवत्यन्तपरिक्रमिणो विष्णुक्रमाः । किमुपक्रममाणो यज्ञमन्तं परिणयेदिति । ॥ ६ ॥

द्वादश वात्सबन्धान्युदयच्छन्निति[1] । कतमानि खल्विमानि वात्सबन्धानि भवन्तीत्येता एव स्रुवाहुतीरन्यत्र स्वाहाकारादित्यथाप्युदाहरन्ति समानसंख्यानोऽग्निर्ऋषि[2] तिस्रो देवतास्तानि द्वादशाथेदं कृष्णाजिनं मौक्तं[3] भवत्याच्य जान्वे तत्पार्श्वत एवाभिमर्पेद्दक्षिणं प्रति रज्जं यथा नावं । नक्तं चेदमेध्यं पश्येदाहवनीयमेवैतेन यजुषोपतिष्ठेताथेमानि दैवानि व्रतानि सायमुपक्रमाणि प्रातरपवर्गाण्यथौपसदानि प्रातरुपक्रमाणि सायमपवर्गाण्यथेदं[4] दैवं[4] व्रतं परिश्रित्यैव व्रतयेदाहवनीय एवैतत्पुराग्निहोत्रꣳ हूयते स मानुध्यास्यतीति[5] । ॥ ७ ॥ चतुर्थः ॥

---

१ See TS. VI. 1. 2. 5.

२ ग्निर्ऋषि G (sec. m.), निर्ऋषि Be, ग्नीनिति U (sec. m.), ग्निनिति C, ग्निरिति the other MSS.

३ See TS. I. 2. 2. e (last pâda).

४ Thus Ben (pr. m.) G (sec. m.), °थेतदैन्वं °थेतं दैवं H C U D G (pr. m.) Ben (sec. m.).

५ Thus H, समनुध्यास्यतीति Be Ben, स मानुध्यासीदिति C U D G (pr. m.), समनुध्यस्यासीदिति G (pr. m.). The Vivaraṇa seems to have read as C, etc.: स आहवनीयोऽनुध्यासीत् यत्रान्यत्र हूयमानं दृष्ट्वेति, but we expect a future: 'if the Āhavanīya sees that I offer somewhere else, it will… .'

Digitized by Google

I. 167. 3. अथायं प्रायणीयस्तस्य कः कर्मण उपक्रमो भवतीति । बर्हिर्यजुषा कुर्याद्यदि पुरस्ताद्यजुष्कृतꣳ स्यात्पाणी संमृशीत । परिस्तृणीयात्पात्राणि निर्णिज्य सꣳसादयेद्ब्रह्माणं दक्षिणत उपवेश्याग्नेवोत्तरत उदपात्रं निधाय जघनेन गार्हपत्यꣳ स्फ्यं निदध्यात्स्फ्योपरि पात्रीं । पात्र्यां व्रीहीनावपेच्छूर्पादानप्रभृति कर्मान्तस्तायत आ प्रस्कन्दनात्प्रस्कन्दनान्तं कर्म कृत्वाहवनीये स्रुवाहुतिꣳ हुत्वोपनिष्क्रम्य संप्रैषमुक्त्वाभिप्रपद्य तिरः पवित्रमप आनीयाधिश्रित्य तिरः पवित्रं तण्डुलानावपेदथाज्यं निर्वपेदथाज्यमधिश्रयेदुभयं पर्यग्नि कृत्वा स्फ्यहस्तः प्राङेत्य स्तम्बयजुर्हरेत्सिद्धमत ऊर्ध्वꣳ । शंय्वन्तः[1] प्रायणीयः संतिष्ठते । को नु खल्वस्य कर्मणो ऽवभेषो भवतीत्या स्रुचां विमोकाच्च चरुहविषामाप्यभिनयनं विद्यत इति[2] । स्थालीभिरेव चरूं
I. 169. 20. निर्वपेदिति नु[3] बौधायनस्य कल्पः । किंदेवत्या उ खलु पदाहुतिर्भवतीत्याग्नेयीत्येके । वैष्णवीत्येके । प्राजापत्येत्येके ।
I. 172. 19. वाग्देवत्येत्येव[4] ब्रूयात्कृष्णायोर्णास्तुकया सोमविक्रयिणमन्तरेण
I. 172. 15. भ्रूमके[5] विध्यति । राजानं प्रत्यपोर्णुते यजमानः ॥ ८ ॥

१ शंयुवंतः G D C U (pr. m.), शंयवतः Be.

२ Effaced in G.

३ Om. Be H.

४ Thus H, °दैवतेत्येव the other MSS.

५ Thus G U (sec. m.) and the Viv. (both copies); चमेके Be, भ्रूमध्यके Ben H Keś., भ्रुवोर्मध्ये C D; cp. Baudh. gṛhs. I. 1: चक्षैकामन्तरेण भ्रूमके दर्भेण संमार्ष्टि ।

Digitized by Google

वयः सुपर्णा उपसेदुरिन्द्रमित्येतयाथ यदि न सोमविक्रयी स्याद्येन यूपावटकाशं पञ्चाग्रग्रावां निहत्य समुपनह्य राजानं पञ्चाग्रग्रावायाᳫं समासज्योपासीताथ यदि कश्चित्प्रसवसंयुक्तं व्याहरेत्क्षिप्रमिति वा त्वरध्वमिति वा कुरुतेति वा[1] तद्राजानमाददीत । न संवादा आवर्तेरन्त्सोमविक्रयी स्याद्येयं प्रथमा सुब्रह्मण्योंकारान्तैवैषोक्ता भवत्यथाथमातिथ्यसंस्थ कः कर्मण उपक्रमो भवतीति । बर्हिर्यजुषा कुर्याद्यदि पुरस्तादयजुष्कृतᳫं स्यात्पाणी संमृशीत । परिस्तृणीयात्पात्राणि निर्णिज्य सᳫंसादयेद्ब्रह्माणं दक्षिणत उपवेश्य दक्षिणमनड्वाहं विमुच्याचैवोत्तरत उदपात्रं निधाय जघनेन गार्हपत्यᳫं स्फ्यं निदध्यात्स्फ्योपरि पात्रीं । पात्र्यां व्रीहीनावपेच्छूर्पादानप्रभृति कर्मान्तस्तायत आ प्रस्कन्दनात्प्रस्कन्दनान्तं कर्म कृत्वोत्तरमनड्वाहं विमुच्य राजानं प्रपादयेत्सिद्धमग्निष्टोमिकं[2] कर्म आनीयाद्वा संप्रैषात्कृष्णाजिनावधवनेनैवातिथ्यं[3] प्रतिपद्यते । सिद्धमत ऊर्ध्वम् । ॥ ६ ॥ पञ्चमः ॥

स दर्भपुञ्जीलमुद्गृह्णेति । कतरन्नु खल्विदं दर्भपुञ्जीलं भवतीति । यदेवैतद्ब्रीहोदानयोर्निदधातीति ॥ सप्त गिरोभिस्वेति । कतमे नु खल्विमे गिरयो भवन्तीति । प्रयाजानू-

---

१ वैति or वोति MSS. exc. H ; om. C.

२ ०ष्टोमिकं G U!D C.

३ ०धवने० G and the Viv.; ०धवने० Be, ०धवतिने० Ben, ०धूवने० D U C.—०तिथ्यं G, ०तिथ्य Be, ०तिथ्यस्य the other MSS.

Digitized by Google

याजा[1] एवैता उक्ता भवन्तीति दीक्षणीयायाः प्रायणीयाया
आतिथ्याया अग्नीषोमीयस्येत्यथाप्युदाहरन्ति[2] दीक्षणीया प्राय-
णीयातिथ्योपसदो ऽग्नीषोमीयः सप्तम इति ॥ यज्ञो देवेभ्यो
निलायतेति । कतमो नु खल्वयं यज्ञो भवतीति । स एवैष
इडान्त आतिथ्यः संतिष्ठते ॥ तं देवा हस्तान्सꣳरभ्यैच्छन्निति । ९
यदेवैतत्तानूनप्त्रꣳ समवमृशन्तीति[3] ॥ तमिन्द्र उपर्युपर्यत्यक्राम-
दिति । यदेवैतदुपसद्भिश्चरन्तीति ॥ तमेभ्यो यज्ञ एव यज्ञ-
माहरदिति । कतमो[4] नु खल्वयं यज्ञो यज्ञमाहरदिति[4] ।
दीक्षणीया प्रायणीयातिथ्यैष एव यज्ञो यज्ञमाहरदिति[5] ॥
वराहो ऽयं वाममोष इति । सत्यमक्षां वर्षिष्ठं । तद्यजमानं १०
वामं वसु मुष्णातीति ॥ के नु खल्वातिथ्यस्यानूयाजा[1] भव-
न्तीत्युपसद इत्येव ब्रूयात्किंदेवत्या उ खलूपसदो भवन्ती-
I. 178. 19. त्याग्नेय्य इत्येव ब्रूयात्कथमु खलूपसदामुपक्रमो भवतीति ।
बर्हिर्यजुषा कुर्याद्यदि पुरस्ताद्यजुष्कृतꣳ स्यात्पाणी संमृशीत ।
परिस्तृणीयात्पात्राणि निर्णिज्य सꣳसाद्येध्मं दन्तीः सꣳस्कृत्य ११
पात्राणि प्रोक्षेदाज्यं निरुप्याधिश्रित्य पर्यग्नि कृत्वा स्फ्यहस्तः
प्राङेत्य स्तम्बयजुर्हरेत्त्रिह्नुमत ऊर्ध्वं । यथा प्रकृत्यामेवं प्रय-

---

१ ०नुयाजा MSS.

२ ०षोमीयस्य चेत्यथा G U (sec. m.).

३ सम् found in Be G U D C only.

४ From कतमो unto माहरदिति missing in G H ; इति missing in Ben C Be D U.

५ इति missing in G U C.

Digitized by Google

मायामुपसदि स्रुचः सादयेदभ्यूढा द्वितीयस्यामभ्यूढतरास्तृतीयस्याꣳ[१] । संसरमाणा इवोपसद्भिः प्रचरेयुर्नाहतमाद्रियेरन्संमयाङ्गुलिः[२] स्रुवमादायाग्निवोपसदं जुहुयादिति ।

॥ १० ॥ षष्ठः ॥

१ स उ खल्वग्नीषोमीयस्य बर्हिर्यजुषा कुर्यादित्युदाहुः प्रवर्ग्ये प्रागाहवनीयस्य प्रणयनात्संवनीयेभ्यस्तु वत्सानुपाकुर्याद्ध्रुवच्छिन्न आहवनीये गार्हपत्ये यद्दृतीयमुपवपेदेवमुपयमनीष्वथैयमौदुम्बरी[३] स्थूणा यजमानेन संमिता कार्या भवत्यथायं यूपो यजमानस्यारत्निभिर्विमितो भवति । यद्योपर[४] इत्येके[४] । ऽथो हैवैतानि[५] कुर्याद्यूपावटं तु[६] परिलिख्य पात्री संप्रगीत । परिस्तृणीयात्पात्राणि निर्णिज्य सꣳसादयेत्प्रोक्षणीः सꣳस्कृत्य पात्राणि प्रोक्षेदाज्यं निरुप्याधिश्रित्य पर्यग्नि कृत्वा स्रुचः संमार्ष्टि । ता उत्तरवेदिꣳ हरन्ति प्रोक्षणीस्त्वाथ प्रतिप्रस्थाता पत्नीमभिसंनह्यत्यौरोणा-

---

१ ॰ढतरास्तु॰ H Ben U Be; ॰ढतरांश॰ G, ॰ढतराश॰ D C.

२ Thus G D Ben CU (pr. m.), ॰मयांगुलि Be, ॰मयंगुलीभिः U (sec. m.). H defective. The Viv.: परिमृदीतस्रुवं प्रवरमादाय ।

३ Between उपवपेदेवम् and उपयमनीषु H Ben ins. इमाम्, not G U Be D C.

४ Conjectural reading; यद्योपर इत्येके G C Be U, यद्योपरेत्येके Ben, यद्योपर इत्येके H, यद्योमपर इत्येके D; योपर इ॰ the Viv.

५ हैवैतानि all the MSS., with ॰त॰ the Viv. (one copy) = यजमानानि ।

६ om. H.

Digitized by Google

ग्निकेनाथैनां गार्हपत्यमीक्षयेद्येनामाज्यमवेक्षयित्वाज्येनाद्रुवेत्पत्न्या[१] तदवेक्षितमुपयच्छीत[२] तेजो ऽसीत्यथैनच्छकलेनोपयत्य हरेत्तेजो ऽनु प्रेहीत्यथैनदाहवनीये ऽधिश्रयेदग्निस्ते तेजो मा विनैदित्यथैनदुल्मोत्तरेण प्रोक्षणीः सादयित्वावेक्षितोत्पुनुयादाज्यवतीभ्यां प्रोक्षणीः। प्रसिद्धमाहवनीयस्यकाले III. 97. 11. पृषदाज्यवन्त्याज्यानि गृह्णीतेति विज्ञायत ऊर्ध्वं। यद्यो एतच्छालीकेः कथं वेद्यन्ते पत्नीग्राह एवाग्नीषोमस्याज्यानि गृह्णीयात्तानि हरे सादयेदिति। समन्वारंभीय वासमन्वानीय[३] वा पुराणगार्हपत्यं पाणी संमृशीत। परिस्तृणीयात्पात्राणि निर्णिज्य सङ्सादयेत्प्रोक्षणीः सङ्स्कृत्य पात्राणि प्रोक्षेदाज्यं निरुप्याधिश्रित्य पर्यग्नि कृत्वा स्रुचः संमार्ष्टि। ता अत्रैव सह सङ्सादयन्ति प्रोक्षणीश्च। न[४] प्रतिप्रस्थाता पत्नीमभिसंनह्यत्यौरोडाग्निकेन[५]। नैनां[५] गार्हपत्यमीक्षयेद्येनामाज्यमवेक्षयित्वाज्येनाद्रुवेत्पत्न्या तदवेक्षितमुपयच्छीत तेजो ऽसीत्यथैनच्छकलेनोपयत्य हरेत्तेजो ऽनु प्रेहीत्यथैनद्गार्हपत्ये ऽधिश्रयेदग्निस्ते तेजो मा विनैदित्यथैनदुल्मोत्तरेण प्रोक्षणीः

---

१ ०नोद्रवे० instead of ०नाद्रवे० G here and infra l. 14. Is चद्रवेत् the better reading?

२ Thus here and l. 14 G Be D C Ben U (sec. m.), ०यच्छेत H U (pr. m.).

३ Only given by G U (sec. m.).

४ Thus G U D Be, C H Ben om.

५ Thus Be C only, the other MSS. om. न reading ०ग्निकेनैनां।

Digitized by Google

याद्यिलावेचेतोत्पुनुयादाज्यवतीभ्यां प्रोक्षणीः प्रसिद्धं गार्ह-पत्यसकाशे पृषदाज्यवन्त्याज्यानि गृहीत्वा ॥ ११ ॥

परिकर्मिभ्य उत्प्रदाय ब्रह्मणे राजानमुत्प्रयच्छेत्संप्रच्छन्नेषु सुवाङ्कतौ[1] जुहुयात्संप्रच्छन्नास्त्वेव गच्छेयुराहवनीयाद्राजा दक्षिणार्धः स्यादथाग्निरथ ग्रावोवायव्यान्युत्तरार्धान्याज्यान्यपि वाग्निर्दक्षिणार्धः स्यादथ राजाथ ग्रावोवायव्यान्युत्तरार्धान्येवाज्यानि । पूर्वया द्वारोपनिष्क्रम्योत्तरेण सदः परीत्याग्नीध्रागारेऽग्निं निधायाभिहुत्य प्रोक्षणीहस्त उत्तरेणाग्नीध्रीयं धिष्ण्यं प्रतिपद्यते[2] । ऽन्वञ्च आज्यैराहवनीये हुत्वेध्मं प्रोक्ष्य वेदिं प्रोक्ष्य बर्हिः प्रोक्ष्य बर्हिरासन्नं प्रोक्ष्योपनिनीय पुरस्तादाश्ववालं प्रस्तरं गृहीत्वा पञ्चविधं बर्हिः स्तीर्त्वा प्रस्तरपाणिः प्राङभिसृत्य कार्ष्मर्यमयान्परिधीन्परिधायोर्ध्वे समिधावभ्याधाय बर्हिर्मुष्टिं विधृती प्रस्तरमित्येतत्समादाय प्रदक्षिणमावृत्य पूर्वया द्वारा हविर्धानं प्रपद्योत्तरार्धे खरस्य बर्हिर्मुष्टिꣳ स्तृणीयाद्बर्हिषि विधृती । विधृत्योराश्ववालं प्रस्तरं । प्रस्तरे जुहूं । बर्हिषीतरा । एता असदन्निति समभिमृश्याप उपस्पृश्य ब्रह्मणो राजानमादाय पूर्वया द्वारा हविर्धानं

---

१ सुवाङ्कतीकुं° MSS., but cp. the Viv.: सं सोम सुवाय इति (TS. I. 3. 4. *a* and *b*).

२ प्रतिपद्यते Be G U D C, प्रतिपद्यंते Ben, °समतिपद्यंते H.

Digitized by Google

संपरिस्तीर्य पात्राणि निर्णिज्य सꣳसाद्याज्यं विलाप्योपास्ते । ऽपरः[१] प्रतिप्रस्थाता प्रोक्षणीः सꣳस्कृत्य पात्राणि प्रोक्षेदाज्यं निरुप्याधिश्रित्य पर्यग्नि कृत्वा स्रुचः संमार्ष्टि । ता उत्तरवेदिꣳ हरन्ति प्रोक्षणीस्तथाध्वर्युराग्नेय्यर्चा स्रुचो ऽभिमृशति । संमृष्टानि द्विधा पात्राण्यभिवच्छन्त[२] इति । वायव्या वायव्यान्यैन्द्र्या[३] सदो । ऽथैव उन्नेता ग्रावोवायव्यꣳ संप्रचाय द्रोणकलशे दशापवित्रे समवधाय दक्षिणस्य हविर्धानस्य पुरोऽक्षꣳ सꣳसादयत्युपकल्पयते प्रतिप्रस्थाता पृषदाज्याय दध्याग्नीध्र इध्माबर्हिरुपसादयत्यथ प्रतिप्रस्थाता पत्नीमभिसंनह्यत्यौरोडाग्निकेनाथैनां गार्हपत्यमीक्षयेदथैनामाज्यमवेक्षयित्वाज्येनाद्रवेत्यंस्या[४] तदेवेक्षितमुपयच्छीत[५] तेजो ऽसीत्यथैनच्छग्लेनोपयत्य हरेत्तेजो ऽनु प्रेहीत्यथैनदाहवनीये ऽधिश्रयेदग्निस्ते तेजो मा विनैदित्यथैनद्धृत्वोत्तरेण प्रोक्षणीः सादयित्वावेक्षेतोत्पुनुयादाज्यवतीभ्यां प्रोक्षणीः प्रसिद्धमाहव-

---

१ ऽपरः U (pr. m.), परः D C, अपरः Ben (pr. m), ऽपरः the other MSS. H. wholly corrupt.

२ Uncertain reading ०वच्छन्त Ben. ०वच्छंत G (sec. m.), ०वर्षंत G (pr. m.), ०वच्छान्त Be C U, ०वसन्त D, ०वच्छंत D. The Viv. (one copy) ०वच्छ changed into ०वत्स, and thus also the other copy.

३ ०यैन्द्रिया G C.

४ ०नोद्रवे० again G.

५ ०यच्छीत G (sec. m.), U (pr. m.) D C Ben, ०यच्छेत G (pr. m.) Be H U (sec. m.).

Digitized by Google

गौयसकाम्ये पृषदाज्यवन्त्याज्यानि गृह्णीते । विद्रुमत ऊर्ध्वम् ।

॥ १४ ॥

अथ प्रातीकेरेवमेवैषां यथासंप्रैषं विहितानि कर्माणि भवन्त्यथाध्वर्युराग्नेय्यर्चाग्नीध्रमभिमृशेदैष्णव्या हविर्धानमित्यथोपरमत्यथैष आग्नीध्रः पूर्वः पत्नीशालं हुत्वाग्निमुपसमाधाय संपरिस्तीर्य पात्राणि निर्णिज्य सꣳसाद्याज्यं विलाप्योपास्ते । ऽपरः प्रतिप्रस्थाता प्रोक्षणीः सꣳस्कृत्य पात्राणि प्रोक्षेदाज्यं निरूप्याधिश्रित्य पर्यग्नि कृत्वा स्रुचः संमार्ष्टि । ता आग्नीध्रꣳ हरन्ति प्रोक्षणीस्थाप्याध्वर्युराग्नेय्यर्चा स्रुचो ऽभिमृशति । संमृष्टानि द्विधा पात्राण्यभिमृशन्त[1] इति । वायव्यया वायव्यान्यैन्द्र्या[2] सदो । ऽथैष उन्नेता ग्रावोवायव्यꣳ संप्रक्षाल्य द्रोणकलशे दशापवित्रे समवधाय दक्षिणस्य हविर्धानस्य पुरोऽक्षꣳ सꣳसादयत्युपकल्पयते प्रतिप्रस्थाता पृषदाज्याय दध्याग्नीध्र इध्माबर्हिरुपसादयति । न प्रतिप्रस्थाता पत्नीमभिसंनह्येत्पौरोडाशिकेन[3] । नैना[3] गार्हपत्यमीक्षयेदथैनामाज्यमवेक्षयित्वाज्येनाद्रवेत्यन्या[4] तदवेक्षितमुपयच्छीत[5] तेजो ऽसीत्य

---

१ ०मृशंत Be G, -मृशत U C, ०मृशंत D; H and Ben. abbreviate this passage.

२ ०न्यैन्द्रिया G U C, ०न्यैंद्रीया Be.

३ Thus G (pr. m.) D Be C Ben; ०केनैनां G (sec. m.) H; ०केनाथैनां U (sec. m.).

४ ०णोद्रवे० again G.

५ ०यच्छीत all (H. abbreviates).

32

Digitized by Google

थैनच्छकलेनोपयत्य हरेत्तेजो ऽनु प्रेहीत्यथैनदाग्नीध्रीये ऽधिश्रयेदग्निस्ते तेजो मा विनैदित्यथैनद्धृत्वोत्तरेण प्रोक्षणीः सादयित्वावेक्षतोत्पुनुयादाज्यवतीभ्यां प्रोक्षणीः । प्रसिद्धमाग्नीध्रीयसकाशे पृषदाज्यवन्त्याज्यानि गृहीत्वा परिकर्मिभ्य उत्प्रदाय प्रोक्षणीहस्त उत्तरेणाग्नीध्रीयं धिष्णियं प्रतिपद्यते । ऽन्वञ्च आज्यैरथेध्मं प्रोक्ष्य वेदिं प्रोक्ष्य बर्हिः प्रोक्ष्य बर्हिरासन्नं प्रोक्ष्योपनिनीय पुरस्तात्प्रस्तरं गृहीत्वैकविधं[1] बर्हि[1] स्तीर्त्वा[1] प्रस्तरपाणिः प्राङभिसृप्यौदुम्बरान्परिधीन्परिधायोर्ध्वे समिधावभ्याधाय बर्हिर्मुष्टिं विधृती प्रस्तरमित्येतत्समादाय प्रदक्षिणमावृत्य पूर्वया द्वारा हविर्धानं प्रपद्योत्तरार्धे खरस्य बर्हिर्मुष्टिꣳ स्तृणीयाद्बर्हिषि विधृती । विधृत्योः प्रस्तरं । प्रस्तरे जुहूं । बर्हिषीतरा । एता असदन्निति समभिमृश्य योगेन युनक्ति । विष्णुमत ऊर्ध्वम् । ॥ १५ ॥ नवमः ॥

किमग्निहोत्रो दीक्षितः किमौपसदः किंप्रसुत इति । विज्ञायते व्रतमेव दीक्षितस्याग्निहोत्रं । घर्मोच्छिष्टमौपसदस्योपांꣳश्वन्तर्यामौ[2] प्रसुतस्य । यो ह्यनुदिते स सायमग्निहोत्रभक्तिर्य उदिते स प्रातरग्निहोत्रभक्तिः । किं दर्शपूर्णमास[3]

---

१ The three words एक ०ब० स्तीर्त्वा effaced in G.

२ Thus G U D C Be; ०पसदस्युपांꣳश्व० H. ०पसदमस्योपांꣳश्व० Ben, the Vivaraṇa also has औपसदस्य ।

३ Thus Be G U (sec. m.), the Viv.; ०दर्शपूर्णमासस्य H, दार्श (or दर्श) पौर्णमासस्य (or सस) H D C Ben (pr. m.), all without इति: °मास इति Ben (sec. m.). °दर्शपौर्णमास इति U (pr. m.).

इति । विज्ञायते पौर्णमासं यज्ञमग्नीषोमीयं पशुमकुर्वत दार्शं यज्ञमाग्नेयं पशुमकुर्वतेति । यथो एतदौपमन्यवस्य कल्पं वेदयन्ते प्रातःसवन एव सर्वेभ्यः सवनेभ्यः सवनीयान्निर्वपेत्सकृदुपहितान्येव कपालानि स्युरा समभिवासनात्सꣳसृष्टं कर्म तायते[1] । तेषामेकैकमुद्वासयेदनुसवनं येनयेन प्रचरिष्यन्स्यादपि वा अभिमृष्टानां पिण्डानां परिग्राययीतेतरयोः[2] सवनयोर्यद्येककपालश्चिकीर्षितः[3] स्यात्प्रातःसवनिकैरेव[4] वर्तयेत्कृतान्तात्पौरोडाशिकं कर्म प्रत्याददीतेतरयोः[5] सवनयोरनुसवनमङ्गाराध्यूहनेनैव कपालेषु प्रतिपद्येत । सिद्धमत ऊर्ध्वम् ।

॥ १६ ॥ दशमः ॥

यथो एतद्बौधायनस्य कल्पं वेदयन्त उभयतःशुक्रा आदित्यवतीर्वसतीवरीर्गृह्णीयात्ताः शुक्रास्ताभिराप्याययेत्ताभिरभिषुणुयादित्युपर्यर्धꣳ होतृचमसं हलेत्येतेनैवापि तृतीयेन वर्तयेत्सर्वोरपः पूर्वया द्वारा हविर्धानं प्रपादयेद्धोतृचमसीया वसतीवरीया मैत्रावरुणचमसीया इति दक्षिणेन होतारं परिहृत्यापरया[6] द्वारैकधनानेतस्मिꣳस्त काले सर्वस्य एव मैत्रा-

1 Thus Ben, ज्ञायते C D, तायत H (reading रषाद् instead of वेषाद्), वर्तयेत् G Be U (sec. m.) and the Viv.

2 इतरयोः Be G (pr. m.), उभरयोः Ben C U D G (sec. m.).

3 यद्येक° H and the Viv., यदेक° G U Ben Be; C defective.

4 °सवनिकै° G U D, Viv., °सवनीकै° the other MSS.

5 उभरयोः MSS.

6 परिग्रह्या° Be U.

वहणचमसीयाः पर्यस्येत्तृतीयं वसतीवरीणामवनयेत्तृतीयमेक-
II. 190. 12. धनानामेवमस्य प्राक्षवणः शुक्रो भवति । सोमग्रहं गृह्णीयाद्ब्र-
ह्मवर्चसकामस्येत्यनिरुक्तस्यैवैष राज्ञो ग्रहीतव्यो भवति । का
उ खलु देवताः प्रथमꣳ सोमं भक्षयन्तीत्यपि इत्येव ब्रूया-
दि । ज्ञायत उपहूताः सोमस्य पिबतोपहूतो युष्माकꣳ सोमः
पिबन्त्विति । क उ खलु सोमस्य सोमपीथो भवतीति ।
विज्ञायते यत्ते सोमादाभ्यं नाम जागृवि तस्मै ते सोम
सोमाय स्वाहेत्येष एवापि सोमस्य सोमपीथस्तेषाꣳ संनिपति-
तानामानुपूर्वतेति[1] । निग्राभ्यासु वाचयित्वादाभ्येन चरेदथो-
पाꣳशुसवनमाददीताथ राजानं निर्वपेत्सिद्धमथाग्निष्टोमिकं ।
कर्म जानीयादा फलकयोरभिमर्शनात्फलके अभिहुत्य
पृश्निभिश्चरेदथ प्राणग्रहैश्चरेदथाꣳशूनुपसंगृह्णीयादथाꣳशुना
चरेदथोपाꣳशुना । काले ऽन्तर्यामेण । सिद्धमत ऊर्ध्वम् ।

॥ १७ ॥ एकादशः ॥

III. 101. 7. अथो एतद्बौधायनस्य कल्पं वेदयन्त आग्रयणस्य ग्रहणे ।
द्वयोर्धारयोः प्रातःसवने गृह्णीयात्तिसृणां माध्यंदिने सवने
चतसृणां तृतीयसवन इत्युपाꣳश्वन्तर्यामयोश्च सꣳस्रावः संततश्च
शुक्र एते द्वे प्रातःसवने । संततस्यैव शुक्र आग्रयणस्योद्यनेन

---

१ Thus G U D, ॰पातितानां॰ H Ben, ॰पतितान॰ C, ॰पीथानां Be-
॰मानुपूर्वंवेति G U (sec. m.), ॰मानुपूर्वंवे H, चानुपूर्वंवेति Be, ॰मानुपूर्वंवेति
Ben U (pr. m.), ॰मनुपूर्वंवेति C D.

Digitized by Google

च[1] तृतीया माध्यंदिने सवन आदित्यस्थाल्यामतिशिष्टो[2] राजादित्यग्रहस्य च संस्राव आग्रयणस्यैवोद्यनेन[3] च चतुर्थी तृतीयसवने । संपूतं राजानं चर्येण श्रीणीयात्पयसा सक्तुभिर्हिरण्येनेति । स यं कं चन यज्ञं स्तृणात्युभयत[4] उद्बुध्नं हिरण्यश्रयणमेवैनं करोति । तिष्ठता यहा होतव्या अन्यत्र प्राजापत्याच्च मन्थिसंस्रावाच्चेति । यथो एतच्छालीकेः कल्पं वेदयन्ते द्रप्सानुमन्त्रणीयाश्चिति स्रुवाहुतीरेवैता जुहुयात्क्षिप्रं स्वस्नेनाः काले जुहुयादिति । संतनीर्द्वैतस्मिन्नेनाः[5] काले जुहुयादित्यथोऽपेतरित्याह प्राञ्चं राजानं पूतभृतमभि संपवयताद्ग्रावभिराधवनीयं मृद्वा न्युब्जतादित्युक्तसंप्रैषं[6] एष प्रेत[7] आवकाशेभ्यो । ऽवकाशैरुपस्थाय ग्रावभिरेवैनं[8] मृद्वा न्युब्जति । ॥ १८ ॥

समानं कर्माश्विनाद्ग्रहादित्यो[9] धिष्ण्यव्याघारणसंपा-

---

१ Given by G U D only.

२ ०स्थाल्या अति० Ben H.

३ एव om. Be G U D.

४ स्तृणीयादिति instead of स्तृणाति Be G (sec. m.).

५ संतनी० Be, सततोर्द्व० H.

६ Thus Ben H, ०त्युक्तः सं० the other MSS.

७ प्रेते G U D C, एते Be, हाते Ben, H. corrupt.

८ Thus G (sec. m.) U D, ग्रावभिरेनं C, ग्रावाभिरेवैना the other MSS.

९ Viv.: समानं कर्माश्विनाद्ग्रहादिति वचोयते (e.g. XI. 3 : 67. 17) यथा-क्रमेण विधिः ।

Digitized by Google

I. 213. 20. तादित्येव समुद्द्रो[1] भवति । कथमु खलु धिष्ण्यानां
यथान्युप्तं व्याघारणं भवतीति । विभुवे प्रवाहणाय स्वाहेति
व्याघार्य रौद्रेणानीकेन पाहि माग्ने पिपृहि मा मा मा
I. 214. 8. हिंसीरिति । सप्त वृणीत इति । होतैवैषां सप्तमो भवत्य-
हर्गेण उत्तरेष्वहःसु प्रातःसवनिकं प्रसर्पणं कथं स्यादित्या-
हवनीयोपस्थानप्रभृतीत्येव ब्रूयात्सकृत् स्फ्यविघनानामुपस्थानं ।
I. 217. 6. कथमु खल्वेषां विसंस्थितसंचरः स्यादित्यन्तरेण होतुश्च
धिष्णियं ब्राह्मणाच्छंसिनश्च ये ऽधिष्णिया । अथ धिष्णिय-
वन्तः स्वंस्वमेव धिष्णियमुत्तरेण परिक्रामेयुरथेमावध्वर्यू
अचमसौ[2] भवतः । क उ खल्वेतयोर्भक्षो भवतीति । होतृच-
मस इत्येव ब्रूयात्क उ खल्वृत्विजामेकाहे सोमं न भक्षयन्ती-
त्युन्नेता ग्रावस्तुत्सुब्रह्मण्य इत्येव ब्रूयात्क उ खलु सत्रे
दीक्षिता भक्षयेयुरिति । नेष्टुश्चमस उन्नेता भक्षयेदच्छावाक-
चमसे ग्रावस्तुदुद्गातृचमसे[3] सुब्रह्मण्यो ऽपि वा सर्व एवाग्नी-
ध्रचमसे भक्षयेयुर्विज्ञायत उत्तरस्यां ततौ[4] तेषां य एवाग्नीध्रः
स ग्रावस्तुत्स सुब्रह्मण्यः स उन्नेतेति । ॥ १९ ॥ द्वादशः ॥

I. 217. 11. III. 104. 7. यथो एतद्बौधायनस्य कल्पं वेदयन्ते समानपात्र्यामेव

---

१ °द्देश्रो G (sec. m.).

२ Thus H Ben (pr. m.) C D U (pr. m.), °चमिनौ Ben (sec. m.) Be G U (sec. m.).

३ °द्गातृचमसे H only.

४ See XVII. 21 : 301. 2.

Digitized by Google

यवनीयानुद्वासयेत्पुरोडाशस्यैवैषो ऽलङ्कारो दृष्टो भवति[1] । मध्यतः पुरोडाशमुपस्तीर्णाभिघारितमुद्वासयेत्पुरस्ताद्धाना दक्षिणतः करम्भं पश्चात्परिवापमामिक्षामुत्तरतः । कथमु खल्वेषाꣳ संचरो[2] स्यादिति । प्रज्ञातो हविष्पथो । ऽथापरं । पूर्वया द्वारोपनिर्हृत्यापरया द्वारा सदः प्रपाद्यायेण कर्हन् अयनेन धिष्णियानुत्तरेणाच्छावाकस्य धिष्णियं पर्याहृत्यान्यस्मै प्रदायैतेनैव यथेतमेत्योत्तरेण सदः परीत्य पूर्वया द्वारोपनिर्हृत्योत्तरेणाग्नीध्रीयं पर्याहृत्यान्तर्वेद्यासादयेद्।ध्वर्युर्हविर्धानं[3] प्रपन्नः त्वदुपनिष्क्राम मा त्वाभिपरिह्वारिषमित्येव ब्रूयाद् । अथो एतद्बौधायनस्य कल्पं वेदयन्ते द्विदेवत्येषूत्तरतस्तिष्ठते प्रतिप्रस्थात्रे प्रतिनिर्याह्यं[4] प्रयच्छतीति यदाध्वर्युः पुरोडाशान्प्राङ्प्रत्यङ् हरेत्तद्धविर्धानं प्रपद्यमानं प्रतिप्रस्थातारं परिगृह्णीयाद्धविर्धानादायोपनिष्क्रामत्युपनिष्क्रान्तस्यैवाध्वर्योर्हविर्धानाद्दक्षिणे । ऽपरेण परिक्रान्ता योत्तरतस्तिष्ठते प्रतिप्रस्थात्रे

---

१ °तीति Ben.

२ Thus Ben C U and G (pr. m.) the Viv. (one copy); संचरि H the Viv. (another copy), संचारौ Be G (sec. m.), संचरः U (sec. m.). The Viv.: संचरणं संचरो गमनं तस्याखि संचरौ (°रि) मार्गः cp. XXVI. 24.

३ Thus H G (pr. m.) Kes'., the other MSS. ins. चाय before ध्वर्यु°

४ प्रतिनिया? Ben Be and one copy of the Viv.

Digitized by Google

प्रतिनिर्ग्राह्यं[1] प्रयच्छतीति । हुत्वा व्यवनीय[2] प्रदक्षिणमावृत्य[2]
प्रतिप्रस्थाताध्वर्युं परिगृह्णीयादध्वर्युः प्रतिप्रस्थातारं प्रत्यङ्
द्रवन्पात्रेण । सिद्धमत ऊर्ध्वमयेमे द्विदेवत्या अननुवषट्कारा
भवन्ति । क्व[3] उ खल्वेषामनुवषट्कारो भवतीति । विज्ञायते
द्विदेवत्यानृतुयाजान्यश्च पात्नीवतो ग्रहः । आदित्यश्च-
III. 106. 2. सावित्रौ[4] तान्स्म[5] मानुवषट्कृथा[5] इति । यथो एतद्दौपम-
न्यवस्य कल्पं वेदयन्ते द्विदेवत्येषु दीर्घभक्षेणैवैनाभक्षयेद्भक्षे हि[6]
माविशेति प्रतिपद्य कल्पे दक्षाय रायस्पोषाय सुवीरतायै
इत्यातः । प्रत्यभिमृशते मा मा राजन्विबीभिषो मा मे
हार्दि त्विषा वधीः । वृषणे शुष्मायायुषे वर्चस इत्यथानु-
सवनभक्षेणैव[7] सवनमुखीयान्भक्षयेदिति । ॥ २० ॥ त्रयोदशः ॥

क्व उ खलु वसतीवरस्य स्तोत्रभक्तिर्भवति शस्त्रभक्तिर्वेति ।
विश्वरूपासु ह्यस्य स्तोत्रभक्तिर्भवति प्रातरनुवाके[8] च शस्त्र-
भक्तिः । क्व उ खलूपांश्वन्तर्यामयोर्द्विदेवत्यानां स्तोत्रशस्त्र-

---

१ प्रतिनिग्रा° Ben Be and one copy of the Viv.

२ °णीयाप्रदक्षिण° G U D C.

३ क्व उ U Be Ben C, Viv., क्व G H.

४ °सावित्रं Be Ben (sec. m.), °सावित्रान् Ben (pr. m.)

५ Thus G (pr. m.) U D C and cp. Āśv. śrs. v. 5. 21 (Vait. sū. 20. 4); माश्नतानुवष° Ben (pr. m.), माश्नतामनुवष° G (sec. m.), ताश्नामानुवष° H, ममाश्नतानुवष° Be.

६ °भक्षयेन्नैवै° Be G.

७ °भक्षयेन्नैव Be G U (sec. m.).

८ °वाको Be G C U (sec. m.).

Digitized by Google

भक्तिर्भवतीति । यदुपांशुं गृह्णाति तदुपांश्वन्तर्यामयोः । प्रउग उक्थे[१] द्विदेवत्यानामथायं प्रतिप्रस्थातर्तुग्रहेष्वध्वर्योरन्तरतःश्चेवो भवतीतश्चामुतश्च यन्तं प्रतिप्रस्थाताध्वर्युं परिस्तृणीयादथाध्वर्युः प्रतिप्रस्थातारं प्रत्यङ् द्रवन्पात्रेण । सिद्धमत ऊर्ध्वं । किंदेवत्या उ खल्वृतुयाजा भवन्तीत्यृतुदेवता इत्येतदेकमथापरमिन्द्रꣳ होता यजति । मरुतः पोता यजति । ग्नावो नेष्टा यजत्यग्निमाग्नीध्रो यजतीन्द्रं ब्राह्मणाच्छꣳसी यजति । मित्रावरुणौ मैत्रावरुणो । देवं द्रविणोदां चत्वारो ऽश्विनाध्वर्यू अध्वर्यू[२] । अग्निं[२] गृहपतिं गृहपतिः । क उ खल्वैन्द्राग्नस्य स्तोत्रभक्तिर्भवतीति । बहिष्पवमान इत्येव ब्रूयाद्ये चात्र ग्रहा अस्तोत्राः पवमान एव[३] तेषाꣳ[४] स्तोत्राणि भवन्ति[४] । क उ खलु माध्यंदिनीयाः सवनीया निरुप्यन्त इति । शुक्रवैश्वदेवस्य स्तोत्र इत्येव ब्रूयात्क[५] तृतीयसवनीया । माहेन्द्रस्य स्तोत्र इत्येव ब्रूयात् । ॥ २१ ॥

नाराशꣳसमुपदस्तꣳ ऊताद्वैनꣳ[६] होतृचमसाद्भक्षीया-

---

१ Thus U (sec. m.), Viv.; उक्थो G U (pr. m.), उकथे Be Ben H. Acc. to the Viv. it is synonymous to मुखे ।

२ Thus G U D C; चध्वर्यवोग्निं Ben H Be.

३ Thus G Be, एवैतेषां Ben D H U C.

४ भवंतीति Ben H.

५ चवतु ins. G U D C.

६ Thus G U (sec. m.), ऊताद्वैनं H D C U (pr. m.), ऊताद्वैनं Ben (sec. m.) Be, ऊताद्वेनं Ben (pr. m.)

Digitized by Google

हिंकाराग्रꣳसं प्रातःसवनं च माध्यंदिनसवनं चैकनाराग्रꣳसं तृतीयसवनं । चत्वार्युन्नीयमानसूक्तानि[1] भवन्तीति[2] । सवनमुखेषु[3] चाच्छावाकचमसे[3] च[3] । त्रयो दीर्घभक्षाः । क उ खलु प्रवर्ग्यः सुत्यमहरनुसमेतीति । दधिघर्म इत्येव ब्रूया-
I. 234. 1.त्किमुपसदाꣳ । सौम्यस्य परीज्येति । तिरश्चर्मण्यालके ग्राव्णो-
दादयतीति । अंशुम्ब्राभिषव इत्येतदाचक्षते । कथमु खलु रथंतरपृष्ठे माहेन्द्रं ग्रहं गृह्णीयान्महाꣳ इन्द्रो य ओजसेत्येतया गायत्र्या माहेन्द्रं गृह्णीयादथ बृहत्पृष्ठे महाꣳ इन्द्रो नृवदा चर्षणिप्रा इत्येतया त्रिष्टुभा माहेन्द्रमथोभयपृष्ठे[4] यथा पृष्ठं तथा गृह्णीयात्पुरोरुचमितरां कुर्यादिति । ॥ २२ ॥ चतुर्दशः ॥

कथमु खलु सवनीयस्य पञ्चोर्ध्वयाया उपक्रमो भवतीतौडम्बूनꣳ संस्तीर्य पृषदाज्यं विहृत्य[5] जुह्वाꣳ समानीयान्तरेण चात्वालोत्करावुदङ्ङुपनिष्क्रम्य संवदेताभिघारयेदाघादयेत्यध्रुं पञ्चहोता चतसृषूपस्तृणीते । मनोताप्रभृतिनेडान्तेन चरेत्सिंहमत ऊर्ध्वमथोक्थ्यविग्रहेषु य एव प्रातःसवनिकौ[6]

---

१ °र्युन्नीयमानानिसू° Ben H, °र्युन्नीयमानिसू° Be, °र्युन्नीयसू° C.

२ इति om. G.

३ । Thus, hesitatingly, emended. सवनमुखेष्वाच्छावाकच (°कच°) मसे सवनेच C U D; सवनमुखेष्वच्छावाकचमसे च सवनमुखेषु G (sec. m.); सवनमुखेषाच्छावाकचमसे च सवने च Be Ben; सवनमुखेच्छावाकचमसेषसवने च H

४ After माहेन्द्रम् G U D ins. ग्रहम् ।

५ Thus H, विहृत्य the other MSS. (G is indistinct).

६ °सावनीकौ or °सवनीकौ some of the MSS.

Digitized by Google

ग्रहणमन्त्रः स एव माध्यंदिनीयः स तृतीयसवनिको[१] । देवतामेव व्यञ्जयेच्चमसायचमसायैव त्रींस्त्रीन्पुरोडाशशकलानुपास्येन्नव[२] होतृचमस इति । त्रयाणामेवैष उक्तो भवत्यथायमाग्रयणस्त्रयस्त्रिंशतो देवतानां गृह्यते । क उ खल्वेताः प्रदाने विज्ञायन्त इति । पात्नीवते । विज्ञायते पत्नीवतस्त्रिंशतं त्रींश्च देवानिति । कथमु खलु पात्नीवतं भक्षयेद् । आदित्यवद्गणस्य सोम देव ते मतिविदस्तृतीयस्य सवनस्य जगतीच्छन्दसो ऽग्निना वैश्वानरेण पत्नीवता त्वष्ट्रा पीतस्य मधुमत उपहूतस्योपहूतो भक्षयामीति । ॥ २३ ॥

कथमु खल्वन्तरुक्थ्यो भवतीति । प्रसिद्धं तृतीयसवन आग्रयणं गृहीत्वोक्थ्यं गृह्णीयादथैनं ध्रुवमुपस्थाप्य त्रिषूर्ध्वपात्रेषु विगृह्णीयादुपयामगृहीतो ऽसि देवेभ्यस्त्वा देवायुवमुक्थ्येभ्य उक्थायुवं यज्ञस्यायुष इन्द्रावरुणाभ्यां[३] जुष्टं गृह्णामीति । पुनर्हविरसीत्युक्थ्यस्थालीं प्रत्यभिमृशति । परिमृज्य सादयत्येष ते योनिरिन्द्रावरुणाभ्यां त्वेति । तदानीमेवापरं[४] गृह्णात्युपयामगृहीतो ऽसि देवेभ्यस्त्वा देवायुवमुक्थ्येभ्य उक्था-

---

१ °सावनीको or °सवनीको some of the MSS.

२ Thus D G U (pr. m.) C Ben (pr. m.), °पास्येतन H, °पास्येरन्नव Ben (sec. m.), °पास्येरंनव Be.

३ Nearly all the MSS. insert here and infra वा before जुष्टं ।

४ MSS., exc. Be once and Ben once (sec. m.), read °परेण instead of °परं ।

Digitized by Google

युवं यज्ञस्यायुष इन्द्राबृहस्पतिभ्यां[१] जुष्टं गृह्णामीति । पुनर्ह-
विरसीत्युक्थ्यस्थालीं प्रत्यभिमृशति । परिमृज्य सादयत्येष
ते योनिरिन्द्राबृहस्पतिभ्यां त्वेति । तदानीमेवापरं गृह्णात्यु-
पयामगृहीतो ऽसि देवेभ्यस्त्वा देवायुवमुक्थेभ्य उक्थायुवं
यज्ञस्यायुष इन्द्राविष्णुभ्यां जुष्टं गृह्णामीति । नात्र पुनर्हविर- ९
सीत्युक्थ्यस्थालीं प्रत्यभिमृशति । दशाभिरेवैनां मृष्ट्वा न्युब्जति ।
परिमृज्य सादयत्येष ते योनिरिन्द्राविष्णुभ्यां त्वेत्यथैनान्ध्रुवे
ऽवनीय होतृचमसे ऽवनयेत्स्तोमे स्तोमाश्चावपेच्छस्त्रे शस्त्राणि ।
तस्य प्रत्तस्य[२] भक्ष इन्द्रावरुणाभ्यामिन्द्राबृहस्पतिभ्यामिन्द्रा-
विष्णुभ्यामग्निना वैश्वानरेण मरुद्भिः पीतस्य मधुमत उपहू- १०
तस्योपहूतो भक्षयामीत्येतेनैव वा भक्षयेदपि वा नित्यपूर्वं-
णादित्यवद्गणस्य सोम देव ते मतिविदस्तृतीयस्य सवनस्य
जगतीच्छन्दस इन्द्रावरुणाभ्यामिन्द्राबृहस्पतिभ्यामिन्द्राविष्णुभ्या-
मग्निना वैश्वानरेण मरुद्भिः पीतस्य मधुमत उपहूतस्योपहूतो
III. 113. 2. भक्षयामीति । यथो एतदौपमन्यवस्य कल्पं वेदयन्ते पुरस्ता- ११
न्मिन्द्राहुती जुहुयान्मिन्द्राहुती हुत्वा हारियोजनं ग्रहं
II. 326. 12. गृह्णीयादित्यथ हैके चात्वालदेशे ऽवभृथं निधाय दध्ना
पयसा मधुमिश्रेण नैव्ययनैर्ऋजीषमभिजुह्वति यत्ते ग्राव्णा

१ Here begins M (see Introd. to Vol. II, p. IV).

२ Thus U M, प्रतक D, प्रबक्ष Be, thus or प्रतक्ष Ben., प्रविर H G. om. the word altogether, प्रत C.

Digitized by Google

चिच्छिदुः सोम राजन्नित्येवमृग्यजूꣳषि जुहोतीति[1] । कत-मानि खल्विमान्यवभृथयजूꣳषि भवन्तीति । यद्देवैनदाहव-नीये प्राकल्पैश्चरन्नि देवकृतस्यैनसो ऽवयजनमसि मनुष्यकृत-स्यैनसो ऽवयजनमसि पितृकृतस्यैनसो ऽवयजनमसीत्येवमवभृथा-हुताविति । कतमा उ खल्वियमवभृथाहुतिर्भवतीत्यप उद्धृत्य[2] जुहोति यज्ञस्य त्वा यज्ञपते हविर्भिः । सूक्तवाके नमो-वाके विधेम स्वाहेति । तिष्ठन्त एवावभृथेन प्रचरेयुः । पराञ्चावृत्तः प्रपदेनोदकान्तं प्रत्यस्येत्सिद्धमत ऊर्ध्वम् ।

॥ २४ ॥ पञ्चदशः ॥

अथायमुदयनीयस्तस्य कः कर्मण उपक्रमो भवतीति । बर्हिर्यजुषा कुर्यात्पाणी संमृशीत । परिस्तृणीयात्पात्राणि निर्णिज्य सꣳसादयेद्ब्रह्माणं दक्षिणत उपवेश्याथैवोत्तरत उद-पात्रं निधाय जघनेन गार्हपत्यꣳ स्फ्यं निदध्यात्स्फ्योपरि पात्र्यौ । पात्र्यां श्रौहीनावपेच्छूर्पादानप्रभृति[2] कर्मान्तस्तायत आ प्रस्कन्दनात्प्रस्कन्दनान्तं कर्म कृत्वा तिरः पवित्रमप आनीयाधिश्रित्य तिरः पवित्रं तण्डुलानावपेदाज्यं[3] निर्व-पेदाज्यमधिश्रयेदुभयं पर्यग्नि कृत्वा जघनेन गार्हपत्यमौप-सदायां वेद्याꣳ स्रुक्यजुर्हरेत्सिद्धमत ऊर्ध्वं । तस्य प्रतस्था-सादनं । दक्षिणं परिधिसन्धिमपरं विमुच्य दक्षिणं वा परि-

---

1 See TS. VI. 6. 3. 1.

2 Thus G U M D C, उद्धृत्य Ben हुत्वा H.

3 From वापेच्छूर्पा° unto तंडुलान् om. G Be and Ben (sec. m.).

धिमग्रेण प्राञ्चं प्रायणीयमासादयेत्प्रत्यञ्चमुदयनीयमग्निमुखा
अथ देवता इज्यन्ते । संस्थन्त[१] उदयनीयः संतिष्ठत ॥ २५ ॥
I. 263. 2. अथ यदि पशुरुपक्लृप्तः स्यात्पाणी संमृशीत । परि-
स्तृणीयात्पात्राणि निर्णिज्य सङ्घादयेत्प्रोक्षणीः संस्कृत्य
पात्राणि प्रोक्षेदाज्यं निरुप्याधिश्रित्य पर्यग्नि कृत्वा स्फ्यमाद-
दीत । संप्रैषप्रभृति पाशुबन्धिकं कर्म तायते । सिद्धमत ऊर्ध्वं ।
III. 114. 17. यथो एतच्छालीकेः कथं वेदयन्ते मैत्रावरुण्यामिक्षया यजेतेति
तस्मै सह सवनीयैर्वत्सापाकरणं[२] सह सायंदोहमुदयनीयेन
चरित्वा पाणी संमृशीत । परिस्तृणीयात्पात्राणि निर्णिज्य
सङ्घादयेत्प्रोक्षणीः संस्कृत्य पात्राणि प्रोक्षेदथ प्रातर्दोहं
धेनूर्दोहयेदथैनां[३] गार्हपत्ये श्रपयित्वानभिघारितामुद्वासयेद-
थाज्यं[४] निर्वपेदथाज्यमधिश्रयेदुभयं पर्यग्नि कृत्वाहवनीये
वैदलकान्परिधीन्परिधायाथैनां[५] पुनरधिश्रित्याभिघारिता-
मुद्वास्यान्तर्वेद्यासादयेदथाग्नये सोमायेत्याज्यभागाभ्यां चरेदाज्य-
भागान्तं कर्म कृत्वा दक्षिणे वेद्यन्ते केशश्मश्रु वपते नखानि

---

१ Thus write G M U (sec. m.), संयुवंतः Be U (pr. m.) C, सर्वंतं H, संयुतं D.

२ Thus M Be Ben, वत्सानामपाक० G U D C, वत्सापाक० H.

३ ०मं Ben (pr. m.) Be.

४ Thus H U D C G (pr. m.) Ben (pr. m.); ०नावभिघारितमु० M, ०नाभिघारितमु० G (sec. m.) Be Ben (sec. m.).

५ वैदल० M only.

Digitized by Google

निष्क्रमते[1]। ऽथाज्यभागप्रतिपत्त्केडान्ता[1] संतिष्ठते। ऽथैयमुद्व-
9. सानीयोपांशु भवति पुनराधेयधर्मै[2] हि[2]। सहस्रसावेद्यै
स्तम्बयजुषो हरणमसंनद्धा पत्नी यज्ञपुच्छमन्वास्ते। ॥ २६ ॥
षोडशः ॥

१ अथेममग्निचयं त्र्युपसत्कं षडुपसत्कं द्वादशोपसत्कमिति[3]
चिन्वते। स यदि साहस्रं त्र्युपसत्कं चेष्यमाणो भवति पूर्वाह्णे
प्रवर्ग्योपसद्भ्यां प्रचर्य प्रथमां चितिं सपुरीषामुपधाय संचि-
ताहुती[4] जुहोति। द्वितीयां चितिं सपुरीषामुपधाय
संचिताहुती जुहोति। श्वो भूते प्रवर्ग्योपसद्भ्यां प्रचर्य तृतीयां
१० चितिं चतुर्थीं चितिं पञ्चमीं चितिं षष्ठीं चितिं सपुरीषा-
मुपधाय संचिताहुती जुहोत्यौपवसथिकेव तृतीयाथ यदि
साहस्रं षडुपसत्कं चेष्यमाणो भवति पूर्वाह्णे प्रवर्ग्योपसद्भ्यां प्रचर्य
प्रथमां चितिं सपुरीषामुपधाय संचिताहुती जुहोति। श्वो[5]
भूते प्रवर्ग्योपसद्भ्यां प्रचर्य द्वितीयां चितिं सपुरीषामुपधाय
११ संचिताहुती जुहोति[5]। स एवमेव पञ्चाहमौपवसथिकेव षष्ठ्यथ
यदि साहस्रं द्वादशोपसत्कं चेष्यमाणो भवति यथासूत्रं[6] तथाथ

---

१ ॰न चाज्य॰ Ben H.

२ Thus G Ben C D; ॰धर्म्मान्वि U, ॰धर्म्येवि M, ॰धर्मान्विच H, ॰संज्ञानाय Be.

३ ॰कं वेति Ben H.

४ Here and infra some of the MSS. read ॰हुतीर्जुहो॰ ।

५ The passage from श्वो unto जुहोति om. M Be, in G it is effaced.

६ यथासूत्रमथ H G (sec. m.).

Digitized by Google

यदि द्विषाहस्रं[1] त्र्युपसत्कं चेष्यमाणो भवति पूर्वाह्णे प्रवर्ग्यो-
पसद्भ्यां प्रचर्य प्रथमां चितिꣳ सपुरीषामुपधाय संचिताहुती
हुत्वाहार्याꣳ सपुरीषामुपदधाति[2] । द्वितीयां चितिꣳ सपुरी-
षामुपधाय संचिताहुती हुत्वाहार्याꣳ सपुरीषामुपदधाति ।
श्वो भूते प्रवर्ग्योपसद्भ्यां प्रचर्य तृतीयां चितिं चतुर्थीं चितिं ९
पञ्चमीं चितिꣳ षष्ठीं चितिꣳ सपुरीषामुपधाय संचिताहुती
हुत्वाहार्याꣳ[3] सपुरीषामुपदधात्यौपवसथिकैव तृतीयाय यदि
द्विषाहस्रꣳ षडुपसत्कं चेष्यमाणो भवति पूर्वाह्णे प्रवर्ग्योपसद्भ्यां
प्रचर्य प्रथमां चितिꣳ सपुरीषामुपधाय संचिताहुती हुत्वा-
हार्याꣳ सपुरीषामुपदधाति । श्वो[4] भूते प्रवर्ग्योपसद्भ्यां प्रचर्य १०
द्वितीयां चितिꣳ सपुरीषामुपधाय संचिताहुती हुत्वाहार्याꣳ
सपुरीषामुपदधाति[4] । स एवमेव पञ्चाहमौपवसथिकैव षष्ठाय
यदि द्विषाहस्रं द्वादशोपसत्कं चेष्यमाणो भवति पूर्वाह्णे
प्रवर्ग्योपसद्भ्यां प्रचर्य प्रथमां चितिमुपधायाव्यस्तपुरीष[5]
एताꣳ रात्रिं वसति । श्वो भूते प्रवर्ग्योपसद्भ्यां प्रचर्य ११
पुरीषमुपधाय संचिताहुती हुत्वाहार्याꣳ[6] सपुरीषामुपदधाति ।

---

१ द्विषा° and द्विसा° the MSS. promiscue; thus also त्रिषा°, त्रिसा° ।

२ Thus Be G M, °मुपधाय the other MSS.

३ हार्यंꣳ M here and infra each time.

४ From श्वो unto °दधाति effaced in G.

५ Most of the MSS. ins. सपुरीषाम् after चितिम्, but cp. the following chapter.

६ हुत्वा द्वे द्वे चाहार्ये सपुरीषे उप° M.

स एवमेव यथासूत्रं तथा वर्तमानः पुरीषंपुरीषमुपधाय संचिताकृती कृत्वाहार्याꣳ सपुरीषामुपदधात्यौपवसथिकेव[1] द्वादशी । ॥ २७ ॥

अथ यदि चिषाहस्तं त्र्युपसत्कं चेष्यमाणो भवति पूर्वाह्णे प्रवर्ग्योपसद्भ्यां प्रचर्य प्रथमां चितिꣳ सपुरीषामुपधाय संचिताकृती कृत्वा द्वे आहार्ये सपुरीषे उपदधाति । द्वितीयां चितिꣳ सपुरीषामुपधाय संचिताकृती कृत्वा द्वे आहार्ये सपुरीषे उपदधाति । श्वो भूते प्रवर्ग्योपसद्भ्यां प्रचर्य तृतीयां चितिं चतुर्थीं चितिं पञ्चमीं चितिꣳ षष्ठीं चितिꣳ सपुरीषामुपधाय संचिताकृती कृत्वा द्वेद्वे आहार्ये सपुरीषे उपदधात्यौपवसथिकेव तृतीयाथ यदि चिषाहस्तꣳ षडुपसत्कं चेष्यमाणो भवति पूर्वाह्णे प्रवर्ग्योपसद्भ्यां प्रचर्य प्रथमां चितिꣳ सपुरीषामुपधाय संचिताकृती कृत्वा द्वे आहार्ये सपुरीषे उपदधाति । श्वो[2] भूते प्रवर्ग्योपसद्भ्यां प्रचर्य द्वितीयां चितिꣳ सपुरीषामुपधाय संचिताकृती कृत्वा द्वे आहार्ये सपुरीषे उपदधाति[2] । स एवमेव पञ्चाहमौपवसथिकेव षष्ठ्यथ यदि चिषाहस्तं द्वादशोपसत्कं चेष्यमाणो भवति पूर्वाह्णे प्रवर्ग्योपसद्भ्यां प्रचर्य प्रथमां चितिमुपधायाध्यस्तपुरीष एताꣳ रात्रिं वसति । श्वो भूते प्रवर्ग्योपसद्भ्यां प्रचर्य पुरीषमुपधाय संचिताकृती कृत्वा द्वे आहार्ये सपुरीषे उपदधाति । स एवमेव यथासूत्रं तथा

१ कृत्वा द्वेद्वे आहार्ये सपुरीषे उप॰ M.

२...२ Effaced in G.

Digitized by Google

वर्तमानः पुरीषंपुरीषमुपधाय संचिताङ्गती कृत्वा द्वे स्वाहार्वे सपुरीषे उपदधात्यौपवसथिकेव द्वादशी । कथन्नु[1] खल्वन्तरुपसत्कं बहिरुपसत्कमन्तर्बहिरुपसत्कमिति विजानीयाद्वै यस्य संवत्सरस्य द्वादशावभिष्य राजानं क्रीणीयात्सो ऽन्तरुपसत्कः । संवत्सरे पर्यवेते राजानं क्रीणीयात्स बहिरुपसत्को । दैवस्य । संवत्सरस्य षडवभिष्य राजानं क्रीणीयात्तस्योपसदः सुत्यस्य षड्हाः सो ऽन्तर्बहिरुपसत्कः । ॥ २८ ॥ सप्तदशः ॥

II. 1. 8. मृदमेताꣳ समां बिलेन करोतीति[2] । समां[3] भूम्यां
II. 1. 16. निदधातीत्येवेदमुक्तं भवत्यथैतावश्वगर्दभावुत्तरत उपस्थापयति पुरस्ताद्वा प्रत्यञ्चौ । स यदि पुरस्तात्प्रत्यञ्चौ दक्षिणो ऽश्व । उत्तरो गर्दभो । ऽथ यद्युत्तरतः पूर्वो ऽश्वो[5] ऽपरो[5] गर्दभो । ऽग्निभ्यः पशूनालभत इति । पश्चात्तां पशूनां ब्राह्मणं भवति । स यद्यु[6] हैतान्पशूनुपाकरोत्या बर्हिष उपासनात्पाशुबन्धिकं कर्मं वर्तयित्वा शिराꣳसि प्रच्छिद्यापो देहानभ्यवहरेयुरपो

---

१ Thus U G (pr. m.) C Ben (pr. m.) H M D, यस्य G (sec. m.) Ben (sec. m.)

२ इति given by G U and a citation in the Mahāgnisarvasva.

३ समां D H U (pr. m.) C, समं M U (sec. m.) Ben (sec. m.) Be.

४ Thus (singul.) U (sec. m.) the Viv. and the Mahāgnis., plural the other MSS.

५ Thus (श्वोपरो) M D C U (pr. m.) the Viv. and Ms., श्वउपरो Be Ben G U (sec. m.); H corrupt.

६ यद्य M. (i.e. *yady aha*).

Digitized by Google

देहानभ्यवहरन्तीति विज्ञायते । मासमेतं[1] ब्रह्मचर्यं चरति । यो ऽधःसंवेश्यमाङ्गाम्यस्त्युपायो भवति पूर्वं दीक्षेत्येतामापद्यते[2] । यथोद्यमेवैतं मासमभि दीक्षमाणो मन्यते । ऽथ कृष्णाजिने यजमानं वाचयति मुष्टी चैव न करोति वाचं च न यच्छतीति । कृष्णाजिनप्रभृति कर्मान्त एष भवत्यावेदनात्प्रयमायामुपसदि वेदिं विमिमीते[3] स्तम्बयजुर्हरतीति । कर्मैवप्रकारितमेवैतद्भवत्यथ[4] संभारेषूषाञ्जिवपन्यदद्यन्द्रमसि कृष्णं तन्मनसा ध्यायेत्तदपोहेति । ॥ २९ ॥

उत्तरमुत्तरं प्रति बलीवर्दमुत्तरामुत्तराङ्ग सीतां कृषन्नौषधं वपन्स्वयमातृण्णावकाशं नावक्रामेदित्यथ[5] हैके[6] पुरुषे च स्वयमातृण्णायां च साम गायन्ति । किमु खलु स्वयमातृण्णाभिक्रान्तं भवतीति । हिरण्येष्टका मण्डलेष्टका रेतःसिगित्येव ब्रूयाद्यमिष्टकागणमुपदध्यात्तं न व्यवेयाद्दक्षिणेन दक्षिणमुत्तरेणोत्तरङ्ग । स यदि दक्षिणतः पुरस्तादेष्टका उपदध्यादुपसंचरावर्ततायथोत्तरतः पश्चाद्वा प्रदक्षिणमावृत्य स्वयमातृण्णामेवाभिमुख इष्टका उपदध्यात्कृत्तिका उपदधा-

---

Astasāhasrikā Prajñāpāramitā, Fasc. 1–6 @ -/10/- each	3	
*Atharvana Upanishads (Text), Fasc. 2–5 @ -/10/- each	2	
Ātmatattvaviveka, Fasc. 1–3	1	
Avadāna Kalpalatā (Sans. and Tibetan), Vol. I, Fasc. 1–13; Vol. II, Fasc. 1–11 @ 1/- each	24	
Bālam Bhaṭṭi, Vol. I, Fasc. 1–2; Vol. II, Fasc. 1 @ -/10/- each ..	1	
Bauddhastotrasangrana	2	
Baudhāyana Śrauta Sūtra, Fasc. 1–3; Vol. II, Fasc. 1–5; Vol. III, Fasc. 1–4 @ -/10/- each	7	
*Bhamati (Text), Fasc. 5–8 @ -/10/- each	2	
Bhasavritty	0	
Bhātta Dīpikā, Vol. I, Fasc. 1–6; Vol. II, Fasc. 1–2 @ -/10/- each ..	5	
Bodhicaryāvatāra of Çāntideva, Fasc. 1–7 @ -/10/- each	4	
Brahma Sutras (English), Fasc. 1 @ 1/-	1	
Bṛihaddevatā, Fasc. 1–4 @ -/10/- each	1	
Bṛihaddharma Purāṇa, Fasc. 1–6 @ -/10/- each..	3	
Çatadūṣaṇī, Fasc. 1–2 @ -/10/- each	1	
Catalogue of Sanskrit Books and MSS., Fasc. 1–4 @ 2/- each ..	8	
*Çatapatha Brāhmaṇa, Vol. I, Fasc. 1–7; Vol. II, Fasc. 1–5; Vol. III, Fasc. 1–7; Vol. V, Fasc. 1–4 @ -/10/- each ..	14	[illegible]
Ditto Vol. VI, Fasc. 1–3 @ 1/4/- each	3	[illegible]
Ditto Vol. VII, Fasc. 1–5 @ -/10/-	3	2
Ditto Vol. IX, Fasc. 1–2	1	4
Çatasahasrikā-prajñāpāramitā, Part I, Fasc. 1–18, Part II, Fasc. 1 @ -/10/- each	11	[illegible]
*Caturvarga Chintāmani, Vol. II, Fasc. 4–25; Vol. III, Part I, Fasc. 1–18, Part II, Fasc. 1–10; Vol. IV, Fasc. 1–6 @ -/10/- each	35	[illegible]
Ditto Vol. IV, Fasc. 7 @ 1/4/- each	1	4
Ditto Vol. IV, Fasc. 8–10 @ -/10/-	1	14
Çlokavartika (English), Fasc. 1–7 @ 1/4/- each..	8	12
*Çrauta Sutra of Apastamba (Text), Fasc. 6–17 @ -/10/- each ..	7	3
*Çrauta Sutra of Çānkhāyana, Vol. I, Fasc. 1–7; Vol. II, Fasc. 1–4; Vol. III, Fasc. 1-4: Vol IV. Fasc. 1 @ -/10/- each	10	0
Cri Bhashyam (Text), Fasc. 1–3 @ -/10/- each	1	14
Cri Cantinatha Charita, Fasc. 1–4	2	[illegible]
Dāna Kriyā Kaumudī, Fasc. 1-2 @ -/10/- each..	1	4

Digitized by Google

त्तथापो[1] ऽभ्यवहृत्य[1] तत्प्रायश्चित्तं हुत्वा तथा पुनर्गृहीत्वा जुहुयात्सवनेषु[2] पुनरुन्नीय जुहुयाद्धुत्वा वा तस्मिन्हिरण्यमन्तर्धायाप आनीय भक्षयेत्सैव ततः प्रायश्चित्तिरथ यदि सवनकालो ऽतिक्रामेदग्निर्मूर्धा दिव इत्येतस्यानुवाकस्य प्रथमेन गायत्रेण[3] जुहुयात्प्रातःसवने[4] । तथा त्रैष्टुभेन[5] माध्यंदिने सवने । तथा जागतेन[5] तृतीयसवने । ऽत ऊर्ध्वमतिरात्र[6] उत्तरमहर्नाधिगच्छेद्यदि गच्छेद्यज्ञभ्रेष आगच्छेत्तत्र प्रायश्चित्तं सर्वान्होतॄञ्जुहुयाद्विज्ञायते ब्रह्म वै चतुर्होतार इति । तस्माच्चतुर्होतृनेव जुहुयादत ऊर्ध्वमहःसंख्यां[7] नाधिगच्छेदेकाहेष्वथ[8] सवनीयानां प्रायश्चित्तिरथ यदि पूतिगन्धः[9] स्यात्तदुत्सृज्य पुनरुत्पाद्य प्रचरेदपि वोष्णोदकेन प्रक्षाल्य[10] ऽवधाय[10] पुनः श्रपयित्वा प्रचरेत्तत्रापि यदि[11] पूतिगन्धो भवेत्तदुत्सृज्य पुनरेवोत्पाद्य प्रचरेत्तथा सवनीयानां पुरो-

---

१ ०त्तथापहृत्य Tr.

२ Thus Tr, चमसेषुवा B H U.

३ गायत्र्या Tr.

४ प्रातः सवने जुहुयात् B H U.

५ त्रिष्टुभा, जगत्या Tr.

६ ०तिरात्रादुत्तर० Tr.

७ Thus H and Viv.; संख्या B U, संख्यं Tr.

८ यदि ins. Tr.

९ Thus B and Viv., पूतीगंध U, पूतीगंधाः H, पूतीगंधं Tr.

१० Thus U, ०ल्येनावधाय H, ०ल्येन—B, ०ल्येन, omitting चावधाय, Tr.

११ in U only.

Digitized by Google

ज्यायानां। तथा शांसाख्यानामथ यदि स्तोत्रꣳ शस्त्रं प्रतिगरं
वोत्सृजेन्मिन्द्राहुती हुत्वोपाकुर्यादथ यद्येकाꣳ स्तोत्रीयाꣳ सूक्तं
वर्चं वार्धर्चं वा प्रतिगरं वोत्सृजेन्मिन्द्राहुती हुत्वा जपेत्स्तोत्रो-
पाकरणप्रभृत्या[1] होमाद्वाचं यच्छेद्यदि वाचं विसृजेद्वैष्णवी-
मृचं जपेदथ यद्याश्राव्य वाचं विसृजेद्वैष्णवीमृचं जपेद्विष्णो ९
त्वं नो अन्तम इति। पुनरेवाश्राव्य[2] यजेद्दुर्गातिरिक्तपुनरुक्त-
व्याघातेष्वन्येषु वान्यत्र प्रायश्चित्त[3] मिन्द्राहुती जुहुयात्सर्व-
स्थानेषु मिन्द्राहुती यज्ञशरीरमिति श्रुतिस्तस्मात्सर्वेषामाचा-
र्याणां प्रशस्तमिति। ॥ ४ ॥ तृतीयः ॥

अथ यदि हुताहुतौ सोमौ सꣳसृज्येयातामाहवनीया- १०
दुदीचो[4] ऽङ्गारान्निरूह्य[5] तेषु जुहुयाद्यस्य हि स्व चलि-
याविन्द्राग्नी चेतनस्य च। हुताहुतस्य तृप्यतमहुतस्य हुतस्य
च॥ हुतस्य चाहुतस्य चाहुतस्य हुतस्य च। इन्द्राग्नी अस्य
सोमस्य वीतं पिबतं जुषेथाꣳ स्वाहेति। तस्य नित्यभक्षमनु-
वर्तयति[6] मा[6] यजमानं तमो विदन्मर्त्विजो मो इमाः प्रजाः। ११
मा यः सोममिमं पिबात्सꣳसृष्टमुभयं कृतमित्यथ यद्यन्य-

१ Thus Tr B, ०स्तोत्राद्दामप्रभृत्या U H.

२ एव om. Tr.

३ ०त्तेषु Tr.

४ ०यादेवोदीचो Tr B.

५ Thus Tr U, ०न्निर्वर्त्य B H.

६ ०वर्तयेन्मा U.

Digitized by Google

हुतास्वमसा अन्यहुतैः संसृज्येरन्सोमे वा सोममभिष्टवीयादित्येतदेवाथ यद्यन्यवृता चलिनो ऽन्यवृतैः संसृज्येरन्दीक्षिता[1] दीक्षितैर्वान्यत्र प्रात्यसोमात्सत्त्राचेत्येतदेवाथ यदि सुतः सोमो ऽभिवृष्येत[2] तदित्पदं[2] प्रत्यस्मै पिपीषत इत्येताभ्यां स्रुवाहुती हुत्वा[3] तस्य[3] नित्यभक्षमनुवर्तयतीन्दुरिन्दुमवागादिन्दोरिन्द्रो ऽपात् । तस्य त इन्द्रविन्द्रपीतस्य मधुमत उपहूतस्योपहूतो भक्षयामीत्यथ यदि सुते सोमे यजमानो म्रियेत भयं वागच्छेत्सर्वाणि हवींषि पात्र्यां समवधाय द्रोणकलशे सोमं जुह्वामाज्यं पशुमन्यस्यामित्येकामाहुतिं जुहुयाद्ये[4] देवा येषामिदं भागधेयं बभूव येषां प्रयाजा उतानूयाजाः । इन्द्रज्येष्ठेभ्यो वरुणराजभ्यो ऽग्निहोतृभ्यो देवेभ्यः स्वाहेति हुत्वात ऊर्ध्वं पैतृमेधिकं कर्म प्रतिपद्येताभये[5] वा[6] पुनर्यजेत जीर्णस्याप्रकस्य[7] चाग्निहोत्रचेष्टायामात्मन्यग्निसमारोपणं[7] विद्यत इत्यात्मनि समारूढेष्वग्निषु[8] न खादेन्न पिबे-

१ ०दीक्षितो B H U.

२ ०वृष्येततदित्पदं H, ०वृष्येत्तदित्पदं B U, ०वृष्येत्तदित्पदं Tr.

३ जुहुयात्तस्य Tr.

४ जुहोति ये Tr.

५ ०पद्यतेभये Tr.

६ H. om. वा ; it is added sec. om. in U and found in B Tr.

७ Thus Tr, ०त्मस्याग्निहो० H U B.—०त्मन्यग्निसमा० Tr, ०त्मसमा० B U H.

८ चाग्निषु om Tr.

Digitized by Google

स्तोपरि शय्याꣳ[1] शयीत नाप्सु निमज्जेन्न मैथुनं व्रजेत्कामं खादेत्कामं पिबेत्कामं त्वेवोपरि शय्याꣳ[1] शयीत नैवाप्सु[2] निमज्जेन्न मैथुनं व्रजेदिति[3] । प्रक्षालितपादपाणिरप आचम्य प्राङ्मुख उपविश्याग्निहोत्रयजुषा[4] यावन्मात्रं व्रतयित्वा तूष्णीं भूयो व्रतयेत्प्रजापतिं मनसा ध्यायन्नित्येवमेवोपासीता शरीरविमोक्षणात्[5] । ॥ ५ ॥ चतुर्थः ॥

अथ वै भवति[6] यथा वै पुत्रो जातो म्रियत एवं वा एष म्रियते यस्याग्निरुख्य उद्वायति । यन्निर्मन्थ्यं कुर्याद्विच्छिन्द्याद्भ्रातृव्यमस्मै जनयेत्स एव पुनः परीध्यः । स्वादेवैनं योनेर्जनयति । नास्मै भ्रातृव्यं जनयतीति ब्राह्मणमुख्यस्योद्वायेदप्सु भस्म प्रवेश्योख्याꣳ शकृत्पिण्डेन परिलिप्य पुनरेवैनां[7] प्रवृज्य परिदायाहुतिषाहं कृत्वाथैनाꣳ[8] स्रुवाहुतिभिरभिजुहोति[9] सुवर्न घर्मः स्वाहा सुवर्नार्कः स्वाहा सुवर्न शुक्रः स्वाहा सुवर्न ज्योतिः स्वाहा सुवर्न सूर्यः स्वाहेत्यर्कवतीभ्यामर्कमभिधावन्ता-

---

१ शय्यायां H B U.
२ नत्वेवाप्सु B U (H def.).
३ इति om. Tr.
४ Thus the Viv., ॰होत्रं यजुषा the MSS.
५ ॰वि॰ om B H U.
६ See T S. V. 7. 5. 1.
७ पुनरेवैनं B, पुनरेवान्यां Tr.
८ ॰थैनं Tr, ॰थैनां B.
९ ॰हुतीभि॰ Tr H U.

Digitized by Google

इधात्यर्कः पवित्रं पवित्रमर्को रजसो विमान इति द्वाभ्यां । मुञ्जकुलायप्रभृतिना कर्मणा प्रतिपद्येता कृष्णाजिनवाचनादृध वै भवति तमो वा एतं गृह्णाति यस्याग्निरुख्य उद्वायति । मृत्युस्तमः । कृष्णं वासः कृष्णा धेनुर्दक्षिणेति । कृष्णं वासः कृष्णां धेनुꣳ शतमानꣳ[1] हिरण्यमिति ददाति[2] । तमसैव तमो मृत्युमपहते । ऽथो तेजो वै हिरण्यं । तेज एवात्मन्धत्त इति ब्राह्मणमथ यद्यासन्दी शिक्यमगारं वा दह्येत वैश्वानरीभिः समिधो ऽभ्यादध्याद्वैश्वानरो न ऊत्येत्येतेनाष्टार्चेनाथ यदि वसतीवरीकलशः[3] पात्रेजन[4] एकधनाः[4] कुम्भेष्टकाः कथनेष्टका[5] वा परासिच्येरन्यूपो वा भिद्येत रशना वा छिद्येत चषालं वा भिद्येतौदुम्बरी वा भिद्येत ग्रावा वा भिद्येत द्रोणकलशो वा दीर्येतान्यद्वा यज्ञे दारुमयं मृन्मयं[6] वा पात्रं भिद्येत तत्तेनैव यजुषा स्वे[7] आयतने[7] निधायोपधायाभिमन्त्रयते[8] भूरायुर्मे धारयत प्राणं मे धारयत प्रजां मे

---

१ Tr ins. च ।

२ Found in Tr only and in a citation in the Mahāgnisarvasva.

३ Thus Tr, the Viv. and the Prāy. Candrikā, वसतीवरकल॰ H U, वसतीवरः कल॰ B.

४ Thus B and the Prāy. Candrikā, पात्रेजना H, पात्रेजनीरेक॰ U, पत्रेजनीरेक॰ Tr.

५ Thus Tr B, कधने॰ U, कयने॰ H.

६ मृण्मयं Tr.

७ Thus Tr. and the Viv. स्वस्थाने U, स्वस्थाने B H.

८ Thus Tr, निधायवोपधायाभि॰ B, निधायवोपधायावाभि॰ H U.

Digitized by Google

धारयत पशून्मे धारयत मा म आयुः प्राणः प्रजाः पशवः पराभिच्चेरन्नित्यथ यदि दारुमयं पात्रमाहवनीये[1] ऽनुप्रहरेदथ[2] यदि[2] मृन्मयमपो[3] ऽभ्यवहरेद्भूमिर्भूमिमगान्माता[4] मातरमप्यगात् । भूयास्म पुत्रैः पशुभिर्यो नो द्वेष्टि स भिद्यतामिति ॥ ६ ॥ पञ्चमः ॥

[5]अथातो ऽग्निहोत्रस्य लौकिकविधिं व्याख्यास्यामः पुराग्निहोत्राद्गार्हपत्यादरण्योरग्नीन्समारोपयन्नयं[6] ते योनिर्ऋत्विय इत्यन्तर्वेद्यरणी निधाय लौकिके[7] ऽग्नौ जुहुयात्सायमुद्धरति[7] सायमाहुतिं हुत्वा[8] प्रातरुद्धरति प्रातरुद्धरति प्रातराहुतिं हुत्वेति विज्ञायते ऽथाग्निहोत्रं चतुर्भिर्लुप्यते[9] होमोपस्थानव्रतदर्शपूर्णमासैरिति तन्तुमत्येष्ट्वा[10] दर्शपूर्णमासाभ्यां यजेत संतिष्ठते विच्छिन्नप्रायश्चित्तिः[11] ॥ ७ ॥ षष्ठः ॥

---

१ After पात्रं H U B ins. भिन्नम् ।

२ अथ यदि om. Tr.

३ मृण्मयं Tr.

४ °वहरेयुर्भूमि° H U.

५ The first part of this kh. differs considerably in the MSS. I have given the text of Tr, which, on the whole, agrees with the Vivaraṇa.

६ पुराग्निहोत्रस्य कालाद्गार्हपत्यभस्मनारणी संमृज्य (or संमृज्यारणी) रण्योः समारोपयत्ययं B U H.

७..७ लौकिकमग्निमाहृत्य सायमुद्धृत्य B U H.

८ इति विज्ञायते ins. B U H.

९ Thus the Viv., °र्लुप्येत the MSS.

१० इष्ट्वा om. Tr.

११ Thus Tr and the Vivaraṇa ; ग्निहोत्रस्य लौकिकविधिः B U H.

अथापद्यग्निहोत्राणाꣳ[१] समासस्तद्यथा राष्ट्रविभ्रमो व्याधयो ऽध्वगमनं गुरुकुलवासो देशकालद्रव्यानुपपत्तिरन्येषां वायोगो[२] यासु[३] विद्यत इति । तस्य कः कर्मण उपक्रमो भवतीति । कामं पूर्वाह्णे वापराह्णे वाग्निहोत्रवेलायां वा यथासूत्रं[४] वा कुर्यात्प्रसिद्धं वा[४] यजमानस्या प्रवासात्प्रसूतः[५] प्रसिद्धं प्रतिपदि सायं[५] चतुर्दश चतुर्गृहीतानि गृह्णाति सोपवसथे पार्वणे वाथेतरस्मिन्पक्षे दश[६] । प्रसिद्धꣳ सर्वꣳ समित्प्रभृति कर्म । मन्त्राꣳस्त्वेकवत्सꣳस्थाप्य सायमग्निहोत्राणि[७] हुत्वा प्रातरग्निहोत्राणि[८] जुहुयात्सायमुपक्रमः प्रातरपवर्गः । काले[९] पार्वणे न यजेत । नोर्ध्वं[१०] पाक्षिकात्समासो न प्रसक्ते नाश्रद्दधानस्याप्युदाहरन्ति[११]

---

१ Thus Tr and the Viv.; अथाप्यग्नि॰ B U H.

२ Tr ins. होम after ॰काल॰ ।

३ Thus H U, यासु Tr (grantha!), वान्यासु B.

४ Instead of these four words Tr प्रसिद्धं only.

५..५ Thus Tr; प्रवसतः प्रसुतः प्रतिपदीष्ट्वाय U H, प्रवसत् प्रतिपदि सायं B.

६ वा only in Tr.

७ Thus U, ॰त्राणां Tr B H.

८ Thus U, ॰त्राणां Tr B, ॰त्राण्यं H.

९ कालीय H.

१० Thur Tr, नोर्ध्वं B U H.

११ Thus Tr, ॰द्दधानस्य अथाप्यु॰ B, ॰द्दधानमथ B ॰द्दधानेमथ U (the last two om. अथाप्युदाहरन्ति).

Digitized by Google

अश्रद्धा परमः[1] पाप्मा पाप्मा ह्यज्ञानमुच्यते ।
अज्ञानाल्लुप्यते धर्मो लुप्तधर्मोऽधमः[2] स्मृतः ॥
श्रद्धया शुध्यते बुद्धिः श्रद्धया शुध्यते मतिः ।
श्रद्धया प्राप्यते ब्रह्म श्रद्धा पापप्रणाशिनी[3] ॥

तस्माच्छ्रद्दधानेनाप्रसङ्गेन[4] संपन्ने[4] काले[4] तत्तन्मत्या यथैतैवं लौकिकप्रयोग एवमङ्गत एवं विध्यपराधे चाप्युदाहरन्ति न वृथाग्नीनुद्वासयेन्नैवानापत्सु । वीरहा वा एष देवानां योऽग्निमुद्वासयत इति । तस्माच्छ्रद्दधानस्याप्रासङ्गिकस्य[5] चान्यत्रापि[6]

येये विशेषा लघवो यत्रयत्रोपलक्षिताः ।
तैः कर्मसंस्तरे[7] कुर्यान्न्यायोपेतं यथा भवेत् ॥
स्वशास्त्रे विद्यमाने[8] यः परशास्त्रेण वर्तते ।
भ्रूणहत्या समं तस्य स्वशास्त्रमवमन्यतः ॥
आर्षेयस्य स्वशास्त्रस्य प्रदेशास्तद्गुणैः समाः ।
कर्मणां प्रविचारार्थमापत्सु च समाप्नुयादिति ॥ ८ ॥

---

१ परमा MSS.

२ Thus B H U, धर्मः Tr.

३ Thus Tr, ॰प्रनाशिनी U, ॰प्रमोचनी B H.

४ ? Thus Tr (only संपन्नेन), ॰प्रसंगेन प्रसंगेन संपन्नेकाले U, ॰प्रसंगेन काले B H; the Viv. also has प्रसन्नेकाले ।

५ ? Thus H U, ॰धानस्याप्रसंगिक॰ B, ॰धानेनाप्रसंगिकस्य Tr.

६ Thus Tr, ॰कस्यान्यात्रापि B, ॰कस्य च अन्यत्रापि U, ॰कस्य च H.

७ Thus B U H, ॰संस्तरैः Tr.

८ ॰मानो H U.

Digitized by Google

यथो एतस्मो ऽपरिमितं प्रवसति न संवत्सरमति प्रवसतीत्यविशेषाज्जायापत्योराहिताग्न्यो रित्येवेदमुक्तं भवति । विज्ञायते चार्धो वा एष आत्मनो यत्पत्नीत्यथ यदि प्रवसति यजमाने पत्न्याः प्रवासनिमित्तꣳ स्यात्तदास्तोऽप्यतीयꣳ हुत्वाध्वर्युः समारोपयेदयं ते योनिर्ऋत्विय इति । यत्र गच्छेत्त्रानो हरेत्तत्र प्राप्याग्निं[1] मथित्वा विहारं कल्पयित्वा गार्हपत्य आज्यं विलाप्योत्पूय स्रुचि चतुर्गृहीतं गृहीत्वाहवनीये संतनीं जुहोति मनो ज्योतिर्जुषतामाज्यं विच्छिन्नं यज्ञꣳ समिमं दधातु । या इष्टा उषसो निम्रुचश्च ताः संदधामि हविषा घृतेन स्वाहेत्यथाग्नये तन्तुमते पुरोडाशमष्टाकपालं निर्वपति । शरावं दक्षिणां ददाति । सा प्रसिद्धेष्टिः संतिष्ठते । ऽथ यदि यजमानस्यैव[2] पत्नी चोभौ त्वेव[3] निष्क्रामतो ग्रामान्ते ग्रामसीमान्ते वा वसतो[4] ऽग्निहोत्रमेव[4] जुह्वताविहृतमन्याधेयं कुर्वीताग्नीन्हरन्तो नोच्छ्वसेयुर्यद्युच्छ्वसेयुरग्नयो लौकिकाः संपद्येरन्नो विना समारूढेष्वग्निषु[5] नाद्रियेत[5] अम्याप्रासे[6] सत्त्रनिदर्शनात्[6] । ॥ ९ ॥ सप्तमः ॥

---

१ प्राप्य only in Tr.

२ ०नस्य H U.

३ त्वेवमेव H U.

४ ? Thus B, वसातेग्नि० Tr, वसेताग्नि० U, वसत्यग्नि० H, वसेते the Vivarana.

५ ष्वग्निषु नाद्रियेत om. Tr.

६ ? अम्याप्रवासेसत्त्रनिद० Tr, अम्याप्रासेसत्त्रेतत्त्रद० B, अम्याप्रासेनदीषत्त्रनिद० U, अम्याप्रासेनदीत्वनिद० H.

Digitized by Google

अथ वै भवति सर्वान्वा एषो ऽग्नौ कामान्प्रवेशयति यो
ऽग्नीनन्वाधाय व्रतमुपैति स यदनिष्ट्वा प्रयायादिति । स
यदनिष्ट्वा प्रयास्यन्भवति तद्गार्हपत्य[१] आज्यं विलाप्योत्पूय स्रुचि
चतुर्गृहीतं गृहीत्वाहवनीये जुहोत्यन्वारब्धे यजमाने तुभ्यं त
अङ्गिरस्तमेति । यो ऽग्नीनन्वाधाय व्रतमुपैति स यद्युदाव- ९
सीति तत्पुरस्ताद्व्याख्यातं । यस्याहिताग्नेरग्निरपक्षायति याव-
च्छम्यया प्रविध्येद्यदि तावदपक्षायेत्तꣳ संभरेदिदं त एकं पर
उ[२] त एकमिति । संभृत्यानुप्रहरेदग्निहोत्रकालेषु[३] वान्येषु[३]
वा[३] । यदि परस्तरामपक्षायेदनुप्रयायावस्येदित्यनुप्रयायावस्ये-
त्तद्यैवावस्येत्तच्च[४] वोदावस्येदु रोषधीर्वा[४] एतस्य पशून्पयः १०
प्रविशन्ति यस्य हविषे वत्सा अपाकृता धयन्ति । तान्यहुत्वा-
यातयाम्ना हविषा यजेत । यस्य दुग्धायस्यपहरन्तरिवादावत्सां
यवागूं निर्वपेदित्यथैतेषां दोहयित्वा[५] तस्मिन्नप आनीय
व्रीहिप्रभृति सिद्धमत ऊर्ध्वमथ यस्य सायं दुग्धꣳ हवि-
रार्तिमार्च्छतीन्द्राय व्रीहीन्निरुप्योपवसेदिति । निर्वपणान्तं[६] ११

१ Thus B, तद्गार्ह॰ H U, गार्ह॰ Tr.

२ ज Tr. H.

३ Thus Tr U and the Viv. (only चान्येषु instead of वा॰); कालेषु वा H, कालेचान्येषु वा B.

४ Thus H U, ॰वस्येत्तच्चैवावस्येदोषधी॰ Tr, ॰वस्येत्तद्यच्चैवास्योषधी॰ B.

५ किंचिद् ins. Tr and the Viv.

६ निर्वापणान्तं Tr, निर्वापांतं Viv.

Digitized by Google

कर्म कृत्वा श्वो भूत आग्नेयेन प्रचर्यैन्द्रेण प्रचरेत्कृतस्थानं तत्कुर्यादथ[1] यस्योभयꣳ हविरार्तिमार्च्छत्यैन्द्रं पञ्चशरावमोदनं निर्वपेदिति । प्रकृत्या वा निर्वपेच्छरावेण वेति । प्रकृत्या[2] निर्वपेत्तथा[2] शरावपरिमाणार्थꣳ शरावमिति वदन्तस्तथा[3] चतुष्पाचं निर्वपेदित्यथ पात्र्यामेव निर्वपेत्सांनाय्यस्थाने[4] कुर्यादंस्य[5] यस्ये ऽहन्यल्यनालम्भुका भवति तामपरुध्य यजेतेति । तामपरुध्यैव[6] यजेत सर्वेणैव यज्ञेन यजते । तामिष्टोपहूये-तामू[7] हमसीत्यृतुकाल[7] उपगमनमन्त्रो । ऽन्वाधानप्रभृत्यपरुध्यैव यजेत तथैकाहानाम् । ॥ १० ॥ नवमः ॥

अथ यदि[8] दीक्षोपसत्सु[8] तथाहर्गणेष्वन्येष्वहःसु वा[9] यथा[9] श्वोहे पर्यवेते गोमूत्रेणोष्णोदकमिश्रेण लोहितं छित्त्वेत्युक्ता[10]

---

१ Thus Tr and B; U and H read (after कृत्वा): यैताग्नीध्रीयोच्छूर्पे स्रुग्भ्यासिरभ्युष्यासंजयेदथ वागते सꣳसादयेत्प्रोक्षणप्रभृतिना कर्मणा प्रतिपद्येत सिद्धमत ऊर्ध्वमथ यस्योभयꣳ etc.

२ These three words not in Tr.; प्रकृत्येव B

३ तथा not in Tr.

४ After निर्वपेत् Tr. has: न प्रकृत्या प्रसिद्धमाग्नेयेन प्रचर्यैन्द्रेण प्रचरेत् ।

५ कुर्यात् only in Tr.

६ एव not in Tr.

७ °येतामोहम° U and the Viv. (pr. m.) °येतेत्यमोहम° Tr, but cp. T Br. III. 7. 1. 9.

८ यद्दी° Tr, यद्दी° B.

९ ? वाथ Tr.

१० ? छिन्नृखे° Tr, छिले° B H U and the Viv.

प्रक्षाल्य दर्भपुञ्जीलैः पवयतीति । विज्ञायत आपो वै दर्भा-स्तैर्हि[1] स्नाता भवतीति । विज्ञायते ब्रह्महत्यायै ह्येषा वर्णं प्रतिमुच्यास्त इति । तस्माद्दुविर्नान्वीक्षेत न स्पृशेदित्यथ सूतिकाया[2] दशाहे पर्यवेते यथाम्नातꣳ शौचं कृत्वा पत्नीं कर्मसु योजयेत्तत्कर्म पुत्रो[3] ब्रह्मचारी वा कुर्यात्तन्मन्त्रं यजमानो जपेदेषा पत्न्यकुशली[4] यदि स्यादेवमेव कारयेदित्यथ यदि[5] सांनाय्ये घर्मे वा प्रवृत्तायां पयो न स्याद्येन[5] केन चिदुपायेन किंचित्पयो[6] दोहयित्वाद्भिः सꣳसृज्य प्रचरेद्वान्यत्पय आनीय कुर्यात्सैव ततः[7] प्रायश्चित्तिरथ यदि सोमाधानमारभ्य पुरा[8] दीक्षणीयाया अनालम्भुका भवति नाग्निहोत्रं जुहोति । त्र्यहे पर्यवेते[9] ऽप्युदीक्षाप्रभृति सिद्धमत ऊर्ध्वमथ यदि पुरा व्रतदोहनादनालम्भुका भवति त्र्यहꣳ हविष्यमश्नीयाद्यदि व्रते[10] दुग्धे[10] हविष्यमेव[11] व्रतमपो ऽभ्यव-

१ Thus H U, दर्भा इति तैर्हि B, दर्भा इति तेन Tr.

२ Thus H ०कायां Tr B U.

३ तत्पुत्रो Tr.

४ Thus Tr and U (sec. m.); कुशली B H U (pr. m.).

५..५ Thus Tr; सांनाय्यं वा घर्मो वा प्रतप्तो नस्येद्येन B, सांनाय्ये वा घर्मे वा प्रवृत्तायां पयो नस्येद्येन U, H is corr. but reads at the end पयोनस्याद्येन।

६ किंचित्तस्मिन् Tr.

७ तत्र B H.

८ पुरस्ताद् Tr.

९ यथाम्नातं शौचं कृत्वा ins. U.

१० Thus B U H and the Viv., ०तं दुग्धं Tr.

११ Only in Tr.

Digitized by Google

हरेत् । त्र्यहे[1] पर्यवेते गोमूत्रादि सिद्धमत ऊर्ध्वमथ[1] यदि पुरा प्रवर्ग्यस्य[2] स्यान्न[2] प्रवृञ्ज्याद्धविष्यप्रभृति यथाजातꣳ शौचं कृत्वा गोमूत्रादि सिद्धमत ऊर्ध्वमथ यदि प्रवृक्ते[3] ऽनाशनभुक्ता भवति हविष्यमेव[4] तदहः[4] सꣳस्थाप्य त्र्यहे[5] पर्यवेते गोमूत्रादि सिद्धमत ऊर्ध्वमथ[5] दीक्षित वाचं यच्छ प्रत्य वाचं यच्छ[6] पत्नि[6] वाचं[6] यच्छेति संप्रैषादेकस्तनप्रभृत्यानाशनभुक्ता[7] भवति सिद्धमावभृथात्कृत्वा त्र्यहे पर्यवेते ऽवभृथमवयन्ति । सुत्ये ऽहनि मार्जालीये सिकतोपोप्ते परिश्रित्योपविशेदन्येष्वहःसु पत्नीशालायामेवोपविशेत्प्राग्वꣳशं[8] न प्रपद्येत । ॥ ११ ॥ दशमः ॥

अथातः प्रायश्चित्तसमुच्चयं व्याख्यास्यामः । सर्वत्रानादिष्टेषु मनस्वती मिन्दाहुती व्याहृतयो होतार इति जुहुयात्सर्वस्वप्रत्येषु[9] मिन्दाहुती पितृयज्ञलोपे सप्तहोतारमिति[10] जुहुयादथ[10] यद्यग्न्याधेये सर्वमौपासनमभिप्रव्रजेयुः पुनस्त्वादित्या रुद्रा वसवः समिन्धतामित्येतया स्रुवाहुतिꣳ हुत्वा[11] लौकिके

---

१ त्र्यहे..ऊर्ध्वम् only in Tr.

२ ? Thus U B, प्रवर्ग्यस्य न Tr, प्रवर्ग्यस्यासन्न H.

३ प्रवृत्ते MSS. and Viv.

४ Thus Tr, ०ष्यमेतदहः B H U.

५ Instead of त्र्यहे..ऊर्ध्वम् Tr has only सिद्धम् ।

६ Only given by Tr.

७ Thus Tr, संप्रैषावेक० B H U.

८ उपविशेत् om, H U.

९ Thus Tr, ०षु प्रत्येषु B U H.

१० इति जुहुयात् in Tr only.

११ तस्मिन् ins. Tr.

Digitized by Google

ऽग्नौ गृह्याणि कर्माणि प्रयुञ्जीत[1] यद्यर्धमवशिष्येताथ[2] यदि
ब्राह्मौदनिको धारितः स्यादौपासनवत्स्यात्संयोद्वाते पाकादूर्ध्वं
अयादौऽग्नौ जुहुयादथ यदि गार्हपत्यमनाहितमादित्यो ऽभ्यु-
दियादादित आरभ्यान्यस्मिन्काल आदध्यान्मध्ये चेदग्निविनाश
एतदेवाथ[3] यदि पत्नीमृत्वियं[4] विन्देत प्राग्दक्षिणाया एत- ९
देवात ऊर्ध्वमपरोधो ऽग्निहोत्रे च सोमे[5] चावभृथादिषु[5]
सर्वत्रेष्टिपशुसोमेषु[6] तावन्मात्रं[7] पत्न्या वा सर्वमथ यदि गार्ह-
पत्याहवनीयावुद्वायेतामभिनिम्रोचेदभ्युदियाद्वाऽन्वाधेयं[8] तत्र
प्रायश्चित्तिः । पुनराधेयमित्येके । ऽथ[9] यदि पत्नी बहिः-
सीमां पुनराधानमथ यद्यात्मनि समारूढेष्वग्नत्यं चरेद्दरणिवि- १०
नाशोऽकदोषो[10] वा[11] भवेदन्याधेयमरणिविनाशेनाग्निविनाश[12]
उक्तो । ऽथ यदि ग्राममर्यादां नदीं वाग्नीनतिहरेयुरेताने-

---

१ अथ ins. Tr.

२ Thus H U, °श्येदथ Tr, °श्येतातस्मिन्कुर्यादथ B.

३ अथ in Tr only.

४ Thus Tr, पत्न्यृत्वियं B U H.

५ Thus B H, सोमे चावभृथात् U, सोमेमावभृथादिषु Tr.

६ Thus Tr B, सर्वेष्टि° U H.—°सोमेषु Tr B, °संवेषु U H.

७ च ins. U H.

८ Thus Tr, आहवनीयगार्हपत्यावु° B U H.—उद्वायेताम् Tr.

९ In Tr only.

१० °रवी B U H.

११ In H U only.

१२ Tr om. अन्याधेयम्, rightly ?

Digitized by Google

वाग्नीन्ध्रियमाणानन्वारभेयातां[1] । प्रवसति यजमाने न[2] पत्नी[2] प्रवसति[2] नाच प्रायश्चित्तं । भिन्नयोनिश्चेदन्वाहार्यपचन उद्वायेद्या[3] प्रकृतिस्तत[4] आहरणं पृथगरणी वा । ॥ १२ ॥

अथ यद्येककपालः परावर्तेत[5] प्रजापतेर्वर्तनिमनुवर्तस्वेत्यध्वर्युः स्वस्थाने प्रतिष्ठापयेत्प्रति क्षत्रे प्रतितिष्ठामि राष्ट्रे विश्वमन्याभिवावृध इत्येताभ्यां यजमानोऽनुमन्त्रयते । ऽस्कान्द्यौः पृथिवीमस्कानजनि प्राजनीत्येताभ्याꣳ स्रुवाहुती जुहुयात् संस्थिते वैश्वानरीमिष्टिं[6] निर्वपेद्दिह्वायते च यत्प्राङ्[7] पद्येत देवलोकमभिजयेद्यद्दक्षिणा पितृलोकं । यत्प्रत्यक्पद्याꣳसि यद्याꣳ हन्युर्यदुदङ् मनुष्यलोकमभिजयेत्प्रतिष्ठितो होतव्य इत्यथ यदि पशुबन्धः सोमो वा लुप्येत वैश्वानरीमिष्ट्वा पुनर्यजेत[8] । सर्वं चेत्तुल्यमपरंतिक्रामेत्समन्वारब्धाः[9] प्रागुपवेशनादपच्छिद्येरन्समाप्य पुनर्यजेत । सोमेन दीक्षितो न[10] दद्यान्न[10] जुहुयान्न[10] पचेन्न जपेदित्यादित[11] एव विभजेदित्याहुर्मंतो-

---

१ Instead of एतानेव B U H एतदेव ।

२ Thus Tr, B om. न, प्रवसति H, S प्रवसति वा U.

३ Thus Tr B, ०येद्यथा U H.

४ Instead of तत Tr तद्र ।

५ पराकावर्तेत Tr.

६ इष्टिम् alone in Tr.

७ प्राक् H.

८ एकाहेषु ins. U.

९ After ०क्रामेत् U ins. सर्पणे ।—Instead of ०रब्धाः (thus Tr.) ०रब्धा वा U, रब्धा वा H B.

१० न जुहुयान्न दद्यान्न Tr.

११ इति om. Tr.

Digitized by Google

पेतो[1] न[1] स्नायान्नापो[1] ऽवगाहेत न वासो जह्यान्न रज:[2] प्रस्रावयेत्सर्वं च यजमानस्यर्त्विजां च यावत्कर्म व्रतमुपदिशन्ति नर्त्विजामार्त्विज्यमन्यत्र विद्यते न मद्धर्त्विजाꣳ समासो[3] न[3] सर्वत्र[3] यजमानस्यार्त्विज्यमन्यत्र सत्त्रात्सर्वेषु[4] सोमेषु सोमापचार-कालातिक्रमान्तरितविपर्यासव्यवायसमासादिष्वन्येषु[5] चाम्ना-तेषु[6] स्नातेषु च दोषेषु[6] प्राक् समिष्टयजुष आज्यस्थाल्याः स्रुवेणोपघातꣳ सर्वप्रायश्चित्तानि जुहुयाज्जयानित्येके । अभ्या-तानानित्येके । राष्ट्रभृत इत्येके । ऽमात्यहोमानित्येके । छन्दाꣳ-सीत्येके । सौरीरित्येके । तनूरित्येके । होतृनित्येके । दशा-त्मकमित्येके । पौरुषीरित्येके । वैष्णवीरित्येके । महाव्याहृती-रित्येके । व्याहृतीरित्येके । प्राजापत्यामित्येके[7] । प्रणवमित्येके । सर्वानित्याचार्यः[8] सर्वानित्याचार्यः । ॥ १३ ॥ एकादशः ॥

॥ इत्येकोनत्रिंशः प्रश्नः ॥

---

१ स्न० न स्नायात् in U only.

२ Thus Tr, वास: B U H.

३ ? Thus reads U, समासोन चापिवे (यज०) Tr, समासोमेन सर्वत्र B, समासोमेन सर्वत्र H. The meaning of the whole passage is unclear to me.

४ सत्त्रात्सर्वेषु Tr.

५ सोमोपचार० Tr.—०सादिषु चान्येषु B.

६ Thus (only वाज्ञा० instead of चाम्ना०) Tr, चाम्नातेषु दोषेषु B, चदोषेषु U H.

७ Thus Tr, प्राजापत्यानि० H B, प्राजापत्यानी० U.

८ ०चार्यः Tr H, ०चार्याः B U.

Digitized by Google

अथेमे ऽग्निचयास्तेषां भूमेः परिमाणविहारान्व्याख्यास्यामो । ऽथाङ्गुलप्रमाणं चतुर्दशाणवश्चतुस्त्रिंशत्तिलाः पृथुसंश्लिष्टा इत्यपरं । दशाङ्गुलं क्षुद्रपदं । द्वादश[1] प्रादेशः[1] । पृथोत्तरयुगे त्रयोदशिके । पदं पञ्चदशाष्टाशीतिशतमीषा चतुःशतमक्षः । षडशीतिर्युगं । द्वात्रिंशज्जानुः । षट्त्रिंशच्छम्याबाहू । द्विपदः प्रक्रमो । द्वौ प्रादेशावरत्निरथाप्युदाहरन्ति पदे युगे प्रक्रमे ऽरत्नावियति शम्यायां च मानार्थेषु याथाकामीति । पञ्चारत्निः पुरुषो व्यामश्च[2] । चतुररत्निर्व्यायामश्चतुरश्रं[3] चिकीर्षन्यावच्चिकीर्षेत्तावतीं रज्जुमुभयतःपाशां कृत्वा मध्ये लक्षणं करोति । लेखामालिख्य तस्या मध्ये शङ्कुं निहन्यात्तस्मिन्पाशौ प्रतिमुच्य[4] लक्षणेन मण्डलं परिलिखेद्विष्कम्भान्तयोः शङ्कू निहन्यात्पूर्वस्मिन्पाशं प्रतिमुच्य पाशेन मण्डलं परिलिखेदेवमपरस्मिंस्ते यत्र समेयातां तेन द्वितीयं विष्कम्भमायच्छेद्विष्कम्भान्तयोः शङ्कू निहन्यात्पूर्वस्मिन्पाशौ प्रतिमुच्य लक्षणेन मण्डलं परिलिखेदेवं दक्षिणत एवं पश्चादेवमुत्तरतस्तेषां ये ऽन्त्याः संसर्गास्तच्चतुरश्रं संपद्यते । ऽथापरं । प्रमाणाद्द्विगुणां रज्जुमुभयतःपाशां कृत्वा मध्ये लक्षणं करोति । स प्राच्यर्थो । ऽपरस्मिन्नर्धे चतुर्भागोने

---

१ द्वादशांगुलंप्रादेशं M.

२ Thus T, च not in my copies.

३ Thus throughout B U M; ०स्र० instead of ०श्र० throughout H.

४ प्रमुच्य B M H.

Digitized by Google

लक्षणं करोति । तन्न्यञ्चनमर्धं ऽꣳसार्थं । पृष्ठ्यान्तयोः पाशौ
प्रतिमुच्य न्यञ्चनेन दक्षिणापायम्यार्धेन श्रोण्यꣳसान्निर्हरेद्दीर्घ-
चतुरश्रं चिकीर्षन्यावच्चिकीर्षेत्तावत्यां भूम्यां[1] द्वौ शङ्कू निहन्या-
द्द्वौद्वावेकैकमभितः[2] समौ । यावती तिर्यङ्मानी तावतीꣳ
रज्जुमुभयतःपाशां कृत्वा मध्ये लक्षणं करोति । पूर्वयोरन्त्ययोः ९
पाशौ प्रतिमुच्य लक्षणेन दक्षिणापायम्य लक्षणे लक्षणं
करोति । मध्यमे पाशौ प्रतिमुच्य लक्षणस्योपरिष्टाद्दक्षिणा-
पायम्य लक्षणे शङ्कुं निहन्यात्सो ऽꣳसः । एतेनोत्तरो ऽꣳसो
व्याख्यातस्तथा श्रोणी । यत्र पुरस्ताद्ꣳहीयसीं मिनुयात्तत्र
तदर्धे लक्षणं करोत्यथापरं प्रमाणादध्यर्धाꣳ रज्जुमुभयतः- १०
पाशां कृत्वापरस्मिꣳस्तृतीये षड्भागोने लक्षणं करोति । तन्न्यञ्च-
नमिष्टे[3] ऽꣳसार्थं[3] । पृष्ठ्यान्तयोः पाशौ प्रतिमुच्य न्यञ्चनेन
दक्षिणापायम्येष्टेन श्रोण्यꣳसान्निर्हरेत्समचतुरश्रस्याक्ष्णयारज्जु-
र्द्विस्तावतीं भूमिं करोति । प्रमाणं तिर्यग्द्विकरण्यायामस्त-
स्याक्ष्णयारज्जुस्त्रिकरणी । तृतीयकरण्येतेन व्याख्याता । नव- ११
मस्तु[4] भूमेर्भागो भवतीति[5] । दीर्घचतुरश्रस्याक्ष्णयारज्जुः
पार्श्वमानी[6] तिर्यङ्मानी च यत्पृथग्भूते कुरुतस्तदुभयं करोति ।

---

१ Thus my copies, भूमौ T.

२ °वेकमभितः B, °वेकैवमभितः H.

३ °नमिष्टेन सार्धं M.

४ Before नव° M ins. विभागस्तु तासां ।

५ भवति M.

६ च ins. M.

Digitized by Google

तासां[१] त्रिकचतुष्कयोर्द्वादशिकपञ्चिकयोः[२] पञ्चदशिकाष्टिकयोः[३] सप्तिकचतुर्विंशिकयोर्द्वादशिकपञ्चत्रिंशिकयोः[४] पञ्चदशिकषट्त्रिंशिकयोरित्येतासूपलब्धिः । ॥ १ ॥

नानाचतुरश्रे समस्यन्कनीयसः करण्या वर्षीयसो वृध्रमुल्लिखेद्वृध्रस्याक्ष्णयारज्जुः[५] समस्तयोः पार्श्वमानी भवति । चतुरश्राच्चतुरश्रं निर्जिहीर्षन्यावन्निर्जिहीर्षेत्तस्य करण्या वर्षीयसो वृध्रमुल्लिखेद्वृध्रस्य पार्श्वमानीमक्ष्णयेतरत्पार्श्वमुपसंहरेत्सा यत्र निपतेत्तदपच्छिन्द्याच्छिन्नया निरस्तं । समचतुरश्रं दीर्घचतुरश्रं चिकीर्षंस्तदक्ष्णयापच्छिद्य भागं द्वेधा विभज्य पार्श्वयोरुपदध्याद्यथायोगमपि[६] वैतस्मिंश्चतुरश्रं[७] समस्य तस्य करण्यापच्छिद्य[८] यदतिशिष्यते तदितरत्रोपदध्याद्दीर्घचतुरश्रं समचतुरश्रं चिकीर्षंस्तिर्यङ्मानीं करणीं कृत्वा शेषं द्वेधा विभज्य पार्श्वयोरुपदध्यात्खण्डमावापेन[९] तत्संपूर-

---

१ Found in all my copies; not given by T.

२ M om. द्वादशि..कयोः ।

३ पंचिकषष्टिकयोः M.

४ •त्रिंशति• instead of •त्रिंशि• M.

५ वृद्ध instead of वृध्र the MSS. here and infra. cp. Thibaut, andit X, pp. 17, 18.

६ •रुपसंदध्या• M U B.

७ Thus अपि वैत• my copies, not अपि चैत•, as Thibaut reads.

८ Thus B H U, •छिद्याद् M only.

९ Instead of पार्श्वयोः T: विपर्यस्येतरत्र ।; उपसंदध्या• B H U.

Digitized by Google

येत्तस्य निर्हार[1] उक्तश्चतुरश्रमेकतोऽणिमच्चिकीर्षन्नणिमतः
करणीं तिर्यङ्मानीं कृत्वा शेषमक्ष्णया विभज्य विपर्यस्येत-
रत्रोपदध्याच्चतुरश्रं प्रउगं चिकीर्षन्यावच्चिकीर्षेद्द्विस्तावतीं भूमिं
समचतुरश्रां कृत्वा पूर्वस्याः करण्या मध्ये शङ्कुं निहन्यात्तस्मि-
न्पाशौ प्रतिमुच्य दक्षिणोत्तरयोः श्रोण्योर्निपातयेद्बहिस्त्यम- ९
पच्छिन्द्याच्चतुरश्रमुभयतः प्रउगं चिकीर्षन्यावच्चिकीर्षेद्द्विस्तावतीं
भूमिं दीर्घचतुरश्रां कृत्वा पूर्वस्याः करण्या मध्ये शङ्कुं
निहन्यात्तस्मिन्पाशौ प्रतिमुच्य दक्षिणोत्तरयोर्मध्यदेशयो-
र्निपातयेद्बहिस्त्यमपच्छिन्द्यादेतेनापरं प्रउगं व्याख्यातं। चतुरश्रं
मण्डलं चिकीर्षन्नक्ष्णयार्धं मध्यात्प्राचीमभ्यापातयेद्यदति- १०
शिष्यते[2] तस्य सह तृतीयेन मण्डलं परिलिखेन्मण्डलं चतुरश्रं
चिकीर्षन्विष्कम्भमष्टौ भागान्कृत्वा भागमेकोनत्रिंशधा[3]
विभज्याष्टाविंशतिभागानुद्धरेद्भागस्य च षष्ठमष्टमभागोनमपि
वा पञ्चदश भागान्कृत्वा द्वावुद्धरेत्सैषानित्या[4] चतुरश्रकरणी।
प्रमाणं तृतीयेन वर्धयेत्तच्चतुर्थेनात्मचतुस्त्रिंशोनेन[5]। सविशेषः। ११

॥ २ ॥

अथाग्न्याधेयिके विहारे[6] गार्हपत्यादाहवनीयस्यायतनं।

---

1 निर्ह्रास B U, cp. Z D M G. LV, p. 579.

2 °श्यायातये° B M.

3 °विंशधा H M.

4 Thus U M; °द्धरेदेषा° H B and T.

5 Thus my copies.

6 Thus, not विहारो, my copies.

विज्ञायते ऽष्टासु प्रक्रमेषु ब्राह्मणो ऽग्निमादधीतैकादशसु राजन्यो द्वादशसु वैश्य इत्यायामतृतीयेन त्रीणि चतुरश्राण्यनूचीनानि कारयेदपरस्योत्तरस्याꣳ[1] श्रोण्यां गार्हपत्यस्यैव दक्षिणे ऽꣳसे ऽन्वाहार्यपचनः पूर्वस्योत्तरे ऽꣳस
५ आहवनीयो ऽपि वा गार्हपत्याहवनीययोरन्तरालं पञ्चधा षोढा वा संभुज्य षष्ठꣳ सप्तमं वा भागमागन्तुकमुपसमस्य[2] समं चैवं विभज्य पूर्वस्मादन्ताद्द्वयोर्भागयोर्लक्षणं[3] करोति गार्हपत्याहवनीययोरन्तौ नियम्य लक्षणेन दक्षिणापायम्य लक्षणे शङ्कुं निहन्ति तद्दक्षिणाग्नेरायतनं भवत्यपि वा प्रमाणं पञ्चमेन
१० वर्धयन्त्येवं पञ्चधा संभुज्यापरस्मादन्ताद्द्वयोर्भागयोर्लक्षणं[3] करोति पृष्ठ्यान्तयोः पाशौ प्रतिमुच्य लक्षणेन दक्षिणापायम्य लक्षणे शङ्कुं निहन्ति तद्दक्षिणाग्नेरायतनं भवति विपर्यस्तेतेनोत्करो व्याख्यातो ऽपरेणाहवनीयं यजमानमात्री भवतीति दार्शपौर्णमासिकाया वेदेर्विज्ञायते तस्यास्त्रिभागोनं
११ पश्चात्तिरश्ची तस्या एवार्धं पुरस्तात्तिरश्चीं[4] दीर्घचतुरश्रमेकतोऽणिमद्विहृत्य स्रक्तिषु शङ्कून्निहन्याद्यावती पार्श्वमानी

---

१ ०दपरस्योत्तरस्योत्तरस्यां B M.

२ ०गंतुमुपसमस्य H U.

३ Thus (and cp. Thibaut's remark) B; the other MSS. चन्यात् instead of चन्तात्।

४ ०त्तिरश्ची यावद् M.

Digitized by Google

द्विरभ्यस्ता[1] तावतीꣳ[1] रज्जुमुभयतःपाशां कृत्वा मध्ये लक्षणं करोति। दक्षिणयोः पार्श्वयोः[2] पाशौ प्रतिमुच्य लक्षणेन दक्षिणापायस्य लक्षणे शङ्कुं निहन्यात्तस्मिन्पाशौ प्रतिमुच्य लक्षणेन दक्षिणं पार्श्वं परिलिखेदेतेनोत्तरं पार्श्वं व्याख्यातं। पूर्वं पार्श्वं तया द्विरभ्यस्तया परिलिखेदेवमपरं। दशपदा पश्चात्तिरश्ची द्वादशपदा प्राच्यष्टापदा पुरस्तात्तिरश्चीति पाशुबन्धिकाया वेदेर्विज्ञायते। मानयोगस्तस्या व्याख्यातो। रथसंमितेत्येकेषां। विराट्संपन्नेत्येकेषाꣳ। शम्यामात्री चतुःस्रक्तिर्भवतीत्युत्तरवेदेर्विज्ञायते[3]। समचतुरश्राविशेषाद्वितीया वेदिर्भवतीति पैतृक्या[4] वेदेर्विज्ञायते। महावेदेस्तृतीयेन समचतुरश्रकृतायास्तृतीयकरणी[5] भवतीति[6]। नवमस्तु भूमेर्भागो भवति[7]। यजमानमात्री चतुःस्रक्तिर्भवतीत्येकेषां। दिक्षु स्रक्तयो भवन्ति। वेदिद्वितीये यजेतेति सौत्रामणिकीं वेदिमभ्युपदिशन्ति। महावेदेस्तृतीयेन समचतुरश्रकृताया अष्टादशपदा पार्श्वमानी भवति। तस्यै दीर्घकरण्यामेकतोऽणिमत्करण्यां च याथाकामीति। ॥ ३ ॥

---

१ द्विस्तावतीं B.

२ ? Found in H M U; B. om. Thibaut omits the word.

३ चतुस्र० the MSS.

४ पैतृयज्ञिकाया B, and U originally.

५ ०कृतायाः करणी तृतीयकरणी B U, and cp. Thibaut's remark on this passage.

६ भवति M U, भवती H.

७ भवतीति M.

Digitized by Google

प्राग्वंशः षोडशप्रक्रमायामो द्वादशव्यासो[1] ऽपि वा द्वादशप्रक्रमायामो दशव्यासस्तस्य मध्ये द्वादशिको विहारस्त्रिंशत्पदानि प्रक्रमा वा पश्चात्तिरश्ची भवति षट्त्रिंशत्प्राची चतुर्विंशतिः पुरस्तात्तिरश्चीति महावेदेर्विज्ञायते । मानयोगस्तस्या व्याख्यात । आहवनीयात्षट् प्रक्रमान्महावेदिस्तत । एकस्मिन्सदस्तं दशकमुदक् सप्तविंशत्यरत्नयो । ऽष्टादशेत्येकेषां । ततश्चतुर्षु हविर्धानं । तद्दशकं द्वादशकं वा । मानयोगस्तयोर्व्याख्यातो । यूपावटीयाच्छङ्कोरर्धप्रक्रममवशिष्योत्तरवेदिं विमिमीते । दशपदोत्तरवेदिर्भवतीति सोमे विज्ञायते । मानयोगस्तस्या व्याख्यातश्चात्वालः शम्यामात्रो ऽपरिमितो वाथोपरवाः प्रादेशमुखाः प्रादेशान्तराला । अरत्निमात्रं समचतुरस्रं विहृत्य स्रक्तिषु शङ्कून्निहन्यादर्धप्रादेशेनार्धप्रादेशेनैकैकं मण्डलं[2] परिलिखेत्सदसः[3] पूर्वार्धाद्विप्रक्रममवशिष्य धिष्ण्यानां[4] द्विप्रादेशो विष्कम्भस्तथान्तराला । आग्नीध्रागारस्य[5] पार्श्वमानी . पश्चारत्निरेतेन मार्जालीयो व्याख्यातस्तस्योदीचीं द्वारं कुर्वन्ति । रथाक्षान्तराला यूपावटा भवन्तीत्येकादशिन्यां

---

१ द्वादशपद्व्यास॰ M, which omits the following words up to दशव्यास॰ ।

२ परिमंडलं M and U (sec. m.).

३ ॰त्सदः H.

४ Thus, not धिष्णिया॰, the MSS,

५ आग्नीध्रीया॰ T.

Digitized by Google

विज्ञायते । तस्या[1] दशानां च रथाक्षाणामेकादशानां च
पदानामष्टाङ्गुलस्य च चतुर्विंशं भागमाददीत । स प्रक्रमः
स्यात्तेन वेदिं विमिमीते[2] । ऽथाश्वमेधे[2] विंशत्याश्च रथाक्षाणा-
मेकविंशत्याश्च पदानामष्टाङ्गुलस्य च चतुर्विंशं भागमाद-
दीत । स प्रक्रमः स्यात्तेन वेदिं विमिमीते[3] । ऽथ[3] प्राचे- १
कादग्निन्यां[4] यूपार्थं वेदेः पूर्वार्धात्पदार्धव्यासमपच्छिद्य[5]
तत्पुरस्तात्प्राच्यं[6] दध्यान्नानाष्टाङ्गुलं विद्यते । न व्यतिषङ्गो ।
यूपावटाः पदविष्कम्भास्त्रिपदपरिणाहानि यूपोपराणीति ।

॥ ४ ॥ प्रथमः ॥

अर्धाष्टमाः[7] पुरुषाः[7] प्रथमो ऽग्निरर्धनवमा द्वितीयो । १०
ऽर्धदशमास्तृतीय । एवमुत्तरोत्तरो[8] विधाभ्यास ऐकादश-
विधात्तदेतत्सप्तविधप्रभृत्येकशतविधान्तमत ऊर्ध्वमेकशतविधा-
मेव प्रत्याददीतानग्निकाम्या यज्ञक्रतूनाहरेदन्यत्राश्वमेधादश्व-
मेधमप्राप्तं चेदाहरेदत ऊर्ध्वं विधामभ्यस्येन्नेतरदाद्रियेतातीतं[9]

---

१ तस्यै U originally and a citation in the Mahāgnisarvasva.

२ ०मीतायाश्वमेधे M, cp. XXVI. 23 : 304. 6.

३ ०मीताथ again M.

४ प्राच्ये० M, प्राच्यै० the other MSS.; ०न्या U.

५ Thus M; पूर्वार्धात्पदार्धव्या० U, पदार्धव्या० B, पूर्वार्धपदार्धव्या० H.

६ ०प्राच्यां M.

७ चार्धाष्टमपुरुषाः T.

८ ०त्तरे M.

९ ०भ्यस्येदन्यतरदाद्रि० M,

Digitized by Google

चेदाहरेदाहृत्य कृतान्तादेव प्रत्याददीत । कथमु खलु विधामभ्यस्येद्यदन्यत्प्रकृतेस्तत्पञ्चदश भागान्कृत्वा विधायांविधायां द्वौद्वौ भागौ समस्येत्ताभिर्धाष्टमाभिरग्निं चिनुयादूर्ध्वप्रमाणाभ्यासं जानोः पञ्चमस्य चतुर्विंꣳशेनैके[1] समामनन्त्यथ हैक एकविधप्रभृतीनपक्षपुच्छाꣳश्चिन्वते । तन्नोपपद्यते पूर्वोत्तरविरोधादथ हैकेषां ब्राह्मणं[2] भवति श्येनचिदग्नीनां पूर्वा ततिरित्यथापरेषां[3] न ज्यायाꣳसं चित्वा कनीयाꣳसं चिन्वीतेत्यथास्माकं[4] । पक्षी भवति । न ह्यपक्षः पतितुमर्हत्यरत्निना पक्षौ द्राघीयाꣳसौ भवतस्तस्मात्पक्षप्रवयाꣳसि वयाꣳसि । व्याममात्रौ पक्षौ च पुच्छं च भवतीति । नापक्षपुच्छः श्येनो विद्यते । न चासप्तविधस्य पक्षपुच्छानि विद्यन्ते न च सप्तविधं चित्वैकविधप्रभृत्यस्तस्मात्सप्तविध एव प्रथमो ऽग्निर्भेदाम्बर्जयेदधरोत्तरयोः पार्श्वसंधानं भेदा इत्युपदिशन्ति । तदभ्यन्तेषु न विद्यते[5] न स्रक्तिपार्श्वयोः । साहस्रं चिन्वीत प्रथमं चिन्वान इति[6] । पञ्चमायां वा चितौ

१ ०शेनैवैके T.

२ See XXIV. 5: 188. 14.

३ ०थापरं M.

४ ब्राह्मणं ins. U on the margin; the brāhmaṇa is found T. S. V. 2. 5. 1.

५ विद्यंते U.

६ See T. S. V. 6. 8. 2.

Digitized by Google

संख्यां[1] पूरयेद्धि प्रतास्वेषिकीर्षेत्पञ्चचोडाभिर्नाकसदः[2] समानसंख्यं[3] प्रतीयात्। ॥ ५ ॥

पशुधर्मो[4] ह वा अग्निर्यथा ह वै पशोर्दक्षिणेषामस्थ्नां यद्दक्षिणं पार्श्वं तदुत्तरेषामुत्तरं यदुत्तरेषां दक्षिणं तद्दक्षिणेषामुत्तरं यद्वाक्[5] चोर्ध्वं[5] च[5] तत्समानमेवमिष्टकानाꣳ रूपाण्युपदध्याद्यां दक्षिणावृतो लेखास्ता दक्षिणत उपदध्यात्सव्यावृत उत्तरत। ऋजुलेखाः पश्चाच्च[6] पुरस्ताच्च भवन्ति। व्यालिखिता मध्ये। ऽथ या विग्रयस्था[7] यथा ह वै पशोः पृष्ठवꣳशो नैवैकस्मिन्पार्श्वे व्यतिरेकेण वर्तते नैवापरस्मिन्नेवं तासामुपधानं प्रतीयादथापि ब्राह्मणं[8] भवति प्रजापतिर्वा अथर्वाग्निरेव दध्यङ्ङाथर्वणस्तस्येष्टका अस्थानीति। तस्माद्धिरण्यं चेच्चिनुयात्तन्वोपक्षयमध्यैरात्मोपक्षयमध्यात्संदध्यात्प्राशमेनं[9] चिनुत इति विज्ञायते। ऽन्मयीभिरनिष्टकाभिर्न[10]

---

१ om. M.

२ ०प्रताꣳस्वे U, ०प्रतांस्वे०B.—०चोडानाकसदः M.

३ ०स्यं H U, स्थां M, ०स्थाः B.

४ ०धर्मा B M U.

५ यद्वाचं M; यद्वाक् चो० B.

६ Thus H M U, पश्चात् B.

७ Thus with T; विषय० my copies.

८ T. S. V. 6. 6. 3.

९ Some of the MSS. write (as Lāṭy. I. 5. 7.) उपक्षय or क्षय, some (as Drāhy. II. 1. 10.) उपक्षय।

१० ०यीभिरिष्टकाभि० M B.

Digitized by Google

संख्यां पूरयेदिष्टकचिदा[1] अन्यो ऽग्निः पशुचिदन्य इत्येतस्मा-
द्ब्राह्मणात्पशुर्वा एष यदग्निर्योनिः खलु वा एषा पशोर्विक्रियते
यत्प्राचीनमैष्टकाद्यजुः क्रियत[2] इति च[3]। लोकवाधीनि[4]
इत्याश्ववटेषूपदध्यात्संख्यानमृषभं विकर्णीमितीष्टकासु[5] कर्माणि
प्रतीयादिष्टकामन्त्रयोरिष्टकाव्यतिरेके लोकंपृणाः संपद्यन्ते
परिमाणाभावादतीतानेव[6] वेष्टकागणानचोपदध्यात्पंच[6]
लोकंपृणा। मन्त्रव्यतिरेके ऽक्ताः शर्कराः संधिषूपदध्या-
त्प्राचीरुपदधाति प्रतीचीरुपदधातीति गणेषु रीतिवादः।
प्राचीमुपदधाति प्रतीचीमुपदधातीति कर्तुर्मुखवादः। पुरस्ता-
दन्याः प्रतीचीरुपदधाति पश्चादन्याः प्राचीरित्यपवर्गश्चतुरश्रा-
स्वेवैतदुपपद्यते। ॥ ६ ॥

न खण्डामुपदध्यान्न भिन्नामुपदध्यान्न कृष्णामुपदध्यान्न
जीर्णामुपदध्यान्न लक्षणामुपदध्यान्न[7] स्वयमातृण्णां स्वयंचिता-
मुपदध्यादूर्ध्वप्रमाणमिष्टकानां जानोः पञ्चमेन कारयेदर्धेन

See T. S. I. 5. 8. 2.

°यत इति B U, but we have one single citation: T. S. V. 2. 1.

om. H.

With व my copies: T. with ब।

विकर्णी is, according to the Mahāgnisarvasva, विश्वाकर्णी ली।

Thus B U, °तीतानेवे° M, H is incompl. T reads as M, rting, moreover, स्व after °गणान्।

Thus H, खण्डासु° M U; खण्डाकासु° T.

नाकसदां पञ्चचोडानां च । यच्छोषपाकाभ्यां प्रतिहृषेत्[1] पुरीषेण तत्संपूरयेत्पुरीषस्यानियतपरिमाणत्वाद्व्यायाममात्री भवतीति गार्हपत्यचितेर्विज्ञायते । चतुरस्रेत्येकेषां । परिमण्डलेत्येकेषां । चतुरस्रꣳ सप्तधा विभज्य तिरश्चीं त्रेधा विभजेदपरस्मिन्प्रस्तार उदीचीरुपदधाति । समचतुरस्रास्तूपदध्याद्व्यायामषष्ठेनेष्टकाः कारयेच्चतुर्थेन तृतीयेनेति । तासां नव प्रथमा द्वादश द्वितीया इति पूर्वस्मिन्प्रस्तार उपदधाति । पञ्च तृतीयाः षोडश प्रथमा इत्यपरस्मिन्परिमण्डलायां यावत्संभवेत्तावत्समचतुरस्रं कृत्वा तन्नवधा विभजेत्प्रधीꣳस्त्रिधा त्रिधेत्यपरं[2] प्रस्तारं[2] तथोपदध्याद्यथा प्रध्यनीकेषु समवो भवन्ति । धिष्ण्या एकचितीकाश्चतुरस्राः परिमण्डला वा । तेषामाग्नीध्रीयं नवधा विभज्यैकस्य स्थाने ऽश्मानमुपदध्यादथ होतुर्धिष्ण्यं[3] नवधा विभज्य पूर्वाꣳस्त्रिभागानेकैकं द्वेधा विभजेदथेतरान्नवधानवधा विभज्य मध्यमपूर्वौ द्वौ[4] भागौ समस्येदथ मार्जालीयं त्रेधा विभज्य पूर्वापरौ भागौ पञ्चधा विभजेदुभयतस्तना सꣳसृज्येष्टकाः कारयेदिति । संवत्सरसत्त्र एवैतदुपपद्यते न रात्रिसत्त्र[5] । एवमस्य मन्त्रवती चितिक्लृप्तिर्भ-

---

१ Thus U and T; ०सेत् H M B.

२ ०परस्मिन्प्रस्तारे M B.

३ धिष्णियं H M.

४ द्वौद्वौ M.

५ See X. 12 : 11. 13.

Digitized by Google

न्वषितं[1] चिषाहस्तस्य परस्ताच्चिन्वीत कामविवेकान्तस्य रूपꣳ श्येनाकृतिर्भवतीति ।[2] ॥ ७ ॥ द्वितीयः ॥

अथ वै भवति[3] श्येनचितं चिन्वीत सुवर्गकाम इत्याकृतिर्द्वैविध्यं । चतुरश्रात्मा श्येनाकृतिश्च । विज्ञायत उभयं[4] ब्राह्मणं[3] । पञ्च दक्षिणायाꣳ श्रोण्यामुपदधाति पञ्चोत्तरस्यां । बस्तो वय इति दक्षिणे ऽꣳस उपदधाति । वृष्णिर्वय इत्युत्तरे । व्याघ्रो वय इति दक्षिणे पक्ष उपदधाति । सिꣳहो वय इत्युत्तरे[5] । पुरुषो वय इति मध्य इति चोपापरं । वयसां वा एष प्रतिमया चीयते यदग्निरित्युत्पततां छाययेत्यर्थः । समचतुरश्राभिरग्निं चिनुते[6] दैव्यस्य च मानुषस्य च व्यावृत्त्या इति मैत्रायणीयब्राह्मणं[7] भवति । तस्येष्टकाः कारयेत्पुरुषस्य चतुर्थेन पञ्चमेन षष्ठेन दशमेनेत्यथाग्निं विमिमीते । यावान्पुरुष ऊर्ध्वबाहुस्तावदन्तराले वेणोश्छिद्रं[8] करोति मध्ये तृतीयं ।

---

१ See XVII. 28 : 306. 8. and XXVI. 28 : 311. 5.

२ H adds प्रकृतिवत् and thus also T, but see the comm.: इतिकारः परिभाषासमाप्त्यर्थः ।

३ See T. S. V. 4. 11. 1.

४ The first brāhmaṇa is found T. S. V. 3. 1. 5. (cp. Baudh. X. 38: 36. sqq.) the second T. S. V. 5. 3. 2.

५ U and Mahāgnisarv. ins. पक्षयोरेव वीर्यं दधाति ।

६ Thus my copies; चिन्वीत T.

७ I have not been able to trace this passage in the agniciti-brāhmaṇa of our Maitrāyaṇī Saṃhitā.

८ Thus M; वेणोः छिद्रे H U, वेणोश्छिद्रे B and Thibaut.

Digitized by Google

यदमुत्र स्फ्यया करोति तदिह वेणुना करोति । तत्रात्मा
समचतुरश्राश्चत्वारः पुरुषाः । पक्षः समचतुरश्रः पुरुषः । स तु
दक्षिणतो ऽरत्निना द्राघीयानेतेनोत्तरः पक्षो व्याख्यातः । पुच्छः
समचतुरश्रः पुरुषस्तमवस्तात्प्रादेशेन[1] वर्धयेदेवꣳ सारत्निप्रादेशः
सप्तविधः संपद्यत । उपधाने पश्चात्प्रागुत्तरतः पुरुषतृतीयवेलायां ९
चतस्रः पञ्चम्यस्तासामभितो द्वे द्वे पादेष्टके । ततो ऽष्टौ चतुर्थ्यः ।
पक्षशेषꣳ षड्भागीयाभिः प्रच्छादयेदेतेनोत्तरः पक्षो व्याख्यातः ।
पूर्वापरयोः पुच्छपार्श्वयोश्चतुर्भागीया उपदध्याद्दक्षिणोत्तरयोः
पादेष्टकाः । शेषमग्निं पञ्चमभागीयाभिः प्रच्छादयेदेष द्विप्रतः
प्रस्तारो । ऽपरस्मिन्प्रस्तारे पश्चात्प्रागुत्तरतो ऽर्धव्यायामवेलायां १०
तिस्रस्तिस्रः षष्ठ्यो द्वे द्वे द्विपदे इति विपर्यासमुपदध्यात्तथोत्तरे[2] ।
दक्षिणस्याꣳ श्रोण्यां नव षष्ठ्यश्चतुरश्रकृतास्तथोत्तरस्यां । नवनव
षष्ठ्यो द्वे द्वे द्विपदे इति दक्षिणादꣳसादोत्तरादꣳसाद्विपर्या-
समुपदध्याच्छेषमग्निं पञ्चमभागीयाभिः प्रच्छादयेदेष द्विप्रतः
प्रस्तारो व्यत्यासं चिनुयाद्यावतः प्रस्तारांश्चिकीर्षेत् । ॥ ८ ॥ ११

अथापरः । पुरुषस्य पञ्चम्यस्ता एवैकतो ऽध्यर्धास्तासामर्धाः
पाद्यास्तोपधाने पूर्वापरयोः पक्षपार्श्वयोरर्धेष्टका उदीचीरुप-
दध्यात्तथोत्तरे । दक्षिणोत्तरयोः पुच्छपार्श्वयोश्चतस्रश्चतस्रो[3]
ऽध्यर्धा उदीचीः । पुच्छस्यावस्ताच्चतस्रो ऽर्धेष्टका उदीचीस्ता-

---

१ अधस्तात् instead of अवस्तात् M.

२ ०दध्यादेवमुत्तरे B.

३ पुच्छपक्षयो० B.

Digitized by Google

तासामभितो द्वे पादेष्टके । जघनेन पुच्छाप्ययोरेकैकामर्धेष्टकां[1] प्राचीं । शेषमग्निं पञ्चमभागीयाभिः प्रच्छादयेदेष द्विशतः प्रस्तारो । ऽपरस्मिन्प्रस्तार आत्मसन्धिषु चतस्रः[2] पादेष्टका उपदध्यात्तासामभितो द्वे द्वे अर्धेष्टके । पूर्वस्मिन्ननीके पञ्च । पक्षाप्ययोस्तिस्रस्तिस्रो ऽध्यर्धा उदीचीस्तासामन्तरालेष्वेकैकामर्धेष्टकां प्राचीं । शेषमग्निं पञ्चमभागीयाभिः प्रच्छादयेदेष द्विशतः प्रस्तारो । व्यत्यासं चिनुयाद्यावतः प्रस्तारांश्चिकीर्षेत् । ॥ ९ ॥[3]

अथ वक्रपक्षो व्यस्तपुच्छस्तस्येष्टकाः कारयेत्पुरुषस्य चतुर्थ्यस्तासामर्ध्याः पाद्यास्[4] । नित्यमक्ष्णयापच्छेदनमनादेशे । पादेष्टकाश्चतुर्भिः[5] परिगृह्णीयादर्धपदेन पदेनाध्यर्धपदेन पदसविशेषेणेति । ते द्वे यथा दीर्घसंश्लिष्टे स्यातां तथार्धेष्टकां कारयेद्यथाग्निं विमिमीत । आत्मा द्विपुरुषायामो दशपदव्यासस्तस्य दक्षिणादंसादुत्तरतो ऽध्यर्धप्रक्रमे लक्षणं करोत्येवमपरतस्तयोरुपरिष्टात्स्पन्द्यां नियम्यांसमपच्छिन्द्यादेतेनेतरांसांश्[6] सक्थीनामपच्छेदा व्याख्याताः । स आत्मा । शिरो

---

१ पुच्छस्था॰ U, पुच्छपार्श्वयो॰ M.

२ पादेषु M; T om.

३ Here ends probably the third adhyāya; no indication of it is found in my copies.

४ ॰श्चेति B U H.

५ ॰ष्टकांश्चतुर्भिः my copies.

६ Between नियम्य and चांऽसम् M ins. चनुस्पन्द्ि ।

Digitized by Google

ऽर्धषष्ठपदायाममर्धपुरुषव्यासं । तस्याꣳसौ प्रक्रमेण प्रक्रमेणा-
पच्छिन्द्यात्पुच्छस्य षट्पदा प्राची द्विपुरुषोदीची । तस्य पूर्वं
स्रक्ती त्रिभिस्त्रिभिः प्रक्रमैरपच्छिन्द्यात्पञ्चो द्वादशपदायामो
दशपदव्यासस्तस्य मध्यात्प्राचि[1] षट् पदानि प्रक्रम्य शङ्कुं
निहन्यात्स्रक्त्योरेकैकमर्धेनꣳ स्पन्द्यया परिचिनुयादन्तस्थ- ९
मपच्छिद्य तत्पुरस्तात्प्राञ्चं दध्यात्स निर्णाम । एतेनोत्तरस्य
पक्षस्य निर्णामो व्याख्यातः । पक्षाप्ययोः प्रक्रमप्रमाणानि पञ्च-
पञ्च चतुरश्राण्यनूचीनानि कृत्वा सर्वाण्यवान्तमक्ष्णयापच्छिन्द्या-
दर्धान्युद्धरेदेवꣳ सारत्निप्रादेशः सप्तविधः संपद्यत । उपधाने
शिरसो ऽग्र्ये चतुर्थीमुपदध्याद्धꣳसमुखीं पुरस्तात्पादेष्टके १०
अभितस्तयोरवस्तादभितस्तिस्रस्तिस्रश्चतुरश्रपाद्याः । शेषे पादे-
ष्टका । अपि वा शिरसो ऽग्रे हꣳसमुखीमुपदध्यात्तस्य अव-
स्ताच्चतुर्थीमुपदध्यात्पादेष्टके अभितस्तयोरवस्तादभितस्ति-
स्रस्तिस्रश्चतुरश्रपाद्याः । शेषे पादेष्टकाः । शिरसो ऽवस्तात्पञ्च
पादेष्टका व्यतिषक्ता उपदध्यात्तथा पुच्छस्य पुरस्ताद्यदपच्छिन्नं ११
तस्मिन्नर्धेष्टकाः पादेष्टकाश्चोपदध्याच्छेषमग्निं चतुर्भागीयाभिः
प्रच्छादयेत्पाद्याभिः सार्धाभिः संख्यां पूरयेदेष[2] द्विशतः[2]
प्रस्तारो[2] । ऽपरस्मिन्प्रस्तारे हꣳसमुखीश्चतस्रश्चतसृभिः पादेष्ट-
काभिः संयोजयेद्यथा दीर्घचतुरश्रꣳ संपद्यते । तत्तिर्यक्

१ प्रांचं M.

२ These three words not in B; T omits them.

Digitized by Google

स्वयमातृण्णावकाश उपदध्याद्वूंऽसमुख्यौ प्रतीच्यौ पुच्छाप्यये[1] ऽर्धपदेनात्मनि विशये । तयोरवस्तादभितस्तिस्रः पादेष्टकाः प्राङ्मुखीरुपदध्यात् । पुच्छस्यावस्तात्पञ्चदश पादेष्टका व्यतिषक्ता उपदध्यात् । पादेष्टके अर्धेष्टकेति पञ्चपक्षाणां प्राचीर्व्यत्यासं चिनुयादिशये यदपच्छिन्नं तस्मिन्नर्धेष्टकाः पादेष्टकाश्चोपदध्याच्छेषमग्निं चतुर्भागीयाभिः प्रच्छादयेत् । पाद्याभिः सार्धाभिः संख्यां पूरयेत् । ॥ १० ॥

अथापरः[2] । पुरुषस्य पञ्चमीभिः शतमशीतिः सप्तार्धं च सारत्निप्रादेशः सप्तविधः संपद्यते । तासां पञ्चाशद्द्वे चात्मन्यर्धचतुर्थ्यः[3] शिरसि । पञ्चदश पुच्छे । ऽष्टपञ्चाशत्सार्धा दक्षिणे पक्ष उपदध्यात्तथोत्तरे । ऽर्धव्यायामेन स्रक्तीनामपच्छेदः । संनतं पुच्छं । पक्षयोस्त्रिभिस्त्रिभिररत्निभिरपनामो । ऽध्यर्धाभिः[4] षट्षट् पक्षाणि कुर्यादाकृतिः शिरसो नित्यायेष्टकानां विकाराः । पुरुषस्य पञ्चम्यस्ता एवैकतो ऽध्यर्धास्ता एवैकतः सपादाः । पञ्चमभागीयायाः पाद्याः सार्धास्तथाध्यर्धायास्तयोश्चाष्टमभागौ[5] तथा शेषचेष्यथा तिस्रः स्रक्तयो भवन्ति । पञ्चमभागीयायाश्चाष्टम्यस्तानि दशात्मनि पञ्चमभागीयाः सार्धा उपदध्यात्तथा पुच्छे । पक्षयोश्चाध्यर्धाः सार्धाः । शिरसि याः संभवन्त्यपरस्मिन्प्रस्तारे पूर्वयोः

१ पुच्छस्याप्यये U.
२ ०परं M.
३ ०तुर्याः B.
४ Thus B, ध्यर्धाभिः M U, ०ध्यर्धार्ध्याभिः T.
५ ०स्तथाध्यर्ध्याया० M U.

Digitized by Google

पञ्चाप्ययोरेकैकामुभयीमुपदध्यादेकैकामपरयोर्द्विदे शिरसः पार्श्वयोः। पुच्छस्यावस्तादध्यर्धाः प्राचीर्यथावकाशं। पार्श्वयोः पाद्याः साष्टमभागाः[1]। पक्षयोस्त्वाध्यर्धाः सावयवाः। शेषं यथायोगं यथासंख्यं यथाधर्म[2]. चोपदध्यात्। ॥ ११ ॥

कङ्कचित[3] एतेनात्मा पुच्छं च व्याख्यातङ्ँ। शिरसि। पश्चोपदध्यात्तस्याकृतिर्व्याख्याता। सप्तपञ्चाशद्दक्षिणे पक्ष उपदध्यात्तथोत्तरे। व्यायामेन सप्रादेशेन पक्षयोरपनामः। पञ्चमभागीयार्ध्याभिः षट्षट् पत्त्राणि कुर्यादध्यर्धावशिष्यते। तथा पुच्छस्यावस्तात्पादावरत्निमात्रावरत्न्यन्तरालौ प्रादेशव्यासौ भवतस्तयोरवस्तादभितो द्वौद्वावष्टमभागौ प्रागभेदावुपदध्यादेवङ्ँ १०

सारत्निप्रादेशः सप्तविधः संपद्यते[4]। ऽथेष्टकानां विकाराः। पञ्चमभागीयाः सावयवाः। पादेष्टकां[5] चतुर्भिः[5] परिगृह्णीयादर्धप्रादेशेनाध्यर्धप्रादेशेन प्रादेशेन प्रादेशसविशेषेणेत्यध्यर्धेष्टकां[5] चतुर्भिः[5] परिगृह्णीयादर्धव्यायामेन द्वाभ्यामरत्निभ्यामरत्निसविशेषेणेति। ताः षट्। तासां चतुरश्रपाद्याः साष्टम- ११

भागाः पादयोरुपधाय शेषं यथायोगं यथासंख्यं यथाधर्म[2] चोपदध्यात्। ॥ १२ ॥

---

१ ०भागीयाः M.

२ यथाधर्मं my copies throughout.

३ See XVII. 28 : 307. 1.

४ शिरसो नित्या ins. M.

५ पादेष्टकाश्चतुर्भिः M.

Digitized by Google

अलजचित¹ एतेनात्मा शिरः पुच्छं च व्याख्यातं पक्षावपोद्धृत्य । चितिष्ठिर्दक्षिणे पक्ष उपदध्यात्तथोत्तरे । पुरुषेण पक्षयोरपनामो । ऽपरस्मादपनामात्प्राञ्चमरत्निं मित्वा तस्मिन्स्पन्द्यां नियम्यापरं पक्षपक्षापच्छेदमन्वायच्छेदेवं² पक्ष पक्षस्यः सार्धा उद्धृता भवन्ति । पादेष्टकामपनाम³ उपधाय तासां चतुरश्रपार्श्वाः साष्टमभागा अपोद्धृत्य शेषं⁴ यथायोगं यथासंख्यं यथाधर्मं चोपदध्यात् । ॥ १३ ॥

प्रउगचितं चिन्वीतेति⁵ । यावानग्निः सारत्निप्रादेशस्तावत्प्रउगं कृत्वा तस्यापरस्याः करण्या द्वादशेनेष्टकास्तदर्धव्यासाः कारयेत्तासामर्धाः पार्श्वाश्च । तासां द्वे अर्धेष्टके बाह्यसविशेषे⁶ चुबुक उपदध्यादर्धाश्चान्तयोः । शेषमग्निं बृहतीभिः⁷ प्रच्छादयेदर्धेष्टकाभिः संख्यां पूरयेदपरस्मिन्प्रस्तारे ऽपरस्मिन्ननीके सप्तचत्वारिंशत्पादेष्टका व्यतिषक्ता उपदध्याच्चुबुक एकां शूलपार्श्वां⁸ । दीर्घे चेतरे चतस्रः स्वयमातृण्णावकाश उपदध्यादर्धाश्चान्तयोः । शेषमग्निं बृहतीभिः प्राचीभिः प्रच्छादयेदर्धेष्टकाभिः संख्यां पूरयेत् । ॥ १४ ॥

---

१ See XVII. 28 : 307. 4.

२ पक्षपक्षमपच्छे° M, पक्षयंनापच्छे° B.

३ पादेष्टकानामवनाम B.

४ Thus (not शेषा as T) my copies

५ See XVII. 28 : 307. 7.

६ Thus my copies ; बाह्वविशेषे T.

७ M ins. प्राचीभिः, rightly ?

८ Not given by T in the text.

Digitized by Google

उभयतःप्रउगं चिन्वीतेति[1] । यावानग्निः सारत्निप्रादेश-
स्तावदुभयतःप्रउगं कृत्वा । नवमेन तिर्यङ्मान्याः प्रउगचितोऽस्य
विकारास्तथोपधानमपरस्मिन्प्रस्तारे चुबुकयोर्द्वे पादेष्टके
उपदध्यात्संध्यन्तयोश्च दीर्घपाद्ये । दीर्घे चेतरे च[2] यतश्च स्व-
मात्रस्यावकाश उपदध्यादर्धाश्चान्तयोः । शेषमग्निं छन्दतीभिः १
प्राचीभिः[2] प्रच्छादयेदर्धेष्टकाभिः संख्यां पूरयेत् । ॥ १५ ॥

चतुर्थः ॥

रथचक्रचितं चिन्वीतेति विज्ञायते । द्वयानि तु[2] खलु
रथचक्राणि भवन्ति साराणि च प्रधियुक्तानि चाविशेषात्ते
मन्यामहेऽन्यतरस्याकृतिरित्यथाग्निं विमिमीते । यावानग्निः १०
सारत्निप्रादेशस्तावतीं भूमिं परिमण्डलां कृत्वा तस्मिन्यावत्सं-
भवेत्तावत्समचतुरश्रं[3] कृत्वा तस्य करण्या द्वादशेनेष्टकाः कार-
येत्तस्माः षट् प्रधावुपधाय शेषमष्टधा विभजेदपरं[4] प्रस्तारं
तथोपदध्याद्यथा प्रध्यनीकेषु सक्तयो भवन्त्यथापरः[5] । पुर-
षार्धात्पञ्चदशेनेष्टकाः समचतुरश्राः कारयेत्तासामर्धास्तासां द्वे ११
शते पञ्चविंशतिश्च सारत्निप्रादेशः सप्तविधः संपद्यते ।
तास्वन्याश्चतुःषष्टिमावपेत्ताभिः समचतुरश्रं करोति । तस्य

---

१ See XVII. 28 : 307. 9.

२ Not in the text as given by T.

३ तावत् not in the text of T.

४ After विभजेत् U ins. (probably taken from the bhāṣya):
यस्मिन्प्रस्तारे चतुरश्रचक्रीरवान्तरदेशात्प्रतिसंपादयेद्० ।

५ After भवन्ति U ins. इति ।

Digitized by Google

षोडशेष्टका[1] पार्श्वमानी भवति । त्रयस्त्रिंशदतिरिच्यन्ते । ताभिरन्त्याश्चतस्रः परिचिनुयात्ताभिः षोडश मध्यमाश्चतुःषष्टिरराश्चतुःषष्टिर्वेदिर्नेमिः शेषा । नाभिमन्ततः परिलिखेन्नेमिमन्ततश्चान्तरतश्च[2] परिलिख्य नेमिनाभ्योरन्तरालं द्वात्रिंशद्धा विभज्य विपर्यासं भागानुद्धरेदेवमवाप उद्धृतो भवति । नेमिं चतुःषष्टिं कृत्वा व्यवलिख्य मध्ये परिकृषेत्ता अष्टाविंशतिशतं[3] भवन्त्यराꣳश्चतुर्धा चतुर्धा[4] नाभिमष्टधा विभजेदेष प्रथमः प्रस्तारो । ऽपरस्मिन्प्रस्तारे नाभिमन्ततश्चतुर्थवेलायां परिकृषेन्नेमिमन्तरतो । नेमिमन्तरतश्चतुःषष्टिं[5] कृत्वा व्यवलिखेदराणां पञ्चधा विभाग आ परिकर्षणयोर्नेम्यामन्तरालेषु द्वे द्वे नाभ्यामन्तरालेष्वेकैकां । यच्छेषं नाभेस्तदष्टधा विभजेत्स एष षोडशकरणः सारो रथचक्रचित्[6] । ॥ १६ ॥ पञ्चमः ॥

द्रोणचितं चिन्वीतेति विज्ञायते[7] । द्वयानि तु[8] खलु द्रोणानि भवन्ति[9] चतुरश्राणि च[10] परिमण्डलानि चावि-

---

१ ॰ष्टकाः my copies.

२ ॰मिमंततः पर्यस्य तस्य परिलिखेन्नेमि॰ M, B om. परिलिख्य, U has तत्र after परिलिख्य; cp. XVII. 29 : 307. 16.

३ Thus T and U; अष्टाविंशच्छतं B, अष्टाचत्वारिंशच्छतं M.

४ Thus U M; विभजेत् instead of the second चतुर्धा B T.

५ नेम्यंतरत॰ U, नेम्यंत॰ M, नेमिमंतत॰ B.

६ ॰चक्रः B M.

७ See XVII. 29 : 308. 3.

८ Only in U B.

९ Only in U.

१० om. B .

Digitized by Google

शेषान्ते मन्यामहे ' ऽन्यतरस्याङ्गतिरित्यथाग्निं विमिमीते ' चतुरश्र आत्मा भवति ' तस्य त्रयः पुरुषास्त्रिभागोनाः पार्श्वमानी ' पश्चात्त्सरुर्भवति ' तस्यार्धपुरुषो द्व्याङ्गुलानि च[1] प्राची ' त्रिभागोनः पुरुष उदीचीत्येवं[2] सारत्निप्रादेशः सप्तविधः संपद्यते ' ऽथेष्टकानां विकाराः ' पुरुषस्य षष्ठ्यस्ता एवैकतो ऽध्यर्धास्तासामर्ध्यास्तिर्यग्भेदाः पुरुषस्य चतुर्थ्य इति ' तासां स्रक्त्योरन्तरालयोः षट् षष्ठीरुपधाय शेषमग्निं द्व्यतीभिः प्रच्छादयेदर्धेष्टकाभिः संख्यां पूरयेदपरस्मिन्प्रस्तारे दक्षिणे ऽंसे ऽध्यर्धामुदीचीमुपदध्यात्तथोत्तरे ' पूर्वस्मिन्नन्तीके षड्भागीया उपदध्याद्दक्षिणोत्तरयोश्चतुर्भागीयास्तयोः पुरस्तात्पार्श्वयोर्द्वे चतुर्भागीये उपदध्यात्तयोरवस्तादभितो द्वे द्वे अध्यर्धे विषूची ' तयोरवस्तान्मध्यदेशे[3] द्वे[4] षष्ठ्यौ प्राच्यौ ' शेषमग्निं द्व्यतीभिः प्राचीभिः[5] प्रच्छादयेदर्धेष्टकाभिः संख्यां पूरयेत् ' ॥ १७ ॥[6]

अथापरः ' पुरुषस्य षोडशीभिर्विंशशतं[7] सारत्निप्रादेशः सप्तविधः संपद्यते ' तासामेकामपोद्धृत्य शेषाः परिमण्डलं करोति ' तत्पूर्वेण रथचक्रचिता व्याख्यातं ' षोडशीं पुरस्ता-

१ Only in U.
२ इति om. U.
३ मध्येदेशे B.
४ om. B.
५ om. U.
६ End of sixth adhyāya ?
७ °विंशंशतं B. विंशतिशतं M.

द्विशय उपधाय तथा सह मण्डलं[१] परिलिखेदवस्तादपच्छिन्नं तत्पुरस्तादुपदध्यात् । प्रधीनाꣳ सप्तधा विभागः । प्रधिमध्यमाः प्रक्रमव्यासा भवन्ति । चतुरश्राणामर्धाभिः संख्यां पूरयेत् । परस्मिन्प्रस्तारे प्रधिमध्यमामोष्ठ उपधाय यदवस्तात्तद्द्वेधा विभजेत् । एष नवकरणो द्रोणचित्परिमण्डलः । समूह्यपरिचाय्यौ[२] पूर्वेण रथचक्रचिता व्याख्यातौ । समूह्यस्य दिक्षु चात्वालान्खानयित्वा तेभ्यः पुरीषꣳ समूह्योपदध्यात् । परिचाय्य इष्टकानां देशभेदस्तꣳ सर्वाभिः प्रदक्षिणं परिचिनुयात् ।
॥ १८ ॥ सप्तमः ॥

श्मशानचितं चिन्वीतेति विज्ञायते[३] । सर्वमग्निं चतुरश्रान्यष्टदश भागान्कृत्वा तेषामाख्यातमुपधानं । त्रिभिर्भागैर्भागार्धव्यासं[४] दीर्घचतुरश्रं विहृत्य पूर्वस्याः करण्या मध्याच्छ्रोणी[५] प्रत्यालिख्यान्तावुद्धरेत् । तस्य दशधा विभागस्तानि विꣳशतिः सर्वोऽग्निः संपद्यते । ऽपरस्मिन्प्रस्तारे प्रउगमध्ये[६]ऽनूचीनं विभजेत् । तस्य षड्धा विभागस्ते द्वे पार्श्वयोरुपदध्याद्भागतृतीयायामाश्चतुर्थव्यासाः कारयेत् । तासामर्धास्तिर्यग्भेदास्ता अन्तयोरुपधाय

---

१ परिसंवत्तं M.

२ See XVII. 29 : 309. 6, 8.

३ See XVII. 30 : 309. 1.

४ भागार्धं om. B.

५ Thus my copies (cp. the bhāṣya) ; चर्धाच्छ्रोणी Thibaut.

६ प्रधिमध्ये B.

Digitized by Google

शेषमग्निं बृहतीभिः प्राचीभिः प्रच्छादयेदर्धेष्टकाभिः संख्यां पूरयेदूर्ध्वप्रमाणमग्नेः पञ्चमेन वर्धयेत्तत्सर्वं त्रेधा विभज्य द्वयोर्भागयोश्चतुर्थेन वा नवमेन[1] वा चतुर्दशेन वेष्टकाः कारयेत्ताभिस्तिस्रो वा नव वा चतुर्दश[2] वा[2] चितीरुपधाय[2] शेषमवाच्यमक्ष्णयापच्छिन्द्यादर्धमुद्धरेत्तस्य नित्यो विभागो । यथायोगमिष्टकानाꣳ ह्रासवृद्धी । ॥ १९ ॥ अष्टमः ॥

कूर्मचितं चिन्वीत यः कामयेत ब्रह्मलोकमभिजयेयमिति विज्ञायते[3] । द्वयाः खलु कूर्मा भवन्ति वक्राङ्गाश्च परिमण्डलाश्चाविशेषात्ते[4] मन्यामहे । ऽन्यतरस्याकृतिरित्यथाग्निं विमिमीते । चतुरश्र आत्मा भवति । तस्य दश प्रक्रमाः पार्श्वमानी भवति । तस्य द्वाभ्यांद्वाभ्यां प्रक्रमाभ्याꣳ स्रक्तीनामपच्छेदः । पूर्वस्मिन्ननीके प्रक्रमप्रमाणानि चत्वारि चतुरश्राणि कृत्वा तेषां ये अन्त्ये ते अक्ष्णयापच्छिन्द्यादेवं दक्षिणत एवं पश्चादेवमुत्तरतः । स आत्मा । शिरः पञ्चपदायाममर्धपुरुषव्यासं । तस्याꣳसौ प्रक्रमेणप्रक्रमेणापच्छिन्द्यात्स्रक्त्यपच्छेदे[5] पादानुन्नयेत्तस्य द्विपदाक्ष्णया तिरश्ची तद्विगुणायाममनूची । तस्य द्विपदाक्ष्णया पूर्वमꣳसमपच्छिन्द्यादेतेनेतरेषां पादाना-

---

१ पंचमेन M.

२ वधीरुपधाय M.

३ See XVII. 30 : 309. 6.

४ परिमंडलांगा॰ U.

५ प्रक्रमेण once M.

Digitized by Google

मपच्छेदा व्याख्याता । अपरयोः पादयोरपरावꣳसावपच्छिन्द्यादेवꣳ[1] सारत्निप्रादेशः सप्तविधः संपद्यते । तस्येष्टकाः कारयेत्पुरुषस्य चतुर्थ्यस्तासामर्ध्याः[2] पाद्यास्त्वध्यर्धपाद्यास्तुर्भिः[3] परिगृह्णीयात्प्रक्रमेण द्वाभ्यां पदाभ्यां पदसविशेषेणेति । ते द्वे[4] यथा दीर्घसꣳश्लिष्टे स्यातां तथैकां कारयेद्विपदाध्यर्धेन समचतुरश्रामेकामुपधाने शिरसो ऽग्रे चतुरश्रामुपदध्याद्धꣳसमुख्याववस्तात्पञ्चपद्य चतुरश्रा द्वे द्वे पादेष्टके इति पादेषूपदध्याद्यद्यदपच्छिन्नं तस्मिन्नर्धेष्टका[4] उपदध्याच्छेषमग्निं[5] चतुर्भागीयाभिः प्रच्छादयेदर्धेष्टकाभिः संख्यां पूरयेदपरस्मिन्प्रस्तारे शिरसो ऽग्रे हꣳसमुखीमुपदध्यात्पादेष्टके अभितस्तयोरवस्तादभितो द्वे द्वे अध्यर्धपाद्ये[6] विषूची । तयोरवस्तादभितश्छेदसꣳहिते द्वे पादेष्टके । द्वे द्वे द्विपदे तिस्रस्तिस्रो ऽर्धेष्टका इति पादेषूपदध्याद्यद्यदपच्छिन्नं तस्मिन्नर्धेष्टकाः पदेष्टकाश्चोपदध्याच्छेषमग्निं चतुर्भागीयाभिः प्रच्छादयेदर्धेष्टकाभिः संख्यां पूरयेत् ।

॥ २० ॥ नवमः ॥

---

१ ॰रपराꣳसावप॰ M.

२ चतुर्थीस्ता॰ B, but cp, XXX. 10 : 403. 9.

३ ॰ध्यर्धापाद्यां चतुर्भिः Thibaut, but cp. XXX : 10 : 403. 10.

४ om. T, but cp. l.c.

